THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

॥श्रीकृष्णायनमः॥
॥श्रीमदणुभाष्यपुस्तकं राम॥
॥कृष्णरामेणः ॥॥

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

श्री

॥श्रीगोपीजनवल्लभाय नमः॥ ॥अथातो ब्रह्मजिज्ञासा॥ इदमत्र विचार्यते। वेदांतानां विचार आरंभणीयो न वेति किं तावत्प्राप्तं नारंभणीय इति। कुतः सांगो ध्येयस्तथा ज्ञेयो वेदः त्रा
ह्मश्च बोधकाः। निःसंदिग्धं तद् यथा लोकवाक्यस्ते स्फुटाः। अथ ज्ञानार्थं विचार आरंभणीयः तस्य च ब्रह्मस्वरूपत्वात् नेऽछरूपार्थो भवतीति मंतव्यं। विचारं विनापि वेदादेव सांगा
दर्थप्रतीतेः। न चार्थज्ञानमविदितं अविचारितास्त्व ज्ञानार्थं प्रत्याययंतीति वाच्यं। ज्ञेयश्चेति विधानात्। गीती शीघ्री शिरःकंपी तथा लिखितपाठकः। अनर्थज्ञोल्पकंठश्च षडेते पाठकाधमा
इति बाधोपलब्धिश्च। ब्रह्मसूत्रादिवन्न संदिग्धार्थप्रतिपादकः। तदर्थश्च व्याकरणादिना निश्चीयते। यथा लौकिकवाक्ये तथा वेदेपि। न च न हि रूढं निर्णेतव्यं अपौणिकत्वप्रसंगात्। मा
तस्माद्वेदार्थज्ञानार्थं विचारो नारंभणीयः। स्यादेतत् न वेदार्थज्ञानमात्राय विचारः। किंतु ब्रह्मज्ञानाय तस्य चात्मरूपत्वात्तस्य चाविद्यावच्छिन्नत्वात् देहात्मभावदृढप्रतीतेस्तदतिरिक्तस्य।
पशितभा गा ६ ब्रह्मणोऽभावात् वेदमात्रात् संभावनानिवर्तकं ज्ञानमुत्पद्यते प्रत्यक्षतदेहात्मभावदृढप्रतीतेः श्रुतेरुपचरितार्थत्वं स्तुतित्वं वा कल्पयिष्यतीति। मैवं। अन्यो किं कोऽपि वेदार्थो न युक्त्या प्रतिपद्यते। त
प्रमा वेदयुक्त्या उप्रमादात् परमात्मनः। न हि स्वबुद्ध्या वेदार्थं परिकल्प्य तदर्थविचारः कर्तुं शक्यः ब्रह्म उनर्यदित्थं वेदांतेष्ववगतं तादृशमेव मंतव्यं। अणुमात्रान्यथाकल्पनेपि दोषः स्यात्
योऽन्यथा संतमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चोरेणात्मापहारिणा। नैषा तर्केण मतिरापनेयेति श्रुतेश्च। न च विरुद्धवाक्यानां श्रवणात्तन्निर्द्धारार्थं विचारः। उभयोरपि प्रामाणि
कत्वेनैकतरनिर्द्धारस्याशक्यत्वात्। अचिंत्यानंतशक्तिमति सर्वभवनसमर्थे ब्रह्मणि विरोधाभावाच्च। अत एवोपनिषत्सु तत्तदुपाख्याने बोधाभावे औपाधिकबोधे च तपस एवोपदेशः। न च पा॰२
तपःशब्देन विचारः तस्य सर्वनाधिक्यात्तप एव। न चोपाख्यानानां मिथ्यात्वं तथा सति सर्वत्रैव मिथ्यात्वं न वेत् विशेषानौत्लक्षप्रामाणिकोक्ते विधौ वा उपाख्याने वा ब्रह्मस्वरूपे वा कस्यचिद् १

त्वं १ वा १ प्र वेदा

१ ज्ञार
अ

पि विश्वासो यथा लोके। तस्माद्वेदेऽर्थमात्रस्याप्यसत्यार्थस्याभावात्। वैदिकानां न संदेहोऽपि। किंतु न विरुद्धार्थकल्पना। विद्यासु च तदश्रुतेः। यदि वेदार्थज्ञाने विचारस्योपयोगः स्यात् अंगत्वेन याकरणस्येव विद्यासु श्रवणं स्यात्। स्वातंत्र्ये च गुणादेरिव मीमांसाया अपि प्रकारभेदेन प्रतिपादकत्वं स्यात्। तं त्वौपनिषदं पुरुषं पृच्छामीति तु तेषां निषेधः। अन्यथा ज्ञानं नोपनिषदुक्तं फलं समर्पयति। तस्मान्नारंभणीय एव ब्रह्मविचारः। अनेन धर्मविचारोऽप्याक्षिप्त एव। न चैतन्निराकर्तुः सोऽयमतिभार इति पूर्वपक्षः। सिद्धांतस्तु संदेहवारकत्वात् स्वबुद्धिदोषात्तदुद्भवः। विरुद्धशास्त्रसंनेदादंगेभ्यश्चाक्वनिश्चयः। तस्मात्सूत्रानुसारेण कर्तव्यः सर्वनिर्णयः। अन्यथा श्रूयते स्वाध्यायन्मिधमश्च तथादिमः। परंपरया प्राप्तवदर्थस्यापि गुरुमुखाद्देवश्रवणेऽपि मंदमध्यमयोः संदेहो भवेत्। समानधर्मदर्शनात् परादिपाववत्। तत्र यथा लक्षणानामुपयोग एवमेव मीमांसायामपि तदुक्तं। असंदिग्धेऽपि वेदार्थे स्खलनावनवन्मनः। मीमांसानिर्णयैः धाता दुर्बुद्धेस्तु ततो दृढमिति। तथा च निर्णयेनैकेन चिद्वक्रबोद्धरिः स्वयं व्यासो विचारं चिकीर्षुस्तत्कर्तव्यतां बोधयति ब्रह्मजिज्ञासा कर्तव्येति। व्यासोक्तत्वादपि कर्तव्यता। कर्तव्यपदाध्याहारे स्यातं अंतं न भवति। अथशब्दोऽथयोगानुशासनमितिवत्। स्वतंत्रतास्यात्। तथा च ज्ञानानुपयोगः। तथा हि तं त्वौपनिषदं पुरुषं पृच्छामीति केवलौपनिषदत्वं ब्रह्मणः शास्त्रांतरवेद्यं तद्यदि मीमांसासनं वा स्यात् तत्कं नितज्ज्ञानं न ब्रह्मज्ञानं भवेत्। अथ वा अध्याहारकरणापेक्षया अथशब्द एवाधिकारे व्याख्येयः। वेदाध्ययनानंतरं यदिदं सिद्धमेव न ह्यधीत एव विचारमर्हतीति तच्चैतत्स्यात् स्वतंत्रतेति तत्र प्रतिविधास्यामः। वेदार्थब्रह्मणो वेदानुकूलविचार इति। किमत्र युक्तं व्याख्यानमिति व्याख्यानतो विशेषप्रतिपत्तेः। यथा कर्मणि दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामः। अथातो दर्शपूर्णमासौ व्याख्यास्याम इति। अथ वै तर्हि इमानि सिध्यंति प्रयोजनानि। अधिकाकांक्षणं न भवेत्। अध्याहारश्च। पुरुषार्थश्च सिध्येत्। उक्तदोषश्च न भवेदिति। कथं। अथशब्दो यश्च दृष्ट्यैव त्वतिमंगलं।

ख्या

न ३

अधिकारेआनंतर्येअर्थांतरोपक्रमेच।तच्छ्रुतिमात्रेणैवमंगलसिद्धेरर्थांतरस्यपूर्वोक्तस्याभावान्नात्रतत्कल्पनं अथवा।शिष्यतआनंतर्येवाधिकारेवेति आनंतर्येह्यध्ययनंस्यस्व
तः।सिद्धत्वादधिकाकांक्षाभवति।तथासतितदभावान्नविचारःसिध्येत्।तथाहि।नतावद्धर्मविचारानंतर्यंविपर्ययसंभवात्।नचपाठतोनियमः तत्रापितथा।नचाचाराद्यवस्था।तत्राप्य
य नियमसंभवात्।प्रत्यवायाश्रवणात्।संभवेपिनवक्रमस्त्वमध्ययनवत्।तथाचततोप्याकांक्षाभवेत्।नचवैराग्यशमदमादिपूर्वसिद्धेः तेषामेवाभावात्।नचयथैवसंभवस्तदैवतत्कर्तव्य
मितिवाच्यंतदसंभवापत्तेः।तथाहि।ब्रह्मणःपरमपुरुषार्थत्वेज्ञातेतज्ज्ञानस्यैवसाधनत्वेअवगतेतच्छेषत्वेचयागादीनामवगतेनतदर्थकर्मकरणेचित्तशुद्धोत्पत्त्यांवैराग्यादि।इदंचवेदा
तविचारव्यतिरेकेणनभवतीत्यन्योन्याश्रयः।निर्द्धारितेपिवेदांतेविचारोव्यर्थएव नचसाक्षात्कारस्तत्फलंतस्यशब्दशेषत्वेननकल्पनायांप्रमाणाभावात्।दशमस्त्वमसीत्यादौप्रत्यक्षमा
मग्राबलवत्त्वोद्देहादेःप्रत्यक्षत्वात्स्वदेहमपिपश्यन्दशमोहमितिमन्यतेनतथाब्रह्म नैमननिदिध्यासनविधीनामानर्थक्यप्रसंगात्।नचाधिकारिभेदःकल्पनीयः।शाब्दज्ञानेनक
ल्पनायांप्रमाणाभावात्।अत्यंतासत्यप्यर्थेशाब्दस्यज्ञानजननात्।प्रमाणसंकरापत्तेश्च।मनसातज्जननेपितथा।तस्मादमुंशाब्दमेवज्ञानमितिमंतव्यमनुभवसिद्धत्वात्।इदानींतना
नामपिशमादिरहितानांनिर्विचिकित्सवेदार्थज्ञानोपलब्धेःसन्यासानुपपत्तिश्च।किंच।अध्याहारश्चकर्तव्यःसचकर्तव्यादिपदानांयदितस्वार्थंव्यर्थमेववाक्यंस्यात्।परार्थत्वेत्वश
क्यं।नहितैर्विचारःकर्तुंशक्यते।स्वकृतिवैयर्थ्यंचअसंगतिश्चाप्यसूत्रस्यनभवेत्।किंच।अधिकारपक्षेपुरुषार्थःसिध्यतिनानंतर्यपक्षे।उक्तन्यायात्।।किंच।तादृशस्याधिकारिणःश्र श्रा॰
वणमात्रेणकृतार्थस्यसमाधिनिरतस्यप्रवृत्तेरसंभवाच्छास्त्रोच्छेदः।शास्त्रविरोधश्च।साधनानामप्येतत्स्वयमेववक्तव्यत्वात्।अतोनेकदोषदुष्टत्वाद।धिकारार्थएवमत्रेयातः।नचज्ञातुमिच्छा। २

च१

वृ १

ज्ञिज्ञासमानाधिकर्तुंशक्येतिवाच्यं।जिज्ञासापदस्यविचारार्थत्वात्।अतएवजिज्ञासितुमिच्छेदितितुराविदांवचनानि।जिज्ञासापदेनचैतज्ज्ञापयति।ब्रह्मज्ञानंपुरुषार्थसाधनत्वादिष्टंत
दिच्छस्वरूपणायविचारआरभ्यतइति।यस्मात्कर्मादिभ्योज्ञानमेवपुरुषार्थसाधनंअतस्तज्ज्ञानायविचारोधिक्रियतइति।अतःशास्त्रार्थः।अधिकारीतुत्रैवर्णिकएव।नहिवेदविचारस्यवे
दाधिकारातिरिक्तःशक्यतेकल्पयितुं।नहिमंदमतेर्वेदोनायातीतित्रैवर्णिकेमतिमत्वमधिकारिविशेषणंकल्पते।अंधपंग्वादीनामिवकर्मणिगृहाद्याश्रमकस्यमननाद्यसंभवात्साक्षात्का
रोनत्रविषय।तेनचधर्मन्यायेनगतार्थत्वमस्य।अप्रतिज्ञादनुपलब्धेश्च।नच जगत्कारणंपरमात्मावाप्रकृतिर्वापरमाणवोवेतिसंदेहेकिंचिदधिकरणमस्ति॥स्यादेतत्।अथातोधर्मजिज्ञासेति चि
धर्मविचारंप्रतिज्ञायनोदकवाक्यार्थस्यधर्मत्वमुक्त्वाप्रामाण्यपुरःसरंसर्वसंदेहानिवारिताः।नचब्रह्मज्ञानस्यापिधर्मत्वं।आत्मेत्येवोपासीत।आत्मानंलोकमुपासीत।नतब्रह्मेत्युपासीत।आत्मा
वारेद्रष्टव्यइत्यादिनोदनावाक्यार्थत्वात्।अयंहिपरमोधर्मोयद्योगेनात्मदर्शनमितिस्मृतेश्च।सद्यादिवाक्यानांत्वर्थवादत्वं।आरोपापवादविषयधर्मप्रतिपादकत्वेनविधेयोपासनाविष
यस्तावकत्वात्।नचज्ञानादीनामविधेयत्वंप्रमाणवस्तुपरतंत्रत्वेनाकृतिसाध्यत्वादितिवाच्यं।नहिसर्वात्मनाचमाधर्यप्रकारनेदस्यप्रयोजकः।सर्वस्यापिकारणेपुरुषव्यापृतिः।तदत्र
वृत्तिसंपादनेप्रमाणसंपादनेवापुरुषकृतिसाध्यत्वं।अन्यथासिद्धांतेपिमननादिशास्त्रवैफल्यापत्तेः।साधनप्रतिपादकश्रुतिविरोधश्च।येनापिसर्वक्रियाफलत्वंनिराकार्यं।तेनापिपु
रुषमन्त्यादिनायतितव्यमेवज्ञानार्थे।तस्माद्यत्रापिविध्यश्रवणंतत्रापिविधिंपरिकल्प्यतत्स्थानांतच्छेषत्वंकल्प्यमितिनार्थेनयामीमांसया।अन्यथाविरोधोपिस्यादेतत्।ब्रह्मविचारएवारं
भणीयोनधर्मविचारः।सर्ववेदव्यासकर्तृविद्व्यासेनाकृतत्वात्तुच्छफलत्वाच्चकल्प्योक्तप्रकारेण।निःसंदिग्धंकरणमंजवाच्च।आचारपरंपरयापिकरणमंजवाच्च।एतस्यापिसंदेहेसत्वना

भिवा

ष्यापाद्भिकानामेवानुष्ठानैः क्रियते न मीमांसकस्य।तस्मात्साङ्गवेदाध्येतुर्निःसंदेहकरणसंभवान्न पूर्वस्यापेक्षत्वं।किंच।परमकृपालुर्वेदः संसारिणः संसारान्मोचयितुं कर्माणि चित्तशु
द्ध्यर्थं बोधितवानिति।कूपेंधपातनवदप्रामा।एकत्वभियाञ्चवसीयते।विपरीतबोधिका पूर्वमीमांसा।तस्मादपि न कर्तव्येति मैवं।किं विचारमात्रं न कर्तव्यं पूर्वकांडविचारो वा।ना
द्यः तत्पत्वात्समर्थितत्वाच्च।द्वितीये सामान्यन्यायेन संदेहनिवार्यलक्षणवत्तदुपयोगः।अनिष्टतया निरूपणं न मीमांसादोषः।किंतु विचारकाणां स्वभावभेदात्।किंच।आवश्यकत्वाद
पि निवृत्तानामपि यागादिज्ञानस्यावश्यकत्वं चित्तशुद्ध्यर्थत्वात्।परमाश्रमभेदेन प्रकारभेदः कायिकादिभेदात्।तत्राद्यस्य वाचिको द्वितीयतृतीययोः कायिकश्चतुर्थस्य मानसिक
इत्याश्रमिणां।तस्मादेकेनैव चरितार्थत्वात्।किं द्वितीयेनेति शंका प्रत्युच्यते।उपासनाया धर्मत्वेपि न ब्रह्मणो धर्मत्वं।ज्ञानरूपत्वात्।धर्मस्य च क्रियारूपत्वात्।न चाधिकारिणां धर्मश्च
ब्रह्मण्युपयोगः कर्तुश्चाक्यः।उत्पत्तिप्रकारफलभेदानामभावात्।प्रकृते तु महात्म्यज्ञानार्थं तदुपयोगः।तस्य च ज्ञानोपयोगो यथा तथा वक्ष्यते।चतुर्थे तूपसनादर्शनादिपदानां मनो
व्यापारत्वमेव।विद्यायाश्चापि यथा ज्ञानोपयोगित्वं तथा वक्ष्यते।किंच।उपनिषद्ज्ञानस्यापि कर्मोपयोगित्वे यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति च
तएव ब्रह्मविदामेव जनकादीनां कर्माणि सर्वदैव सांनिध्यं च अन्यथा ज्ञामत्वमेव।न च ब्रह्मरूपात्मविज्ञाने देहाद्यध्यासाभावेन कर्तृत्वाभावात् कर्मानधिकार इति वाच्यं।निरध्यासैरेव देहा
दिभिः कर्मकरणसंभवात्।अतएव जीवन्मुक्तानां सर्वव्यापारः।तथा च स्मृतिः।नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्।पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन्।प्रलपन्विसृ
जन्गृह्णन्नुन्मिषन्निमिषन्नपि।इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन्।ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः।लिप्यते न स पापेन पद्मपत्रमिवांभसेति।अतो ब्रह्मविदामेव तत्तं कर्म

ब्र
व

पा० १
३

३= ब्रह्मविदाप्नोतीत्यनेन

अन्नफलं भवति। अतो धर्मविचारकारणमपि ब्रह्मजिज्ञास्यमेव। तस्मादगतार्थत्वानुपयोगौ। ननु फलत्वेप्यधिकारी फलं च विचारस्य ब्रह्मज्ञानं तस्य मननादिद्वारा अनुभवः। तस्य चानर्थनिवृत्तिपूर्वकपरमानंदावाप्तिः। तथा च विरक्तः अनर्थजिहासुः परप्रेप्सुः मुमुक्षुः अधिकारी कस्माद्भवति। शाब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि। श्रमस्तस्य फलं मन्ये ह्यधेनुमिव रक्षत इति भगवद्वचनात्। केवलस्य निंदाश्रवणादिति चेन्न। न फलकामनाया अनुपयोगात्। अन्येनैव तत्समर्पणात्॥ नित्यत्वादप्यर्थज्ञानस्य फलत्वेप्यधिकारी। निंदार्थवादस्तु मननादिविधिशेष इति मंतव्यं। ननु ब्रह्मणो विचारे प्रतिज्ञाते विरोधनिराकरणादीनामप्रतिज्ञातार्थत्वं चावक्तव्यत्वं निर्विचिकित्सज्ञानानुदयप्रसंगादिति चेन्न। ब्रह्मण इति न कर्मणि षष्ठी। किंतु शेषषष्ठी। तथा च ब्रह्मसंबंधितत्त्वज्ञानोपयोगि सर्वमेव प्रतिज्ञातं वेदितव्यं। न च गौणतापत्तिः जिज्ञास्यत्वं च स्यादिति वाच्यं। ब्रह्ममात्रे संदेहाभावात्। संदिग्धस्यैव हि जिज्ञास्यता गौणत्वं तु आहत एव तल्लर्थतः। वेदप्रामाण्यं उपपतिनं सिद्धत्वान्न विचार्यते। तस्माद्ब्रह्म जिज्ञासितव्यमिति सिद्धं। किंच। तत्र किंलक्षणं। किंप्रमाणकमिति जिज्ञासायामाह सूत्रकारः। जन्माद्यस्य यतः। शास्त्रयोनित्वादिति। ननु कथमत्र संदेहः। यावता सत्यं ज्ञानमनंतं ब्रह्मेत्याद्या श्रुतिरेव विरुद्धं चैतत्। स्वरूपलक्षणाकथने कार्यलक्षणस्य वक्तुमशक्यत्वात् विवादास्पदत्वाच्चान्न हि ब्रह्मणो जगत्कर्तृत्वं सर्वसंमतं। न च आगमोदितमिति वेदमात्रस्य ब्रह्मप्रमाणकत्वं वक्तुं शक्यते। किंच। व्यर्थश्चैवं विचारः। लक्षणप्रमाणाभ्यां हि वस्तुज्ञानं भवति। तच्च स्वरूपलक्षणेनैव भवति। तत्किमनेन। तस्मादयुक्तमुत्पन्नमिति उच्यते। संदेहवारकं शास्त्रं वेदप्रामाण्यवादिनां। क्रियाशक्तिज्ञानशक्ती संदिग्धे परस्थिते। न हि श्रुतिं व्याख्यातुं प्रवृत्तः सूत्रकारः किंतु संदेहं वारयितुं। तत्सत्यं ज्ञानमनंतं नित्यशुद्धमुक्तस्वभावमिति श्रुत्या कर्तृत्वादिप्रापंचिकधर्मराहित्यं प्रतीयते। यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति कर्तृत्वं च। तत्र

नेजिज्ञासा
करणं
ति.

२= अत्र ब्रह्मप्रमाणत्वं इति पाठः प्रतिभाति। इति गुरूत्तमचरणाः
अकोनपाठे तु ब्रह्मणि प्रमाणं येन यस्य वेति बहुव्रीहौ जगत्कर्तृत्वं मत्वा अन्यपदार्थः

एकत्वं ब्रह्म कल्पाश्रवणादिनिश्चयपक्षाः। सिद्धान्तस्कन्ध उत्पत्तिस्थितिनाशानां जगतः कर्तृत्वं ब्रह्मत्वे वेदेन बोधितं न हि तान्यथा न विरुद्धं हमां न दिश्य तिति विरोधो ऽस्ति कल्पोपि न विरुध्यते। सर्वभावसमर्थत्वादचिन्त्यैश्वर्यवत् ब्रह्मणा वेदेनैव तावक्रुगत्कर्तृत्वं ज्ञो धनेविदक्ष

ज्ञस्पोतिषुरा... नि च कर्तृत्वेविरोधोऽस्ति सत्यत्वादि धर्माधर्मवत्कर्तृत्वस्याप्युपपत्तेः। सर्वथा निर्धर्मकत्वे सामानाधिकरण्यविरोधः सत्यज्ञानादिपदानां धर्मभेदेनैव न उपपत्तेः। न च कर्तृत्वं संसारिधर्मो देहाद्यध्यासरूपत्वादिति वाच्यं। पापं चिके कर्तृत्वेन येवमलौकिकत्वेऽपि अतएवास्येत्याह।

...स्तु नौतिकदेव निर्यश्चनुपानेकलोकाद्भुतरचना ... युक्त ब्रह्मांडकोटिस्रष्टस्य मनसाप्याकल्पयितुं

५ तस्या संदेहः। किं ब्रह्मैव कर्त्री। किं तावत्यासंभ्रम कर्त्री। कथं। ब्रह्मविदाप्नोति परमिति प्रधानवाक्यं फलसंबंधात्। ऋचापि विवृतं। सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्। सो

ऽसिद्द ऽश्नुते सर्वान्सह ब्रह्मणा विपश्चितेति। फलार्थे च ब्रह्मज्ञानं फलं च फलवाक्योक्तधर्मज्ञानादेव नान्यथा। कर्तृत्वं च परं विवरणतयोक्तं। परं किमित्यपेक्षायां सर्वांतर आनंद इति कथं सर्वांतरमि

२ त्याकांक्षायां परिचयार्थं ततो भौतिकसृष्टिमुक्त्वा गौणानंतर्यं परं तं गौणोपासनाफलं च प्रधानदोषतयोक्तं तत्रान्यगतकर्तृत्वारोपानुमत्याकाशरचनस्यानायासेनोत्पत्तिस्थितिभंगकरणं

न लौकिकं। प्रतीतं च निषेध्यं नाप्रतीतं न श्रुतिप्रतीतं। सत्यत्वादयश्च लौकिकास्ततः सर्वनिषेधेन ज्ञानमेव भवेत्। न च सत्यत्वादिकं लोकेनाप्येव व्यवहारमात्रत्वात्। कारणगतमेव स

त्यत्वं प्रपंचे नामन इति वाच्यं। तर्हि कर्तृत्वं तथा कुतो नांगीक्रियते। स्मृतिश्च स्वीकृता भवति। कर्त्ता कारयिता हरिरिति॥ न चारोपन्यायेन वक्तुं शक्यं तथा सत्यस्य स्यात्। तत्र न प्रकृतेः। च

ये स्वयमेव निषिध्यमानत्वात्। नञो वा नामस्यातंत्र्यं न चान्येषामुभयनिषेधादेव। तस्माद्ब्रह्मगतमेव कर्तृत्वं। एवं मोक्षत्वमपि। न वा काचिच्छ्रुतिः। कर्तृत्वं निषेधति। विरोधभानात्। कल्प्यता

लौकिकपरा। फलवाक्येप्यश्रुतानां गुणोपसंहारः कर्तव्यः। तथा चायं सूत्रार्थः। जन्मादिर्येषामित्यवयवसमासात् तद्गुणसंविज्ञानो बहुव्रीहिः। अथवा जन्मप्रभृति सर्वे भावविकारा आदि

शब्देन गृह्यन्ते। तथा च जन्म च आदिश्चेत्येकवद्भावः। आदिशब्दश्च धर्मवाची। अथवा संबंधिनं लक्षयति तस्योभयसापेक्षत्वादुत्पन्ने विद्यमानत्वादस्यानेव भावविकारानुपलक्षयतीत्यादि

शब्देनान्येनाव विकाराः। अथवा जन्म नो नादित्वं। तदाधारस्य पूर्वमविद्यमानत्वात्। अन्ये त्वादिमंतस्तदाधारस्य पूर्वं विद्यमानत्वादतः। आदिशब्दः स्वाधारसद्धर्मवाचीति। द्धर्माणामुपल पा०२

क्षकः। अथवागमनप्रवेशयोर्भेदात् जन्मादिर्येषामिति ज्ञात्वापेक्षया एकवचनं जन्म उक्तत्वात्। सिद्धं। अथवा किमनया कुसृष्ट्या जन्म आद्यस्य आकाशस्य यत इति। तस्माद्वा एतस्मादा ध

४ केचित्तु स्थग्रूपनामप्रपंचकर्तृत्वं योगविभागेन प्रातिज्ञाय समन्वयादिसूत्रेष्वप्येतद्वर्णयंति ४

शास्त्रयोनिः

त्र१

त्मन आकाशः संभूत इत्येव विचार्यते। फलसंबंधित्वात्। तेनैकं सिद्धः शास्त्रार्थः प्रकारांतरेपि यतो वा इमानि भूतानीत्यत्र विस्फुलिंगवदग्नेर्वेति। त्रिः। अत्र उक्रमेणेति विशेषः एतेन सर्व एव प्रकाराः सूचिता वेदितव्याः। ब्रह्मविचारे ब्रह्मणोप्यधिकृतत्वात्। ब्रह्मेत्यायाति न त्वध्याहारः। शास्त्रयोनिः। शास्त्रोक्तकारणत्वादित्यर्थः। शास्तीति शास्त्रं वेदः। सामान्यग्रहणं पूर्वकांडे सर्वस्य विवाक्यानां संग्रहार्थं यथाप्येवकारणत्वं नान्यस्य तथोपरिष्टाद्वक्ष्यामः। मतांतरवज्जन्मादीनां। न विकारित्वं किंत्वाविर्भावतिरोभावावेव तथोत्तरत्र वक्ष्यते। तदन्येनैतत्वाधिकरणेनाम लीलाया अपि न दृष्टिरूपणं प्रपंचमध्यपातात्। अत्र त्रयसिद्ध्यर्थं चिदचित व्याप्नोतीत्यत्र शास्त्रयोनित्वं घा मंतदिति। नैतत्सूत्रकारसंमतमिति प्रतिभाति। तस्मात्सर्वज्ञत्वं सर्वशक्तित्वं च सिद्धं जगत्कर्तृत्वेन। ननु न सर्वो वेदो ब्रह्मणो जगत्कर्तृत्वमानं। तपो यज्ञादियुक्तप्रजापतिप्रभृतीनामेव जगत्कारणत्वस्य पूर्वकांडे तत्र उपाख्यानेष्वेव गम्यमानत्वात्। न चावांतरकारणत्वं। परस्याश्रवणात्। उत्तरकांडे तु द्वयप्रतिपादनाद्विरोधः संदेहश्च मीमांसायाः संदेहनिवारकत्वेप्येकांशस्याप्रामाण्यं स्यात्। उभयसमर्थने शास्त्रवैफल्यं वा। वेदप्रामाण्यादेव तत्सिद्धेः। बाधितार्थवचनं वेदे नास्तीत्यवोचाम। किंच वेदांताः किं वेदशेषा वेदा वा। नाद्यः। अनुपयोगात्। अनारभ्याधीतत्वेन। तदुपयोगित्वे पूर्वकांडविचारेणैव गतार्थत्वं। विद्याप्रवेशश्च। न द्वितीयः। यज्ञाप्रतिपादनात्। मंत्रब्राह्मणत्वाभावाच्च। तस्माद्वेदशेष एव वेदांता इति तेषां किं स्यादिति चेत्। मैवं। अस्मितावद्वेदत्वमध्ययनादिभ्यः स्मरणाच्च। प्रमाणं च सर्वोपि वेदः स्वार्थे। चैमेनयज्ञस्येत्। ब्रह्म भवतु। न चैतावता अवेदत्वमतिप्रसंगात्। शाक्यतेस्मिन्होत्रादीनामन्यतरतदंतर्भाव्य न तथा वक्तुं। तस्माद्ब्रह्मप्रतिपादयंतो वेदांता वेदत्वं न व्यभिचरंतीति। मंत्रब्राह्मणरूपत्वं चोत्पश्यामः। ऋगेव मंत्रः ब्रह्मप्रतिपादकं ब्राह्मणं तच्छेषाः स्तुत्यादिप्रतिपादकाः। यद्यपि न विधीयंते तथापि तादृशमेव ज्ञानं फलायेति युक्तमुत्पश्यामः। पूर्ववैल

इति द्वि०२ यमधिकरणमथ तृ०३यं
३=तदिति पाठोऽयेनित्रुरुषोत्तमचरणाः

लक्षणं उत्तमलक्षणाय। कांडद्वयस्यान्योन्योपकारित्वाय साधारण्यं च एवं यदेव विद्यया करोतीत्यादिना पूर्वशेषत्वं सर्वस्य तमेवं वेदानुवचनेन ब्राह्मणा विविदिषंतीत्यादिना सर्वस्योत्त
रशेषत्वं। कर्मब्रह्मणोः क्रियाज्ञानयोर्धर्मिपरत्वेनैक्यात् कर्तृवाक्येषु सर्वत्र न विरोधः। तस्माच्छास्त्रयोनित्वं सिद्धं। केचित्तु जन्मादिसूत्रं लक्षणत्वादनुमानमिति। अन्ये पुनः श्रुत्य
नुवादकमाहुः सर्वज्ञत्वाय श्रुत्यनुमायानुमानं च ब्रह्मणि प्रमाणमिति। न तु तं त्वौपनिषदं पुरुषं पृच्छामीति केवलो केवलोपनिषद्वेद्यत्वात् उपेक्ष्यं। चानधिगतार्थगंतृत्वात् प्रमाणस्य
। मनननिदिध्यासनयोः श्रवणांगत्वं। संदेहवारकत्वाच्छास्त्रस्यापि तदंगत्वमिति। नन्वेतत्स्यात् तच्च। किं समवायि निमित्तं कर्तृ वा। किमतो यद्येवं। एवमेतत्स्यात्। यद्येकमेव स्यात् त
दा क्रियाज्ञानशक्त्योर्निरतिशयत्वं मन्येत। मृदादिसाधारण्यं च स्यात् मतांतरवत्। कथमेवं संदेहः। यावता यतो वा इमानीत्यादिश्रुतेर्निःसंदेहश्रवणात्। एवं हि मः पंचमी श्रूयते यत
इति। पंचम्यास्तसिरिति आत्मनः स्वपि पंचमी निमित्तत्वेन संदेहः पंचम्या निमित्तत्व कथनात्। उपादानत्वे कर्तृत्वे च संदेहः तद्वाच[illegible]काश्रवणात् कल्पना यां प्रमाणाभावात्। स
। समवायित्वे पुनः सुतरां संदेहः। एवं प्राप्त आह। तत्तु समन्वयात्। तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। निमित्तत्वस्य श्रुतिसिद्धत्वान्मतांतरनिराकरणत्वेनाग्रे वक्ष्यते। तत् ब्रह्मैव सम
वायिकारणं। कुतः समन्वयात्। सम्यगनुवृत्तत्वात्। अस्ति भाति प्रियत्वेन सच्चिदानंदरूपेणान्वयात्। नामरूपयोः कार्यरूपत्वात् प्रकृतेरपि स्वमनेतदंशत्वात्। अज्ञानात् प
रिच्छेदात्। अप्रियत्वे। ज्ञानेन बाधदर्शनात्। नानात्वं चे। छेकमेव। जडजीवांतर्यामिष्वैकैः। कांडत्रयाकद्यात्। कथमेवमिति चेत्। न। सद्रूपे घटरूपक्रियास्विव तारतम्येन। चिन्नवित् जडे पा०२
पिभावत्वादिषु नैति तारतम्येन। विभविंऽ अंगीकर्तव्यः। भगवदिच्छाया नियामकत्वात्। न च साधारण्येन सर्वजगत्प्रति परमाण्वादीनामन्वयः संभवति। एकस्मिन्ननुस्यूते संभवति च ५

फकल्पनायाश्चान्याय्यत्वात् उपादानविशेषग्रहणेऽपि न ब्रह्मणो व्यभिचारः। अलीकप्रतीतेस्तिलादिप्रतीनामपि सम्यगन्वयाभावान्न काप्यव्यभिचारो। तस्माद् ब्रह्मण एव समवायित्वं।
एतत्सर्वं श्रुतिरेवाह। सच्चात्मानं स्वयमकुरुतेति। निमित्तत्वं तु स्पष्टमेव सर्ववादिसंमतं। केचिदत्र शास्त्रयोनित्वसूत्रं पूर्वपक्षनिराकरणाय तत्तु समन्वयादिति योजयंति। तत्सर्वपक्षसिद्धांत
योरप्यसंगतत्वादुपेक्ष्यं। न याहि। जैमिनिर्धर्मजिज्ञासामेव प्रतिज्ञाय तत्प्रतिपादकस्य पूर्वकांडस्य समन्वयमाह। अवांतरवाक्यानां प्रकारशेषत्वात्। न च सर्वस्मिन्वेदे धर्म एव जिज्ञास्य
यतस्तु गुरुणैव व्यासेन ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात्। संदेहमात्रवारकत्वाज्जिज्ञासयोः न तुल्यौ। किंकार्यसाधकत्वं तथासति वेदानामन्याधीनत्वेनाप्रामाण्यं स्यात्। वेदजिज्ञासेत्येवो
क्तं स्यात्। किंच। साधनं च फलं चैव सर्वस्मात् श्रुतिः स्फुटं। न प्रवर्त्तयितुं शक्ता तथा चेत्तरको न हि प्रवर्त्तकस्तु सर्वसर्वात्मा हरिरेव हि। यज्ञ एव हि सर्वत्र बोधते स्वर्गसिद्धये। सिद्ध एव हि सर्वत्र
वेदार्थो वेदवादिनां। मंत्राणां कर्मणां चैव दृष्टनिश्रवणाद्भुतो। इतिश्च सिद्धत्वं तं वेदः स्वार्थं च समन्ततः। प्रजापतिरकामयत प्रजायेयेति स एतदग्निहोत्रं मिथुनमपश्यत्। प्रजाद्यतियज्ञानस्व
जना। अग्निहोत्रेवाग्निष्टोमे च पौर्णमासी चोदयंवामास्यां चातिरात्रं चतानुदमिमीत यावदग्निहोत्रमासीत्तावानग्निष्टोमइत्या ख्यपाख्यानानां मिथ्यार्थत्वं बुद्धजन्मनः पुरोकुंकुकुंवा तथासति वेदा
मप्रामाण्यमेव स्यात्। मिथ्योपाख्यानप्रतिपादकलोकवत्। तस्मात्सर्वमीमांसानिष्ठाः क्रियापरत्वं सर्वस्यापि वेदस्य वदंतो मूर्खा एव। उक्तत्वादिनोपि सर्वज्ञानमंगीकृत्य पूर्वानुपयोगित्वं ब्रह्मज्ञान
वदंतो वेदानभिज्ञाः। यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवतीति उपनिषज्ज्ञानस्य श्रुतिसिद्धैवकारणता। न च बाधितत्वात्तस्यान्यतः इति वाच्यं। कर्मफलवत्। ब्रह्मफलस्यापि लौ
त्वात्। स एवं वेद प्रतितिष्ठति अन्नवानन्नादो भवति महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान्कीर्त्येति। अत एव विद्यावतो यज्ञानधिकारात्। त्रिषेधार्थज्ञानमुपपद्यते। न च वेदेशाध्या

३६. २ ×अभीत्सद्गानयत्नूर्वेसिष्ठादेर्यस्याधिकारात्। न चैवं हि मिनेनेनिवाच्यं। इ संभृत
त्वाद्यस्या। किंच ×२

पं१

कारणत्वं ॥ ब्रह्मालंब्रह्मस्य हविवर्तित्वादिस्मृतेः । तस्मादन्योन्योपयोगित्वेन कोपि दोषः । क्रियाज्ञानयोः स्यात्तंत्रेण पुरुषार्थमिष्यर्थं भिन्नतया शास्त्रप्रवृत्तिः ॥ किंच । वेदांतवाक्यानामस्मिन्न शास्त्रे
न्वय एव प्रतिपाद्यते । संदेहनिराकरणद्वारा । तत्कथं सिद्धवद्धेतुत्वेन निर्देशः । अग्निमवैयर्थ्यं च स्यात् । न च प्रतिज्ञागमिति हेतुत्वं । अनुपयोगात् । गौणमुख्यभावे परं विवादः । न च येन रूपेण
मन्वयो मतांतरस्यैर्विचारितः । तथाप्येतेषु निर्णयोस्ति ॥ शास्त्रारंभकः प्रथमसूत्र एव समर्थितः । तस्मात्समवायिकारणत्वमेवानेन सूत्रेण सिद्धं । ननु कारणत्वमेवास्तु ब्रह्मणः । किं सम
वायिकारणत्वेन विवर्तत्वं च स्यात् । अनर्थरूपत्वेन कार्यस्याप्युक्तता च । तस्मादनारंभणीयमेवैतत्सूत्रमिति चेत् । मैवं । सर्वोपि निषेधसमाधानार्थप्रवृत्तः सूत्रकारः । न ह्यदि ब्रह्मणः समवायित्वं
न ब्रूयात् तदानुपनिषज्ञागोप्यर्थः स्यात् । इदं सर्वं यदयमात्मा । आत्मैवेदं सर्वं । सर्वं भवति । ब्रह्म तं परादादित्यादिभिः तदात्मानं स्वयमकुरुत । एकमेवाद्वितीयं । वाचारंभणं विकार इत्यादि । एवमा
दीनि वाक्यानि स्वार्थे बाधितानि भवेयुः । न चैवं निःसंदिग्धत्वात् । कथं सूत्रप्रवृत्तिः । उच्यते । अस्थूलादिवाक्यान्यपि संति सर्वत्र प्रपंचतद्धर्मवैलक्षण्यप्रतिपादकानि । ततोन्योन्यविरोधे नैकस्यमु
ख्यार्थबाधो वक्तव्यः । तत्र स्वरूपापेक्षया कार्यस्य गौणत्वात् प्रपंचरूपप्रतिपादकानामेव कश्चित्कल्पयेत् ॥ तन्माभूदिति जन्मादिसूत्रवत् समन्वयसूत्रमपि सूचितवान् । तथा च अस्थूलादिगु
णासुक्त एव । अविक्रियमाण एव आत्मानं करोतीति वेदांतार्थः संगतो भवति । विरुद्धसर्वधर्माश्रयत्वं तु ब्रह्मणो भूषणं ॥ किंच । अन्यपदार्थस्य हि वैषम्यनैर्घृण्ये स्यातां । कर्माधीनत्वे त्वनीशिता
। ततः कर्तृत्वमपि न युज्येत । ततः सर्वमहात्म्यनाश एव स्यात् । न चैवमेवास्तु अपवादार्थत्वात् । रज्जुसर्पवद्युक्तार्थकथनेपि न दोषः । सर्वं समाप्नोषि ततोसि सर्व इति स्मृतेश्चेति चेत् मैवं । तथा स पा॰
तिपार्थ उक्तं स्यात् ॥ एतादृशशास्त्रांगीकर्तुरासुरेषु भगवता गणितत्वात् । असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं । अपरस्परसंभूतं किमन्यत्कामहैतुकमिति । शास्त्रानर्थक्यं च । सर्वं समाप्नोषी ६

निशस्त्राणिर यं

परांगतं स्यात्। वस्तुपरिछेदात्। न हि वेदो निःप्रपंचरूपकथनमुक्त्वा लोकं जगत्कर्तृत्वं निषेधति। तस्मादध्यारोपापवादपरत्वेन व्याख्यातव्या वेदांता। तिलापकृताऽइति मन्यामहे॰ सर्वथा र्थबाधात्। यथा निर्दोषस्वर्णगुणविग्रहता भवति तथोपरिष्टाद्वक्ष्यामः। ननु पुरुषार्थिलिंगं इदं च शास्त्रं मोक्षरूपपुरुषार्थसाधकं मोक्षश्चाविद्यानिवृत्तिरूप इत्युक्तं। अविद्या चा नं ज्ञानेनैव नश्यति। ततः ज्ञानोपयोगित्वेन व्याख्यातव्ये वेदांते ध्यारोपापवादव्यतिरेकेण व्याख्यानमयुक्तं। अतो यथाकथंचिद्व्याख्यानेपि पुरुषार्थसिद्धेर्न कोपि दोष इति चेत्। न। पुरुषार्थस्य शास्त्रार्थस्य वा स्वरूपं शास्त्रैकसमधिगम्यं न स्वबुद्धिपरिकल्पितं। अतः स्वबुद्ध्या शास्त्रार्थं परिकल्प्य तत्र वेदं योजयंतो महासाहसिकाः मद्भिरुपेक्ष्याः। पुरुषार्थः पुनर्यथा वेदांतेष्ववगतः॥ ब्रह्मवेद ब्रह्मैव भवति। ब्रह्मविदाप्नोति परं। न स पुनरावर्त्तते। ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं। अनावृत्तिः शब्दादनावृत्तिः शब्दादित्येवमादिभिः श्रुतिस्मृतिन्यायैः ब्रह्मभावेनैव पुरुषार्थत्वं ब्रह्म च पुनर्नैवस्यात्ममात्रं च ज्ञानवद्या। एकस्यैव ममांशस्य जीवस्यैव महामते। बंधोस्याविद्ययानादिर्विद्यया च तथेतरः इति भगवता जीवस्यैवाविद्यावत्वप्रतिपादनात्। न। स्यान्यायोपबृंहितसर्ववेदांतप्रतिपादितसर्वधर्मवद्ब्रह्म। तस्य श्रवणमनननिदिध्यासनैरंतरंगैः शमदमादिभिश्च बहिरंगैरतिशुद्धे चित्ते स्वयमेवाविर्भूतस्य स्वप्रकाशस्य सायुज्यं परमपुरुषार्थः। तस्मात्सर्वे वेदांताः स्वार्थ एव युक्तार्था इति न्यायैर्वक्तव्यत्वात् ब्रह्मणः समवायित्वाय समन्वयसूत्रं वक्तव्यं। एवं ब्रह्मजिज्ञासां प्रतिज्ञाय किं लक्षणकं ब्रह्मेत्याकांक्षायां जन्मादिसूत्रद्वयेन वेदप्रमाणकजगत्कर्त्तासमवायी चेत्युक्तं। एवं त्रिसूत्र्या जिज्ञास्यमानलक्षणविचारकर्त्तव्यता सिद्धा। तत्र ब्रह्मणश्चतुर्धा विचारः। स्वरूपसाधनफलप्रतिपादकानि सर्ववेदांतवाक्यानि त्रिविधानि। मतांतरनिराकरणं च। तत्र स्वरूपे विचारिते मतांतरनिरासव्यतिरेकेण साधनफलयोरनुपयोगात्। अतः प्रथमं स्वरूपनिर्णयः। तदनु मतांतरनिरासः। तदनु साधनानि फलं चेति।

संदिग्धानि

तत्र प्रथमेऽध्याये स्वरूपवाक्यानि विचार्यंते । तानि द्विविधानि निःसंदिग्धानि च । तत्र निःसंदिग्धानां निर्णयो न वक्तव्यः संदिग्धानि पुनस्त्रिविधानि । कार्यप्रतिपादकान्यंतर्यामिप्रतिपाद
कानि उपास्यरूपप्रतिपादकानि प्रकीर्णकानि चेति । तत्र प्रथमपादे कार्यवाक्यानां निर्णय उच्यते । सच्चिदानंदरूपेणाकाशवायुतेजोवाचकवाक्यानि षड्विधान्यपि निर्णीयंते । अन्य
त्रान्यवाचकान्यपि वेदांतेषु भगवद्वाचकानीति । तत्र लक्षणविचार एव सद्रूपाणां वाचकता निर्णीता । चिद्रूपस्य ज्ञानप्रधानस्य निर्णयार्थमीक्षत्यधिकरणमारभ्यते सप्तभिः सूत्रैः । सम
द्वारत्वात् ज्ञानस्य । तत्रैवं संदेहः ब्रह्मणः स्वप्रकाशत्वेन सर्वप्रमाणाविषयत्वाद्यतो वाचो निवर्तंत इति श्रुतेश्च विचारः कर्तुं न शक्यते । स्वप्रकाशविरोधात् श्रुतिविरोधाच्च । आहोस्विद्विरोधप
रिहारेण शक्यत इति । किं तावत्प्राप्तं न शक्यत इति । कुतः स्थापनार्थप्रमाणाभिसंनिकर्षादिमार्गतः सर्वथाविषये वाच्ये व्यवहार्ये कुतः प्रमाणे ऐहिकामुष्मिकव्यवहारयोग्ये हि पुरुषप्रवृत्ति
ः प्रवृत्त्यर्थं प्रमाणानि । ब्रह्म पुनः सर्वव्यवहारातीतमिति । न चैतद्विधिवेदादेवागम्यत इति चेत् । तर्हि बाधिताबाधितार्थप्रतिपादकत्वान्न वेदांता विचारयितव्या इति प्राप्ते उच्यते ॥ ॥ ईक्षतेर्नाशब्दं
। न विद्यते शब्दो यस्येत्यशब्दं सर्ववेदांताद्य प्रतिपाद्यं ब्रह्म न भवति कुतः ईक्षतेः । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत तथोत्तेम
त्रात्मा वा इदमेक एवाग्र आसीत् । नान्यत्किंचन मिषत् स ऐक्षत लोकान्नु सृजा इति । स इमांल्लोकानसृजतेति । स ईक्षांचक्रे । स प्राणमसृजतेति । एवमादिषु सृष्टिवाक्येषु ब्रह्मण ईक्षाश्र
यते । किमतो यद्येवमेवमेतत्स्यात् । सर्वव्यवहारप्रमाणातीतोऽपि ईक्षांचक्रे लोकसृष्टिद्वारा व्यवहार्योऽपि विष्यामीति । अतो यथा यथा तत्तत्वार्त् तथा तथा स्वयमेवोक्तवान् । सर्वरूपं [illegible] पा॰१
लरूपं च सृष्टत्वात् शास्त्रपुरुषार्थत्वाय । तत्र प्रमाणबलेनाविषयः स्वेच्छाविषयश्चेत्युक्तं । ननु सर्वप्रमाणाविषयत्वे दूषिते केवलवेदविषयत्वं कथं सिद्धांती क्रियते । उच्यते चक्षुरादीनां प्रामा ७

एवमन्यमुखनिरीक्षकत्वेननस्वतःप्रमानुत्पत्तिप्रसंगात्। सत्वसहितामेवचक्षुरादीनांप्रामाण्यात्। अतोनिरपेक्षाएवभगवन्निश्वासरूपवेदाएवप्रमाणं। संकेतग्रहस्तुवैदिकएववेद
विद्भिःकृतः आकृतिमात्रार्थलोकापेक्षा। अनधिगतार्थगंतृचप्रामाण्यंलोकानधिगतइत्यर्थः। यत्तुब्रह्मणोरलौकिकत्वंसिद्धमेवलौकिकोव्यवहारःसंनिपातरूपत्वात् पुरुषार्थसा
धकएवनतर्हिब्रह्मात्रस्यकथंग्रहणं। वेदव्याख्यातृत्वाविषयत्वादितिब्रूमः। एतेनमनसैवानुद्रष्टव्यमित्यपिसमर्थितं। तस्माच्छ्रद्धादिप्रतिपादकाअपिवेदांताःसाक्षाद्ब्रह्मप्रतिपादका
इतिसिद्धं। स्यादेतत्। कर्तृत्वमकर्तृत्वंचवेदेप्रतीयतेब्रह्मणः। यतोवाइमानिभूतानिजायंते। सआत्मानंस्वयमकुरुत। निष्कलंनिष्क्रियंशांतंनिरवद्यंनिरंजनं। असंगोह्ययंपुरुषः। इत्येवमा
दिवाक्येषु। तत्रद्वेधानिर्णयःसंभवति। सर्वभवनसमर्थत्वाद्विरुद्धसर्वधर्माश्रयत्वेन। अन्यतरबाधाद्वा। अलौकिकापेक्षयालौकिकस्यजघन्यत्वात्। कर्तृत्वादेर्लौकिकसिद्धत्वात्कर्तृत्वबा
धएवयुक्तः। ईश्वरत्वादिकंतुप्रकृतिगुणसंबंधादपिब्रह्मणोयुज्यते। तस्मादलौकिकसर्वभवनसमर्थत्वादिकल्पनापेक्षयालौकिकएवान्यतरबाधोयुक्तः। ततस्त्वमसत्यस्वरूपादन्यदेवै
तदितिस्वयमेवाशंक्यपरिहरतिसूत्रकारः। ।गौणश्चेन्नात्मशब्दात्। ईक्षत्यादियुक्तःपरमात्मागौणःप्रकृतिगुणसत्वसंबंधवानितिचेत्। न। तथात्वेवक्तुमशक्यतेकुतः आत्मशब्दा
त्। आत्मावाइदमेकएवाग्रआसीदित्युपक्रम्यसऐक्षतेत्युक्तं। आत्मशब्दःपुनःसर्वेष्ववेदांतेषुनिर्गुणपरब्रह्मवाचकत्वेनैवसिद्धः। तस्यैवजगत्कर्तृत्वंश्रुतिराह। ननुचोक्तमन्यतरबाधो
युक्तइति। नयुक्तःस्वातंत्र्याभावेनसगुणस्यकर्तृत्वायोगात्। वेदाश्चप्रमाणंश्रुताः। ततःसर्वभवनसामर्थ्यमेवश्रुतिबलेनलभ्यमंगीकर्तव्यं। किंच। अस्तिभातिप्रियत्वादिधर्मवत्। ब्रह्मगतक
र्तृत्वंलोकेप्रतीयते। कार्यत्वात्। तस्मादात्मशब्दप्रयोगात्गुणातीतमेवकर्तृ। ननुआत्मशब्दोपिलोकवगौणोस्तु। लोकेहिकेनचित्स्पष्टोविष्णुमित्रआह। यत्तदत्रोममात्मेतिअत्रगौण

२४ जगत्कर्त्तृगौणः स्यात् । तन्निष्ठस्य संसार एवस्मान्न मोक्षः ॥७॥
किंच ॥ हेयत्वावचनाच्च ॥८॥ इतोपिनिर्गुण एव ×२

त्वमुपचारइत्येवंप्राप्तेभिधीयते । तन्निष्ठस्यमोक्षोपदेशात् । एवंहिश्रूयते । असद्वा इदमग्रआसीत् । ततोवैसदजायत । तदात्मानं स्वयमकुरुतेत्युपक्रम्य । यदाह्येवैषएतस्मिन्नदृश्येनात्म्ये
निरुक्तेनिलयनेऽभयंप्रतिष्ठांविंदते । अथसोऽभयंगतोभवती । निष्प्रापंचिकधर्मरहितेब्रह्मणि एतस्मिन्सर्वेक्षिजगत्कर्त्तरिपरिनिष्ठितोमुक्तोभवतीत्यर्थः । तत्रयदिजगत्कर्त्ता । वेदांतेषुसर्वत्रसा
धनोपदेशोऽश्रुश्रुत्वादिवत्जगत्कर्त्तुर्हेयत्वेननोपदिश्यते । यदिसगुणःस्यात् । प्राकृतगुणपरिहारार्थंमुमुक्षुर्निर्जगत्कर्त्तानोपास्यःस्यात् । श्रुत्वादिवत् । अतईक्षत्यादयोनसगुणधर्माः ॥
सूत्रत्रयस्यईक्षतिहेतुसाधकत्वाच्चकारः । एवंसूत्रचतुष्टयेनईक्षतिहेतुनाजगत्कर्तृत्वोपपत्त्यासृष्टिवाक्यानांब्रह्मपरत्वमुपपादितं । अतःपरंस्वतंत्रहेतूनाह । स्वाप्ययात् । गतिसा
मान्यात् । श्रुतत्वाच्चेतिसूत्रत्रयेण । ननुकिमर्थंहेत्वंतराणि । साधकत्वेकेनापितत्सिद्धेः । असाधकत्वेज्ञातेनाप्यसिद्धेरितिचेत् । मैवं । स्वप्नेदार्थंहेत्वंतराणिनानाविधानभोजनतृ
प्तिवत् । तद्यथा । आत्मशब्दात्तन्निष्ठस्यमोक्षोपदेशात् । हेयत्वावचनाच्चेति । निर्गुणस्यस्वरूपपरतयाकार्यपरतयाचकार्यस्यपुनर्विधिनिषेधभेदाद्दीपतेति । एवमुत्तरत्रापिप्रपंचि ×२५
ष्यते । तत्रसृष्टिवाक्यानांईक्षतिहेतुनाभगवत्परत्वमुक्तं । इदानींप्रलयवाक्यानामाह । स्वाप्ययात् । ब्रह्मणोनसर्वव्यवहारातीतत्वं । कुतः । स्वाप्ययात् । तत्र । चित्तकरणत्वाज्जीवस्यस्वोच्य
ते । एवंहिश्रूयते । यत्रैतत्पुरुषःस्वपितिनामसतासोम्यतदासंपन्नोभवति । तस्मादेनंस्वपितीत्याचक्षतेस्वंह्यपीतोभवतीतिस्वपितीतिनक्रियापदं । किंतुजीवस्यनामतदैवस्वपिति
नामत्वं । यदा । दामसतासंपद्यते । सतिस्वशब्दवाच्येऽपीतिलयंप्राप्नोतीत्यर्थः । अतएवरज्जौविब्रह्मसंपद्यततोबलाद्यधिष्ठानंप्राप्यपुनर्नविश्वसमायाति । वासनाशेषात् । स्वश पा॰१
ब्देनचात्मेदः । अपतिःसमच्छह्वसामानाधिकरण्यान्निर्गुणत्वं । ननुप्रलयेवक्तव्येकथंसुषुप्तिः । मोक्षातिरिक्तदशायां । तथाकर्मसंबंधाभावादितिब्रूमः । मुक्तिवाक्यानामाह । ८

श्रि६

६

गतिसामान्यात् । गतौ सामान्यात् गतिर्मोक्षः समानस्य भावः सामान्यं मोक्षे सर्वस्य । पि[illegible]भगवतोक्तत्वात् । एवं हि श्रूयते । यथा सर्वासामपां समुद्रमेकायनमित्युपक्रम्य वागेकायनमित्यन्तं दृष्टान्तार्थं निरूप्य सयथा सैंधवखिल्य उदके प्रास्त इत्यादिना लयदृष्टांतं निरूप्य न प्रेत्य संज्ञास्तीति प्रतिपाद्यतन्निरूपणार्थं यत्र हि द्वैतमिव भवति तदितर इतरमित्यादिना सर्वस्य शुद्धब्रह्मत्वं प्रदर्शितं । आदिमध्यावसानेषु शुद्धब्रह्मण एवोपपादनात् सर्वेषां वेदांतानां ब्रह्मसमन्वय उचित इति । किंच । श्रुतत्वाच्च । पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इति श्रुत्यैवासंदिग्धं सर्वकार्यत्वं प्रतिपादितं । सर्वे वेदा यत्पदमामनंतीति च । चकारोऽधिकरणसंपूर्णत्वद्योतनाय । एवं विद्रूपस्य कारणतानिरूपणेन वेदांतानां ब्रह्मपरत्वं निरूपितं । अतः परमानंदरूपस्य कारणत्वोपपादनेन तद्वाक्यानां ब्रह्मपरत्वमुपपाद्यते । आनंदमयाद्यष्टभिः सूत्रैः । तत्र तैत्तिरीयशाखायां ब्रह्मन्नगुप्रपावकद्वयेन । तत्र आनंदमय इति मयट्प्रत्ययांतस्याब्रह्मत्वेनाजगत्कर्तृत्वे ब्रह्मप्रपावकस्याब्रह्मपरत्वं स्यादिति तन्निराकरणार्थमानंदमयाऽधिकरणं । षडिंद्रियस्वरूपद्वयानंदभेदेनानंदस्याष्टविधत्वात् अष्टसूत्राणि । ननु कथं संदेहः कथं वास्याब्रह्मत्वे प्रपावकासंगतिरिति । उच्यते । ब्रह्मविदः परप्राप्तिं प्रतिज्ञाय तज्ज्ञेयांशो कारणत्वायानंदांशमप्रवेशपर्यन्तत्वपरिहाराय सर्वज्ञानंदफलरूपमुपपाद्यतन्निरूपणार्थं सर्वोपि प्रपावक आरब्धः । न च साधनशेषब्रह्मणो वाक्यादेव निःसंदिग्धप्रतीतेः फलस्य ब्रह्मत्वं प्रतिपादनीयं । तथा ब्रह्मात्रमया । दिहुत्यवचनात् सुखवाचकत्वाद्वानामेव वचनाच्च संदेहः । आनंदांशस्यैव कारणत्वेन ब्रह्मत्वप्रतिपादनार्थत्वात्तदभावे प्रपावकवैयर्थ्यं च । फलस्य नैकधा प्रतिपादनायात्मपदप्रयोगेन फलरूपेण जगत्कारणानामुक्तातस्यैव मध्ये सर्वांतरत्वं प्रतिपादितं । तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानंदमय इति । अंते च एतमानंदमयमा

त्मानमुपसंक्रामतीति आदिमध्यरूपे अनद्यफलत्वेनोपपादितं। तत्रिरूपकस्यापि तत्तुल्यफलत्वं वक्तुमन्नमयादीनामपि ब्रह्मत्वेनोपासनमुक्तं। तत्र पूर्वपक्षे अन्नमयादेरिवानंदमयस्यापि
न ब्रह्मत्वं। अन्नमयादितुल्यवचनात्तथैव फलसिद्धेरिति। एवं प्राप्तेभिधीयते। आनंदमयोभ्यासात्। आनंदमयः परमात्मा नान्नमयादिवत्पदार्थांतरं। कुतः। अभ्यासात्। अभ्यस्यते पु
नःपुनः कीर्त्यत इत्यभ्यासः। तस्मात् अभ्यासस्य भेदकत्वं सर्वत्रैतत्सिद्धं। यथा पूर्वतंत्रे शब्दांतराभ्याससंख्यागुणप्रक्रियानामधेयानां षण्णां कर्मभेदकत्वं एवमेवानंदमयस्यापि स्वा
भ्यासात् पूर्ववैलक्षण्यं। अतो तुल्यत्वात् ब्रह्मत्वं। एवमभ्यासः श्रूयते। को ह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनंदो न स्यात्। एष ह्येवानंदयातीत्यर्थतोभ्यासः। सकृत्वाम
यडर्थश्च प्रकृतिकृतुल्यो ऽनुवचनेनाभ्यासेन प्रवाहाद्भेदमाधित्ते ब्रह्मत्वं नतु इत्यापत्तिः। उत्तरस्य साधकत्वात्। तस्मादानंदमयं ब्रह्मैव। अथ यदा स नैव रेमे तस्मादेकाकी न रमते स द्वि
तीयमैच्छत् सहैतावानासेत्यादिश्रुतिभिरेष उ एवेति श्रुतेश्च तानि साधनानि कारयित्वा तानि तानि फलानि ददद्भगवान् स्वक्रीडार्थमेव जगद्रूपेणाविर्भूय~~क्रीडार्थमेव जगद्रूपेणाविर्भूय~~
क्रीडतीति वैदिके निर्णीयते। एतदेव कांडद्वयेपि प्रतिपाद्यते। अन्यथा जीवस्य साधनफले निरूपयंत्याः श्रुतेर्जीवपरत्वमेव स्यान्न ब्रह्मपरत्वं। कर्मब्राह्मणोरपि जीवशेषत्वं नापेयादेवं
सति पूर्वकांडेऽवांतरफलान्युक्त्वैतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः। निरवद्यानंदात्मकमेव परमं फलमिति तद्विवेकमाण। पूर्वं सामान्यत आरम्य साधनं तैन्निर्णये॥
ब्रह्मविदाप्नोति परमिति। अक्षरब्रह्मवित्परं ब्रह्माप्नोतीत्यर्थः। अत्र परत्वाद्ब्रह्मस्य पूर्वपरत्वेन तदित्येव वदेत्। पूर्वं ब्रह्मोत्कार्येयत्परमित्याह तेन सांनिध्यात्तत एव परं पुरुषोत्तमस्वरूपमेवा पा०१
त्राभिप्रेतमिति ज्ञायते॥ किंच। प्रतिवादिना तदा ऽपि ज्ञानात्मिकैव वाच्या तथा सति ब्रह्मप्राप्तो ब्रह्मप्राप्नोतीत्यर्थः स्यात्। स चासंगतः। साधनसाध्यभावव्याहतिश्च। अतःपरं विशेषस्तदि ९
त

वक्ष्यमाणानुभवैकगम्यंतत्त्वरूपंनान्यमानगम्यमिति ज्ञापयितुमन्यमुखेनाह। तदेषाभ्युक्तेति। अन्यथासर्वाथितत्वप्रतिपादिकाश्रुतिरेवंकथंवदेत्। तदित्यव्ययं। तथाचतत्: ष्वैकिंब्रह्मविदःपरप्राप्तिलक्षणमर्थंविज्ञादतयाप्रतिपाद्यत्वेनाभिमुखीकृत्योपदेशक्रमेणाविदितपरब्रह्मकैःकृताःसर्ववाक्योक्तार्थस्यवैशद्यमनया क्रियतइत्यर्थः। संपद्यते। तामेवाह। सत्यंज्ञानमनंतंब्रह्म। योवेद निहितंगुहायांपरमेव्योमन्। सोश्नुतेसर्वान्कामान्सह ब्रह्मणा विपश्चिता। सोपपत्तिकमानंदात्मकत्वमग्रेनिरूपणीयमित्यधुनातदनिरूप्य सच्चिदंशौदेशाकालापरिछिन्नत्वंचोक्तवती। अथवाऽस्यब्रह्मणआनंदात्मकत्वेसत्यपितस्यपरिछिन्नत्वान्नपरमफलत्वमत आनंदेऽपरिछिन्नत्वमेवपरमफलतावछेदकमितितद्धर्मपुरःसरमानंदएवानंतत्वाद्धेनोच्यतेऽत्र। सत्यंविज्ञानमानंदंब्रह्म। सच्चिदानंदविग्रहमित्यादिश्रुतित्रयाणामप्येकप्रक्रमपठितत्वाद्द्वितयोक्तौतन्नियतसहचरितत्वेनानुक्तोप्यानंदःप्राप्यतएवेत्याशयेनवानंदःस्फुटतयानोक्तः। अथवेदनपदार्थमाह। योवेदेत्यादिना। अत्रेदमाकूतं। नायमात्माप्रवचनेनल~~[illegible]~~भ्योनमेधयानबहुनाश्रुतेनं तस्यैष आत्माविवृणुतेतनूंस्वामिति श्रुत्यावरणेतरसाधनाप्राप्यत्वमुच्यते। एवंसतिश्रुतिद्वयविरोधपरिहारायाक्षरब्रह्मज्ञानेनाविद्यानिवृत्त्याप्राकृतधर्मराहित्येनशुद्धत्वसंपादनेनपुरुषोत्तमप्राप्तौस्वरूपयोग्यतासंपाद्यते। तादृशोजीवस्वीयत्वेनवरणेभक्तिभावात्सहकारियोग्यतासंपत्त्यापुरुषोत्तमप्राप्तिर्भवतीतिनिर्णीयते। तदेवगुहायांपरमव्योमाविर्भावः। परमेमीयतेऽज्ञप्यतेनेनेतितथा। ज्ञानमार्गीयजीवज्ञेयप्रकारका[illegible]हृद्विशिष्टेनापितथा। परमव्योम्नोऽत्यलौ। किंकत्वज्ञापनायालौ। किंकप्रयोगःकृतः। भक्त्याहमेकयाग्राह्यः। नाहंवेदैरित्युपक्रम्यभक्त्यात्वनन्ययाशक्यइत्यादिस्मृतिरप्येवमेवसंगछते। अन्यथाज्ञानमार्गिणामपिब्रह्मविदांपरप्राप्तिःस्यान्नत्वेवं। मुक्तानामपिसिद्धानांनारायणपरायणः। सुदुर्लभःप्रशांता।

१× यमेवैषवृणुतेतेनलभ्य ५

त्मा कोटिष्वपि महामुने। तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह॥ इत्यादिवाक्यैः। एतदेवाह। गुहायां हृदयाकाशे यदाविर्भूतं परमं व्योमाख्यमात्म
कं व्यापि वैकुंठं तस्य षष्ठ रूपं स्वोत्तमगृहरूपत्वात्तत्र निहितं स्थापितमिव वर्त्तमानं यो वेद स भक्तो ब्रह्मणा नित्या विग्रहरूपेण विपश्चिता। विविधं प्रपञ्चितं हि विपश्चित्वं। पृषोदरादित्वा
त्प्रपञ्चशब्दावयवस्य पञ्चशब्दस्य लोपं कृत्वा व्युत्पादितो विपश्चिच्छब्दस्तेन विविधभोगचातुर्येण सर्वान्कामानश्नुत इत्यर्थः। एतेन परब्रह्मेति पदार्थ उक्तो भवति। स्वहृद्गुहामार्गीयत्वात्तस्य भक्त
स स्य स्वातंत्र्यं भोगतश्च्यते। सहभावोक्त्या ब्रह्मणो गौणत्वं। अत एव भक्ताधीनत्वं भगवतः स्मृतिष्वप्युच्यते। अहं भक्तपराधीनः वशीकुर्वंति मां भक्त्या इत्यादिवाक्यैः। यद्यप्यश भोजन इति धा
तोरश्नातीत्येवरूपेण भवत्यशूङ् व्याप्ताविति धातोर्भवत्यश्नुत इति रूपं विकरणभेदात्पदभेदाच्च तथाप्यश भोजन इति धातोरेव प्रयोग इति ज्ञायते। तथाहि। अत्राश्नानक्रियायां ब्रह्म
णा सहभाव उच्यते तथा च व्याप्त्यर्थकत्वे ब्रह्मणा सहभूतान्कामान्व्याप्नोतीत्यर्थो भवत्यथवा ब्रह्मणा सहभूतः सञ्जीवः कामान्व्याप्नोतीति। एतौ त्वनुपपन्नौ। न हि कामवञ्जीवकर्तृकव्या
पन। क्रियाकर्मत्वं ब्रह्मणो संभवत्यतिमहत्त्वात्। व्यापने चात्र स्वाधीनीकरणमेव वाच्यं। न हि कामानां तथात्वं स्वतः पुरुषार्थरूपं भोगशेषत्वात्तेषां। श्रुत्युक्तपरब्रह्मविभूतिरूपत्वाच्च रु
स्य तथात्वेनुपपन्नः। तेनाश भोजन इति धातोरेवायं प्रयोगोऽर्थस्यालौकिकत्वज्ञापनायालौकिकः प्रयोगः कुतः। व्यत्ययो बहुलमिति सूत्रेण छंदसि तिङ्विधानात् श्नाप्रत्ययपरस्मैपदयोर्व्य
त्ययेन श्नुप्रत्ययात्मनेपदे जातेऽश्नुत इति भोगार्थक एवायं धातुः। एवमेव न न तदश्नोति कं चन न न तदश्नोति कश्चनेत्यत्र प्रत्ययमात्रव्यत्ययेन प्रयोगोऽश धातोरेवेति ज्ञेयं। अन्यथा सर्वव्यापक पा॰१
स्य ब्रह्मणस्तन्निषेधोनुपपन्नः स्यात्। ननु सकामो ह्युपासकस्तदुपास्यं च सगुणं ब्रह्म द्वयोरपि कामोपभोगश्रवणात्। यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्युपक्रम्य यत्र त्वस्य सर्वमा १०

त्मैवाभूत्तत्केन कं पश्येदित्यादिनान्यदर्शनादिनिषेधाद्ब्रह्मविदः कामोपभोगासंभव इति चेत् । मैवं । तदेषाभ्युक्तेति वाक्येन पूर्ववाक्योक्तार्थनिरूपिके यमृगित्युक्तत्वेन प्राप्ततद्गुणसंबंधस्य
स्यतत्र च वक्तुमशक्यत्वात्तथा सति ब्रह्मविद्याप्यत्वपरत्वयोरसंभवापत्तेः । न च वेद्यस्य गुणत्वमुत्तरस्य सगुणत्वमिति वाच्यं । परत्वानुपपत्तेः । साधनत्वोपन्यस्ततस्य गुणत्वं तत्फलस्य सगुण
य त्वमित्यसंगततरं चेद्धि पश्यंति मुनयो गुणापाये समाहिता इति श्रीभागवतवाक्येन गुणातीतस्यैव मां वैकुंठदर्शनाधिकार उच्यते यत्र तत्र । किमु वाच्यं तत्परदर्शने । यच्चोक्तं ब्रह्मविदो द्वै
तदर्शनानुपपत्त्या कामभोगासंभव इति तन्नाप्युच्यते । यत्र त्वस्य सर्वमात्मैवाभूदिति श्रुतिरखंडब्रह्माद्वैतमाने ब्रह्मविदः प्रापंचिकभेदादर्शनं वदति । नतु प्रपंचातीतार्थदर्शनं बोधयति नि
निषेधति वा । पुरुषोत्तमस्वरूपं तु यावत्स्वधर्मविशिष्टं प्रपंचातीतमेवेति तद्दर्शनादेः किमायातं पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यमित्यनेन ब्रह्मात्मकत्वं प्रपंचस्योक्त्वैतदपि तस्य विभूति
रूपं तु पुरुषस्त्वितो महानित्याह । एतावानस्य महिमाऽतो ज्यायांश्च पूरुष इति श्रुतिरतो न किंचिदनुपपन्नं । एवं सति ब्रह्मविदः परप्राप्तेः पूर्वदशायां तत्केनेत्यादिनोच्यते । उत्तरदशायां तु
सोऽश्नुत इत्यनेनोच्यत इति सर्वं सुस्थं । छांदोग्येपि यत्र नान्यत्पश्यतीत्यादिना भूमस्वरूपमुक्त्वाऽऽत्मैवेदं सर्वमित्यंतेन तद्विज्ञानमुक्त्वोच्यते । स वा एष एवं पश्यन्नेवं मन्वान एवं विजान
न्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानंदः स स्वराड्भवति सर्वेषु लोकेषु कामचारो भवतीति । एतच्च लिंगभूयस्त्वात्तद्धि बलीयस्तदपीत्यधिकरणे प्रपंचयिष्यते । अथवा तदेषाभ्युक्तेति
वाक्येन पूर्ववाक्योक्तब्रह्मनिरूपिकेयमृगित्युच्यते । तत्र साधनफले निरूपिते इत्यपेक्षायां ते एव निरूप्येते । तथा हि । आनंदस्य फलात्मकत्वेन साधनत्वोपन्यस्ते ब्रह्मणि तमनुक्त्वा यो वेदेत्यंतेन परब्र
ह्मविदित्येतावतो वाक्यस्य विवरणं क्रियते । एतेन फलात्मकस्वरूपयोग्यतासंपत्तिरुक्ता । तत उक्तरीत्या भगवद्दर्शनेन भक्तिलाभे गुहायामाविर्भूतं यत्परमं व्योम तस्मिन्निहितः पुरुषोत्तम एवेतितं

प

वं २

निहितमितिनिरुक्तीयार्थे द्वितीया।तयाचतत्रनिहितेनब्रह्मणोन्ययेपूर्ववत्।अयपरमफलत्वान्निरवध्यानंदात्मकत्वमंतरंगेभ्योप्यंतरंगत्वंतस्मिन्ज्ञापयितुंसर्वस्यसर्वरूपत्वेनसर्वाधिदै
विकरूपत्वमपिज्ञापयितुमाधिभौतिकादिरूपेण।विश्वंवीतुंभगवानाकाशादिरूपेण।विभूतोतएवभगवनआकाशास्यैककर्तृत्वमुच्यते।अयेन्नमयादीनिचत्वारिरूपाणिपूर्वंनिरूपि
तान्युत्तरोत्तरमंतरंगभूतानि।अन्नरसमयशारीरभूतात्प्राणमयस्तस्मान्मनोमयस्तस्माद्विज्ञानमयः।केचिन्नेतानिरूपाणिविकारात्मकत्वात्प्रागुक्तान्येवैतेभ्योप्यंतरंगोविमुक्तावियो
जीवएवानंदमयउच्यतइत्याह।सप्रतिवक्तव्यः।अग्रिमप्रपाठकेभृगुणाअधीहिभगवोब्रह्मेतिपृष्टोवरुणस्तदोत्तमाधिकाराभावात्स्वयंब्रह्मस्वरूपमनुक्त्वातपसाधिकारातिशयक
मेणस्वयमेवज्ञास्यतीतितदेवसाधनंसर्वत्रोपदिष्टवान्।तपसाब्रह्मविजिज्ञासस्वेति।ब्रह्मातिरिक्तेनसाधनेननतज्ज्ञातुंशक्यमितिज्ञापनायतपोब्रह्मेतिसर्वत्रोक्तवान्।तथाचतपसा
साधनेनब्रह्मत्वेनज्ञातानिरूपाणिप्राक्तनानीतिविचारकेणनवक्तुंशक्यमिति।तर्हिपुनर्ब्रह्मविषयकप्रश्नसाधनोपदेशात्तत्करणपूर्वातिरिक्तब्रह्मज्ञानानांपरंपरानोपपद्यतइति
चेत्।मैवं।भगवतोहिविभूतिरूपाण्यनंतानि।तत्रयेनरूपेणयत्कार्यंकरोतितेनरूपेणसमर्पितदतिरिक्तंनकरोति।तथैवतज्ज्ञायतः।तथाचान्नमयादिरूपैःस्वफलदानएवफ
लानिददाति।हीनाधिकारिणांतावतैवाकांक्षानिवृत्तिर्भवति।एवंसतियादृशोनाधिकारेणान्नमयरूपज्ञानंभवतितादृशोस्मिन्नंपत्नेनज्ञानमर्पितया।एवमेवोत्तरत्रापि।तथाचाका
शादिरूपमाधिभौतिकस्वरूपमुक्त्वाध्यात्मिकंतत्पुरुषरूपंवदंतीपरिरूपमाह।यद्दृष्टेनैवरूपेणाधिभौतिकेरूपेअध्यात्मिकस्यपुरुषस्यप्रवेशस्तदुक्तंवाजसनेयिशाखायां।पुरश्चक्रे पा०१
चतुष्पदःपुरःसपक्षीभूत्वापुरःपुरुषआविशदितिवक्ततस्तस्मात्पुरुषएवपरंतुपुरःसंबंधीमनूपत्तीभूत्वापुरःशरीराण्याविशदित्यर्थः।प्राक्तनीषुविविधासुसृष्टिषुप्राक्तनस्यैकविधस्यप्र ११

द्विपदः पुरश्चक्रे

शा २ न ३

वेशोनुचितोयद्यपितथापिस्वप्रवेशंविनानकिंचिज्ज्ञावीतिगतिप्रतिबंधकमुक्तंस्यात्तो।किंकयागत्याप्रविशामीतिज्ञापनायपच्छिन्नबनंमहिताह्वशाः।अतएवद्विपदश्चतुष्पदइत्यक्कं
आधिदैविकएकएवेतियःसर्वस्येतिसर्वज्ञोक्तं।नन्वानंदमयेप्येवमुक्तेनायमपिपरमकाष्ठापन्नरूपः।किंतुपूर्वोक्तेभ्योतिशयितधर्मवान्निरूपितरूपएव।नचशिरआदीनामानं
दरूपत्वेनैवोक्तेरयंपरमात्मैवेतिवाच्यं।अन्नमयेयथावयवानांनरूपत्वंतथानंदमयेपितेषांतद्रूपत्वादन्यथातस्यैषएवशारीरआत्मेतिनवदेत्।शारीरंहिपूर्वोक्तंतत्संबंधीहिशारी
रस्तद्भिन्नःप्रतीयते।तथाचपरब्रह्मत्वंस्वात्मात्मवत्त्वंचसर्वश्रुतिविरुद्धं।नचेतदतिरिक्तंचेद्ब्रह्मस्यात्तदानंदमयादन्योंतरआत्माब्रह्मेत्यपिवदेन्नत्वेवमतोयंपरएवेतिचेत्।न।आध्या
त्मिकरूपाणामेवात्रनिरूपणात्तेषांचपंचरूपत्वात्तावतामेवनिरूपणमतोस्मादन्यएवपरइतिप्राप्तेप्रतिवदति।आनंदमयोभ्यासात्।आनंदमयशब्दवाच्यःपरएवकुतः।अभ्यासा
त्तस्यैषएवशारीरआत्मायःपूर्वस्येत्यन्नमयादिषुसर्वत्रैवात्मत्वेनानंदमयस्यैवकथनात्।ननुनकिंचिन्मानमत्रपश्यामः।किंचानंदमयस्यैवसर्वत्रात्मत्वेनकथनआनंदमयेपितस्यैषएवेत्या
दिनवदेद्यमेवपूर्वस्यात्मेतिवदेदतोनानंदमयःपरइतिचेत्।उच्यते।नहीश्वरादन्यःसर्वेषामेकआत्मानभवितुमर्हतितस्यानंदरूपत्वंचैतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतिरसोवै
सः।रसंह्येवायंलब्ध्वानंदीभवति।कोह्येवान्यात्कःप्राण्यात्।यदेषआकाशआनंदोनस्यात्।एषह्येवानंदयातीत्यादिश्रुतिभिर्निर्णीयते।एवंसतितदेकवाक्यतायैप्रकृतोप्यानंदमयशब्द
स्तद्वाच्येवेतिमंतव्यं।अन्यथानंदमयादन्योंतरआत्मेत्येववदेत्।ननुक्रमाध्यात्मिकानामेवात्रनिरूपणादित्यादीतिचेत्।न।उक्तरीत्याधिदैविकस्यैवांतेनिरूपणात्।अतएवभार्गव्यांविद्या
यामपिभृगोरन्नमयादिज्ञानानंतरमपिपुनर्ब्रह्मजिज्ञासोक्तानत्वानंदमयज्ञाने।नहिभृगोराध्यात्मिकज्ञानार्थंप्रवृत्तिःकिंतुब्रह्मज्ञानार्थमेव।अधीहिभगवोब्रह्मेतिप्रश्नवचनात्।किंचब्रह्मवि

दं

दाप्नोतिपरमित्युपक्रमात्तंतेज्ञेयानंदंगणनामुक्त्वासयश्चायंपुरुषे।यश्चासावादित्येसएकइतिवाक्येबुद्धिविशिष्टपुरुषश्चादित्येच।नदेवान्तरंब्रह्मप्रतिष्ठितमितितदानंदोपितथैवेति
तयोरानंदयोरैक्यं।एवंरूपंब्रह्मेतियोवेदतस्यक्रमेणान्नमयादिप्राप्तिमुक्त्वांतेवदत्येतमानंदमयमात्मानमुपसंक्रामतीति।एवंसत्युपक्रमेपरप्राप्तेःफलत्वेनोक्तेरुपसंहारेपितथैव
न्नवितव्यत्वादानंदमयप्राप्तेरेवांतेफलत्वेनोक्तेस्तत्रपरमन्यस्यानुक्तेरानंदमयएवपरः।नतूपसंक्रमणंप्रतिक्रमणमतोनतथेतिचेत्।हंतैवमतिक्रांतब्राह्मणार्थवन्मतिर्भातिय
तःसंक्रमणशब्दःप्राप्त्यर्थकःसर्वत्रश्रूयते।अतएववरवेसंकरादिश।शिप्राप्नोतसंक्रमणमित्युच्यते।नचेयंनपरममुक्तिःअस्माल्लोकात्प्रेत्येतिपूर्वमुक्तेःअतएवपुरुषोत्तमानं
दानुभवेसत्यनुभवैकगम्योयमानंदोनमनोवाग्विषयइतिज्ञात्वालोकवेदकालादिभ्योपिनबिभेतीतियतोवाचइतिश्लोकेनोक्तवती।अन्यथानंदेमनसोप्यगम्यत्वमुक्त्वाविद्वानिति।
कथंवदेत्।एवंसतिसोश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चितेतिश्रुतियत्फलमुक्तंतदेवांतेविद्वन्नमितिज्ञायते।अन्यथास्माल्लोकात्प्रेत्येत्युक्तत्वाद्देहाभावेनभयानुपपत्तिःस्यात्।तन्निषे
ना धासंभवःकामभोगासंभवश्च।अतएवसामानाधिकरण्यमनुक्त्वानंदंब्रह्मणइत्युक्तं।एतेनलौकिकंपूर्वदेहंत्यक्त्वासाक्षाद्भगवद्भजनोपयोगिनं।भगवद्भिन्नत्वात्मकंसंघातंप्राप्नोत्या
दौ।तथाहिदेहेंद्रियप्राणांतःकरणजीवात्मकोहिसंघातः।तत्रस्थूलंशरीरमाद्यंभिन्नतिरूपं।द्वितीयंसूक्ष्मं।तृतीयंसर्वेंद्रियसंबंधित्वेनेंद्रियरूपत्वेनचांतःकरणात्मकत्वेनचेंद्रियांतः
करणरूपं।तुरीयंजीवनत्वात्मकं।यत्रगुहायांभगवद्वरणेनपरमव्योमाविर्भावस्ततःपूर्णानंदात्मकंपुरुषोत्तमस्वरूपंफलरूपंप्राप्यउक्तक्रमगर्भरीत्यातेनसहसर्वकामाशनमेवमनो। पा॰३
वागविषयानंदवेदनंतद्भाग्यवतीतिवाक्यैकवाक्यतयाऽवगम्यते।अथेदंविचार्यते।पुरश्चक्रेद्विपदइतिश्रुतौवक्ततस्कपुरुषएवरंतुउरःसंबंधीसन्पक्षीभूत्वापुरश्चाविशदिति १२

१

निरूपितं। प्रकृते चान्नमयादयस्तथैवोक्ताः। एवं सत्येकस्यां शरीरवल्लीनां तेषां प्रवेशो न वक्तुमुचितः प्रयोजनाभावादित एकैकस्यां श्रुतिर्यथा वाच्यः। तत्र कीदृशं तस्यां कस्य प्रवेश इति विचा
र्यमाणे शास्त्रतत्त्वब्रह्मत्वयोरविशेषाद्धि निगमकाभावात्सर्वेषां सर्वत्र प्रवेशोऽप्रवेशो वा भवेदिति चेत्। अत्रेदं प्रतिभाति। अस्माल्लोकात्प्रेत्येति वाक्य इदमूत्राश्च प्रयोगात्स्वाकृतगुणमयं प्रपंच
मतिक्रम्य गुणातीतप्रपंचं मात्रासन्त्रीलोपयोगिनं प्राप्नोतीत्यवगम्यते। तत्रात्मैवं भगवद्भावे संपन्ने पूर्वं भगवद्विरहभावेनातितीव्रत्वेन सर्वोपमर्दिना शरीरेंद्रियप्राणांतःकरणानि न धार
ण्येवमस्तु यदि तत्तद्रूपं ब्रह्म नेष्टते ष्टनश। विष्टं स्यात्। जीवस्य च ब्रह्मण्येव लयेन लीलारसाननुभवेन नाश एवमः। तथा च तत्तद्रूपं ब्रह्म तेषु तेषु स्थितमिति तेषां नाशः। अभेवानंदमयः स्वरूपोत्त
मः प्रविशतीति रसात्मकत्वादानंदात्मकमेव विरहभावरसाब्धिमनुभूय पश्चात्प्रादुर्भूतं प्रभुस्वरूपं प्राप्य न बिभेति कुतश्चनेति वाक्येन लोकात्तद्भावमुक्त्वा एतं ह वाव न तपति। किमहं सा
धु नाकरवं। किमहं पापमकरवमिति वाक्यैर्वेदाद्वयाभाव उच्यते। शरीरप्राणमनोंतःकरणजीवात्मनां शरीरत्वं वाजसनेयिशाखायामंतर्यामिब्राह्मणे पठ्यते। यस्य सर्वाणि भूतानि शरीरं।
यस्य प्राणः शरीरं। यस्य वाक् शरीरं। यस्य चक्षुः शरीरं। यस्य श्रोत्रं शरीरं। यस्य मनः शरीरं। यस्य त्वक् शरीरमित्यादेरंते यस्यात्मा शरीरमिति। अत पूर्वोक्तनिर्गुणदेशानां भगवच्चरणरेणुज
त्वेनभूतरूपत्वा ब्रह्मशरीरत्वं। तत्रान्नमयतत्प्रवेशोऽनंतन्तु स्थितिः प्राणेऽर्पितया तानेंद्रियेषु विज्ञानमयप्रवेशात्तथा मनसि मनोमयप्रवेशात्तथात्वं। जीवे त्वानंदमयः प्रविशतीति तथा त्वम
न नोयुक्तं पक्षित्वकथनं। आनंदमयस्य स्वरूपं विशेषतो वक्तुं शक्यमिति पः पूर्वस्येति सर्वत्रोक्तं शरीरप्रवेशप्रयोजनकपक्षिरूपित्वं पंचस्वपि साधारणमिति तेषु तथा वदंत्यानंदमयेऽपि तथैवोक्त
वती श्रुतिरिति ज्ञेयं। एवं सति स्वधर्मिणि संबंधेन रजतादेहेमित्वमिवोक्तप्रकारकप्रवेशाश्रयाणामपि तत्तादात्मकत्वमित्युच्यते। वस्तुतस्तु परोक्षवादोऽयमिति निश्चायते। तथा हि। ब्रह्मविदाप्नो

ति परमिति वाक्येन ब्रह्मविदः परप्राप्तिं सामान्यत उक्त्वा तत्रेत्स्य। यं सत्यं ज्ञानमित्यस्योक्तं। तत्र सर्वात्मभावबाह्यक्तो भगवतास्मरतत्त्वरूपात्मकं मात्रं केश्त्युक्त्या ख्यानेन तदर्थं विधास्यति। उ
क्तन्नक्तस्य सदैव विरहभावेन विशेषतः। प्रियस्य स्वरूपातिरिक्तास्फूर्त्या अन्नप्राणादिरूपः स एवेति ज्ञापनाय तत्तद्रूपत्वमुच्यते। तेन परमप्रेमवत्त्वं सिध्यति। ततो भगवदाविर्भावे सत्यपि पूर्व
भावस्यातितीव्रत्वेन ज्ञानादिसर्वतिरोधानेनान्यस्मरसानुभवो न भविष्यतीति स्वयमेव तदनुभवात्मको भवतीति ज्ञापनाय विज्ञानरूपत्वमुच्यते। तदानुभवविषयः प्रकट आनंदमय इति त
त्स्वरूपमुच्यते। तत्र निरुपधिप्रीतिरेव मुख्यानान्यदिति ज्ञापनाय प्रियस्य प्रधानांगत्वमुच्यते। ~~तत्र निरुपधिप्रीतिरेव मुख्यानान्यदिति ज्ञापनाय प्रियस्य प्रधानांगत्वमुच्यते।~~ तदा प्रियेक्षणा
दिभिरानंदात्मक एव विविधरसभावसंदोह उत्पद्यते यः स दक्षिणः पक्ष उच्यते। ततः स्पर्शादिभिः पूर्वविलक्षणः प्रकृष्टानंदसंदोहो यः स उत्तरपक्ष उच्यते। नानाविधपरसमृद्धात्मकत्वात्तयोः पक्ष
योर्युक्तं तथात्वं। स्थायिभावस्यैकरूपत्वादात्मत्वमुच्यते। यतस्तत एव विभावादिभिर्विविधभावोत्पत्तिः। परप्राप्तिसाधनीभूतब्रह्मज्ञानदशायां तदानंदो प्रियः पूर्वमनुभूतं सगणितानंद इ
त्येतदानंदानुभवानंतरं तुच्छत्वेन भाति। प्रगतावसाधनत्वेन स्वरूपतोपि तस्माद्धीन~~त्वं तदानंदो प्रियः पूर्वमनुभूतं सगणितानां~~ त्वं चेति पुच्छभागादपि हृस्थितपुच्छरूपत्वं ब्रह्मण उ
च्यते। पुरुषोत्तमाधिष्ठानत्वात्प्रतिष्ठारूपत्वं च। एवं सत्यक्षरादपुरुषोत्तमत्वेप्यप्रधानीभूयभक्तकामपूरणाकर्तृत्वे संभावना विपरीतभावना च संभवतीति तद्भावाया सत्रैव भवतीत्याद्युक्तं। स्वानु
भवाभावेपि गुरूपदेशेनापि तदस्तित्वमात्रमपियो जानाति तं ब्रह्मविदः। संतं। सत्त्वधर्मविशिष्टं वर्तमानं च विदुरित्यर्थ एवदद। स्ति ब्रह्मेति वेदेत्यादिना ब्रह्मास्तित्वज्ञानेऽसन्नवतीत्युक्त्वा नदस्ति
त्वज्ञाने सन्नवतीत्यनुक्त्वा संतमेनं विदुरिति तत्त्वेनान्यज्ञानं यदुक्तं तेनोक्तपुरुषोत्तमानंदानुभवं तं ज्ञानक्रियाविशिष्टं जीवं वर्तमानं विदुः। अननुभवे केवलं गुरूपदेशादिना तादृग्ब्रह्मास्तित्वज्ञा

त ३

नेस्वरूपतः संततं विदुर्नतु ज्ञानादिमंतं। तदमत्वज्ञानेत्वलीकतुल्यमिति श्रुतितात्पर्यमिति ज्ञायते। एवं विचारचातुर्यवद्भिर्द्विजाधिपे। आनंदमयतानंदसंदोहायावधार्यतां॥ ननु आ
नंदमयस्य न ब्रह्मता वक्तुं शक्या मयटो लोके विकाराधिकाराधिकारविहितत्वादित्याशंक्य स्वयमेव परिहरति। विकारशब्दान्नेति चेन्न प्राचुर्यात्। अनेनैव पूर्वसूत्रार्थः सिद्धो न विषय। ति
विकारवाची शब्दो मयट्प्रत्ययो यस्मिन्नत विकारशब्दं तस्मात्तद्वाच्यं ब्रह्म न भवति। ब्रह्मणोऽविकारित्वादिति चेत्। नात्र विकारे मयट्। किंतु प्राचुर्यात्। प्राचुर्यं अनतिप्राप्नोताति प्राचुर्यात्
४ व ।तथाच पाणिनिः। तत्प्रकृतवचने मयट्। प्राचुर्येण प्रस्तुतं वचनं तत्प्रकृतवचनं तस्मिन्मयट्प्रत्ययो भवतीत्यर्थः। प्राचुर्येण पूर्वापेक्षयाप्याधिक्येन को ह्येवान्यात्। कः प्राण्यादिति वाक्ये प्रकर्षेण
स्कृतं अतो मयट् पूर्वापेक्षया प्राचुर्यमयते एकदेशानिर्देशोन तदर्थलक्षणया प्राचुर्यः प्राचुर्येण प्रस्तुतार्थवाचकत्वादित्यर्थ इति वा। छंदसिद्ध्यत्यतिरिक्तस्थले मयटो विधानाभावात् व्याकर
णमप्यर्थनिर्णायकं। विज्ञानमयानंदमयशब्दोपन्यस्तपि पाणिनिर्मयड्वैतयोर्भाषायां द्व्यचः छंदसीति कथमवोचत्। अत्र केचित्सर्वविज्ञवादिनो विकारार्थत्वं वदंति श्रुतिसूत्रादीनाम
र्थज्ञानात्। तदुद्देशाद्यर्थवद्भिर्भगवतो नवमावतारकार्यं ज्ञात्वोपेक्ष्यं। योर्थस्तमवोचाम। शब्दबलविचारेण मयटो विकारार्थत्वं निवारितं। अर्थबलविचारेणापि निराकरोति॥ ॥तद्धेतुव्य
पदेशाच्च। हेतुत्वेन व्यपदेशात्तस्य हेतु व्यपदेशस्तद्धेतुव्यपदेशस्तस्मात्। एष ह्येवानंदयातीति आनंदयतीत्यर्थः। सर्वस्यापि विकारस्तस्मानंदस्यायमेवानंदमयः कारणं। यथा विकृ
तस्य जगतः कारणं ब्रह्माविकृतं सच्चिद्रूपमेवमेवानंदमयोपि कारणत्वादविकृतोऽन्यथा तद्वाक्यं व्यर्थमेव स्यान्नानंदमयो विकारार्थः। चकारः समुच्चयं वदन्सूत्रद्वयेनैकोर्थोभिधेयप्रतिपादि
तइत्याह। ननु किमिति निर्बंधेन सूत्रत्रयेणैवं वर्ण्यते। अन्नमयादिवदुपासनापरत्वेनापि श्रुत्युपपत्तेः। पक्षपुच्छादित्वेन मोदप्रमोदादीनामुक्तत्वाच्च। तस्मात् ब्रह्मत्वेन समाधितमप्यात्मप

ज्ञो हेतुव्यपदे

क्तोपपत्त्यभावात् । न ब्रह्मपरत्वमिति प्राप्तेऽभिधीयते । मांत्रवर्णिकमेव च गम्यते । सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति मंत्रः
मंत्रेणाभिधाय तत्प्रतिपाद्यं मांत्रवर्णिकं । तदुपपादनपरं चैतदेव मुख्यतयाऽऽम्नायते यच्च यदुद्दिष्टं तदेव मुख्यतया ज्ञातव्यं । उपपादनीयं च संदिग्धं तत्र ब्रह्मणा विपश्चितेति संदिग्धं स
र्वज्ञं ब्रह्म । तस्य हि फलत्वं वाक्येनोपपाद्यते । फलं च सर्वैः श्रुतौ हि आनंदः । अभ्यासात् तत्त्वमित्यवोचाम । शिरःपाण्यादिकं तु स्तुत्यर्थमेव । पुरुषविधत्वाय । लोके हि यंतर्न्तं तं बहिर्बुद्धिं
च तदाकारं भवति । जीवो हि मुख्यकर्तृत्वेन व्यपदेशात् स च तत्स्कृतो हंसरूपः पुरुषाधिकारकं हि शास्त्रं तेन च पुरुषशरीरेण तदाकारः सर्वं फलं प्राप्नोति । अतः पुरुषं हंसरूपेणानुवर्णितं । पंच
स्वपि शारीर आत्मा जीव एक एव तत्रान्नमये निःसंदिग्धत्वात्तस्यैष एव शारीर आत्मेति नोच्यते द्वितीयादिषु प्रथमोक्तमेवातिदिश्यते । तत्रान्नमये हस्तेन प्रदर्श्य पत्रिव निःसंदिग्धं यौतं रव्या५
तदंतरो हि प्राणः आंतरव्यवहारकारणं । बलभोजनविसर्गादिदर्शनप्रयोगात् । तस्य संचार आकाशोपरि निष्ठितः पृथिव्यां । एवं लौकिकव्यवहारार्थं बाह्याभ्यंतरभेदेन द्वयं । तदनु वैदिकव्यवहा
रः स च मनोमयः पुरुषः । आदेशः कर्मचोदना ब्राह्मणानि मंत्रशेषाणि । अथर्वांगिरसे ब्रह्मकर्मत्वात्प्रतिष्ठा । तदनु नानाविधयागादिसाधनवतः फलं विज्ञानमयः । तत्र श्रद्धा आपः । ततीयाथा
येत्वय[illegible]मर्थो विस्तरेण वक्ष्यते । यथोक्तकर्तृत्वात् क्रममुक्तिः । ऋतमतो यमीयमाणानुष्ठीयमानो धर्मो योगश्च मुख्यत्वादात्मा । अधोभागो महर्लौकिकः तादृशस्य ततो वाक् संस्तत्स्य भा
वात् । ततोऽपि ब्रह्मविद आनंदमयः फलेन तस्य स्वरूपस्यैकत्वात् । धर्मभेदेन शिरःपाण्यादि निरूप्यते तस्य मुख्यतया प्रीतिविषयत्वं धर्मतत् शिरः । मोदप्रमोदौ अपरिनिष्ठितपरिनिष्ठि पा०१
तावानंदातिशयौ । आनंदस्तु स्वरूपं साधनरूपत्वात् । ब्रह्म पुच्छमिति । श्लोकौ तु सच्चिदंशबोधकौ । केवलानंदत्वपरिहाराय । अपरौ तु श्लोकौ माहात्म्यज्ञापनाय वाग्गोचरभेदेन । अथा २४

१ वराणो

तरानंदास्क सर्वेतस्मात्त्वनेन यातदुत्कर्षत्वबोधनाय। तस्मात्सर्वत्र प्रपाठके मांत्रवर्णिकमेव प्रतीयते। अतो मुख्योपपत्तेर्विद्यमानत्वेनानंदमयः परमात्मैव चकारो मध्ये प्रयु
क्तो विधिमुख्यविचारेणाधिकरणसंस्तर्णत्वबोधकः। निषेधमुखेन च चतुःसूत्र्येदमेवाधिकरणं पुनर्विचार्यते। सुदृढत्वाय। इदमत्राकूतं। जीव एवानंदमयो भवतु फलत्वस्य
पुरुषार्थत्वात्। स ब्रह्मविदानंदमयो भवती तिस्वर्गादिसुखवल्लौकिकमेवरूपं चानंदमयं जीवस्य फलत्वमिति प्राप्तेभिधीयते। नेतरोनुपपत्तेः। इतरो जीवः। न। आनंदमयो भव न
ति। कुतः। अनुपपत्तेः। जीवस्य फलरूपत्वमात्रेणानंदमयत्वं नोपपद्यते तथा सति तस्य स्वातंत्र्येण जगत्कर्तृत्वे अत्यल्पलौकिकमहात्म्यवत्वेन निरूपणं नोपपद्येत। अतो न जीव आनं
दमयः। भेदव्यपदेशाच्च। इतोपि न जीवः आनंदमयः। यतो भेदेन व्यपदिश्यते। रसं ह्येवायं लब्ध्वानंदी भवतीति आनंदोस्यास्तीत्यानंदी ह्येष एवानंदयाति आनंदयतीत्यर्थः। चकारात् ती
सूत्रद्वयेन जीवो नानंदमय इति निरूपितं। तर्हि जडो भवत्वानंदमयः न। आंतरत्वान्नकार्यरूपो भवति किंतु कारणरूपः सत्वमतेनास्त्येव मतांतरे प्रकृतिर्भवेदुत। निवारयति। कामाच्च नानु
मानापेक्षा। जडा प्रकृतिर्नास्तीति कारणत्वेन निरस्तैव। अयेनद्वाक्यान्यथानुपपत्त्या मत्वपरिणामरूपा कल्प्येत सा कल्पना नोपपद्यते कुतः कामात्। आनंदमयनिरूपणानंतरं सोका
मयते। ति श्रूयते सकामश्चेतनधर्मः अतश्चेतन एवानंदमय इति। चकास्ततपोतपोतप्यतेत्यादि अतोनुमानपर्यंतमर्थमवबोधयद्वाक्यं न तिष्ठतीत्यर्थः। अस्मिन्नस्य च तद्योगं शास्ति। इत स्य
श्च न जड आनंदमयः। अस्मिन्नानंदमये अस्य जीवस्य च आनंदमयमात्मानमुपसंक्रामतीतिनेन रूपेण योगं शास्ति फलत्वेन कथयतीति न हि जीवस्य जडस्य वा प्राप्तिर्युक्ता ब्रह्मैव सद्ब्रह्मा
प्येतीतिवत्। अस्याप्यर्थः। तस्मान्नायं जीवो नापि जडः परिशेष्यात् ब्रह्मैवेति सिद्धं। ये पुनरधिकरणं भंगं कुर्वंति तेषामज्ञानमेव। यतस्तैरप्यानंदमयः कः पदार्थ इति वक्तव्यं न तावज्जीवः

तरानंदात्मकं सर्वं तस्मात्सूत्रेनेन यातउत्कर्षत्वबोधनाय। तस्मात्सर्वत्रपावके मांत्रवर्णिकमेव प्रतीयते। अतो मुख्योपपत्तेर्विद्यमानत्वेनानंदमयः परमात्मैव चकारो मध्ये प्रयु
क्तो विधिमुखविचारेणाधिकरणसंगत्त्वबोधकः। निषेधमुखेन च चतुःसूत्र्येदमेवाधिकरणं पुनर्विचार्यते। सुदृढत्वाय। इदमत्राकूतं। जीव एवानंदमयो भवतु फलस्य
पुरुषार्थत्वात्। स ब्रह्मविदानंदमयो भवतीति स्वर्गादि सुखवल्लौकिकमेवरूपं चानंदमयं जीवस्य फलमस्तु मिति पूर्वपक्षेभिधीयते। नेतरोनुपपत्तेः। इतरो जीवः। न। आनंदमयो भव न
ति। कुतः। अनुपपत्तेः। जीवस्य फलरूपत्वमात्रेणानंदमयत्वं नोपपद्यते तथा सति तस्य स्वातंत्र्येण जगत्कर्तृत्वे च सत्यलौकिकमहात्म्यवत्त्वेन निरूपणं नोपपद्येत। अतो न जीव आनं
दमयः। भेदव्यपदेशाच्च। इतोपि न जीवः आनंदमयः। यतो भेदेन व्यपदिश्यते। रसं ह्येवायं लब्ध्वानंदी भवतीति आनंदोस्यास्तीत्यानंदी ह्येष एवानंदयातीति आनंदयतीत्यर्थः। चकारात् ती
सूत्रद्वयेन जीवो नानंदमय इति निरूपितं। तर्हि जडो भवत्वानंदमयः न। आंतरत्वान्न कार्यरूपो भवति किंतु कारणरूपः सत्त्वमते नास्त्येव मतांतरे प्रकृतिर्भवेत्त। न्निवारयति। कामाच्च नानु
मानापेक्षा। जडा प्रकृतिर्नास्तीति कारणत्वेन निराकृतैव। अथ येन द्वाक्यान्यथानुपपत्त्या सत्त्वपरिणामरूपाकल्प्येत सा कल्पनानोपपद्यते कुतः कामात्। आनंदमयनिरूपणानंतरं सोका
मयतेति श्रूयते स कामश्चेतनधर्मः अचेतनश्चेतन एवानंदमय इति। चकारात्स तपोतप्यतेत्यादि अतो नानुमानपर्यंतमर्थमवबोधयद्वाक्यं न तिष्ठतीत्यर्थः। अस्मिन्नस्य च तद्योगं शास्ति। इत स्य
श्चन जडः आनंदमयः। अस्मिन्नानंदमये अस्य जीवस्य च आनंदमयमात्मानमुपसंक्रामतीति तेन रूपेण योगं शास्ति फलत्वेन कथयतीति न हि जीवस्य जडस्य वा परिमुक्ता ब्रह्मैव सद्ब्रह्मा
प्येतीतिवत् अस्यापि अर्थः। तस्मान्नायं जीवो नापि जडः परिशेष्यात् ब्रह्मैवेति सिद्धं। ये पुनरधिकरणभंगं कुर्वंति तेषामज्ञानमेव। यतस्तैरप्यानंदमयः कः पदार्थ इति वक्तव्यं न तावज्जीवः

तस्य ब्रह्मज्ञानफलत्वेन ब्रह्मणा विपश्चितेत्यानंदमयस्योक्तत्वात् । अयज्ञः स्वर्गवत् । तदा किमाश्रित इति वक्तव्यं यज्ञाश्रितत्वे कर्मफलमेव स्यात् । ज्ञानस्याप्यवांतरफलमिति चेत् न
। तर्हि किमानंदात् तस्यातिरिक्तं फलं । न विष्यतिज्ञचिद्रूपतायाः पूर्वमेव विद्यमानत्वात् । अस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीति श्रुतिविरोधश्च । पुच्छत्वेन ब्रह्मवचनात् प्रद्वेष इ
ति चेत् । तर्हि स एको ब्रह्मण आनंद इत्यत्रापि षष्ठ्या भेदनिर्देशात् ब्रह्मणः परमपुरुषार्थत्वं नांगीकुर्यात् । उपक्रमादिसर्वविरोधश्च पूर्वमेव प्रतिपादितः । यदप्यधिकरणमन्यथा रचि
तं ब्रह्मपुच्छमिति तत्र न पुच्छस्य ब्रह्मत्वं प्रतिपाद्यते येनान्यथा समाधानं भवेत् । किंतु ब्रह्मणः पुच्छत्वमिति पूर्वन्यायेनेदं पुच्छं प्रतिष्ठेतिवत् । तत्र श्रुतिबाधो ब्रह्मणाप्यशक्यः । मौर्ख्यं चैतत्
५ य आनंदमयस्यैव ब्रह्मत्वे न कोपि दोषः स्यात् । आनंदमयस्याब्रह्मत्वं परिकल्प्य तत्पुच्छत्वेन ब्रह्म वेदबोधितमिति ज्ञात्वा तत्समाधानार्थं यतमानो महामूढ इति विषयफलयोः । किं सुखमि
त्यनुसंधेयं । पुच्छत्वोक्तिस्तु सर्वभासित्वाय । अत एव ज्ञानविषयत्वं प्रतिष्ठा च आनंदमयो ब्रह्म एवेव प्रतिष्ठित इति । अत्रावयवाव विभावो नाक्य इत्युक्तं प्राणमयादीनामपि तथात्वात्
त्यानंदम । अनुच्छिन्नस्य वा धातुरोधेन न याच्यमिति सर्वं सुस्थं । अंतस्तद्धर्मोपदेशात् । अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः आप्रणखात्सर्व एव सुवर्णस्तस्य य
धिकरण था कप्यासं पुंडरीकमेवमक्षिणी तस्योदिति नाम । स एष सर्वेभ्यः पाप्मभ्य उदितः । उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यधिदैवतमथाध्यात्ममथ य एषोंतरक्षिणि पुरुषो दृश्यते । इत्यादि
तत्र संशयः । किमधिष्ठातृदेवताशरीरमाहोस्वित् परब्रह्मेति ब्रह्मणो वा शरीरमिति तदर्थमिदं विचार्यते । हिरण्मयशब्दः सुवर्णविकारवाची । आहोस्वित् प्रकाशसाम्येनानंदवाचीति । ब्र पा०१
ह्मविदाप्नोति परमित्युपक्रमस्य आनंदमयस्य फलत्वमुक्त्वा द्वितीयोपाख्याने स यश्चायं पुरुषे यश्चासावादित्ये स एकः स य एवंविदिति साधनस्यानंदमयमात्मानमुपसंक्रम्येति फलं श्रुतं त १५

अस्य वितरिविद्यमानस्य ब्रह्मत्वे फलं नोपपद्यत इति विचारारंभः। तत्र हिरएम यत्राद्यो विकारवाची केशानत्वादस्यत्रोच्यं ने शारीरधर्माः मत्ता वा एषा त्वगमे ध्यायके शास्मिन्निति शारीरमंत
णनोपपद्यते। परिच्छेदस्य च्याधिदे विकादिवचनं च बाधकं अतः सर्वथा तच्छरीरमिति मंतव्यं। चाक्षुषत्वाच्च। इंद्रियवत्त्वं चास्य श्रूयते यथा कप्यासं पुंडरीकमेवमक्षिणी तस्येति। कपेरासः आस
नं आरक्तं तस्यामनं नवनीति अस्य सम्यक्ल्पता च। अतो देहेंद्रिययोर्विद्यमानत्वात् जीवः कश्चिदधिकारी सूर्यमंडलस्थ इति गम्यते फलं तत्सायुज्यद्वारेति। अथोच्यते एष सर्वेभ्यः पाप्मभ्य उदितः
ति अपहतपाप्मत्वादिधर्मश्रवणात्। एवं दोषस्यापि विद्यमानत्वात् ब्रह्मण एव केनचित्रिमित्तेन शारीरपरिग्रह इति तस्य च शारीरस्य कर्मजन्यत्वाभावादपहतपाप्मत्वादिमं गच्छते सुवर्णशारीर
रा त्वमपि अलौकिकत्वात् ब्रह्मण एव संगच्छते। शारीरवदिंद्रियस्यापि परिग्रहः। वर्णमात्रपरिग्रहात्रामस्यता। स्थावरापेक्षया जंगमस्योत्कृष्टत्वात् स्थावरावयवोपमानवज्जंगमावयवोपमानं स्थावर
स्यापीति सर्वब्रह्मभावायश्रुत्यर्थकत्वाच्च। तस्माद्ब्रह्मण एवेदं शारीरमित्येवं प्राप्ते उच्यते। अंतस्तद्धर्मोपदेशात्। अंतर्दृश्यमानः परमात्मैव कुतः तद्धर्मोपदेशात् तस्य ब्रह्मणो धर्मा उदितादिधर्मा उपदिश्यं
ते स एष सर्वेभ्यः पाप्मभ्य उदित इति। अयमाशयः ब्रह्म कारणं जगत्कार्यमिति स्थितं तत्र कार्यधर्मा यथा कारणे न गच्छंति तथा कारणासाधारणधर्मा अपि कार्ये तत्रापहतपाप्मत्वादयः कारणधर्मा
स्ते स्वभवंतिन द्रुमेत्येवावगंतव्यं बलिष्ठत्वात्कारणधर्मस्य। नाम तुल्यतामात्रमुभयेषामपि धर्माणां नेश्रुत्यैकसमधिगम्या ब्रह्मणि। लोके प्रमाणांतरमपि प्रवर्तते। [illegible] अतः
सर्वरसादयो ब्रह्मनिष्ठा एव धर्माः स्थूलत्वादयस्तु ये ब्रह्मणि निषिध्यंते स्थूलादिवाक्येषु ते कार्यधर्माः। अणोरणीयानित्यादिषु कारणधर्मा एव॥ अत एवं कोप्यसाधारणो धर्मो विद्यमानः
शिष्टान्संदिग्धानपि ब्रह्मधर्मानवगमयति। इममेव श्रुत्यभिप्रायमंगीकृत्य सर्वत्र ब्रह्मवाक्यनिर्णयमाह सूत्रकारः। तथा च श्रुतिमतिसिद्धिस्थले तथैवावगंतव्यं। अनंतमित्यनंतसर्गिता च ब्र

मे५

स्रणः प्रतिज्ञाता। अन्यथा गुहायां निहितमिति विरुध्येत। तस्मात्साकारं तादृशमेव ब्रह्म। ब्रह्मणः शरीरमिति तु सर्वथा असंगतं सर्वकर्तुर्ब्रह्मणः का वा अनुपपत्तिः स्यात् येन स्वस्यापि शरीरं कल्पयेत् किंतु लीलया व्यामोहनार्थमन्यथा भासयेन्नटवत् तस्माद्देहातिरिक्तेप्युपपत्तिः सर्वकं यच्च ब्रह्मधर्मस्तु ब्रह्मेति मंतव्यं ब्रह्म तु वेदैकसमधिगम्यं तादृशं वेदे प्रतिपाद्यते तादृशमेवेत्यसकृदवोचाम। अत्र त्रय तेरि हिरण्मयइत्यकारलोपः छांदसः अतो न दोषः। हिरण्मयशब्द आनंदवाची लोकेपि तस्यानंदसाधकत्वात्। अतः केशादयोपि सर्वे आनंदमया एव ब्रह्मस्वरूपमिति मंतव्यं अत एव ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः। केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्र इत्यत्रापि वपुः स्वरूपं। मायाह्येषा मया सृष्टेत्यादि भगवद्वाक्यं भगवन्माया यथा नैवं तमन्यथा प्रपंचतीत्याह। नतु भगवानेवमायिक इति। शरीरे सति जीवत्वमेवेति निश्चयः। अतो ब्रह्मधर्मोपदेशात् सूर्यमंडलस्थः परमात्मैव भेदव्यपदेशाच्चान्यः। इतोपि सूर्यमंडलस्थः परमात्मा भेदव्यपदेशात्। य आदित्ये तिष्ठन्नादित्यादंतरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमंतरो यमयति एष त आत्मांतर्याम्यमृत इति श्रुत्यंतरे आधिदैविकसूर्यमंडलाभिमानिन्यो भेदेन निर्दिष्टं। यद्यपि तत्राकारो न श्रूयते तथापि हिरण्मयवाक्येनैकवाक्यत्वात् सर्वत्र साकारमेव ब्रह्मेति मंतव्यं। अंतर्यामिब्राह्मणे चत्वारोर्था उच्यंते सर्वत्र तिष्ठन्न तद्धर्मैर्न संबध्यते सर्वमुक्तिपरिहाराय स्वधर्मैस्तु न बध्यते। स्वलीलामिच्छयंत शरीरमिति। तस्य नियमनं तदर्थमिति चकाराद्धर्मा उच्यंते। तस्मात्सर्वविलक्षणत्वादन्य एव नाभिमानी। उपसंरव्याहृत्यधर्मव्यपदेशोपसंहारः। ब्रह्मत्वे सिद्धे ज्ञानं वा उपासना चेति नास्मत्सिद्धांते कश्चन विशेषः। कारणे कार्यधर्मारोपस्तु युक्त एव कार्ये तु नः कारणधर्माधिकरणत्वेनोपासनाश्चनेदात्फलायेति सर्वत्र व्यवस्थितिः॥ आकाशस्तल्लिंगात्। अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते आकाशं प्रत्यस्तं यंति आकाशो ह्येवैभ्यो ज्या

पा·१

१६

इत्यंतस्तद्धर्मोपदेशाधिकरणं षष्ठं

यानाकाशः परायणमिति तत्र संशयः। भूताकाशो ब्रह्म वेति। ननु कथमत्र संदेहः आकाशव्योमशब्दा ब्रह्मण्येव प्रयुज्यंतें ब्रह्मप्रकरणे कार्यनिरूपणे तु महाभूतवचनः। यथा आकाश आ
नंदो न स्यात्। परमे व्योमन्निहितेत्यादि। आत्मन आकाशः संभूत इति कार्यनिरूपणं। अतः प्रकरणादेव संदिग्धनिर्णये किमिति सूत्रारंभः जन्मादिलक्षणसूत्रेण चायमर्थो निर्णीतः अन्य
था ब्रह्मशब्देऽपि संदेहः स्यात् महाभूतवेदादिवाचकत्वात् तस्मात्प्रकरणादेव परिज्ञानं भविष्यतीति चेत् तदुच्यते असंदिग्धे प्रकरणे तथैव निर्णयः इह तु नः प्रकरणमपि संदिग्धमतो विचा
रः। अवांतरविद्यायां सर्वथामितप्रकरणवदस्यापि प्रकरणस्य भूताकाश एव पर्यवसानमिति लोकस्नाब्यन्यायेनाकाशो भौतिक एवेति पूर्वपक्षस्तत्राह आकाशस्तल्लिंगात् आकाशः परमा
तू त्मैव कुतः तल्लिंगात् श्रु ति लिंगादयो नियामकत्वेन पूर्वतंत्रवदिहापि गृह्यंते। लिंगं श्रुतिसामर्थ्यं एकवाक्यता च सर्वासां ब्रह्मश्रुतीनां तत्र ब्रह्मैव जगत्कारणमिति निःसंदिग्धे सिद्धं सर्वशब्दवा
च्यत्वं ब्रह्मण्येव। तत्र वाक्यार्थापेक्षया पदार्थस्य दुर्बलत्वात्। वाक्यार्थः सर्वगतित्वादिः तत्वाक्यार्थान्यथानुपपत्त्या आकाशपदार्थो ब्रह्मेति न सर्वशब्दवाच्यत्वाद्ब्रह्म न तु रूढ्या मुख्यत्वाच्च
। यावन्मुख्यपरत्वं संभवति तावत्तत्र कस्यापि वेदांतस्यापरब्रह्मपरत्वमिति मर्यादा। तस्माद्यदेष आकाश आनंदो न स्यादितिवत् अत्राप्याकाशो ब्रह्मैवेति सिद्धं। अतएव प्राणः। प्र
स्तोतर्या देवता प्रस्तावमन्वायत्तेत्युपक्रम्य श्रूयते कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ते
ति तत्र संशयः आसन्यः प्राणः ब्रह्म वेति पूर्वपक्ष सिद्धांतो पूर्ववदेवेत्यतिदिशति। नन्वधिकरणानां न्यायरूपत्वात् सर्वत्र गमिष्यति किमित्यतिदिश्यत इति उच्यते प्राणस्य मुख्यस्यापि सर्वभू
तसंवेशनं स्वापादौ श्रुतावेवोपपाद्यते यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येतीत्यादिना तत्र यथा प्राणविद्यायां न ब्रह्मपरत्वमेवमेवास्यापि न ब्रह्मपरत्वमिति न न्यायेन प्राप्नोति। अतोति

इतितल्लिं
गाधिकरणं
सप्तमं।७।

इतिप्राणाधिकरणमष्टमं

सर्वतः पृष्ठे
त्तमेषु

दिशति। अनेनचायमतिरिक्तोन्याय आपादितः। यत्रैव प्रकरणे ब्रह्मपरत्वे कल्प्यमाने न किंचिद्बाधकं तत्रैव ब्रह्मपरत्वं कल्पनीयमिति न त्वन्यस्मिन्नसंभवे तत्परत्वमिति। अत एव तल्लिंगात्
प्राणशब्दवाच्यं ब्रह्मेति॥ ज्योतिश्चरणाभिधानात्॥ इदमामनंति। अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेष्वनुत्तमेषूलोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति। तत्र ज्योतिः
शब्देन प्राकृतं ज्योतिराहोस्वित्ब्रह्मैवेति संशयः। अत्रासाधारणब्रह्मधर्माभावान्पूर्वपक्षः॥ सिद्धांते तु चरणस्य ब्रह्मधर्मत्वमिति। एतावानस्य महिमा अतो ज्यायांश्च पूरुषः। पादो
स्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति पूर्ववाक्यं॥ गायत्री वा इदं सर्वं भूतं यदिदं किंचेति गायत्र्याख्यब्रह्मविद्यां प्रकृत्य तस्याः पादचतुष्टयं प्रतिपाद्य ब्रह्मणश्चतुष्पात्त्वमुक्तं पुरुषसूक्ते
पि आश्रमचतुष्टयस्था जीवाः पादत्वेनोक्ताः। तथा प्रणवब्रह्मविद्यायामपि अकारउकारमकारनादाख्याश्चत्वारः पादा विश्वतैजसप्राज्ञतुरीया उक्ताः। तद्विष्णोः परमं पदमिति च। ब्रह्म
पुच्छमिति च। सत्यकामब्राह्मणेतु स्पष्टा एव ब्रह्मणश्चत्वारः पादा निरूपिताः। अतः सच्चिदानंदरूपस्य प्रत्येकसमुदायाभ्यां चरूपत्वं तत्र केवलानां कार्यत्वमेव। चतुर्थपादस्य तु ब्रह्म
त्वं तत्रापि षड्विधत्वप्रतिज्ञानात् भूतपृथिवीशरीराणां परिचायकत्वेन षड्विधत्वमनिरूप्य हृदयस्य षड्विधत्वं निरूपयन्नतस्य ह वा एतस्येत्यादिना पंचदेवपुरुषा निरूप्य तेषां द्वारपालत्व
ज्ञानानंतरं अथ यदतः परो ज्योतिर्दीप्यत इति चतुर्थपादस्य षड्विधत्वप्रतिपादनात्। अतश्च तुर्थपादे पंच पुरुषास्ततः परो दिवो ज्योतिः षष्ठस्तस्यैव सर्वत्र दीप्यमानत्वं निरूप्यत एवांतः
पुरुषे उपसंहरति। तस्मात्पूर्वं त्रिपादस्यामृतं दिवीत्युक्तत्वात्। अस्य त्रिपात्त्वं बोधितं अमृतं उपरितनलोकेष्विति च अतोत्र चतुर्थः पादो निरूप्यत इति सिद्धं। अतः पादानां ब्रह्मधर्मत्वात् ज्योति पा०१
षोत्र ब्रह्मत्वमिति ब्रह्मधर्मनिर्णयार्थमिदमधिकरणं चरणानामौपचारिकत्वव्यावृत्त्यर्थं। एतन्निर्णयेन प्राणादिविद्या निर्णीता वेदितव्याः। छंदोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा १७

इति प्राणाधिकरणमष्टमं

सर्वतःपृष्ठे

त्तमेषु

दिशति। अनेन चायमतिरिक्तो न्याय आपादितः। यत्रैव प्रकरणे ब्रह्मपरत्वे कल्प्यमानेन किंचिद्बाधकं तत्रैव ब्रह्मपरत्वं कल्पनीयमिति न त्वन्यस्मिन्संभवेत्परत्वमिति। अत एव तल्लिंगात्
प्राणशब्दवाच्यं ब्रह्मेति। ज्योतिश्चरणाभिधानात्। इदमामनंति। अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु नुत्तमेषूल्लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति। न च ज्योतिः
शब्देन प्राकृतं ज्योतिराहोस्विद्ब्रह्मैवेति संशयः। असाधारणब्रह्मधर्माभावात्पूर्वपक्षः। सिद्धांते तु चरणस्य ब्रह्मधर्मत्वमिति। एतावानस्य महिमा अतो ज्यायांश्च पूरुषः। पादो
स्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति पूर्ववाक्यं॥ गायत्री वा इदं सर्वं भूतं यदिदं किंचेति गायत्र्याख्यब्रह्मविद्यां वक्तुं तस्याः पादचतुष्टयं प्रतिपाद्य ब्रह्मणश्चतुष्पात्त्वमुक्तं पुरुषसूक्ते
पि अत्र मचतुष्टयस्था जीवाः पादत्वेनोक्ताः। तथा प्रणवब्रह्मविद्यायामपि अकारउकारमकारनादवाच्याश्चत्वारः पादा विश्वतैजसप्राज्ञतुरीया उक्ताः। तद्विष्णोः परमं पदमिति च। ब्रह्म
पुच्छमिति च। सत्यकामब्राह्मणे तु स्य पृष्ठा एव ब्रह्मणश्चत्वारः पादा निरूपिताः। अतः सच्चिदानंदरूपस्य प्रत्येकसमुदायाभ्यां चतूरूपत्वं तत्र केवलानां कार्यत्वमेव। चतुर्थपादस्य तु ब्रह्म
त्वं तत्रापि षड्विधत्वप्रतिज्ञानात् भूतपृथिवीशरीरहृदयानां परिचायकत्वेन षड्विधत्वमनिरूप्य हृदयस्य षड्विधत्वं निरूपयन्नतस्य ह वा एतस्येत्यादिना पंच देवसुषयः। निरूप्य तेषां द्वारपालत्व
ज्ञानानंतरं अथ यदतः परो ज्योतिर्दीप्यत इति चतुर्थपादस्य षड्विधत्वप्रतिपादनात्। अतश्चतुर्थपादे पंचपुरुषा अतः परो दिवो ज्योतिः षष्ठस्तस्यैव सर्वत्र दीप्यमानत्वं निरूप्य तदेवांतः
पुरुषे उपसंहरति। तस्मात्पूर्वत्रिपादस्यामृतं दिवीत्युक्तत्वात् अस्य त्रिपात्संबंधि अमृतं उपरितनलोकेष्विति अतोत्र चतुर्थः पादो निरूप्यत इति सिद्धं। अतः पादानां ब्रह्मधर्मत्वात् ज्योति पा॰१
षोत्र ब्रह्मत्वमिति ब्रह्मधर्मनिर्णयार्थमिदमधिकरणं चरणानामौपचारिकत्वव्यावृत्त्यर्थं। एतन्निर्णयेन प्रणवादिविद्या निर्णीता वेदितव्याः। छंदोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा १७

ब्रुह्म

द्दिर्शनं।ननुनात्रब्र[illegible]चतुष्पान्निरूपितं।किंतुगायत्रीछंदःगायत्रीवाइदंसर्वंयद्दिदंकिंचेतिउपक्रम्यतामेवभूतपृथिवीशरीरहृदयभेदैर्व्याख्यायसैषाचतुष्पदाषड्विधागायत्री।देत
देतदृचाभ्यनूक्तं।तावानस्यमहिमेतितस्यामेवव्याख्यातरूपायांगायत्र्यामुदाहृतोमंत्रः कथमकस्माद्ब्रह्मचतुष्पादभिदध्यात्।यद्वैतद्ब्रह्मेतिब्रह्मपदमपिछंदसःप्रकृतत्वात् तत्परमेवाव
गंतव्यं।ब्राह्म्यादिब्रह्मवाचकत्वसिद्धेः।ब्रह्मोपनिषदितिवत् ब्राह्मेतिच तस्मात्छंदसएवपादाभिधानान्नब्रह्मधर्माःपादाइतिचेत्।नैषदोषः।न थाचेतोर्प्पणनिगदात्।तथातेनद्वारेण।
चेतसोर्प्पणंनिगद्यतेगायत्रीवाइदंसर्वंयदिदंकिंचेतिनहिवर्णसमाम्नायरूपस्यसर्वत्वमनुपचारेणसंभवति।यथासूचीद्वारासूत्रप्रवेशस्तथागायत्रीद्वाराबुद्धिसूत्रस्यप्रतिपाद्येब्रह्मणिप्र
विशेदिति।उक्तमेतद्देवंप्रतिपाद्यतइतितत्राह।तथाहिदर्शनं।तथानेनैवप्रकारेणदर्शनंज्ञानंभवतिस्थूलाबुद्धिर्नाहत्यैवब्रह्मणिप्रविशेदिति।एतेनसर्वामंत्रोपासनाव्याख्याताः।हियुक्त
श्चायमर्थोलोकेयतोयत्रप्रविशतितदुपायेनविशतीति।नत्वदृष्टद्वारादृष्टेसंभवत्यदृष्टकल्पनायाअन्याय्यत्वात्।तस्मात्पादाब्रह्मधर्माः।भूतादिपादव्यपदेशोपपत्तेश्चैवं।।किंचभूताद
योऽत्रपादाव्यपदिश्यंतेभूतपृथिवीशरीरहृदयानिचत्वारिनैवैतानिगायत्र्याःपादाभवितुमर्हंतिब्रह्मपरिग्रहेतूपपद्यंतेयावन्मुख्यमुपपद्यतेतावन्नगौणंकल्पनीयंअयमर्थः।इत्थंहेतौछं
दसोऽपिपादव्यपदेशाद्भवंतितथापिब्रह्मणएवयुक्ताइतिपुरुषसूक्तेऽपितावानस्येत्यस्यब्रह्मपरत्वात्।अस्मिन्वाक्येतुगायत्र्याःपादाएवनोपदिष्टाःकिंतुतेब्रह्मणएवपादाइतितद्वाचक
त्वेनगायत्र्याउपचारेणोपसंहारः।चकाराद्द[illegible]न्निराह्यस्यपादाभवंति।किंत्वर्थस्यैवेति।तस्माद्ब्रह्मवाक्यत्वेभूतादीनांपादत्वमुपपद्यतेनान्यथेति।तस्मात्पादानांब्रह्मधर्मत्वं॥ ॥उपदेशभेदा
न्नेतिचेन्नोभयँविरोधात्॥ ॥पादोऽस्यविश्वाभूतानिसर्वाणिभूतान्येकःपादःपादत्रयममृतंदिवीत्येकोऽर्थः पादेषुसर्वभूतानिपुंसःस्थितिपदोविदुःअमृतंक्षेमंभयंत्रिमूर्द्ध्नोधायिमूर्द्धस्वि

म

सिनप्य

६४ इति ज्योतिश्चरणाधिकरणं नवमं

[illegible]

त्यपरः उरूपसत्कानुरोधे द्वितीय एवार्थः। प्रथमे तावत् ननु दिवीति मंत्रे सप्तम्या आधारत्वं प्रतिपाद्यते। अतः परमित्यत्र पंचम्या अनाधारत्वमत उपदेशाभेदान् पूर्वोक्तपरामर्शाभावान्न ज्योतिषो ब्रह्मत्वमिति चेत्। नैष दोषः। उभयस्मिन्नप्यविरोधात्। मंत्रे दिव्येवोक्तमस्मिन् वाक्ये सर्वत्रोच्यते सर्वत्र विद्यमानस्य दिवि विद्यमानत्वं न विरुध्यते। अतः शब्देन न तत्राविद्यमानत्वं किंतु ततोऽप्यन्यत्र सत्त्वं बोध्यते। तस्मात् सप्तमीपंचमीनिर्देशोन विरुद्धः॥ द्वितीये तु ननु मंत्रे अमृतपदमत्र ज्योतिःपदमत उपदेशाभेदाच्च उर्ध्वश्चपादोहृदयं अतः शाब्दाच्च सर्वस्माद्भेदः प्रतिपाद्यते। अत उपदेशाभेदात् ऐकवाक्यता अस्मिंश्च वाक्ये चरणाभावात् स्वरूपासिद्धो हेतुरिति चेत्। नैष दोषः। उभयस्मिन् ज्योतिःपदे अमृतपदे च प्रयुज्यमाने एकार्थत्वान्न विरोधः पादत्रयमुपरितनलोकेषु चतुर्थं सर्वत्रेति अन्यथा वैशात्संपादनामापद्येत। परिच्छेदविरोधश्च अतोऽमृतज्योतिःशब्दयोरेकार्थत्वेन विरोधाभावादेकवाक्यत्वं। अतोऽत्र चरणसद्भावात्तस्य च ब्रह्मधर्मत्वात् ज्योतिर्ब्रह्मैव। प्राणस्तथानुगमात्। अस्ति कौषीतकिब्राह्मणोपनिषदि इंद्रप्रतर्दनसंवादः। प्रतर्दनो ह वै दैवोदासिरित्यादिना एष लोकपाल एष लोकाधिपतिरेष लोकेशः स म आत्मेति विद्यात् स म आत्मेति विद्यादित्येतदंतं। तत्र वरदाने मामेव विजानीह्येतदेवाहं मनुष्याय हिततमं मन्ये इत्युपक्रम्य त्वाष्ट्रवधादिना आत्मानं प्रशस्य स्वोपासनायाः पापाभावं फलत्वेन प्रतिपाद्य कस्त्वमिति विवक्षायां प्राणो वा अहमस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्वेत्युपक्रम्य आयुषः प्राणत्वमुपपाद्य अमृतत्वं च प्राणस्योपपाद्य प्राणेन ह्येवामुष्मिन् लोकेऽमृतत्वमाप्नोतीति अमृतत्वयोगेन प्रतिपादयति। अत्र संदेहः। प्राणः किमायन्यो ब्रह्म वेति। अत एव प्राणः इत्यत्र प्राणशब्दमात्रसंदेहः। अत्रार्थेऽपि संदेहः बाधकं च वक्ष्यत इति पृथगधिकरणारंभः॥ पा१ तत्र साधकासाधारणधर्मस्याभावात् बाधकानां विद्यमानत्वात् ब्रह्मत्वमिति पूर्वः पक्षः। सिद्धांतस्तु चतुर्भिः सूत्रैः प्रतिपाद्यते तत्र प्रथमं साधकधर्ममाहैकेन त्रिभिर्बाधकनिराकरणं। प्रा १०

मु३

णः परमात्मा न भवितुमर्हति। कुतः तथानुगमात्॥ तथा हि पौर्वापर्येण पर्यालोच्यमाने वाक्ये पदार्थानां समन्वयो ब्रह्मप्रतिपादनपर उपलभ्यते। उपक्रमे तावद् वरं वृणीष्वेतीन्द्रः प्रतर्द्दनोक्तः परमपुरुषार्थं वरमुपचिक्षेप। त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति तस्मै हिततमत्वेनोपदिश्यमानः प्राणः कथं परमात्मा न स्यात्। न हि परमात्मनोन्यद्धिततममस्ति परमानंदरूपत्वात् पापानावाप्त ब्रह्मविज्ञान एव। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावर इति श्रुतेः। प्रज्ञात्मत्वं च तस्यैव संभवति। उपसंहारेप्यानंदोजरोमृत इति एष लोकाधिपतिरित्यादि च तस्मात् सर्वत्रानुगमात्। प्राणो ब्रह्म। न वक्तुरात्मोपदेशादिति चेद् ध्यात्मसंबंधभूमा ह्यस्मिन्। बाधकमाह। यदुच्यते प्राणो ब्रह्मेति तन्न कुतः। वक्तुरात्मोपदेशात्। वक्ता हीन्द्रः आत्मानमुपदिशति मामेव विजानीहीत्युपक्रम्य प्राणो वा अहमस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वेति। स एष प्राणो वक्तुरात्मत्वेनोपदिश्यमानः कथं ब्रह्म स्यात्। तथा च वाचो धेनुत्वोपासनवत्तद्देवतायाः प्राणत्वेनोपासना बोध्यते। अन्ये च ब्रह्मधर्माः प्राणस्य वक्ता इति कथमस्य ब्रह्मोपाख्यानत्वमिति चेत्। न। अध्यात्मसंबंधभूमा ह्यस्मिन्। अस्मिन् प्रकरणे अध्यात्मसंबंधः आत्मानमधिकृत्य यः संबंधः आत्मशब्दो ब्रह्मवाचीवस्तुतो जीवस्य ब्रह्मत्वाय नथावचः तस्य संबंधस्तद्धर्माः तेषां बाहुल्यं प्रतीयते एष लोकपाल इत्यादि यावद्यथा कथंचिदपि ब्रह्मप्रकरणत्वं सिध्यति तावदन्यप्रकरणत्वमयुक्तमिति हि शास्त्राध्ये। प्राणस्य प्रज्ञात्मत्वं स्वातंत्र्येणायुर्दातृत्वं। न वाचं विजिज्ञासीत वक्तारं विद्यादिति चोपक्रम्य तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे अर्पिताः स एष प्रज्ञात्मानंदोजरोमृतो न साधुना कर्मणेत्यादि विषयें इयव्यहारे अ न भिन्नं तं प्रत्यगात्मानमेवोपसंहरति। स म आत्मेति विद्यादिति चोपसंहारः। तस्मादध्यात्मसंबंधबाहुल्यात् इति ब्रह्मोपदेश एवायं तर्हि बाधकस्य का गतिरित्यत आह॥ ॥शास्त्रदृष्ट्या तूपदेशो वामदेववत्। पूर्वसूत्रेणापरिहृतमत्र परिहरति तु शब्दः। अयं दोषो व्यवहारद

ध्योपदेशोऽहं ब्रह्मेत्यार्षेणादर्शनेन तदुपदेशः ॥ ननु तत्त्वमसि अयमात्मा ब्रह्मेति वाक्येषु जीवस्य ब्रह्मत्वं बोध्यते । तत्र प्रत्यधिकारं शास्त्रप्रवृत्तेरिति न्यायेन स्वात्मन एव ब्रह्मत्वावगतिमु
ख्यान प्रतर्दनस्येंद्रजीवब्रह्मत्वावगतिरूपा मननं वा गुरुपार्थ्याया । अतः शास्त्रदृष्टिरपि नैवंविधा । केवलं मम चैतन्यमात्मस्यता दृशो ब्रह्मण ऐक्यावगतिः विरोधात्तत्त्वमस्यादिवाक्यार्थोऽध्यव
सीयते । ननु ब्रह्मधर्मा जीवे वक्तुं शक्यं ते इत्याशंक्य परिहरति । वामदेववत् । तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति । य एवं प्रत्यबुध्यत सर्वे संभवति तत्र सर्वेषां सर्वभावे
सर्वात्मत्वप्रसंगात् । सर्वमेकमेवेति वक्तव्यं ततः कारणात् य एव सर्वभाव इति मनुरभवं सूर्यश्चेत्यवयुत्यानुवादोऽनुपपन्नः । तच्च यथाज्ञानानावेशात्सर्वधर्मस्फूर्तिः एवमत्रापि ब्रह्मावेशादुपदेश
इति च शास्त्रवशाद्योऽब्रह्मधर्मा एव तदावेशेन क्रियमाणत्वात् । न चैषव[illegible]च्च स्तवत्राकृते जन्मान्तरे ह्धीब्रह्मप्रसाद्यते जिनः । तेनैव चतुर्भुजरिविष्णुर्यं जिन इति हि तद्वचनं भागवते । तस्मादयुक्तं ब्रह्मध
र्मवचनं । ननु स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हीति सूत्रे सुषुप्तौ ब्रह्मसंपत्तौ च ब्रह्मधर्माविर्भावो न त्वंपदे इति कथमेवमिति चेत् । मैवं । उपदेशभावनादिप्रायिकदाचित्कमाधिकारिविषये
ब्रह्मप्राकट्यमित्योगी कर्तव्यं मय्येव सकलं जातमित्यादिवाक्यानुरोधात् इहैव समवनीयन्ते प्राणाः ब्रह्मैव सन् ब्रह्माप्येतीत्यपि चाविर्भावापेक्षं तस्य च प्रायिकत्वात् । सत्त्वे फलत्वमाह । जीवन्मुक्ता
नामपि परममुक्तेर्वक्तव्यत्वाच्च । असंप्रज्ञातसमाधाविवानिवृत्तदशायामेव शरीरवियोजकाभावात् वागादिमात्रं लीयते तस्य च प्राप्तत्वादेव नार्चिरादिगतिः । तथापि प्रायिकत्वात्सूत्रगी
तादिषु तद्वचनं सगुणनिर्गुणभेदेन नियमवचनं त्वप्रामाणिकमेव । ब्रह्मवादे गुणानंगीकाराच्च । तस्मादुक्तमुक्तं शास्त्रदृष्ट्या तूपदेशवदिति ॥ ॥ जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैवि पा॰१
ध्यादाश्रितत्वादिह तद्योगात् ॥ ॥ अन्यसाधकद्वयमाशंकते । ननु यद्यपि ब्रह्मधर्मास्त्वयांमः प्रकरणेऽप्ययं तेन तज्जीवधर्मा मुख्यप्राणधर्माश्च बाधकाः सन्तीति । न वाच्यं विजिज्ञासीत वक्तारं वि । १९

भि

घारित्यादिश्रुतेर्वागादिकरणाध्यक्षस्य जीवस्य विशेषत्वमधीयते। अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्येति शरीरधारणं मुख्यप्राणधर्म्मः। मा मोहमापद्यथ यथाऽहमेवैतत्पंचधात्मानं
प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति श्रवणात्। यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राण इति जीवमुख्यप्राणवाच्यत्वे प्रज्ञाप्राणयोः सहवृत्तित्वादुपचारो युज्यते। उक्तं तिष्ठ· नैवँ विलक्षणस्य ब्र सर्वथा
ह्मणः। तस्माज्जीवमुख्यप्राणलिंगयोर्विद्यमानत्वान्न ब्रह्मप्रकरणमिति चेन्न। उपासात्रैविध्यात्। अयमर्थः किमत्र चोद्यते जीवमुख्यप्राणलिंगात् ब्रह्मधर्माणां जीवपरत्वं तत्प्राणामपि स्वतंत्रत्वं वा
लिंगद्वयस्यापि ब्रह्मधर्मत्वमुच्यतामिति वा। आद्यः पूर्वमेव परिहृतः। न हि ब्रह्मधर्मा अन्यपरत्वेन परिणेतुं शक्या इति। द्वितीये दूषणमाह। उपासात्रैवि ध्यात्। तथा सति उपासनं त्रैविधं स्यात्। तद्वा
क्यभेदप्रसंगान्न युक्तं। तृतीयेनुपपत्तिरुच्यते। जीवधर्मा ब्रह्मणि न विरुध्यंते आश्रितत्वात् जीवस्यापि ब्रह्माधारत्वात्। तद्धर्मा अपि भगवदाश्रिता एवँ इहेतुनयत्र संबंधो ब्रह्मवादे। मुख्यप्राणेनुत
द्योगात्। तात्तेन योगं तद्योगः तस्मात्। प्राणधर्मा भगवति न विरुध्यंते। प्राणस्य भगवत्संबंधात्। तद्धर्माणामपि भगवत्संबंधः। अथवा वक्तृत्वादयो न जीवधर्माः किंतु ब्रह्मधर्मा एव जीवे आश्रितत्वाद्भासंते
परात्तु तच्छ्रुतेरिति न्यायात्। प्राणेपि तथा। स्वाप्ययसंपत्त्योर्जीवस्य ब्रह्माश्रितत्वं आध्यात्मिकाधिदैविकरूपत्वान्न संयोगः प्राणस्य तु संयोग एव। तस्मात्सर्वे धर्मा ब्रह्मणि युज्यंते। सहोत्क्रमस्तु क्रिया।
तामशास्त्रोर्भगवदीययोः देहे सहैवस्थानं सहोत्क्रमणमिति भगवदधीनत्वं सर्वस्यापि बोध्यते। ननु प्राणस्य यानुगमादिति प्राणत्वेन ब्रह्मैव प्रतिपादितं तत्कथं धर्मयोरुत्क्रमणमिति चेत्। अत्र ध
र्मिणोरेकत्वपृथक्त्वनिर्देशयोर्विद्यमानत्वात्। प्राणो वा अहमस्मि प्रज्ञात्मेत्यत्रैक्यमात्रं निर्दिष्टः तरत्वेकैकस्य धर्मस्य प्रशंसा। यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राण इत्युपसंहारोनं। पुनस्तयो
रेवोत्क्रमणप्रवेशाभ्यां सहस्थैवास्मिन् शरीरे वसतः सहोत्क्रामत इतीत्युपक्रम्य सुषुप्तिमूर्छामरणेषु प्राणाधीनत्वं सर्वेषामिंद्रियाणामुक्त्वा अस्य व्याहृत्यर्थप्रज्ञायैकांशप्रतिपाद्योपसंहरति। पुन।

मैधर

२ क्रियाज्ञानश्रा

नृं२ प्र२ तं५

ज्ञनिन्त्राक्तेरुत्कर्षं च कुं‍च्च्य पर खलु यथा प्रज्ञायामित्यात्मनश्चितापेतो यः कश्चन सिध्येतेत्यंतेन ज्ञानत्रात्कृत्कर्षं प्रतिपाद्य धर्ममात्रत्व निराकरणाय ज्ञानत्रा किमंतं भगवंतं निर्दिश्य तिन्हि प्रज्ञातव्यमि
त्यात्म्य मंतारं विद्यादित्यंतेन । तदनुज्ञानक्रियाशक्त्योर्विषयस्तन्मात्ररूप जगतो भगवदन्वेदं प्रतिपादयन्स एषँ ज्ञात्मानं दोनरोमृत ऽस्फपमं हरति ब्रह्मधर्मैः अतः क्रियाज्ञानविषयरूपो भगवा
नेति प्रतिपाद्यन तावन्मात्रं न ततोप्यधिक इत्येकोपासनैव विहिता । तस्मादुक्तरूपत्वात्सर्वात्मकं ब्रह्मेति महावाक्यार्थः सिद्धः ॥ ॥इति श्रीवेदव्यासमतवर्त्तिश्रीवल्लभाचार्य̐ते ब्रह्मसूत्राणु विरचि
भाष्ये प्रथमाध्याययस्य प्रथमपादः ॥ ॥ॐ॥१॥ ॥सर्वत्र प्रसिद्धोपदेशात् ॥ ॥समन्वये प्रथमेध्याये सर्वेषां वेदान्तानां ब्रह्मणि समन्वयो वक्तव्यः । तत्रोक्ता या ह्युपासनावाक्यानां मुख्यवाक्ये शेषफलो
पकार्यंगत्वं । ब्रह्मवाक्यानां पुनर्निःसंदिग्धानां समन्वयः स्वतः सिद्धः संदिग्धानि द्विविधानि ज्ञातो यतस्य ॥ तदर्थं वैतद्विचारि ब्रह्मणि व्यवहारोस्ति कश्चिन्नवेतितत्र प्रथमस्तु एव व्यवहारः स्थापितः ।
स्य यतो वाचो निवर्त्तन्त इत्यादीनां विशेषेणादमित्थंतया निरूपण निषेधनपरत्वं एवमेव कार्यसिद्धेः । अधीतानां ब्रह्मवाक्यानां चतुर्लक्षण्या ब्रह्मपरत्वे सिद्धे श्रवणं सिद्ध्यति श्रुतस्य कालान्तरेप्यसंभाव
गानाम ना विपरीतभावना । निवृत्त्यर्थं पूर्वक्षिप्तानां [illegible] नपेक्षितानां मुद्रापेनान्येषामपेक्षितानामावापेन तस्यैवाप्यर्थस्य निर्द्धारणे मननं भवति । ततोप्येवं ध्यानादिसमाधं तनूप निदिध्यासनरूप मनसि
सर्वतो निवृत्त व्यापारे स्वयमुपलब्धनिजसुखानुभवरूपं ब्रह्म इदमेव ब्रह्मज्ञानमिति । अतस्मादृग्रानुभवैकवेद्यत्वाद्यक्रमविषयत्वं पाकजो जनत्वमिवत् । अतः श्रवणांगमीमांसायां माहात्म्यज्ञानफ
लायां भगवद्वाक्यानामन्यपरत्वेन्यवाक्यानां च भगवत्परत्वे दिव्यधर्मादिव्यधर्मव्यत्यासेन वैपरीत्यं फलमापद्येत । तदर्थं दिव्यधर्मनिर्द्धारो हितो या धिकरणे विचारितः वेदाएव वाचका श्चेतो किंकमे पा.२
वकर्मेति ततः प्रसंक्तो किंकत्वाय विधिनिषेधमुखेनाधिकरणद्वयं । समन्वयेहतिरूपं । तदनुपद्यमेपादेशद्वसंदेहो निवारितो निश्चितार्थे । तत्रापि प्रथमं प्रत्यपमंदेहो निवारितो द्वयेन प्रकृतिसंबं २०

त्रयेशा

धोप्यधिकरणं। पुनरंतिममधिकरणं संक्षेपनिराकरणाय। एवं प्रथमे पादे ब्रह्म संदेहो निवारितः। ये तु पुनः क्वचित्सगुणनिर्गुणभेदं प्रतिपादयंति ते स्वयमेव स्वस्य ब्रह्मजिज्ञासानधिकारं बोध
यंति ब्रह्मवादे सांख्यानामिव गुणानामनंगीकारात्। नो निकृगुणानामसंबंधाद्यर्थमिवद्यध्यायारंभः। अन्यथा सर्वस्यापि तत्कारणत्वेन तत्संबंधस्य विद्यमानत्वादन्यनिराकरणेन तत्प्रतिपादक
त्वनिर्द्धारिकाधिकरणानां वैयर्थ्यमेव। अर्थसंदेहनिराकरणार्थं द्वितीयाद्यारंभः। तत्रार्थो द्विविधो जीवजडात्मकः प्रत्येकसमुदायाभ्यां त्रिविधः। तत्र प्रथमं जीवबुरः स्मरेण संदेहा निवार्यंते॥ उ
दमाम्नायते सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीत अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यादि तत्र
वाक्योपक्रमे सर्वं खल्विदं ब्रह्मेति सर्वस्य ब्रह्मत्वं प्रतिज्ञाय तज्जलानिति सर्वविशेषणं हेतुत्वेनोक्तात्तत्त्वेनोपासनमुक्तं न चायं ग्रामविधिः ना वाक्यार्थेलक्षणाप्रसंगात् कारणत्वेन सामान्यत एव
सिद्धत्वाच्च। अतः सर्वजगतो ब्रह्मत्वेनोपासनमुक्तं इदमेव पुराणादिषु विराट्त्वेनोपासनं। अतः परमग्रिमवाक्यार्थे संदेहः क्रतुं कुर्वीतेति क्रतुधर्मो यत्न इति यावत्। तस्य स्वरूपं मनोमयः प्राणश
रीर इति उपासनाप्रकरणत्वादुपासनेनैवोपात्तं मनोमय इति प्रमाणाभ्यंतो वेद उक्तः। प्राणशरीर इति कार्यकारणयोरभेदोपचारः। अग्रे सत्यसंकल्पादिधर्मवचनात् किमयं तिहानमयो जीव ब॰
ः ब्रह्मत्वेनोपास्यः उत ब्रह्मैवांतर्यामीयः पुराणेषु स्वस्म उक्तः। त्रैते पूर्ववाक्ये जडस्य जगतो ब्रह्मत्वेनोपासनस्योक्तत्वाज्जीवस्यापि ब्रह्मत्वेनोपासनमेव युक्तं न त्वाहत्येव ब्रह्म वाक्यं न विदुमर्ह इति वि
तानं ब्रह्मत्वे हे दे। इति शास्त्रांतरेभ्यः सत्त्वाच्च तस्मात्कार्यकारणयोरभेदाज्जीव एव ब्रह्मत्वेनोपास्य इत्येवं प्राप्ते उच्यते सर्वत्र प्रसिद्धोपदेशात्। अथ खल्वित्यादि ब्रह्मवाक्यमेवं कुतः सर्वत्र प्रसि
द्धोपदेशात्। ऽर्थः तेषु पदेशः तदुपासना। तत्र परमशांतस्य सर्वस्य जगतो ब्रह्मत्वेनोपासनया शुद्धांतःकरणस्य सर्ववेदांतप्रसिद्धब्रह्मोपदेशा एव युक्तो मननरूपः न तु क्वचित्सिद्धस्य जीवो

स्योपासना। शाखांतरे त्वयं आनंदमयस्यैव कथ्यत्वात्तथा युक्तं। न विहितस्थानस्मादानंदरूपप्राणशारीररूपो वाक्यार्थः। ननु क्रतुमयपुरुष इति यथासंकल्पमस्मिन्हेत्क घनात्लोकांतरभा
विफलार्थमस्योपासनेनैव युक्तानंतु ब्रह्मतानस्यतादृशं फलं युक्तमित्याशंक्य परिहरति। विवक्षितगुणोपपत्तेश्च। विवक्षिता लोकांतरे नादृशरूपप्राप्तिः साप्रकृतेप्युपपद्यते भगवत्स्वरूपला
भोस्मारूप्यलाभाद्यानचब्रह्मा। धिक्कर्तेत्यप्रमशास्तुपायो युक्तः। सत्यसंकल्पादिवचनं च ब्रह्मवाक्यत्वपोषकमिति चकारार्थः। न चैतावतापि नैकांततो ब्रह्मवाक्यत्वमुपपन्नेरूपयत्रापितुल्यत्वा
न दित्याशंक्य परिहरति। अनुपपत्तेस्तु न शारीरः। न च प्राणशारीररूपो जीवो न भवति तिरोहितानंदत्वेन निराकारत्वात्। अथ्यामेनन थाचेत्वनुपास्यत्वमेव इदानीमेवोपासकस्यापि तथात्वा
त्। न च प्राणादेर्लौकिकत्वं उपदेशानर्थक्यप्रसंगात्। अत आनंदरूपप्राणशारीररूपत्वाभावान्नवाक्यार्थो जीवः। हृदयपद्मस्या त्रैव निहितत्वादनुशाख्यः। वितानमयेष्वैप्रासविवेकेनधर्मा। भा.सा.
स्यैवोपासना। ननु ब्रह्मतादृशरूपफलाभिप्रायं न विष्यतीति परिहरति। कर्मकर्तृव्यपदेशाच्च। एतमितः प्रेत्याभिसंभवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शांडिल्य इ
ति श्रेयफलवाक्ये एतं प्राणशारीररूपं कर्मत्वेन ध्येयत्वेन प्राप्यत्वेन च व्यपदिश्य निकर्तृत्वेन च शारीरं व्यपदिशति। न च जननीयरूपाकथनेनादृशं फलं सिध्यतीति कारार्थः। अधिकरण
संसर्गत्वद्योतकश्च। शब्दविशेषात्। इदमाम्नायते। यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतंडुलो वैवमयमंतरात्मन्पुरुषो हिरण्मय इति। तत्र संशयः। हिरण्मयः पुरुषः किं जीवः उ
त ब्रह्मेति। उपक्रमबलीयस्त्वे जीवः उपसंहारबलीयस्त्वे ब्रह्मेति। यद्वैकस्यान्यपरत्वेनैकार्थतासंभवति तद्बलीयस्त्वमिति सिद्धं सर्वतंत्रैस्तत्र चतुर्विधमत्र निरूपणार्थं जीवस्यैवाराधमात्रस्यां पा०२
तर्हृदयेप्रतिपादकमिदं वचनं। फलतो हिरण्मयत्वमिति। न चैतादृशाभासमानत्वं ब्रह्मणोऽप्युक्तमतो जीवप्रतिपादकमेवेदं वाक्यमिति प्राप्ते उच्यते। शब्दविशेषात्स हिरण्मयः पुरुषो न जी २२

प

नजीवः॥

वस्य फलमपि तस्यामेरेव फलत्वात्। नाप्ययं नियमस्तस्यामेवमन्तौलिय इति। अतः आद्येनैव विशेषस्योक्तत्वात् हिरण्मयः पुरुषो जीवः। न तु हृदये विद्यमानत्वाद् निमात्मैव जीवोस्तु रुद्र इति चे
न्नात्र॥ ॥स्मृतेश्च॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। इति। न तु सर्ववेदानां प्रतिपाद्यत्वं तस्य भगवतो वाक्यं कथं स्मृतिरिति उच्यते। तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेः केवलोपनिष
द्वेद्यं ब्रह्म न प्रमाणांतरवेद्यं। ततश्चार्जुनस्य शिष्यरूपेण प्रपन्नस्य बुद्धिं कृत्वा भावाद्भगवद्वाक्ये निर्विचिकित्सविश्वासाभावात् रथित्वेनैव स्थापयित्वा तनाहत्रायनाहत्रा देशकाल
योरुपनिषदामवक्तव्यत्वात् गुरुरूपतादृशरूपं निश्वसितवेदोक्तभजनकं स्मृत्वा तदर्थमपि स्मृत्वा भगवान् पुरुषोत्तमो वाक्यान्युक्तवान्स्म निरूपाणि। ततो ब्रह्मविचारे तान्यपु
राहृत्य चिंत्यंते। भजनस्य भगवान् तदधिकारेणाब्रह्मार्थिद्यां। निरूप्य स्वरूपानुतयामर्वगुह्यतमु मित्यादिना भक्तिप्रपत्ती एवोक्तवान्। अत्रेतोंगत्वेन सर्वं मद्यं निर्णयात् उक्तादस्य ध्यवमेयं। तथैवा
र्जुन विज्ञानात् करिष्ये वचनं तवेति। चकारात् तन्मूलभूत निष्ठाश्योपुच्यते। व्यासस्यापि भगवदंशानां ज्ञानात् दोषः। उपक्रमबलीयस्त्वमात्रांश्च परिहरति। अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति
चेन्न निचाय्यत्वादेवं व्योमवच्च॥ ॥ननु व्यापकस्येश्वरस्य हृदयदेशास्थितिरणुकाड्रीह्यादिरूपत्वं च। अतः अर्भकमल्पकमोकः हृदयं स्थानं यस्य तत्त्वात् व्रीह्यादिभ्यस्त्वाच्च न परमा
त्मा वाक्यार्थ इति चेन्न। निचाय्यत्वात् पूर्वपक्षं परिहरति हृदयं तावद् ध्यायत इति तदायतनत्वेन प्रतिपाद्यते। निदिध्यासनानंतरं हि साक्षात्कारः तद्दर्शनः करणए वेति नि
चाय्यत्वं न केवलं हरिरूपाति विशेषः। द्वितीयं परिहरति। एवं व्योमवत्। एवं व्रीह्यादिभ्यस्त्वतयायप्रतिपादनं चतुर्विधं स्तांन रखस्याप नायथ यथा चत्वार उपरवाः प्रादेशमात्रा इति तथा
तद्धृदयाकाशे प्रकटस्य सच्चिदानंदस्वरूपं सर्वतः पाणिपादं तस्य तत्त्वरूपमिति। पूर्वपक्षसिद्धांतयोश्चकारद्वयमेतादृशवाक्यांतरे पूर्वपक्षसिद्धांतयोराधिक्योपपत्तिसमुच्चयार्थं तेन।

नएवप्राणइतिचेदधिकरणांतरमपिसूचितमितिसंभोगप्राप्तिरितिचेन्नवैशेष्यात्॥ बाधकमात्रंचपरिहरति।यदिसर्वेषांहृदयेभगवान्जीवश्चास्तिचेत्तदाजीवस्येवतस्यापिसुख
दुःखसाक्षात्कारस्तत्साधनादिपरिग्रहश्चप्राप्नोतीतिचेन्न।वैशेष्यात्।विशेषस्यभावोवैशेष्यं।तस्मात्सर्वरूपत्वमानंदरूपत्वंस्वकर्तृत्वं विशेषः।तद्भावोब्रह्मणिवर्ततेनजीवइ
तिजीवस्यैवभोगोनब्रह्मणइति।वैशेष्यपदादयमर्थःसूचितः।अपेक्षितएवभोगोनापेक्षितइति नतुतस्यभोगाभावएवाग्रिमाधिकरणविरोधात्।यथेंद्रियाधिष्ठातृदेवानांतत्वमर
सादिवाक्येन जीवस्यापितथात्वेनस्यापितद्देवभविष्यति॥ ॥अत्ता चराचरग्रहणात्॥कठवल्लीषुपठ्यते।यस्यब्रह्मचक्षत्रंचोभेभवतओदनः।मृत्युर्यस्योपसेचनंकइ वेदय त्था
त्रसइति।अत्रवाक्येब्रह्मक्षत्रयोरोदनत्वंवदद्यत्तद्यार्थस्यभोक्तृत्वमाहतेनचसंशयः॥किंजीवोब्रह्मवेति।सच्चिदानंदरूपत्वंसर्वोपास्यत्वंपूर्वाधिकरणद्वयेनसिद्धंसर्वभोक्तृत्वंसा
धयति।ब्रह्मक्षत्रयोरन्नरूपवध्ययोःसर्वमारकस्यचमृत्योर्भक्षयिताजीवोनभवत्येवेतिकथंसंदेहइतिचेन्।उच्यते।ओदनोपसेचनरूपकत्वाज्जीवधर्मत्वंस्थानात्तानाच्चनादिसर्वगत
स्यचहृदयेपिप्रतिभासमानस्यकइत्थावेदयत्रसइत्यज्ञानमुपपद्यते।अलौकिकसामर्थ्याच्चिसंदेहः।नचनिषिद्धत्व लौकिकभोजनवन्निरूप्यमाणत्वात्स्थानात्तानाच्चक।किंउपा
सनोपचितालौकिकसामर्थ्यंमहादेवादिरत्ताभविष्यति॥नतुतद्विरुद्धधर्माभगवान्भवितुमर्हति।अश्लिष्टकर्मत्वादिधर्मवान्।तस्माज्जीवएवोपासनोपचितमहाभावोवाक्यार्थइ
त्येवंप्राप्तेभिधीयते।अत्ताचराचरग्रहणात्।अत्ताभगवानेव।कुतः।चराचरग्रहणात्।चरंसर्वप्राणिवधार्थंपरिभ्रमन्मृत्युः।अचरंब्रह्मक्षत्ररूपंकस्याप्यचाल्यंतयोरत्तानजीवोभवितु पा॰२
मर्हति।यत्राप्यतिशयोदृष्टःसस्वार्थानतिलंघनादितिन्यायात्।अस्मदादिप्रतिपन्नस्यैवलौकिकवद्वचनंभोक्तृत्वाय।प्रलयकर्तृत्वान्नात्रप्रयुक्तंवंसर्वत्रविद्यमानस्याप्यज्ञायमानत्वा २२

न्फलतः स्वाताज्ञानमुक्तं। ब्रह्मसत्त्वयोरपि मोक्षापेक्षित्वात् मत्स्यसंबंधमात्रेण भगवति भोक्तृरिप्रवेशात् यद्योग्यरूपत्वमेवोदनत्वं प्राणानां तत्रैव समलेवेयात् तत्स्फुरपि तत्रैव तनीनो
येजन्ममरणाद्यनावाय भगवत्येव प्रविष्टा तिनस्मादस्मिन्न वाक्ये ब्रह्मसत्त्वमत्तृनां भोग्यत्वेन ग्रहणादत्ता भगवानेवेति सिद्धं॥ ननु किमित्येवं प्रतिपाद्यते सर्वपद्यन्यायेन यमोन्यो
वाम्रन्फसाधनीतन्यस्ववत्रो मर्वं करोतीति नीववाक्यमेव। किंनस्मादित्यत आह। प्रकरणाच्च प्रकरणं हीदं ब्रह्मणः न जायत इत्यारभ्यासीनो दूरं ब्रजतीत्यादिना माहात्म्यं वदत्तं तेयस्यव
ब्रह्म च तत्त्वं चेत्याह। अतः प्रकरणानुरोधात् सर्वोक्तिप्रकारेण ब्रह्मवाक्यत्वमिति। अन्यथाप्रकृतहानाप्रकृतकल्पने स्यातामिति चकारार्थः॥ ॥गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्॥ न
स्यैवात्रोपपद्यते। ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये। छायातपौ ब्रह्मविदो वदन्ति पंचाग्नयो ये च त्रिणाचिकेता इति। किमिदं ब्रह्मवाक्यमाहोस्विदन्यवाक्यमिति अस्य
वाक्यस्योत्तरशेषत्वे जीवप्रकरणपठितत्वान्न ब्रह्मवाक्यत्वं पूर्वशेषत्वे तु ब्रह्मवाक्यमिति प्रकरणनिर्णयः। मध्यपाठादेवं संदेहः। अर्थविचारे तु द्विवचननिर्देशात् पूर्वशेषत्वे बद्धमुक्त ×क्र५
जीवौ भविष्यतः। उत्तरशेषत्वे त्विंद्रियमनसो भयथापि न ब्रह्मवाक्यं द्वयोर्मुख्यत्वेन प्रतिपादनात्। ब्रह्मवाक्येपि न प्रयोजनसिद्धिः। अथ मन्यसे उपनिषदपाठादन्यत्राभिहितात् जी
वब्रह्मपरत्वेपि तयोरभेदात् ब्रह्मपरत्वेव वाक्यस्य युक्तेति। तथापि कस्य निर्णायकत्वं प्रकरणस्यार्थस्य वेति तयोरपि संदिग्धत्वादयुक्तो विचार इति चेत्। उच्यते। संदेहवारकं शास्त्रं परत्रा
स्यात्तु निर्णयः। जीवाद्युत्कर्षज्ञापकेन द्वयोर्वाक्येपि न क्षतिः। गुहागतपराह्याभ्यामित्यर्थः। ऋतं पिबन्ताविति अत्रैवं संशयः। किं जीवद्वयं निरूपयति। आहोस्वित् जीवब्रह्मणी वेति। तत्र ब्रह्मप्र
करणस्य सामान्यत्वात् यस्तु विज्ञानवान्भवतीत्यग्रे विद्वदविद्वतोर्वक्तव्यत्वात् तदर्थमुभयोः प्रथमं निर्देशाद् उचितः। मंत्रेपि ऋतं स्वर्गापवर्गलक्षणं सुखं मार्गद्वयस्यापि विहितत्वात् सुकृ

गा

तल्लोकत्वं गुहा। तत्र विचारो हृदयं वा। आत्मपेक्षया त्वेकवचनं। परमपरार्धे सत्यलोकः तत्रोभयोर्वी त्वञ्च विद्यया। पिहितप्रकाशात्वाद् विदुषः छायात्वं ब्रह्मत्वानेन। निप्रकाशात्वादात
पत्वं विदुषः। अत एव विदुषः रूपं ब्रह्मविदो वदंति पंचाग्नयस्त्रिणाचिकेताश्चेतरां। इंद्रियमनसोस्त्वचेतनत्वान्नवाक्यार्थसंगतिः वाक्यार्थयोगे हि विशेषणनिर्णयः। तस्माद्बुद्धमुक्तजीवपरत
यो यत्र चात्मत्मकरणपागत्र ब्रह्मवाक्यमिति एवं प्राप्ते उच्यते। गुहां प्रविष्टावात्मानौ गुहा हृदयाकाशः। तत्र सकृदेकस्मिन्प्रविष्टौ जीवपरमात्मानावेव। अनेन जीवेनात्मनानुप्रविश्य
त्सुनयोः प्रवेशाश्रवणात् न ह्येकस्मिन् हृदयाकाशे जीवद्वयं प्रवेष्टुमर्हति। अयमर्थस्त्वेवं संभवति। पूर्वाधिकरणे यथा निलषितयोगो भगवति साधितः। प्रकारांतरेणापि ऋतं सत्यं परं ब्रह्मसे
ति ऋतसत्ययोर्ब्रह्मत्वप्रतिपादनात् स्वरूपामृतपानात्। सुकृतमपि ब्रह्मैव तस्मात्तत्सुकृतमुच्यत इति श्रुतेः। स एव लोकः। उपचारात् षष्ठी। अक्षरं वा। परमपरार्द्धोपरि। तत्रत्यानोपरिदृ
श्यमानत्वात्। छायाप्रतिमारूप्यं सायुज्यं गतस्य जीवस्यापि तथात्वाह्लतेपि विशिष्टं ब्रह्मप्रकटानंदत्वात्। आतपः परोक्षवादः कांज्ञत्रयेपितह्लाद इति त्रयाणां ग्रहणं। अतो युक्त एवाय
मिति हि शाह्लाघः। नन्वयं हृतवात्कमेवमिति विचारः। तद्दर्शनात् तयोर्दर्शनं तद्दर्शनं तस्मात्। जीवब्रह्मणोः प्रतिपादनीयत्वात्। येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति
चैके। एतद्विद्यामनुशिष्टस्त्वयाहमिति जीवः पृष्टः। अन्यत्र धर्मादन्यत्रास्मात्कृताकृतादन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति ब्रह्म। पृष्टं तत्र ब्रह्म निरूप्य जीवं विनिरूपय
न् उभयोरुक्तत्वेन महाभोगं निरूपयन् फलार्थं मध्ये स्वरूपं कीर्तयति। अतो ब्रह्मवाक्यमेवैतदिति सिद्धम्। विशेषणाच्च। विशेषणानि पूर्वोक्तानि जीवब्रह्मणोरेव संगतानि अग्निं पा॰२
वा। आत्मानं रथिनं विद्धि सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति जीवप्राप्यं ब्रह्मेत्यत उभयोरेव सर्वव्याहृत्याकथना। दयिमयं पूर्यालोचनयापीदं ब्रह्मवाक्यमेव। द्वासुपर्णेति निः २३

ह्ला अ१

मं दिग्धं च कारः प्रकरणोक्तसर्वोपपत्तिः समुच्चयार्थः ।अंतर उपपत्तेः ।य एषोक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति ।तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति व
र्त्मनी एव गच्छतीत्यादि श्रूयते ।तत्र संशयः प्रतिबिंबपुरुषस्य ब्रह्मत्वेनोपासनापरमिदं वाक्यं ब्रह्मवाक्यमेवेति वा ।विरुद्धार्थवाचकं चात्र संदेहः ।तत्र दृश्यत इति वचनात् ।प्रतिबिं
बपरायं ब्रह्मप्रकरणस्य च समाप्तत्वादेषा सोम्य ते स्म द्विद्या चात्मविद्या चेत्युपसंहारदर्शनात्तत्सिध्यर्थं उपासनापरत्वेनैव वाक्यस्य युक्ता अविरोधे हि ब्रह्मपरता ।उपास्यत्वेन ब्र
ह्मधर्माणामत्रयो[illegible]भविष्यतीत्येवं प्राप्ते उच्यते ।अंतर अक्षिमध्ये दृश्यत इत्युक्तः परमात्मैव कुतः उपपत्तेः ।उपपद्यते हि तस्य दर्शनमार्षं ।सर्वत्र ब्रह्मपत्र पत्र बहिः संनिधानेनास्य
स्थानस्योक्तत्वात्त्वत्र भगवंतमुपदिशतीति लोकं वाव ते वोचत्वहं तु ते तद्वक्ष्यामीति मह उपक्रमाच्च ।प्रतिबिंबमात्रस्य च न पुरुषत्वनियमः ।तस्माद्विरोधाभावात्ब्रह्मवाक्यमेव ।स्था
नादिव्यपदेशाच्च ।एतं संयद्वाम इत्याचक्षत एतं हि सर्वाणि वामान्यभिसंयंतीति एष उ एव वामनीरेष हि सर्वाणि वामानि नयतीति एष उ एव भामनीरेष हि सर्वेषु लोकेषु भातीति ।वामा
नि कर्मफलानि तेषामेव मनोहरत्वेन तदर्थं कर्मकरणात कर्मफललयः कर्मफलदानं च यत इति स्वर्गापवर्गफलदातृत्वमुक्तं ।सर्वलोकेषु भानं च ।एष इति तमेवाक्षिपुरुषं निर्दिश्य
स्थानादिव्यपदिश्यते ।न हि प्रतिबिंबात्मनः स्थानादिव्यपदेशः संभवति ।चकारादेतत्तुल्यवाक्यस्याप्ययमेवार्थः ।इंद्रविरोचनप्रजापतिसंवादे च घयोयं भगवोप्सु परिख्यायत इत्या
सुरं ।न तु य एषोक्षिणि पुरुषो दृश्यत इत्यादि ।तस्मादक्षिपुरुषो ब्रह्मैव ।सुखविशिष्टाभिधानादेव च ।ननु किमिति निर्बंधेन ब्रह्मवाक्यत्वं संपाद्यते उपासनापरत्वे को दोष इत्याशंक्या
ह ।सुखविशिष्टाभिधानात् ।एतदमृतमभयमेतत् ब्रह्मेति ।यद्यत्रोपासना विधीयेत ।एष आत्मेति तदात्रामृतादिवचनं व्यर्थं स्यात् ।तद्धर्माणां पूर्वमेव प्राप्तत्वात् ।तस्मादमृतमानंदः ।

अभयं चित् ब्रह्म सच्चिदानंदरूपमात्मेत्युक्तं भवति। अत एष इति। अक्षिपुरुषं निर्दिश्य सुखविशिष्टमभिधीयते स चितो न ब्रह्मव्यापकत्वमिति सुखमेव निर्दिष्टं अतः सुखवि
शिष्टाभिधानादेव ब्रह्मवाक्यमिति। एषा मुख्योपपत्तिरित्येवकारः॥ चकारः सद्यादिभिरपि तस्मात् ब्रह्मैवाक्षिपुरुषः॥ श्रुतोपनिषत्कगत्यभिधानाच्च। स्वरूपतो निर्णीय फल
तो निर्णयमाह। श्रुतोपनिषत्कस्य श्रुतोपनिषद्ध्यायेन तस्य प्रविदो या गतिर्देवयानाख्या सा अक्षिपुरुषविदोप्युच्यते अथ यदुवेवास्मिन् शाव्यं कर्म कुर्वंति यद्वि नार्चिषमेवा
भियंतीत्युपक्रम्य चंद्रमसो विद्युतं तत्पुरुषो मानवः स एनान् ब्रह्म गमयति एष देवपथो ब्रह्मपथ इति एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं ना वर्त्तंत इति ब्रह्मविदोप्येष ए
व मार्गः इत एव निरस्हितः। चकारस्तत्कर्मसमुच्चयेनाधिकरणसमाप्तिबोधकः॥ अनवस्थितेरसंभवाच्च नेतरः॥ ॥इदमेवाधिकरणं उन निषेधमुखेन विचारयति। ननूपासनाप
रत्वेपि सर्वमुपपद्यते। तद्धर्मव्यपदेशेनैवोपासनोपपत्तेः। अतः सर्वा उपपत्तयो व्यपदेशिवद्भावेन संगच्छंत इत्येवं प्राप्ते उच्यते। इतरो नात्र वाक्यार्थः। अनवस्थितेः अस्थिरत्वात् उप
देशकवाक्यत्वात् उपदेष्टुरेव च तद्गतिं भवेत्। तथा च चक्षुर्दर्शनाभावात् अनाप्तत्वं चक्षुरुपगमे चापगच्छति सद्वितीयेन सद्वितीयः उपासनाकाले च सुतरामनवस्थितिः सद्वितीय
योपासनायामपि श्रवणमनन योर्भिन्नविषयत्वादनवस्थितिः वक्तुरेव नियमे गुरोर्निबंधेन सुतरामनवस्थितिः। किंचा मनसा कपासनं कर्त्तव्यं तत्र चासंभव एव नाद्वन्नाधर्मवत्वं च न
संभवति अत्यासुरत्वं च न संभवतीति द्वितीयचकारार्थः॥ तस्मादक्षिस्थाने सह एव यो भगवान् स्थितः परमैवेन वाक्यमिति सिद्धं। व्यापकः सर्वगतस्य सर्वतः पाणिपादांतत्वात् आनंदमूर्त्तिर्निगिवा पा० २
नेव ब्रह्मवादेष्वेव मर्यादा॥ स गुणवादो ब्रह्मवादाज्ञानादिति॥ ॥अंतर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्॥ ॥य इमं च लोकं परं च लोकं सर्वाणि च भूतान्यंतरो यमतीत्युपक्र २४

म्मश्रूयते यः पृथिव्यां तिष्ठन् पृथिव्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमयत्येष त आत्मांतर्याम्यमृत इत्यादिना अधिदैवमधिलोकमधिवेदमधियज्ञमधिभूतम
ध्यात्मं च कश्चिदंतरवस्थितो यमयितांतर्यामीति श्रूयते तत्र संशयः॥ किमयं अंतर्याम्यधिदैवादिषु सर्वेष्वेक एव अथाधिदैवादिनामभेदाद्भिद्यत इति। सामान्यतस्त्वयं तद्धर्मापदेशादिति न्यायेना
त्रापि ब्रह्मत्वं सिद्धमेव। न पांशाद्भेदान्न संदिह्यते। अधिदैवादिषु भेदाद्याधारधर्मानिगवल्फपचयं नैव यथा मंत्राविक्षिप्तः अन्य एवेति। तत्र तत्तदधिष्ठानस्य यो वर्त्तते अभिमानेन तस्य तादृशाशब्द
प्रयोगः अधिलोकादयस्तत्राखांतरेष्वन्वेव प्रसिद्धा योगव्यापकाः पंचस्वधिकरणेषु अधिलोकमधिज्योतिषं इत्यादि। अतो धिदैविकादिशब्दा यौगिकाः संतो न भगवति वर्त्तितुमुत्सहंते। नाप्यन्ये
कल्पनीया यद्धर्मा उपचाराद्भवेयुरिति न वेद्युः। कल्प्यमानस्य सर्वानुस्यूतस्य तादृशस्य भगवद्व्यतिरिक्तस्यासंभवात्। तस्मादंतर्यामि ब्राह्मणं उत्तानप्ययुक्तं स्यात्। तत्तदभिमानिदेवतास्वेति परमे
वतत्तदुपासनार्थमभिविष्य इति। अत्राभिचामं देहे देहे संदेहश्चोपपद्यते। देहाभवोत्रा इति न्यायाद्वा। ननु निषिद्धसंहा भगवति कल्प्यितुं शक्येति। एवं प्राप्ते अभ्यते अंतर्याम्यधिदैवादिषु अंतर्यामी
अधिदैवादिषु भगवानेव नान्यः स्याद्दर्शो निवितुमर्हति। ननु चोक्तं भगवति कथं निषिद्धकल्पनमिति। तत्राह तद्धर्मव्यपदेशात्। तेषां धर्मास्तद्धर्माः तन्मयुक्तिबोधकाः। ते विशेषेण भवंत्यः पृइद्रूपं ते
सर्वे प्रातत्तत्कार्यं सामर्थ्यं च भगवतो न तु सर्वतस्तेषामिति। एवं च सत्यस्य सर्वं संगतं भवति। तस्माद्ब्रह्मवाक्यमेवास्य प्रायत्वधिकरणस्य नानांतस्तद्धर्माधिकरणेन गतार्थत्वाद्युक्तैव॥ ॥न च स्मार्त्तमतद्ध
र्माभिलापात्॥ ॥ननु ब्रह्मवादे अंतर्यामी न प्रसिद्धः जीवब्रह्मजडानामेव प्रसिद्धत्वात् अतो नांतर्यामिणः सांख्यपरिकल्पितस्य गुणयोगात्मा दृश्यास्य ब्रह्मत्वे बाधकः पुरुषार्थो निवेत्। न हीश्वरं प्रकृतिध
मरिहर्द मंतर्यामिणं मन्यंते तादृशास्योपनिषत्त्वाभावात् एवं पक्षन्यायेनस्तेति परतात्मतस्य वाक्येन तत्वमित्याशंक्य परिहरति। न च स्मार्त्तमतिप्रसिद्धं स्मार्त्तं सांख्यमतसिद्धमिति यावत्। तादृशा।

द्ध ष्य
मंतर्यामिरूपमत्र न विवक्षितुं नार्हति। कुतः। अतद्धर्माभिलापात्। तद्धर्माणामनभिलापात् तद्विरुद्धधर्माणां चाभिलापात्। न ह्यत्र सत्वरजस्तमोगुणास्तत्कार्यं वा अभिलप्यते तद्विरुद्धाश्चैते धर्मा यस्य पृथिवी
शरीरमित्यादिना स्मात् सांख्यपरिकल्पितं नांतर्यामिरूपमत्र न विवक्षितुमर्हतीति सिद्धं। एवं सति ब्रह्मधर्मा एवैते भवंतीति ब्रह्मवादः फलिष्यति। शारीरश्चोभयेपि हि भेदेनैनमधीयते॥ ॥ननू
क्तन्यायेन शारीरस्य एव न विवक्षितो दोषः। किमिति ब्रह्मपरत्वं कल्प्यमिति तत्राह शारीरश्च नेत्यनुवर्त्तते। शारीरश्च जीवो नांतर्यामिब्राह्मणोक्तं तदभिमानिरूपो यस्य पृथिवी शरीरमिति वाक्यानुरोधेन।
न विवक्षितुमर्हति। ततोपि भिन्नत्वात् अंतर्यामिणो वचनात्। उभयेपि काण्वमाध्यंदिनब्राह्मणाद्ध्ययेपि एनं जीवं भेदेनैवाधीयते। ब्राह्मणाभिः संदेहार्थमुभयपठणं। यो विज्ञाने तिष्ठन्निति काण्वाः॥ यश्चा
त्मनि तिष्ठन्निति माध्यंदिनाः। न चात्मशब्देनात्मनः संभवति चान्येषां सर्वमेव पठितत्वादंते हि जीवमाह। तस्मादंतर्यामिब्राह्मणे ब्रह्मैव वाक्यार्थ इति सिद्धं। अदृश्यत्वादिगुणको धर्मोक्तेः॥ मुंडके
।हि श्रूयते कस्मिन्नु भगवो विज्ञान इति पृष्टे द्वे विद्ये वेदितव्ये इत्युत्तरमाह। तत्र नामरूपात्मकजगतो विज्ञानार्थं नामांशो वेदादिः रूपांशोपरश्चं तत्र वेदादिविद्यायां न संदेहः परायां संदिह्यते किमे
षा सांख्यमतविद्या ब्रह्मविद्या वेति सांख्यधर्माभिलापात्संदेहः। अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं त
दव्ययं। यद्भूतयोनिं परिपश्यंति धीरा इत्यादि। अथ येच दिव्यो ह्यमूर्त्तः पुरुषः सबाह्याभ्यंतरो ह्यजः। अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः पर इत्युक्त्वा एतस्माज्जायते इति निरूप्य अग्निर्मूर्द्धा
चक्षुषी चंद्रसूर्यौ इत्यादिना रूपमुक्त्वा पुनः पुरुषात्संनिधिमाह। तत्रैकप्रकरणत्वादेकवाक्यतावक्तव्यात्तत्राक्षरपुरुषयोर्भेदः प्रतीयते तयोरुभयोरपि सन्निधिः। न ब्रह्मवादेन संगच्छते। तस्मात्सांख्य पा॰२
मतमेवैतत्प्रकृतिपुरुषयोः श्लिष्टत्वादन्यतरप्राधान्येनोभयोः सत्त्वं उभयात्मकत्वाज्जगतः रूपमपि समाहितं व्यष्टीनाम यस्युत्पत्तिरिति तिरोहितरूपत्वात् न ब्रह्मविद्या किंतु स्मृतिरेवेति २५

ब्रह्मविद्यावेदविद्या उपचाराद्धेति । एवंशामेउच्यते अक्षरं अदृश्यत्वादिगुणकः परमात्मैव ब्रह्म । विज्ञाने नैव सर्वविज्ञानात् । तत एव विद्याया अपि परत्वं अक्षरस्यापि ब्रह्मत्वं पुरुषस्यापि तयोः
पराऽपरभावः अभेदश्च एतावता एव हि ब्रह्मवादः । न च प्रधानमक्षरस्य ब्रह्मत्वमाह । अदृश्यत्वादिगुणकः परमात्मैव कुतः धर्मोक्तेः । तथाक्षरात्संभवतीह विश्वमिति । इयं चोपनिषत् । न ह्यत्र ब्रह्म
व्यतिरिक्ताक्षरगन्धोऽप्यस्ति । पुरुषस्य ब्रह्मत्वं निःसंदिग्धमेव इषदानंद तिरोभावेन ब्रह्मान्तरमुच्यते अक्षरानंदः पुरुष इति । ब्रह्मविदाप्नोति परमित्यत्रैव तथा निर्णयात् । तस्माददृश्यत्वा
दिगुणकः परमात्मैव ॥ ।विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ ॥ननु पूर्वपक्षन्यायेन ब्रह्मविद्याख्यायामपि स्मृति ब्रह्मविद्यैवास्तु हे । ब्रह्मणी वेदितव्ये मूर्त्तं चामूर्त्तं चेत्यत्र विकारस्ये
व ब्रह्मपदवाच्यत्वं अतः प्रकृतिपुरुषावेव वाक्यार्थ इति परिहरति । इतरौ न भवतो वाक्यार्थरूपौ । कुतः विशेषणभेदव्यपदेशाभ्यां विशेषणभेदः व्यपदेशभेदश्च ताभ्यां अदृश्यत्वादयो गु
स्प णा न प्रकृतेर्भवंति सर्वस्यापि तद्विकारत्वात् । न हि घटदर्शनेन मृद्दर्शनं इति वदितुं युक्तं । ब्रह्मवादे पुनः सर्वज्ञत्वनमसमर्थत्वाद्ब्रह्मणि विरोधाभावः । न हि नित्यं सदेकरूपमविक्रियमाणं
च न वित्तुमर्हति सर्वं ब्रह्मधर्मतुल्यत्वेतदेव ब्रह्मेति श्रुतेर्ब्रह्मवादिनि । यः सर्वज्ञः सर्वविदित्यादयस्तु सुतरामेव न प्रकृतिधर्माः । व्यवधानाच्च न पुरुषसंबंधः अक्षरनिरूपण एव पुरुषविशे
षणाच्च । येनाक्षरं पुरुषं वेद सत्यमिति तस्मादक्षरविशेषणानि न प्रकृतिविशेषणानि । नापि पुरुषविशेषणानि सांख्यपुरुषस्य । न हि दिव्यत्वादयो गुणाः पुरुषस्य भवंति न हि तन्मते पुरुष
ने दोषसंगी क्रियते जीवब्रह्मवत् । न च तस्य बाह्याभ्यंतरत्वं सर्वज्ञत्वाभावात् । न हि तस्माज्जायते प्राणादिः । तस्मात्पुरुषविशेषणान्यपि न सांख्यपुरुषविशेषणानि । अतो विशेषणभेदः । व्यपदेशभेद
श्च ब्रह्मविद्यैवे पेति स ब्रह्मविद्यां सर्वविद्यामिति उपक्रमे प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति मध्ये तेषामेवैतां ब्रह्मविद्यां वदेत [illegible] संनेनस्मात्सांख्यपरिकल्पितौ प्रकृतिपुरुषौ वाक्यार्थः ॥ न

रि ब्रह्माण्येषु श्रुत्यायस्य मतिरूपां विद्यां वदतीति चकारार्थः॥ ॥रूपोपन्यासाच्च॥ ॥अग्निर्मूर्द्धचिन्तुषीत्यादिरूपं न हि प्रकृति पुरुषयोरन्यतरस्य संभवति ब्रह्मवादे पुनर्विश्वकायस्यैतद्रू-
पं। सत्र विज्ञानात्मनमुख्योपपत्तिरेषेतिसूचितं॥ चकारेण श्रुत्यन्तर विरोध एकवाक्यता च सर्वेषां वेदान्तानामिति। तस्मादुत्तरत्राद्वैनड्डरूपत्वाद्वैन च ब्रह्मैव प्रोक्तमिति ब्रह्म विद्यैवेषेति सि-
द्धं॥ ॥वैश्वानरः साधारणशब्दविशेषात्। अधिकरणत्रयेण भोगमुपपाद्य पूर्वाधिकरणे च द्युत्वादिगुणानुक्त्वा प्रसंगाद्युपसुपन्यस्तं अधुना साकारब्रह्मतामुपपादयितुमिदमधिकर-
णमारभते। कोन आत्मा। किं ब्रह्मेति आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीत्युपक्रम्य द्युसूर्यवाय्वाकाशवारिपृथिवीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिंदया च मूर्द्धादि-
त्वाद्युपदिश्य आम्नायते। यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्वि-
श्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः। पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीय इत्यादिं तत्र संशयः। किं वैश्वानरश-
ब्देन ब्रह्म प्रतिपादयितुं शक्यते न वेति अर्थस्यातिसंदिग्धत्वात्संदेहः। तत्रोपक्रमे ब्रह्मात्मपदप्रयोगोऽस्ति मान्यत्किंचिदुपपादने तद्धर्मा एव साकारस्य तु लोकन्यायेनाब्रह्मत्वं वैश्वानरो यद्यप्य-
ग्नावेव प्रसिद्धः। तथापि पूर्वकाण्डसिद्धत्वाद्देवतात्मपरिग्रहो युक्तः। ततश्च संवत्सरो वा अग्निर्वैश्वानर इति श्रुतेः। संवत्सरस्य प्रजापतित्वाच्च हिरण्यगर्भोपासनापरमिदमिति गम्यते ब्रह्मात्म-
शब्दाच पिहितत्वेनैव युक्ततरो न तूपासकस्यैवान्नभोक्तृत्वमपि सर्वत्र युक्तं प्रादेशमात्रत्वमपि मुख्यजीवत्वादस्मदाद्यपेक्षया स्थूलत्वाभिप्रायं। विराडभिमानित्वाच्च लोकावयवत्वं वेदगर्भत्वाद- पा॰२
भित्रयात्मकत्वमिति तस्माद्धिरण्यगर्भोपासनापरमेवैतद्वाक्यं न भगवदुपासनापरमित्येवं प्राप्ते उच्यते। वैश्वानरः परमात्मैव कुतः साधारणशब्दविशेषात्। साधारणशब्दानां विशेषः पूर्वपक्षे २६

हि साधारणशब्दा हिरण्यगर्भपरतया ततोपि विशेषोस्ति येन भगवानेव वैश्वानरो भवति प्रादेशमात्रस्यैव द्युमूर्द्धत्वादिधर्मः। न हि विरुद्धधर्माश्रयत्वं भगवद्व्यतिरिक्ते संभवति। सर्वभवनसाम
र्थ्याभावात्। साधारणाद्धर्माच्छिष्ट एव विशेष इति वा। विशेषादित्येतावद्वक्तव्ये साधारणशब्दविशेषादिति प्रादेशमात्रस्यैव वैश्वानरशब्दवाच्यत्वं द्युमूर्द्धत्वादिकं तस्यैवेति समासेन द्योतयतः। अन्यथा विरो
धाभावात्। यदपि लोकात्मकं स्थूलं रूपं तदपि भगवत एव न हिरण्यगर्भस्येति श्रुरूपत्वात्तस्य। विश्वं जडस्य नरस्य जीवस्य च भगवदंशत्वेन देवतात्वाद्देवताद्वंद्वे चेति विश्वानरो नौ निवासो यस्येति
नस्य निवास इत्यण्। तेन परमेश्वर एव वैश्वानरो भवति नान्यः भगवदंशत्वादन्यत्रोपचारात्प्रयोगः॥ तस्माद्वैश्वानरः परमात्मा॥ ॥स्मर्यमाणमनुमानं स्यादिति॥ ॥व्याख्यानेन भगवत्परत्वाद्वा
क्यस्य प्रमाणेनोरसमाह। केचित्त्वदेहे हृदयावकाशे प्रादेशमात्रं भुरूपं वसंतं। चतुर्भुजं कंजरथांगशंखगदाधरं धारणया स्मरंतीति स्मर्यमाणं रूपमनुमानं स्यात्। प्रादेशमात्रं वैश्वानरस्य ब्र ति
ह्मत्वे। स्मरणं हि मननं। श्रुतस्य भवतीति वाक्येभ्य एव हि श्रवणं यदि प्रादेशमात्रवैश्वानरप्रतिपादकजातीयानां न ब्रह्मवाक्यत्वं स्यात्तदा स्मरणं नोपपद्येत। अत इति हेतोः प्रादेशमात्रवैश्वान
रो भगवानेवेति सिद्धं॥ ॥शब्दादिभ्योंतः प्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते॥ ॥किंचिदाशंक्य परिहरति। ननु यद्यपि स्मर्यमाणमनुमानं स्यादिति वा
क्यार्थो निर्णीयते। तदा स्मृत्यंतरेणान्यथापि व्याख्येयं। अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधमिति जाठर एवाग्निर्वैश्वानरो भवति। तस्यैव भगवद्वि
भूतित्वाद्वा वाक्यार्थो यथाकथंचिद्योजयिष्यते। न हि विरुद्धधर्माणां विद्यमानत्वात्भगवत्परत्वं वाक्यस्य विरुद्धधर्माः शब्दादयः अंतःप्रतिष्ठानं च। अग्निर्वैश्वानर इति शब्दः [illegible]
त्मत्वं [illegible] ~~अग्निर्वैश्वानर इति~~ केवलवैश्वानरपदे भवेद्भगवत्परत्वं योगेन तदग्निसाहचर्यादग्निरेव भवेत्तस्यैव च त्रेताग्निकल्पनमुपासना

र्यज्ञाणो हि देवता न ह्युक्तं प्रथममागच्छेत् तद्धोमीयमित्यादिना। तदेतेभ्यो हेतुभ्योंतःप्रविष्टितत्त्वमपि न भगवद्धर्मः। पुरुषेंतःप्रविष्टितं वेदेति भिन्नरे उहेंतु[illegible] स्वभवतीति न च कारः
तस्माद्विरुद्धधर्माणां विद्यमानत्वाद्भगवान् वैश्वानर इति चेत्। न। तथाहि श्रुतपदेशात् सर्वज्ञोक्तत्वं भगवतो वक्तुं तथाहि द्विरूपद्विरूपते विरुद्धधर्माणां तत्तज्ञावाप्तिरित्यैश्वर्यमेव भगवतो वर्णितं। त
हि कार्यवाक्यमेवास्तु स्मृत्यनुरोधादिति चेन्नत्राह। असंभवात् तन्न हि तस्य द्युमूर्द्धत्वादयो धर्माः संभवंति। उपचारादुपासनार्थं परिकल्पनं भविष्यतीति चेन्न। न पुरुषमपि चैनमधीयते वाजसने
यिनः। स एषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेंतःप्रतिष्ठितं वेदेति तस्मात्पुरुषत्वं पाठांतरे पुरुषविधत्वं वा जाठरस्य न संभवतीति भगवानेव वैश्वानरः॥ भगवत्पर
न त्वे [illegible] संभवत्यन्यकल्पना न युक्तेति॥ ॥ अत एवं देवताभूतं च॥ ॥ वैश्वानरो न रूत्येत्यादिमंत्रैर्देवताया महाभूताग्नेर्वा क्रियार्यतेति कस्यचिद्बुद्धिः स्यात्तदपि अतिदेशेनैव परिहरति मुख्योपपत्ति
र्भगवत्परत्वे संभवति नान्यकल्पना युक्तेति॥ साक्षादप्यविरोधं जैमिनिः॥ ॥ ॥ अधुना परिमाणविशेषो विचार्यते। प्रादेशमात्रत्वेन भवतः स्यान्नवा। किं कृत्रिमं चेति। अस्मिन्निदं सिद्ध एव श्रुत्युक्ते
सिद्धं न वेदिति विचार्यते। तत्रास्मिन्नर्थे चत्वार ऋषयो वेदार्थचिंतकाः प्रकारभेदेन। तत्र केवलं शाब्दबलविचारका आचार्याः शाब्दार्थयोर्जैमिनिः। आश्मरथ्यस्तु शाब्दोपसर्जनेनार्थविचारकः॥
केवलार्थविचारको बादरिरिति। आचार्यः पुनर्विचाराविचारयोर्दोषं परस्परविचारमपि वदन्नेतेषां मतबुद्धिख्यापनाय नामान्याह। तत्र जैमिनिरुभयबलविचारकः प्रथमं निर्दिश्यते। व्याप
कस्य प्रादेशमात्रत्वे साक्षादपि कल्पनाव्यतिरेकेणापि स्वरूपविचारेणैवाविरोधं मन्यते जैमिनिः। आकाशवद्व्यापकं सर्वतः पाणिपादांतं ब्रह्म अत एव साकारत्वमनंतमूर्त्तित्वं ब्रह्मणः स्वेच्छ पा॰२
यापरेच्छया स्वभावतश्च विभक्तमिवत्रयोपि नियतपरिणामाश्च नियतपरिणामास्तु आकाशावतारिच्छेदनिरूप्याः। तद्वद्धि प्रादेशाभ्यां तथा भवंति। स्मृतावप्युक्तं। विश्वोसृक्त्रीणि रूपाणि पुरु २९

षाख्यान्यथो विदुः। प्रथमं मूर्द्धतः स्पष्टं द्वितीयं वंशसंस्थितं। तृतीयं मन्दिरस्थं तानि ज्ञात्वा विमुच्यत इतिन्हतेषु पंचधा। उदरेंगुष्ठमात्रः हृदये प्रादेशो मूर्द्धनि च मनसी इंद्रियेषु चाणुः। किंच व्याप
कः एकस्याप्युपक्रमे सर्वे भूतथात्वबादो विरुतिरन्येदाय। तस्माद्वैश्वानरस्य भूरूपत्वात् सच्चिदानंदरूपे ऐश्वर्यादेशमात्रत्वं न विरुध्यते। अतः साकारब्रह्मवाद एव जैमिनेः सिद्धांतः॥ ॥अभिव्य
२ चे क्तेरित्याश्मरथ्यः॥ ॥निराकारमेव ब्रह्म मायाजैंनिकाछन्नं तदपगमेन भूरूपाकारेणाधिदैविकदेवताधिष्ठितेनाभिव्यक्तः भूरूषेंतर्यामी च तत एव भूरूप विध इति। अभिव्यक्तेर्हेतोः सा
कारत्वमपि मायापगमनकृतत्वान्न स्वाभाविकत्वं तथापि निर्दिश्यमानं सच्चिदानंदरूपमेवाश्मरथ्यो मन्यते॥ ॥अनुस्मृतेर्बादरिः॥ ॥बादरिः केवलयोकिंकिञ्चिंतनवशात्प्रादुर्भूतरू
पानुवादिका श्रुतिरिति यद्यद्धियात उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहायेति वाक्यानुरोधात्। अन्यथा बहुकल्पनायां बुद्धिसौकर्याभावात्। किंचादिमतेपि तथात्वात्
पुरुषानुरोधेन ब्रह्मवादोप्यन्यथा नेय इति हि मन्यते। आभिव्यक्तेरतात्विकत्वं। अथवा मायाच्छन्ने अनुस्मृतिः अभिव्यक्तिस्तत्त्वत्त्वा। एवं सति बादरिमतेपि तात्विकमेव रूपं॥ ॥संपत्तेरिति
दे जैमिनिस्तथा हि दर्शयति॥ जैमिनिमते आकारवादे नियतमाकारं मन्यमानस्तदेकदेशी नियतमेव प्रादेशमात्रं भगवद्रूपं मन्यते तेन निराकरणाय सर्वत्र प्रादेशत्वं संपत्तिस्ततमित्याह। तत्र का
संपत्तिः कथमिति स्वयमेव श्रुत्या प्रदर्शयति॥ वाजसनेयिब्राह्मणे। द्युप्रभृतीन् पृथिवीपर्यंतान् वैश्वानरस्यावयवान् अध्यात्म्येवमूर्द्धप्रभृति चिबुकपर्यंतेषु संपादयन् प्रादेशमात्रमिद्
वै देवाः सुविदिता अभिसंपन्नास्तथा तु व एतान्वक्ष्यामि। यथा प्रादेशमात्रमेवाभिसंपादयिष्यामीति स होवाच। मूर्द्धानमुपदिशन्नेष वा अतिष्ठा वैश्वानर इत्यादिना संपत्तिनिमित्तमेव प्रादेश
मात्रत्वं वैश्वानरस्याह। न तु प्रादेशमात्र एव वैश्वानर इति तदेकदेशिपरिहारं जैमिनिर्मन्यते। आमनंति चैनमस्मिन्॥ मुख्यं स्वसिद्धांतमाह। व्यापक एव प्रादेश इति न हि विरुद्धमुभयं नग

वत्यनवगाह्यमहात्म्येन स्मर्त्र्यमाणमेवानुमन्तव्यं न युक्तिः शास्त्रबलविचार एव मुख्यः। ननु प्रातीतिकविरोधादन्यथात्वकल्पनं। वैश्वानरस्य द्युरूपत्वं पुरुषविधत्वं पुरुषेंतःप्रतिष्ठित
त्वं च वाजसनेयिनः समामनंति न हि तस्य द्विधत्वं तस्मिन्प्रतिष्ठितत्वं च मंत्रवति युक्त्या अतोऽन्ये ऋषयो भ्रांता एव येऽन्यथा कल्पयंतीत्यभिप्रेत्य स्वमतमाह। एनं वैश्वानरमस्मिन्मूर्द्धचिबुकां
तराले जाबालाः समामनंति एषोऽनंतोऽव्यक्त आत्मा योऽविमुक्ते प्रतिष्ठित इति सोऽविमुक्तः कस्मिन्प्रतिष्ठित इत्यादिना भ्रुवोर्घ्राणस्य च यः संधिः स एष द्यौर्लोकस्य परस्य च संधिर्भवतीति न ए
नंतः संकुचितस्थाने भवति विशेषणादेः पर्य्यवसित्वेः। युक्तिगम्यत्वे ब्रह्मविद्यैवं च विरोधेऽपि वेदस्तुतिश्रुते स्कत्राद्ब्रह्ममूलत्वादिति। ननु तथापि काचिद्वेदानुसारिणी युक्तिर्वक्तव्या शास्त्रसाफल्या
येति चेन्न उच्यते। विरोध एव नाशंकनीयो वस्तुस्वभावात् अयस्कांतमणिधौ लोहपरिभ्रमणे या युक्तिः गर्भस्योदर्यदाहे। रेतसो मयूरत्वादिना वेन हि सर्वत्र स्वभावदर्शनात्सामस्योपपत्तिः
कैश्चिदपि त्राश्यते वक्तुं तस्मांते सुषिरमित्यादिना श्रुतिरेतमेवाह। यतो हा मनने ध्यस्य च भगवतो मुखारविंदे विश्वमेव हङ्कास्य त्रमाया विद्यानिराकरणाय सिद्धांतमाह। अथो अमुष्यैव
समामनंत्यस्य यः कश्चनौत्पत्तिक आत्मयोग इति उत्तरत्र बंधने चायमर्थो निर्णीतः तस्माद्द्यानंदांशस्यैवायं धर्मो यत्र स्वाभिव्यक्तिस्तत्र विरुद्धसर्वधर्माश्रयत्वमिति चकारार्थः। तस्मात्त्रा
देशमात्रो व्यापक इति वैश्वानरो भगवानेवेति सिद्धं॥ ॥८॥ ॥इति श्रीवेदव्यासमतवर्त्ति श्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये प्रथमाऽध्यायस्य द्वितीयः पादः समाप्तः॥ ॥२॥
भ्वा द्यु द्यायतनं स्वशब्दात्॥ ॥द्वितीयपादे आधेयरूपो भगवान्प्रतिपादितः। आधाररूपोऽत्र प्रतिपाद्यते तेन सर्वं ब्रह्मेति फलिष्यति। इदं श्रूयते। यस्मिन्द्यौः पृथिवी चांतरिक्षमोतं मनः सह पा॰२
प्राणैश्च सर्वैस्तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथामृतस्यैष सेतुरिति। बाधकानां बलिष्ठत्वात्साधकानामभावतः। आधारधर्मा बाध्येरन्निति पादो निधीयते। अस्मिन्नित्यादि २०

वि

वाक्येषुवाक्यार्थःसर्वबाधितः।अर्थान्त्रकरणाल्लिंगादिनिरूपणंविचार्यते।अत्रसंशयः।द्युभ्वाद्यायतनंब्रह्मआहोस्वित्पदार्थान्तरमिति।अर्थान्तरमेवभवितुमर्हतिद्युभ्वादीनांसूत्रेमणिगणाइवप्रोतानामा
रत्वान्नतद्धारकःपरमात्मा।अन्यवाग्विमोकश्चासंगतः।एकविज्ञानेनसर्वविज्ञानस्यदृष्टत्वात्कथमन्यविमोकः।सेतुश्चगतिसाधनः।तस्मात्फलत्वमपिआत्मलाभान्नपरंविद्यतइतिरोधश्च।अतोनब्रह्मवि
द्यापरमेतद्वाक्यं।किंतुस्मृतिमूलंभविष्यतीत्येवंप्राप्तेउच्यते।द्युभ्वाद्यायतनंब्रह्मैव।द्यौःभूम्यादिर्येषांतेद्युभ्वादयः।तेषामायतनंयस्मिन्नद्यौरितिवाक्योक्तानांसाधकंसदत्रप्रथमपरिहारमाह।स्वशब्दा
त्।आत्मशब्दोव्याख्यातःस्वशब्देन।अत्रैवैकस्यात्मत्वेनोपासनार्थमात्मपदं।।किंतुश्रुत्युक्तानामात्मत्वंतेननभावस्ततोदोषः।कारणेहिकार्यमोतंभवति।सेतुत्वंचयुज्यते।तज्ज्ञानेनामृतत्वप्राप्तेः।अभे त्वे
देपिब्रह्मविदाप्नोतिपरमितिवदर्थः।तस्मादबाधितार्थत्वात्स्वस्यसर्वगतत्वस्फत्यादकत्वात्द्युभ्वाद्यायतनंब्रह्मैव॥ ॥मुक्तोपसृप्यव्यपदेशात्।ननुचोक्तंसर्वविज्ञानस्योपक्रान्तत्वादन्यवा
ग्विमोकोविरुद्धइतिनैषदोषः।मुक्तोपसृप्यव्यपदेशात्।मुक्तानांजीवन्मुक्तानांशारीरेणद्युध्यासरहितानांभवांतस्यकरणेशरधनुर्न्यायेनब्रह्मत्वेनज्ञातंपृथक्त्वेनवानीवंलक्ष्येयोजा।यितुंतडतउपसृप्य
ते तावपदिश्यतेनशारीरेणद्युध्यामविशिष्टंनब्रह्मणोयोजनी[illegible]ति।।किंच।वाग्विमोकप्रवनवस्त्रविमोकः।वस्तुनोब्रह्मत्वात्वाचारंभणमात्रत्वाद्विकारस्य।अतोनसर्वविज्ञानबाधः।अतोबाधका
भावादिदंब्रह्मवाक्यमेव।येतुश्रुतेरन्यथार्थत्वंकल्पितमतानुसारेणनयंतितेष्वोक्तंस्पष्टंश्रुतिविरुद्धार्थवादित्वंपेस्याः।नानुमानमतच्छब्दात्॥ ॥ननुजडधर्माजीवदृष्टान्ताःप्रकरणेबहवःसंतिअणइ
वंब्रह्मपुरेमनोमयइत्यादितस्मात्प्रकृतिपुरुषनिरूपकसांख्यानुमापकमेवैतत्प्रकरणमस्तु।निर्णीतमप्यन्तराधिकरणेजडधर्मास्तुनरूढविनं।तस्माद्युभ्वाद्यायतनंप्रकृतिरेवभवितुमर्हतीतिचेन्न॥
अनुमानंतन्मतानुमापकंनभवति।कोपिशब्दोनिःसंदिग्धस्तन्मतव्यापकोनास्ति।ब्रह्मवादव्यापकास्तुबहवःसंति।आत्मसर्वज्ञानंदरूपादिशब्दाःसंदिग्धाजडधर्मत्वेनप्रतीयमानाअपिब्रह्मध

र्मएवेतियुक्तंनहिब्रह्मवादःश्रुतिव्यतिरिक्तेसिद्धोस्तियेनब्रह्मधर्मत्वावोनिश्चेतुंशक्येत तस्मात्सर्वा धारत्वेननिरूप्यमाणःपरमात्मैवनप्रधानमिति॥ ॥प्राणभृच्च॥ ॥नन्वस्तिनिर्णायकं
प्राणनामोतत्व वचनंमनोमयःप्राणशरीरनेतेतिच।अतोजीवधर्माःकेचन ऊउधर्मश्चापरेसर्वज्ञत्वादयोपियोगप्रभावाज्जीवधर्माइतितस्माज्जीवविशिष्टसांख्यवादएवयुक्तइतिचेत्।
सं न।प्राणभृज्जीवोनभवति अनन्तत्वंहिदेवनस्यानंदामृतरूपःसन्विज्ञमर्हतितन्मते इष्टयोगकरणमुत्तरार्थो।भेदव्यपदेशात्॥ ॥विशेषहेतुमाह तमेवैकंजानथेतिकर्मकर्तृभावःप्रतीयते।अतो
भेदव्यपदेशान्नप्राणभृज्जीवः।प्रकरणात्॥ ॥जीवज[illegible]वारणनिराकरणायविशेषहेतुमाह।प्रकरणं हीदं ब्रह्मणः ब्रह्मादेवानामित्यारंभेसब्रह्मविद्यामिति।तेषामेवैतांब्रह्मविद्यामित्यंते
चब्रह्मविद्यायाएवप्रकरणित्वमवगम्यते।ब्रह्मैवेदममृतंपुरस्तादित्यादिभिर्विस्पष्टंब्रह्मवादःप्रतीयते॥ ॥स्थित्यदनाभ्यांच॥ ॥सर्वस्याप्यन्यथाभावशंकयाविशेषहेतुमाह।द्वासुपर्णेतिवाक्ये
अनश्नन्नन्यो अभिचाकशीतीति केवलस्थितिःपरमात्मनःकर्मफलभोगोजीवस्य अतःस्थित्यदनाभ्यांजीवपरमात्मानावेवमध्येपरामृष्टौनहिसांख्यमतमेतादृशंभवति।अतोस्यवैशेषिकोप
पत्ते विद्यमानत्वात्सातिशयेनसर्वाउपपत्तयोदृढाइति यच्चाद्यायतनंभगवानेवेतिसिद्धंयद्यपिपैंग्युपनिषदिद्वासुपर्णेत्यस्यान्यथाव्याख्यानंप्रतिभातितदृचांप्रदेशविशेषेन्यथाव्याख्यानंन
दोषायतत्रक्षेत्रज्ञोजीवब्रह्मणौव्याख्येयौ॥भूमासंप्रसादादध्युपदेशात्॥ ॥इदंश्रूयतेयोवैभूमातत्सुखमितिसुखलक्षणमुक्त्वाभूम्नोलक्षणमाह।यत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजाना
तिसभूमेतितत्रसंशयः भूमावाकुत्स्नमाहोस्विद्ब्रह्मविद्यात्वख्यापनायाऽप्रापकंसमाप्यततोपिविज्ञानादीनामंतरंगाणांसुखंतानांभूयस्त्वमुक्त्वासुखस्यफलत्वात्तस्यैवभूयस्त्वंवदंस्तरतिशोकमा पा०२
त्मविदितिनारदप्रश्नाद्भूम्नो[illegible]ब्रह्मत्वंप्रकरणादुक्तंशक्यतेतथापितस्यैवाधात आत्मादेशइति अहंकारादेशवदात्मादेशोप्यस्तितेनाब्रह्मत्वेपिप्रश्नसिद्धिः।तस्यसुखवाकुत्स्नस्यस्वेमहिम्निप्रतिष्ठि २९
स्तेति[illegible]तत्रप्रपाठकारंभे।तस्मात्कृत्स्नस्य मीतिशः [illegible] तत्वात्स्वेदादीनांगमत्वमुक्त्वाततोभूयस्त्वंवागादीनांप्राणपर्यंतानामुक्त्वामुख्यप्राणविद्यायाअवरब्रह्मणि ×२ द्वितीय २

तत्त्व सर्वतः प्रश्नविषयत्वान्नेपि भवति सुषुप्तावपीति तयोरन्यतरग्राह्येत त्राप्यंतरंगत्वात्सुषुप्तिरेवात्र भूमत्वेनोच्यते तेन न सुखबाहुल्यं सुषुप्तिरूपमेव भूमेत्येवं प्राप्ते उच्यते। भूमा भगवानेव
क्तः संप्रसादादध्युपदेशात्। संप्रसादः सुषुप्तिः तस्मादधि आधिक्येन उपदेशात्। यद्यपि नाम्न्यप्रपतीत्यादिसमानं तथापि स एवाधस्तादित्यादिना ततोप्यधिकधर्मा उच्यंते तेन हि सुषुप्तेः स
र्वत्वादिधर्माः संभवंति आत्मशब्दश्च मुख्यतया परिगृहीतो भवति। भूमशब्दस्यापि सर्वत्वाद्भगवति वृत्तिरदोषः तस्माद्भूमा भगवानेव॥ ॥धर्मोपपत्तेश्च॥ नान्यत्पश्यतीत्यादयोपि धर्मा
ब्रह्मणि न विरुध्यंते स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि। तन्न्यायेनैवत्र हि द्वैतमिव भवतीत्यादिश्रुत्या उभयत्राम्नानात्। अन्यदर्शनादयो भगवति विरुध्यंते चकारात्फलं तस्यैवोपपद्यत
इत्याह। स वा एष एवं पश्यन्नित्यादिना सहस्राणि च विंशतिरित्यंतेन तेन भूमा ब्रह्मैवेति सिद्धं॥ ॥अक्षरमंबरांतधृतेः॥ ॥गार्गिब्राह्मणे कस्मिन्नु खल्वाकाश ओतप्रोतश्चेति स होवाचैतद्वै तदक्ष
रं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वित्यादि श्रूयते। तत्र संशयः॥ किमक्षरशब्देन पदार्थांतरं ब्रह्म वेति तत्राचेतनं साधारण्याद्वर्णत्वात्वादाकाशवदस्याप्य ब्रह्मत्वमेव द्युभ्वाद्यायतनविरोध
स्कंध्याः अत एवाग्रतार्थताच्च दृष्टांताधिकरणेनानिष्टत्र विरुद्धधर्माश्च शंका निराक्रियंते अतोचेतनत्वं स्पष्टत्वात् ब्रह्मवादस्यासमास्तत्वादात्र हि विप्रत्वात्पुंस्त्री त्वाच्च स्मरणेवाव आकाशात्
न्स्यानितिवत्। कयाचिदुपपत्त्या स्मरणकालभक्त स्मृतप्रकृतिजीवविशेषणमन्यतरपर्यंतं इतिवक्ष्यमुपासनार्थं। अत्र हि प्रपंचिकसर्वधर्मणा हि स्पं ब्रह्मधर्मवत्त्वं च प्रतीयतेत उपासनार्थत्वे उपपद्ये
त ब्रह्मपरिग्रहे तु वैयर्थ्यमेव उपदेशस्याभावात् तस्मादक्षरमन्यदेव ब्रह्मधर्मत्वेनोपास्यमित्येवं प्राप्ते उच्यते। अक्षरं परमात्मैव कुतः। अंबरांतधृतेः। सूत्रं व्याख्याय सिद्धं हेतुमाह। अत्रैक एव प्रश्नः अंत
तरं चैकं आकाशस्यावांतरत्वमेव तेनांबरांतानां पृथिव्यादीनां विधारकः परमात्मैव। द्युभ्वाद्यायतनसिद्धो धर्मोपि हेतुः न तदश्नोति कश्चनेति मुख्यतया परिगृहीतो भवति। अन्यथा सूर्योपि पतनं

पु

न
श्री

पं२

प३

च भवेन्नन्वप्यन्यः सर्वाधारो न विरोद्धुमर्हति परोक्तेणाब्रह्मकथनार्थमक्षरपदमन्यनिराकरणार्थं तद्धर्मोपदेशाच्च । तस्मादक्षरं परमात्मैव ॥ ॥ सा च प्रशासनात् ॥ ॥ ननु कश्चिद्वाक्ये विधारणं ब्र
ह्मधर्मत्वेनाश्रितमित्यन्यत्रापि नियामयित्वं ज्ञायते नियामकाभावादित्यत आह । सा च विधृतिरत्रापि वाक्ये ब्रह्मधर्म एव कुतः प्रशासनात् एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथि
वी विधृते तिष्ठत इति प्रशासनेन विधारणमस्य धर्मोऽपि विरोद्धुं नार्हति ऽप्रतिहताज्ञाज्ञाकर्तुर्भगवद्धर्मत्वात्तस्मादक्षरं ब्रह्मैव ॥ ॥ अन्यभावव्यावृत्तेश्च ॥ नन्वक्षरमुपासनापरं भविष्यतीति तत्राह ॥ अ
न्यभावव्यावृत्तेः अन्यस्य भावः अन्यभावः अब्रह्मधर्म इति यावत्तस्माच्च व्यावृत्तेः । अब्रह्मत्वे हि ब्रह्मत्वेनोपासना भवति कार्यकारणभावेन । न चैतादृशो धर्मोऽस्ति चकाराद्यो वा एतदक्षरम भेदे
विदित्वा गार्गीत्यादिना शुद्धब्रह्मप्रतिपादनमेव नोपासनाप्रतिपादनमिति । तस्मादक्षरं ब्रह्मैवेति सिद्धं । ईक्षतिकर्मव्यपदेशात्सः ॥ ॥ पंचमप्रश्ने एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्मा
द्विद्वानेतेनैकतरमन्वेति यद्येकमात्रमित्यादिना एकद्वित्रिमात्रोपासनया ऋग्यजुःसामभिर्मनुष्यलोकसोमलोकसूर्यलोकप्राप्तिं पुनरागमने निरूप्यार्धचतुर्थमात्रोपासनया परं पुरुषमभि
ध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचेत्यादिना परात्परं पुरिशयं पुरुषमीक्षत इति । तत्र संशयः । परपुरुषः परमात्मा ध्यानविषयः आहोस्विद्विराट्पुरुषो ब्रह्मा वेति तत्रामुख्यप्रवाद्
पतितत्वात् ब्रह्मलोकं गतस्य तदीक्षणमेव च फलं श्रूयते न हि परमपुरुषस्य ब्रह्मत्वे तज्ज्ञानमेव फलं भवति । तस्माद्विराड्ब्रह्मा वा अभिध्यानविषय इत्येवं प्राप्ते उच्यते । सः अभिध्यानविषयः
परपुरुषः परमात्मैव कुतः ईक्षतिकर्मव्यपदेशात् जीवघनात् केवलजीवाधारात्परात् ब्रह्मलोकात्परात्परपुरुषदर्शनमीक्षतिः । तस्याः कर्मत्वेन व्यपदेशात् । उभयोः कर्मणोरेकत्वं अपरं त्रिमा पा॰ ३
त्रपर्यंतं निरूप्यापरं च ये निरूपयति तथैव ब्रह्मलोके तिस्रो मात्रा इत्यादि अभिध्यानस्य हि साक्षात्कारः फलं अतः फलरूपज्ञानस्य विषयत्वात्परपुरुषः परमात्मैवमेवं दशंका निरस्यार्थमेवेदं सू सू॰ ५

४× एवामृताभयरूपः। प्रतिभाति। स्पष्टार्थं च द्वितीयप्रकरणं। तस्मात्प्रथमेपि जीव

दि

त्वं। अत्र सर्वसंकरवादिनामन्यथापागोत्रमात्र तत्रापि विचारस्कल्प्यः॥ ॥दहर उत्तरेभ्यः॥ ॥अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोस्मिन्नंतर आकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं
तद्वाव विजिज्ञासितव्यमित्यादि श्रूयते तेन च संशयः। किं जीवोन्वेष्टव्यः ब्रह्म वेति। जीवब्रह्मवादो निर्णीयते श्रुत्यर्थाच्चेति निर्णेतव्यः। न ह्यदस्मिन्वाक्ये परमार्थतो जीव एव ब्रह्म चेच्छास्त्रं च तत्रैव सम
माप्तं चेद्व्यर्थमधिकरणारंभः। इदमेव च वाक्यं श्रुत्वा वक्तव्यं च भवेत् तस्मादस्मिन्नधिकरणे मुख्या सर्वसंकरवादो निराकृतिः॥ किं तावत्प्राप्तं दहर आकाशो जीव इति॥ अत्रावांतरप्रकरणद्वयं त
त्र द्वितीये प्रजापतिप्रकरणे जीव एव तादृशधर्मवान्न भवितुमर्हतीत्यर्थानुगुण्यमपि व्याख्येयं। अयमेव जीवो ब्रह्म अयमात्मा ब्रह्मेति श्रुतेः मैत्रेयीब्राह्मणं चानुगुणं भविष्यति। तस्य पुरं शरीरं तत्र हृ
दयकमलं सूक्ष्मं। तत्राराग्रमात्रो जीव एव आकाशः तात्स्थ्यात्तव्यपदेश इति अन्वेष्टव्यस्तत्र तस्मिन्वर्धमानस्तन्महिमा। वामुना रूपेण सर्वं तत्र वर्तत इति अन्यथोभयत्र सर्वकथनं। विरुद्धमापद्ये
त। भूतानि महान्ता निश्चाद्यो वातश्चे द्युरित्यादिना। नित्यतामुपपाद्य एष आत्मेत्यादिना तस्यैव ब्रह्मत्वमुपदिशति तन्नैतानं चप शांमति। स्वात्मत्ता। निनः कामं मिद्धं चाह। यद्वेत्यादिना
। येपि च विरुद्धा धर्माः प्रतिभांति अहरहर्गमनादयस्तेपि स्वकल्पितजीवानां स्वप्नमायामनोरथादिषु तेषामेव गमनागमनेषु प्रतिस्वातिरिक्तस्य ब्रह्मणोभावात्। एवं लोकाधारत्वमपि ब्रह्मचर्यं च।
तस्य साधनमिति योगश्च तपो धर्मायतनं नमनत्वमेतीति च तस्माज्जीव एव दहर इत्येवं प्राप्ते उच्यते। दहरः परमात्मा न जीवः कुतः उत्तरेभ्यः। उत्तरत्र वक्ष्यमाणेभ्यो हेतुभ्यः। तेषामपि साध्यत्वादेवमुक्तं।
जीवो नाम भगवदंशो न भगवानेवेत्यप्येवक्ष्यते। अंशो नानाव्यपदेशादिति। नापि ब्रह्मतावन्मात्रमिदमप्ययेवक्ष्यते। अधिकं तु भेदनिर्देशादिति। तस्मादिदं प्रकरणं न जीवब्रह्मविद्यापरं किंतु
ब्रह्मवाक्यमेवेति गतिशब्दाभ्यां तथा हि दृष्टं लिंगं च। उत्तरहेतूनां मध्ये हेतुद्वयमाह। गतिशब्दाभ्यां गतिर्ब्रह्मलोकगमनं एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंतीति एष आत्मा

४ X तच्छक्तिरूपमानादि। उत बहिर्भूतं। सांख्यवत्तन बहिर्भूतं

पहतपाप्मा सत्यकामः सत्यसंकल्प इति केवलं भगवद्वाचकाः शब्दा ब्रह्मलोकशब्दश्च। ननूक्तं जीवस्यैवैते शब्दा आगतिश्च मनोरथादिकल्पितानामिति तन्निराकरणायाह। तथा हि तथैव गति
र्हार्द्दौ भगवत्येव युक्तौ चानृतेनापिधानं हि तेषां। विशेषणं चाज्ञानावेष्टितत्वमित्यर्थः। न त्वज्ञानपरिकरिकल्पितत्वं दृष्टत्वात् तथैव हि दृश्यते सर्वेप्याह। न किंचिद्वेदिषमिति। न च गंतुरभावए
शास्त्रवैफल्यापत्तेः नह्यात्मनाशः पुरुषार्थः कर्मकर्तृविरोधश्च तथा चापहतपाप्मत्वं च तद्विरुद्धधर्माणामनुभवात् भगवती त्विदानीमेव तेषामनुभवः ध्यानादावुपलब्धेः। पृथिवीशरीरवदेकजी ब
वब्रह्मविभागो न त्वज्ञानकृतः। तथा हि। अज्ञानं नाम चैतन्यांतर्भूतं चेत् सांख्यनिराकरणेनैव निराकृतं चांतःस्थितायाः शक्तिरूपायाः स्वरूपाविरोधिन्या न स्वरूपविभेदकत्वं आश्रयनाशप्रसंगात्
कल्पनायाश्चाप्रामाणिकत्वात् बहिःस्थितस्यैव हि भेदकत्वं कुठारादिवत्। नापि वायुवत् तच्छक्तित्वात्। किंच कोयं ब्रह्मवादे प्रद्वेषः येन मिथ्यावादः परिकल्प्यते अज्ञानादिति चेत्। पीतशं
स खप्रतिभानवद्युक्तं मनकरणं बंविदुपासनयापगमिष्यति शार्कराभक्षणेनेव पीतप्रतीतिः सर्वज्ञेन हि वेदव्यासेन चापि मिथ्यावादनिराकरणेनेदमधिकरणमारब्धं तस्माज्जीवानामेवाज्ञा
नदर्शनात्। ब्रह्मणः सर्वतत्त्वदर्शनात् गतिशब्दौ ब्रह्मविषयावेव न जीवविषयौ॥ किंच॥ लिंगं च वर्त्तते यथैवेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति न हि स्वाज्ञा
ति नं स्वस्य संभवति हिताकरणप्रसक्तिश्च न च ज्ञानेन सामर्थ्यमुद्बुद्धमिति वाच्यं। विरोधित्वात् न हि ज्ञाने ज्ञाते कर्तृत्वमस्ती। निविज्ञववादिनोंगीकुर्वंति विरुद्धा च कल्पनाहं ब्रह्मास्मीत्यत एव।
सर्वभावश्रुतेः तत्त्वज्ञानं च तत्प्रसादजे लिंगं तस्य हि मधुसूदनो भगवच्छब्दवाच्यानामन्यतरः स चेज्जीवे समायाति तत्कृपया तस्यैवास्यापि माहात्म्यं भवति तस्माल्लिंगादपि गतिशब्दौ ब्रह्मविषयौ॥ पा॰३
चकारात्तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुत्या ब्रह्मत्वेन तज्ज्ञानं नात्मनो मोक्षाय ब्रह्मण एव तज्ज्ञानमात्मत्वेनापि तस्माद्दहरः परमात्मा॥ ॥ धृतेश्च महिम्नोस्यास्मिन्नु ३१

॥१५॥

॥१६॥

पलब्धेः। अपरं हेतुमाह। धृतेः॥ ॥अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति। न हि सर्वलोकविधारकत्वं ब्रह्मणोऽन्यस्य संभवति। चकारात्सेतुत्वमपि तद्बोद्धव्यं न हि जिज्ञासितव्यमिति। लोकविधारणस्य माहात्म्यरूपत्वात् तस्यैव कर्मत्वमित्याह। महिम्न इति। महिमेषुत्कर्षस्य तद्वासनारूपेण तस्मिन्विद्यमानत्वं संसारिधर्मत्वेन माहात्म्यरूपत्वात्। न च विरुद्धमुभयत्रैकस्य दशनमिति वाच्यं। अस्मा। अस्मिन्नुपलब्धेः। अस्यैतादृशविरुद्धधर्माश्रयमाहात्म्यस्यास्मिन्भगवत्येवोपलब्धेः व्याख्याना काशात् यावान्वा अयमाकाशः अणुः स्थूल इति। यशोदादयश्च बहिः स्थितमपि जगद्दंतः प्रपश्यंति। न त्वेतादृशो जीवो भवितुमर्हति तस्मात् ब्रह्मैव दहरः। प्रसिद्धेश्च। आकाशशब्दवाच्यत्वप्रसिद्धिः। अपहतपाप्मत्वादिप्रसिद्धिः किं बहुना प्रकरणोक्तसर्वधर्मप्रसिद्धिर्भगवत्येव न जीवे संभवत्यतो पि भगवानेव दहरः। चकाराद्विधिमुखेनाधिकरणसमाप्तिः सूचिता। अन्यनिषेधमुखेन पुनर्विचारयति॥ १७ ॥इतरपरामर्शात्स इति चेन्नासंभवात्॥१८॥ ननु ब्रह्मैतादृशं जीवो नैतादृश इति न कश्चित्। सिद्धमस्मिन्सूत्रे कमसमधिगम्यत्वादुभयरूपस्य ब्रह्मवादे। अतो यथा सर्वत्र ब्रह्मणोसाधारणधर्मदर्शनात्तत्प्रकरणं ब्रह्मण इति निश्चीयते एवमिहापि जीवस्यासाधारणधर्मदर्शनाज्जीवप्रकरणमिति कुतो न निश्चीयते निश्चिते उतस्मिन्नाकाशाद्युत्पत्त्वाद्यो धर्मा जीवस्यैव भविष्यंति नान्यस्येत्यभिप्रायेणाह इतरपरामर्शात्। इतरो जीवस्तस्य परामर्शः उपक्रमोपसंहारमध्यपरामर्शैः संदिग्धे निर्णयः। तत्रात्मविदः सर्वकामानुक्त्वा मध्ये च य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवा तदमृतमभयमित्यादिमध्ये च ये अथ य आत्मा स सेतुरिति तत्र संप्रसादः सुषुप्तिः जीवावस्था तत्परमं बंधनिमित्तेन स्वेनैव रूपेणाभिनिष्पत्तिवचनाज्जीव एवैतादृश इति गम्यते। न च तत्परमात्मनोयं धर्मः संभवति। अतः सर्वमेव प्रकरणं जीवपरं भविष्यतीति स एव जीव एव प्रकरणार्थ इति चेन्न। जीवस्तादृशो न भवति विरुद्धधर्मत्वेनैव सर्वत्र तन्निश्चयात्। उभयोरेकरूपत्वे

न

स्तु न यत्त्वमेव न स्यात् ऋतं पितावित्यादिवाक्यविरोधश्च अतो न जीवस्तादृशाभिप्रायेणाह। असंभवात्। न जीवे जगदाधारत्वादिकं संभवति न हि परामर्शमात्रेण सर्ववेदांतविरुद्धं
ल्पयितुं शक्यते [illegible] रेपरामर्शस्यान्यार्थत्वमुत्तरत्र वक्ष्यति तस्माद्दहरो जीवो भवितुमर्हति वाक्यार्थोयं यथोपपद्यते तथोत्तरत्र वक्ष्यते। ब्रह्म
त्वेकमेव नोभयमिति निश्चयः॥ ॥१८॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु॥ ॥१९॥ उत्तरात्प्रकरणात् प्राजापत्यात्। तत्र हि दिव्ये च चक्षुषि मनोरूपे प्रतीयमानो जीव एवामृताभयरूपो निरूपितः तस्यैवोदश
रावे जाग्रत्साक्षित्वं तदनु स्वप्नसाक्षित्वं तदनु सुषुप्तिसाक्षित्वं निरूप्य सर्वत्र तस्यामृतरूपत्वमेव निरूप्यावस्थानामतात्त्विकत्वमुत्क्रासमाध्यवस्थायां मनसि तमेव जीवं तादृशं प्रति
पादयति अतो जीवोपि वस्तुतस्तादृश एवेति प्रकृतेपि परामर्शात्स एवेति चेत्। एवमाशंक्य परिहरति तुशब्देन नायमर्थो दूष्यते। किंतु किंचिदन्यदस्तीति न नकारप्रयोगः। तदाह
आविर्भूतस्वरूपः स्वाप्ययसंपत्त्योर्भगवदाविर्भावो जीवे भवति। नृसिंहोपासकस्य नृसिंहाविर्भाववत्। ब्रह्मण उपदेशसमये भगवदाविर्भावात् मंत्रस्यात्मानं पश्यन्निंद्रेपि तथैवोपदिष्ट वं
वान् प्रजापतिः। अन्यथाक्षिबिंबादावमृताभयवचनं मिथ्या स्यात्। इंद्रे त्वाविर्भावाभावात् प्राजापत्यसंनिधाने विपरीतं पश्यति। अतस्तावन्मात्रदोषपरिहाराययान्यथोपदेशः स्वप्ना
दिष्टतया प्रकृतेपि स्वप्नावस्थायां भगवदाविर्भावान्न तथा वचनं तस्मादुभयमपि भगवत्प्रकरणमेव एवमन्यत्रापि भगवदावेशजतां भगवद्धर्माभिलापाज्ञाश्चाः। तस्माद्दहरः परमात्मैव।१९।
॥ ॥अन्यार्थश्च परामर्शः॥२०॥ परामर्शस्य प्रयोजनमाह। अन्य एवार्थः प्रयोजनं यस्य तस्माद्यमहरहर्वा एवंवित्स्वर्गं लोकमेति स्वस्यैवं ज्ञाने हि ब्रह्मसुखं फलं ब्रह्मज्ञानापेक्षायामुपयु पा०३
ज्येत भगवतश्च नदाविर्भावो भवतीति चकारार्थः। संपन्नो भगवदावेशकथनार्थं वक्ष्यति च स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हीति चतुर्थे। तस्मान्न परामर्शेनान्यथा कल्पनं॥ ॥अल्पश्रुतेरि ३२

ति चेत्तदुक्तं ॥ ॥ ननु न वयं जीवे उपपत्तिरस्तीति जीवप्रकरणं कल्पयामः । किंतु ब्रह्मणो नायमर्थ उपपद्यते अल्पश्रुतेः । अल्पे हि हृत्पुंडरीके कथं भगवदवस्थानं व्यापकत्वश्रवणात्तया
बाधा आश्रयमाकाश इति । तस्माद्विरोधपरिहाराय जीव एवाराग्रमात्रस्तत्र भवतीति कल्प्यं इति चेत् न हि भवान् सम्यग्विचारको मदीय एव परं तत्समाधानं पूर्वमेवोक्तं निचाय्यत्वादेवं व्यो
मवच्चेत्यत्र । तन्न प्रस्मर्तव्यं । विरोधस्तु सर्वभवनसमर्थे ब्रह्मणि नाशंकनीयः । तथा पुरुषशरीरं च । पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः । आविस्तरां प्रपश्यंति सर्वशक्त्युपबृंहित
मिति भगवद्वाक्यात् । तस्माद्भगवानेव दहर इति सिद्धं ॥ ॥ अनुकृतेस्तस्य च ॥ ॥ दहरविरुद्धं वाक्यमाशंक्य परिहरति । न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः
तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति कठवल्यामन्यत्र च श्रूयते यत्कठानामेकार्थत्वं प्रकरणात् ब्रह्मपरत्वं चावगतं अथ यच्चिमं देहः यस्मिन्द्यौरित्यत्र सूर्यादीनां ब्र
ह्माधारत्वमुक्तं अस्मिंश्च वाक्ये पूर्वार्द्धेन तेषां भानं निषिध्यते । यच्च यस्तु सर्वदा तिष्ठेन्न च चेन्नामते । कभासेतोपि ह्या यां कर्मत्वे श्रुतिबाधनं । यच्चेत्यधिकरणसप्तमी यच्च लोकांतरस्थिता ता
मप्यभानं तत्राग्नेः का वार्तेति वचनात्तत्पलोकास्थितः कश्चित्तु तेजोविशेष एव वाक्यार्थ इत्येवं प्राप्ते उच्यते अनुकृतेस्तस्य भगवदनुकारार्थमेवैतद्वचनं स्वतो भाननिषेधः पूर्वार्धे सर्वोपि
पदार्थस्तमेवानुकरोति सूर्यरश्मय इव छायापुरुषमिव तस्माद्वाक्ये भगवदनुकारित्ववचनान्न तेनार्थकल्पनं । किंच तस्य भासा सर्वमिदं विभातीति सूर्यादीनां स्वतः प्रकाशो नास्त्येव घटवत्
वत्प्रकाशेनैव प्रकाशवत्त्वमिति चकारार्थः । तस्मात्स्वतो भानेन लक्षणया कर्मत्वे वा भगवत्परत्वे सिद्धे नान्यार्थकल्पनं ॥ ॥ अपि स्मर्यते ॥ ॥ व्याख्यातेर्थे संमत्यर्थमाह । अपीति स्मृत्युच्चयः । न
तद्भासयते सूर्यो न शशांको न पावकः । यदादित्यगतं तेजो जगद्भासयतेऽखिलं । यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति च । तस्माद्भगवानेव सर्वविभासकत्वमेव सर्वमनुकरोतीति सि

१× अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्य न ततो विजुगुप्सति। तथा

दं॥ ॥शब्दादेव प्रमितः॥ ॥प्रसंगात्पुनर्बधिकांतरमाशंक्य परिहरति। अंगुष्ठमात्रः पुरुषो ज्योतिरिवाधूमक इति तत्रैव श्रूयते। यावा चाऽयमाकाश इति व्यापकत्वमंतःस्थितस्य प्रती
तेः अंगुष्ठमात्रतावाच प्रतीयते अतो विरोधाज्जीवस्यैव लोकांतरगंतृदेहवत उपासनार्थमीशानत्वादिधर्माः अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति। तन्निवृत्यर्थं। तस्मादंगुष्ठमात्रो न
भगवानेवं प्राप्ते मन उत्तरमाह। शब्दादेव प्रमितः अत्र संदेह एव न कर्त्तव्यः। शब्दादेव प्रकर्षेण विमानात्। यथा दहरवाक्ये सूक्ष्मस्यैव व्यापकत्वं तथांगुष्ठमात्रस्यैवे शानत्वं यदि भगवान्तत्रादृश्यो
न स्याद् अन्यस्य तादृशत्वं नोपपद्येत तस्माद्भगवतः सर्वतः पाणिपादांतत्वात् यत्र यावानपेक्ष्यते तत्र तावतं श्रुतिर्निरूपयतीति अंगुष्ठमात्रः परमात्मेति सिद्धं॥ ॥हृद्यपेक्षया तु मनुष्याधिकार
त्वात्॥ ॥न चानेकरूपत्वं विरुद्धधर्मवत्त्वं मा भूत् अन्यार्थं स्वरूपे निरूप्यतिथादेशामात्रत्वं च ध्यानार्थं अंगुष्ठमात्रत्वस्य कोपयोग इति चेत् तत्राह। उक्तत्वेन निःप्रयोजनत्वं निराक्रियते अस्ति प्र
योजनं तदाह हृदि अंगुष्ठमात्रं निरूप्यते केन हेतुना अपेक्षया ईश्वरकार्यापेक्षया॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठतीति स्मृतेः। रक्षार्थमंगुष्ठमात्र इत्यर्थः। ननु प्रमाणे न तत्त्वे किमेत
त्र संभवति तत्राह। मनुष्याधिकारत्वात्। यद्यपि हृदयं स्थूलं तथापि धर्मरूपं तावदेव तावन्मात्रस्यैवावदानश्रवणात्। तस्मादंगुष्ठमात्रस्यैव सर्वधर्मरक्षकत्वादंगुष्ठमात्रो भगवानेवेति सिद्धं। त
यां दुपर्यपि बादरायणः संभवात्। सर्वत्र ब्रह्मविद्यायां मनुष्याणामेवाधिकार इति। तन्निराकरणार्थं देवादीनामधिकारमाह। तदुपर्यपि मनुष्यापेक्षयावज्जिनानामधिकारो नास्ति तत्रापि वैदिक
धर्महेतोः त्रैवर्णिकानां धर्मयुक्तानामागतं। ततोपि ये साध्यादयो धर्मयुक्तास्तेषामप्यधिकारः॥ तत्र जैमिनिप्रभृतीनां न संमतिरिति स्वनामग्रहणं विशिष्टत्रैवर्णिकानामस्य प्रजापतिपर्यं पा॰ ३
तं शतानंदिनामधिकारं मन्यते बादरायणः कुतः संभवात् संभवंति तेषां ज्ञानाधिकारः धर्मज्ञानाभ्यां साति ज्ञायाभ्यां हितादृशाजन्म संभवात्। न हि तेषां पूर्वसंस्कारो लुप्यते अक्षरपर्यंतं त्राः ३३

×अंगुष्ठमात्रनिरूपणार्थं मनुष्याधिकारा निरूपिते कस्यचिद्भ्रमो भवेत्।२

४× मनुष्यानधिकृत्येदं शास्त्रं प्रारब्धानं प्रवृत्तं। अतो मनुष्याणां हृदयस्यांगुष्ठमात्रत्वात् ×४

ते

तोत्कर्षश्रवणादुपर्य्यपि तेषां च नोत्तरभाग्नेःशुद्धविद्याहेतुकत्वादुत्तरोत्तरमुपदेष्टॄणां विद्यमानत्वात्प्रजापतिपर्य्यन्तं सर्वेषामधिकारः संभवति। संभववचनाद्दुर्लभाधिकारस्तत्रेति सूचितं। योयो
देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणामिति। तदुपर्य्यप्यधिकारः सिद्धः॥ ॥विरोधः कर्म्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्॥ ॥नन्वेवमुपरितनानां ज्ञानाधिकारे स्वीक्रिय
माणे तत्सर्वत्राविशिष्टाधिकारो वक्तव्यः कर्मणि वेदाध्ययनेउपनयनादिश्रुतेस्तत्र तेषां ब्राह्मण्याद्यभावादेवाद्याद्यभावाच्च पौराणिकेन मतेन देवानां रागाभावाद्व्रतदभावेऽपि क्रियमाणे कर्मणिश्रु
ति विरोध इति चेत्न। अनेकप्रति पत्तेर्दर्शनात्। बहूनां प्रतिपत्तिर्दृश्यते बहवोऽत्र कर्मणि प्रवर्त्तमाना दृश्यंते। साध्या वै देवाः सुवर्गकामा एतं षड्रात्रमपश्यन्तमाहरंस्तेनायजंत सोऽग्निष्टोमेन व
सूनयाजयत्सउक्थ्येन रुद्रानयाजयत् सोऽतिरात्रेणादित्यानयाजयदित्यादि यच्चैकशतं वर्षाणि प्रजापताविंद्रो ब्रह्मचर्यमुवासेति। अस्मादागस्त्यऋषीश्वदृत्वा यज्ञकरणं च श्रूयते देवा वै सत्रमासतेत्या हल ५
क्ये दौ। दर्शनवचनात्स्वस्यापि कृत्स्नं कर्मकरणं च द्योतयति। अथवा सर्वपदार्थानामनेकप्रतिपत्तिर्बहुधोपयोगो वेदे दृश्यते। यथा चउर्द्धाकरणादि परिधिप्रहरणादिरूपोपवापादि तद्विद्यमा
ने। क्रियते नाविद्यमानेन तथा यत्र ये पदार्था निसंति तत्र कर्म तदभावेऽपि भवति। तथाहि दृश्यते पर्वते सोमवाहकानोऽभावात्। यज्ञेन यज्ञमयजंत देवाः इति संभृतसंभारः पुरुषावयवेरहं। तमेव पु व ७
रुषं यज्ञं तेनैवायजमीश्वरमित्यादिवाक्यैः सर्वसंभृत्युपपत्तिश्च। आधुनिकानां प्रतिवेदविभागानूजैमिनेस्तथा निर्णयः। तस्मात्कर्माधिकारः कर्मकरणं चोपपन्नं सिद्धं॥ ॥शब्द इति चेन्नातः प्रभवात्प्र यैपि ८
त्यक्षानुमानाभ्यां॥ ॥ननु मास्तु कर्मकरणे विरोधः शब्दे तु भविष्यति अर्थज्ञानानंतरं हि कर्मकरणं वेदाच्चार्थज्ञानं तत्र साध्यादीनां वेद एव कर्मकरणं श्रूयते तेन बहूनामेककर्मकर्तृविरोधः। अन्यकल्पना
यां त्वनवस्थाव्यवस्थापकाभावाद्वेदो वसूनां वृत्तांतं वदन्नवसूनामधिकारं वदेत् वदन्वा कथमनित्यो न भवेदिति चेत्न। अतः प्रभवात्। अतः शब्दात्प्रभवः शब्दोक्तपदार्थानां। वेदोक्ताः सर्व एव पदा

यश्चाधिदैविका एवं पुरुषावयवस्ताः स्वानुकारित्वाद्भगवतः॥ अतो नामप्रपंचो वेदात्मको नित्य एवांगीकर्त्तव्यः । स केवलं शास्त्रैकसमधिगम्यः॥ वेदैश्च सर्वैरहमेव वेद्य इति॥ अत एतस्य प्रपंचस्य भि-
न्नत्वान्न विरोधः शब्दे । कथमेवमत आह । प्रत्यक्षानुमानाभ्यां । प्रत्यक्षं तावदिदानीमपि यजमानः यजमानस्तं ऋत्विजश्च स्वकृत्यं वेदादवगच्छंति॥ न व्यक्तिमात्रवाचकत्वेन नाविरोधः सर्वत्र ल-
क्षणाप्रसंगात् । न यः सिक्तरेतास्यादित्यादिष्वविरोधश्च । न च प्रवृत्तिनिमित्तस्यैव वाच्यत्वं प्रवृत्तिवैयर्थ्यापत्तेः । संकेतग्रहविरोधाच्च॥ सर्वस्यापि पदार्थस्य भगवत्त्वान्नानुपस्थितिदोषः॥ संकेतग्रहेपि
। जमदग्नीनां पंचावत्तमित्यनुमानं न हि स्वयं जामदग्न्य इति प्रत्यक्षोऽनुभवोस्ति परोक्षव्यवहारस्यैवानुमानत्वमिति बस्नवादः । तस्मात्प्रत्यक्षानुमानाभ्यामिदानींतनलौकिकयज्ञपपदार्थेष्वभ-
गवदवयवावेशस्तथामुत्रापि देवादिलोके । तस्माद्वैदिकः पदार्थः सर्वोप्याधिदैविको भिन्न इति सिद्धं॥ ॥ अत एव च नित्यत्वं॥ ॥ साधिकां विशेषोपपत्तिमाह॥ अत एवास्मादेव हेतोर्वेदस्य ।
नित्यत्वं सर्वप्रपंचवैलक्षण्येन । चकारात् ब्रह्मतुल्यत्वं शब्दब्रह्म वेदपुरुषशब्दादिवाच्यत्वं । अस्यास्तु सृष्टेर्ब्रह्मोपादानस्य सर्वत्र तथाकथनं । तन्महात्म्यं निरूप्य यं प्राणन्नतो नित्य इति
अर्थः प्रधानात् ब्रह्मविद्यापराविद्याप्रपंचभेदादेव लौकिकवैदिकशब्दव्यवहारभेदो । तस्मादाधिदैविकप्रतिपादकत्वाद्वेदस्य नित्यत्वं॥ ॥ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्श-
नात्स्मृतेश्च॥ ॥ एवं शास्त्रबलविचारेण वेदप्रमाणस्य सिद्धये नित्य एव प्रपंचो ह्याधिदैविकः सर्वत्र सिद्धः । इदानीमर्थबलविचारेणोत्तरकांडे किंचिदाशंक्य परिक्रियते दार्ढ्यार्थं न च स्य प्रपंचस्या-
नुकारित्वेन वाच्यत्वे न वास्तवी क्रियमाणत्वे सृष्टिप्रलययोर्विद्यमानत्वादनित्यसंयोगः प्राप्नोतीत्यत आह समाननामरूपत्वाच्चावृत्तावप्यविरोधः । वस्तुतस्तु भगवद्रूपत्वादाविर्भावतिरोभावेष्वप्येवत पा-३
घात्वा आवृत्तिशंकापि तथापि लोकबुद्ध्यनुसारेणावृत्तावपि समाननामरूपत्वात् । समुद्रेजलप्रक्षेपवत् । पुनरुपादानेतदेव नित्यस्याभावेपि नामरूपयोस्तुल्यत्वादन्यस्य भेदकस्याभावान्नानित्यसं २४
पणार्थं वि[illegible]धिकाः शेषा मोक्षिकातुसा॥ अत एव ऋषीणामप्यत्र मोहः । निश्वसितवचनाच्च तस्या × ६

योगविरोधः॥ऊतःद्व्रनि[illegible]न्न॥ ॥दृश्यते हि तथा॥ ॥वेद। पितृमातृस्त्रीभर्तृशरीरगंगादिषु तद्देवेदमितिव्यवहारस्य सिद्धत्वात्सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चांतरिक्षमथो
सुवरिति। स्मृतेश्च सर्ववेदमयेनेदमात्मनात्मात्मयोनिना। प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते इत्यादिस्मृतेः सर्वस्मृतेश्च। ऋषीणां पूर्वचरितस्मरणं स्मृतिरुच्यते इति। अतो पूर्वविलविचारेपि
पदार्थानां नित्यत्वान्न वेदस्यानित्यसंबंधः॥ ॥मध्वादिष्वसंभवादनधिकारं जैमिनिः॥ ॥अर्थविचार एवैकदेशेन पूर्वपक्षमाह। ननु मध्वादिविद्यासु देवानामनधिकारात्सर्वत्रैवानधिका
रः। तथाहि। असौ वा आदित्यो देवमधु तस्य द्यौरेवेत्यादिना सूर्यस्य देवमधुत्वं प्रतिपाद्य तद्रश्मीनां वेदत्वं च नवसुरुद्रादित्यमरुत्साध्याः पंचदेवगणास्च मुख्येन मुखेनामृतं दृष्ट्वैव तृप्यंतीति पंचवि रव्ये ३
धा एव च देवाः। स्वतः सिद्धं च तेषां तन्मधु अनुपासकत्वान्न देवासुरकल्पनाकृतार्थत्वाच्च॥ ब्रह्मणोपि देवत्वं। आदित्यब्रह्मेन सर्वा एव ते चोपासनविद्या गृहीता। अतस्तेषामुपास्यत्वात् कृतार्थत्वा
च्चानाधिकारः। नहि प्रयोजनव्यतिरेकेण कस्यचित्प्रवृत्तिः संभवति मोक्षस्याप्यधिकारनिवृत्तौ उत्तरमार्गविनिवृत्त्वात्स्वत एव सिद्धिः। यावदधिकारमिति न्यायात् ब्रह्मनयाजयदित्यत्रापि भावि
न्येव मंतानस्मान्मनुष्याधिकारकमेव ज्ञानं कर्म चेति न देवानामधिकार इति जैमिनिराचार्यो मन्यते॥ मनुष्याणामेव ज्ञानकर्मणोस्तरतमभाववतां न इष्टभोगानंतरं मोक्षप्राप्तेरिति॥ ज्यो
तिषि भावाच्च॥ ॥किंच तेषां सर्वेषामनधिकारः प्रत्यक्षत एव दृश्यते॥ सर्वे हि नक्षत्रादिरूपेण महाभोगवंतो जगदवभासकत्वेन ज्योतिश्चक्रे दृश्यंते। अग्निपुच्छस्य प्रथमं कांडमित्यादिश्रुतेश्च। न
[illegible]नादृशां प्राप्तैश्वर्यवतां सर्वोपास्यानां मोक्षदातॄणां ज्ञानकर्मणोः कश्चनोपयोगोस्ति तस्मादनधिकार एव देवानामित्येवं प्राप्ते उच्यते॥ ॥भावं तु बादरायणोस्ति हि॥ ॥उक्तपूर्वपक्षं व्याव
र्तयति भावं देवानामधिकारस्य सद्भावं बादरायण आचार्यः गोण सिद्धांतानावाय। स्वनामग्रहणं॥ किमार्षेण ज्ञानेन तथा सर्वमिति उत्पन्नमन आह। अस्ति हि। [illegible]। अस्ति वेदेषु नापति

दे

रकामयतप्रजायेयेतिसएतमग्निहोत्रंमिथुनमपश्यत्तदुदितेसूर्येऽजुहोदितिदेवावैसत्रमासतेत्यादिभिःकर्माधिकारोनिश्चितः।तद्योयोदेवानांप्रत्यबुध्यतसएवतदभवदित्यादितथेंद्र
प्रजापतिसंवादेब्रह्मादेवानामितिच।एवमेवंविधैर्वाक्यैर्देवानामप्यधिकारोऽस्ति।यच्चचन्नदेवानांफलभोगएवप्रतीयनेनकरणंतच्चापितेषामधिकारेऽङ्गीकर्तव्यः।श्लिष्टकोऽयमर्थः।एतेहिवस्व
च्छाधिदैविकभगवद्वपवभूताःअनत्रानात्।अन्यथावक्तृत्वादिविरोधः।यद्वसूनांप्रातःसवनमित्यादिवत्।नहिजीवविशेषाद्दृष्टादृश्यंतितस्मादिदंब्रह्मप्रकरणमेवयोपिदेवोपासन
वत्।प्रतीयतेभगवद्दंशएवाधिदैविकः।नवापूर्वकल्पेननिर्णयः।तथासतितेषामभावादनुपास्यत्वं।अनित्यतायाश्चवेदस्यस्यात्।तस्माद्देवानामप्यधिकारइतिब्रह्मबलविचारएवयुक्तइ
तिसिद्धं॥ ॥शुगस्यतदनादरश्रवणात्तदाद्रवणात्सूच्यतेहि॥ ॥इदानींशूद्रस्याधिकारोनिराक्रियते।यथाकर्मणिएतयानिषादस्थपतिंयाजयेत्साहितस्येष्टिरितिश्रुतेईविद्धदाधावेति
शूद्रस्येतिलिंगात्तदोहादौचशूद्रस्याधिकारः।एवमिहापिसंवर्गविद्यायांशूद्रस्याधिकारइतितन्निराकरणार्थमिदमधिकरणमारभ्यते।एवंश्रूयतेजानश्रुतिर्हपौत्रायणःइत्यत्रहंसवाक्यश्र
वणानंतरंसयुग्वनोरयिक्वस्यसमीपंगतःजानश्रुतिःपौत्रायणः रयिक्वेमांनिषद्शतानिगतानित्यादिनादेवताष्टःप्रत्युवाचाहहारेत्वाशूद्रतवैवसहगोभिरस्त्वित्यादिनाजानश्रुतिंशूद्र
त्वाह्वेनसंबोध्यपुनश्चशूद्रशानेनमुखेनेत्युक्त्वासंवर्गविद्यामुपदिष्टवान्।अतोत्रविद्यायांजातिशूद्रस्याप्यधिकारइत्याशंक्यपरिहरतिनात्रशूद्रशब्दोजातिशूद्रवाचीकिंतुमत्सरयुक्तस्त्वम दे २
त्रनाधिकारीतितथामंवोधनंतदाह।शुक्।कृर्केंअस्यजानश्रुतेःसमजनितचहेतुःतदनादरश्रवणात्तस्माद्धंसादनादरस्यश्रवणात्कंवरएनमेतत्सन्तंसयुग्वानमिवरयिक्वमात्थेतिस्वाप पा०३
कर्षश्रवणात्।किमतोयद्येवमतआह।तदा[illegible]वणात्।।तत्रदनंतरंआद्रवणात्तत्सुचमनुआद्रवतीतिशूद्रःपरोक्षवादार्थंदीर्घःसर्वज्ञत्वख्यापनायरूढीर्योगमपहरतीतिन्यायात्कथमेव ३५

दे दे २

दे

र कामयत प्रजायेयेति स एतमग्निहोत्रं मिथुनमपश्यत्तदुदिते सूर्येऽजुहोदिति देवा वै सत्रमासतेत्यादिभिः कर्माधिकारो निश्चितः। न चोपायो देवानां प्रत्यक्षबुध्यत स एव तदभवत् इत्यादि तथेत्र
पपति संवादे ब्रह्मा देवानामितिच एवमेवं विधैर्वाक्यैर्देवानामप्यधिकारोऽस्ति यच्चोक्तं न देवानां फलभोग एवं प्रतीयते न करणं तच्चापि तेषामधिकारेऽङ्गीकर्तव्यः स्थितश्चायमर्थः। एतेन हि वस्त्व
च्चाधिदैविकभगवदवयवभूताः अनशानात्। अन्यथा वस्तुत्वादिविरोधः। यद्यस्तत्तां प्रातः सवनमित्यादिवत्। न हि जीवविशेषादृष्टात्स्पष्टं ति तस्मादिदं ब्रह्मप्रकरणमेव योऽपि देवोपासन
वत्। प्रतीयते सभगवदंश एवाधिदैविकः। न वा सर्वकल्पेन निर्णयः। तथा सति तेषामभावादनुपास्यत्वं। अनित्यता च वेदस्यस्यात्। तस्माद्देवानामप्यधिकार इति श्राद्धबलविचार एव युक्त इ
ति सिद्धं॥ ॥शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि॥ ॥इदानीं शूद्रस्याधिकारो निराक्रियते। यथा कर्मणि एतया निषादस्थपतिं याजयेत्सा हि तस्येष्टिरिति श्रुतेरीविक्षुद्रा धावेति
शूद्रस्येति लिंगात् दोहादौ च शूद्रस्याधिकारः एवमिहापि संवर्गविद्यायां शूद्रस्याधिकार इति तन्निराकरणार्थमिदमधिकरणमारभ्यते। एवं श्रूयते जानश्रुतिर्ह पौत्रायणः इत्यत्र हंसवाक्यश्र
वणानंतरं सयुग्वनो रयिकस्य समीपं गतः जानश्रुतिः पौत्रायणः रयिक इमानि षट्शतानि गवां निष्कादिना देवता पृष्टः धन्तु वा चाहहारेत्वा शूद्र तवैव सह गोभिरस्त्वित्यादिना जानश्रुतिं शूद्र
शब्देन संबोध्य पुनश्च शूद्रानेन मुखेनेत्युक्त्वा संवर्गविद्यामुपदिष्टवान्। अतोऽत्र विद्यायां जातिशूद्रस्याप्यधिकार इत्याशंक्य परिहरति नाच शूद्रशब्दो योजाति शूद्रवाची किंतु महत्तरयुक्तस्त्वम
त्रनाधिकारीति तथामं बोधनं तदाह। शुकृर्कं अस्य जानश्रुतेः समजनि तच्च हेतुः तदनादरश्रवणात्तस्माद्धंसादनादरस्य श्रवणात् उक्तं कं वर एनमेतत्सन्तं सयुग्वानमिव रयिकमात्थेति तस्याप
कर्षश्रवणात्। किमतो यद्येवमत आह। तदा[illegible]वणात्॥ तत्तदनंतरं आद्रवणात् सूचमनु आद्रवतीति शूद्रः परोक्षवादार्थ दीर्घः सर्वज्ञत्वख्यापनाय रूढो योगमपहरतीति न्यायात् कथमेव

दे ३
पा॰ ३
३५

दे

दे २

५४ का।क्षसेनिरित्यस्य व्याख्यानं। चैत्ररथ इति चित्रा रथा यस्य तस्यापत्यं

मत आह। स्पृश्यते हि। स्वस्य सर्वतत्त्वं स्पृश्यते हंसवाक्याच्छोके जाते त्वमागत इति। अन्यथापपत्रस्याधिकारवचनमनर्थकं स्यात्। उक्तश्चायमर्थो ब्रह्मविदः सर्वज्ञ इति तस्य मा स्मयनिराकर

णं वा संबोधनफलं। तस्माच्छुचं प्रत्याद्रवणाद्वा शूद्र इति पदप्रयोगो न जातिशूद्रवाची। कुत एवमत आह॥ ॥क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात्॥ ॥जानश्रुतेः पौत्रायणस्य क्षत्रियत्वमवग

म्यते। गोनिष्करथकन्यादानात्। न हि क्षत्रियप्रभृतयोऽन्ये तेन क्षत्रियादन्यस्य संभवं तिराजधर्मत्वात्। न चान्यो ब्राह्मणायजमानत्वेन कन्यां दातुं शक्नोति न वा प्रथमं हंसवाक्यं श्रुत्वेमं गच्छते। उपदेशाच्चे

ति चकारार्थः। तथापि संवर्गविद्यायां शूद्रस्यैवाधिकारं मन्वानस्य निराकरणार्थं हेतुमाह। उत्तरत्र चैत्ररथेन। लिंगात्। अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिमित्यत्र तत्र ब्राह्मणक्ष

त्रियौ तौ निर्दिष्टौ कक्षा सेना यस्येति कक्षसेनस्यापत्यं तेन चैत्ररथेन कक्षा स्था रूपा रथा इति व्याख्यानं एतेन वै चित्ररथं कापेया अयाजयन्निति शौनकश्च कापेयो याजकौ याज्यस्य। चित्ररथस्य पुत्रः श्च

काक्षसेनिरिति ब्रह्मचारी ब्रुवीत इमौ उ संवर्गविद्योपासकौ प्राणाय हि भिक्षा तस्मान्न ददतुः। उभावपि शौनको भगवतः। तेन प्रकृतेऽप्येतौ गुरु क्षत्रियौ ब्राह्मणक्षत्रियावेवेति गम्यते तस्मान्न जातिशू

द्रः संवर्गविद्यायामधिकारी॥ ॥संस्कारपरामर्शात्तदभावाभिलापाच्च॥ ॥इदानीं शूद्रस्य कश्चिदपि ब्रह्मविद्यायामधिकारश्चेदत्रापि कल्प्येत तत्तु नास्ति सर्वत्र संस्कारपरामर्शात् उपनयनसं

हि स्कारः सर्वत्र परामृश्यते तं होपनिन्ये। अधीहि भगव इति होपससाद तान्हानुपनीयेत्यादिप्रदेशेषु उपनयनपूर्वकमेव विद्यादानं प्रतीयते। शूद्रस्य तु तदभावाभिलापात् चतुर्थ एकजातिस्तु शूद्र इति रगी

न शूद्रे पातकं किंचिन्न च संस्कारमर्हतीति शूद्रस्य संस्कारनिषेधात् चकारात् न शूद्राय मतिं दद्यादिति निषेधः॥ ॥तदभावनिर्द्धारणे च प्रवृत्तेः॥ ॥इतश्च न शूद्रस्य सर्वथाधिकारः तदभावनिर्धारणे

शूद्रत्वाभावनिर्द्धारण एव गुरोः शिष्यभावप्रवृत्तेः। सत्यकामो ह जाबाल इत्यत्र गौतमः सत्यकाममुपनिनेषैनैतदब्राह्मणो विवक्तुमर्हतीति सत्यवचनेन शूद्रत्वाभावं ज्ञात्वैव चकार एवार्थे चकारेण निर्द्धारण

मृन्मयज्ञानार्थंवर्णित्वंशूद्राभावंच॥तस्मान्नशूद्रस्याधिकारः॥ ॥श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च॥ ॥इतश्चाधिकारचिंतावेदस्यश्रवणमध्ययनंअर्थज्ञानंत्रयमपितस्यप्रतिषिद्धं
।तस्मानिधानस्यस्यच॥अथास्यवेदमुपशृण्वतस्त्रपुजतुभ्यांश्रोत्रप्रतिपूरणमितिपद्युवाएतत्श्मशानंयच्छूद्रः।तस्माच्छूद्रसमीपेनाध्येतव्यमितिउदाहरणेजिह्वाछेदोधारणेशरीरभेद
इतिदोहादौशूद्रसंबंधेमंत्राणांमन्त्रावणस्मृतिश्रुत्यापिवेदार्थेनशूद्राधिकारइत्याहस्मृतेश्चवेदाक्षरविचारेणशूद्रःपततीतितल्लक्षणादितिचकारस्त्वधिकरणसंपूर्णत्वद्योतकः॥स्मार्त्तपौरा
वेण णिकज्ञानादौतुकारणविशेषेशूद्रयोनिगतानांमहतामधिकारः।नत्वापिनकर्मजातिशूद्राणां।तस्मान्नास्तिवैदिकेक्वचिदपिशूद्राधिकारइतिस्थितं॥कंपनात्॥ ॥कठवल्लीविचारेणनिश्चि
ताद्याधिकारिणःवाक्यांतरंचतत्रत्यंचिंत्यतेप्रलयावधि॥यदिदंकिंचजगत्सर्वंप्राणएजतिनिःसृतं।महद्भयंवज्रमुद्यतंयएतद्विदुरमृतास्तेभवंतीति।अत्रप्राणवज्रोद्यमनत्रासाभ्यांसंदेहः॥किंप्रा
णोपासनाइंद्रोपासनावाब्रह्मवाक्यंवेतिबाधकत्वाद्ब्रह्मश्रुतित्वात्प्रकरणेननिर्णयः।अमृतंवैप्राणइतिश्रुतेः।प्राणोपासकस्याप्यमृतंप्राप्तिर्युज्यतेइंद्रस्याप्यमरत्वात्वज्रमुद्यतमितिप्राण
पक्षेवियोजनेमरणजनकत्वाद्भयरूपत्वंइंद्रपक्षेबलाधिष्ठातृत्वात्प्राणत्वंतस्मात्प्राणइंद्रोवावाक्यार्थइतिएवंप्राप्तेउच्यते।कंपनात्कंपनमत्रप्रथमवाक्यार्थःसचभयहेतुकः।अविशेषेणसर्वजगत्
कंपनंभगवद्धेतुकमेवभवति।नचैकांततोवज्रइंद्रस्येवायुधंभवति।अनिहृदयत्वात्तंतस्यतानस्यहृदयमाच्छिंदन्सातानिरभवदितिश्रुतेः।तस्मान्मारकरूपमेवेदंभगवतःप्राणशब्दवाच्यत्वंचप्र
वमेवासिद्धं॥तस्मात्सर्वजगत्कंपनंभगवत्कृतमितिभगवानेववाक्यार्थः॥ ॥ज्योतिर्दर्शनात्॥ ॥यएषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरभिसंपद्यस्वेनरूपेणाभिनिष्पद्यतइतितत्रसंशयः पा॰३
परंज्योतिर्महाभूतरूपंब्रह्मवेति।ब्रह्मधर्माश्चयेकेचित्सिद्धायुक्त्यापिसाधिताः।निर्णायकास्ततोप्यन्येचत्वारोत्रनिरूपिताः।तत्ररूढ्योपपत्त्याचमहाभूतमेवज्योतिरित्येवंप्राप्ते।उच्यते।ज्योतिर्ब्रह्मै २६

॥इतिदशमाधिकरणं॥

मृन्नयज्ञानार्थंवर्णितंशूद्राभावंच॥तस्मान्नशूद्रस्याधिकारः॥ ॥श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च॥ ॥इतश्चाधिकारचिंतावेदस्यश्रवणमध्ययनंचअर्थज्ञानंचयमपितस्यप्रतिषिद्धं
।तत्संनिधावस्यस्यच॥अथास्यवेदमुपशृण्वतस्त्रपुजतुभ्यांश्रोत्रप्रतिपूरणमितियद्युवाएतत्श्मशानंयच्छूद्रः।तस्माच्छूद्रसामीप्येनाध्येतव्यमितिउदाहरणेजिह्वाछेदोधारणेशरीरभेद
इतिदोहादौशूद्रसंबंधेमंत्राणामुनावणस्मृतिप्रयुक्त्यापिवेदार्थेनशूद्राधिकारइत्याह स्मृतेश्चवेदाक्षरविचारेणशूद्रःपततीतितल्लक्षणादितिचकारस्त्वधिकरणसंहर्षत्वद्योतकः॥स्मार्त्तपौरा
वेण णिकज्ञानादौतुकारणविशे[illegible]शूद्रयोनिगतानांमहतामधिकारः।तत्रापिनकर्मजातिशूद्राणां।तस्मान्नास्तिवैदिकेक्वचिदपिशूद्राधिकारइतिस्थितं॥कंपनात्॥ ॥कठवल्ली।विचारेणनिश्चि
ताद्यधिकारिणः वाक्यांतरंचतत्रत्यं।चिंत्यतेप्रलयावधि॥यदिदं।किंचजगत्सर्वंप्राणएजतिनिःसृतं।महद्भयंवज्रमुद्यतंयएतद्विदुरमृतास्तेभवंतीति।अत्रप्राणवज्रोद्यमनशब्दाभ्यांसंदेहः॥किंप्रा
णोपासनाइंद्रोपासनावाब्रह्मवाक्यंवेति।बाधकत्वाद्ब्रह्मश्रुतित्वात्प्रकरणेननिर्णयः।अमृतंवैप्राणइतिश्रुतेः।प्राणोपासकस्याप्यमृतंप्राप्तिर्युज्यतेइंद्रस्याप्यमरत्वात्वज्रमुद्यतमितिप्राण
पक्षेवियोजनेमरणजनकत्वाद्भयरूपत्वंइंद्रपक्षेबलाधिष्ठातृत्वात्प्राणत्वंतस्मात्प्राणइंद्रोवावाक्यार्थइतिएवंप्राप्तेउच्यते।कंपनात्कंपनमत्रप्रथमवाक्यार्थःसचभयहेतुकः।अविशेषेणसर्वजगत्
कंपनंभगवद्धेतुकमेवभवति।नचैकांततोवज्रमिंद्रस्येवायुधंभवतीति।अ।निर्हृदयत्वात्तत्तस्यत्तांनस्यहृदयमाछिंदन्साक्षान्निरभवदितिश्रुतेः।तस्मान्मारकरूपमेवेदंभगवतःप्राणशब्दवाच्यत्वंब्र
र्वमेव।सिद्धं॥तस्मात्सर्वजगत्कंपनंभगवत्कृतमितिभगवानेववाक्यार्थः॥ ॥ज्योतिर्दर्शनात्॥ ॥यएषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरभिसंपद्यस्वेनरूपेणाभिनिष्पद्यतइतितत्रसंशयः पा॰३
परंज्योतिर्महाभूतरूपंब्रह्मवेति।ब्रह्मधर्माश्चयेकेचिल्लिङ्गाद्युक्त्यापिसाधिताः।निर्णायकास्ततोप्यन्येचत्वारोननिरूपिताः।तत्ररूढ्योपपत्त्याचमहाभूतमेवज्योतिरित्येवंप्राप्ते।उच्यते।ज्योतिर्ब्रह्मे २६

॥ इतिदशमाधिकरणं॥

इत्येकादशाधिकरणं

वक्तः दर्शनात्तद्दर्शिनं सर्वत्र दर्शनं न्याय इति यावत् सुषुप्ते सोमर्वत्र सता सौम्य तदा संपन्नो भवतीति संपद्य न विदुः सति संपद्यामह इति च अहरहर्ब्रह्मलोकं गच्छंतीत्यादिश्रुतेरेषु ब्रह्मसंपत्ति
रेवोक्ता अत्रापि संप्रसादवचनात् परं ज्योतिर्ब्रह्मैव तस्माद्यः कश्चन शब्दो ब्रह्मस्थाने पठितस्तद्वाचक एवेति॥ ॥आकाशोऽर्थान्तरत्वादिव्यपदेशात्॥ ॥आकाशो वै नामरूपयोर्निर्वहिता ते यदंत
रा तद्ब्रह्मेति श्रूयते तत्राकाशशब्दे संदेहः। भूताकाशः परमात्मा वेति नामरूपनिर्वाहमात्रत्वमवकाशदानाद्भूताकाशस्यापि भवतीति ब्रह्मपरत्वमस्य च नियामकस्याभावादित्येवं।
प्राप्ते उच्यते। आकाशः परमात्मा अर्थान्तरत्वादिव्यपदेशात्। यद्भूताकाशस्य प्रयोजनं श्रुतिसिद्धं तस्मादन्यस्य व्यपदेशः कार्यान्तरादिव्यपदेशाश्च यत्रैव हि सिद्धवत्कारेणोक्तस्य धर्मा
श्च तदीयाः तदेव ब्रह्मेति नापि नामरूपनिर्वाहि आकाशस्य माहात्म्यपरे उभे इति। वै निश्चयेनेति सिद्धवत्कारान्नोपासनापरत्वं निर्वाहस्य ब्रह्मधर्मत्वं न श्रुत्यन्तरसिद्धमिति विचारः॥ अ
र्थापि निरूपकस्य च यमेव न्याय इति तस्माद्यत्रैव तद्धर्मकथनं अस्य वाच्यस्य तत्रैव ब्रह्मपरत्वमिति सिद्धं॥ ॥सुषुप्त्युत्क्रान्त्योर्भेदेन॥ ॥बृहदारण्यके ज्योतिर्ब्रह्मणे याज्ञवल्क्य किं ज्योति
रयं पुरुष इत्यारभ्य अभयं ह वै ब्रह्म भवति य एवं वेदेत्यन्ते संदेहः॥ किं ब्रह्मवाक्यमेतन्न उत जीवस्येति जीवस्य ब्रह्मत्वप्रतिपादने जीववाक्यत्वं स्यान्न अन्येण ब्रह्मण एव ज्ञानकर्मत्वे ब्रह्म
वाक्यत्वमिति यद्यप्यर्थज्ञानेन संदेहः तथापि नियामकं हेतुमाह। भेदेनेति। नस्यायमर्थः॥ किं ज्योतिरयं जीव इति प्रश्ने सूर्यचंद्राग्निवाङ्निराकरणानंतरं आत्मज्योतिः। आत्मानावोगेनेवास्य ज्यो
तिरित्युत्तरेणानंतरं कतम आत्मेति प्रश्ने योऽयं विज्ञानमयो ज्ञानरूपः इंद्रियेषु हृदि च प्रकाशमानः इत्युत्तरे जीवोऽप्येतादृश इति तन्निराकरणार्थं स समानः सन् जीववत्कल्पः सन् क्रीडतीत्याह। तस्योभय
धर्माश्चिपुच्यंते। क्रियामात्रस्य तन्मूलत्वात् यत्र हि चत्वारि स्थानानि अयं लोकः परो लोकः स्वप्न इति त्रयं जीवसमाननया अनुभवति। तत्र स्वप्नस्य मिथ्यात्वाद्द्वयमेव सुषुप्तं च तुर्यं जीवस्य तमोऽपि

तत्रास्मिन्लोकेजीवस्यानीशित्वंतस्यकर्मिद्धंमोक्षेत्वैक्यंस्वप्रसक्तमायाश्चतःपरंद्वयमवशिष्यतेतेनत्रश्रुत्यैवभेदःप्रतिपादितः।।तत्रभगवतोजीवस्यअन्तःकरणेन्द्रियधर्माःप्राप्नुवंतीतितत्रानुकरणमा
द्वि ह।ध्यायतीवलेलायतीवेतिबुँसहितःस्वयमेवस्वप्नोभूत्वा जागरणानुसंधानंकरोतिएवंजाग्रत्स्वप्नौब्रह्मणोलोकद्वयंजीवस्यस्थानत्रयमाह।।सवाअयमितिकांडिकाद्वयेनसइतिपूर्वप्र
क्रांतोजीवःजीवस्यशरीरेन्द्रियाणांदुःखदातृत्वमेवअयेतिभगवच्चरित्रंमत्तस्वप्नानंदंजीवस्यदुःखंचपश्यतिभेदोऽत्राह्वात्जीवस्यानीशित्वात्येनप्रकारेणायंजीवःपरलोकेगच्छतितमुपायंभ
गवानेवकरोति॥अथोखल्वितिभगवतोनजागरितस्वप्नभेदोस्तीतिपक्षःपरस्वयंज्योतिष्टुंतत्रस्पष्टं।एतावदूरेभगवच्चरित्रमंगीकृत्यजीवविमोक्षार्थंप्रश्न।सवाएषइतिजीववाक्यंतस्यसहउःसं
गोनास्तीतिस्वप्नसंगाभावंप्रत्यक्षतःपरदर्शयपरःअसंगत्वमाह।तावतापिजागरणावस्थायामसंगत्वज्ञानायपुनःप्रश्नः।तत्रमत्स्यदृष्टांतोवस्थाभेदज्ञानायक्रियाज्ञानप्रधानंरूपेनसुषुप्त्येतद्दृष्टं
नस्कसुषुप्तौभगवत्स्वरूपप्राप्त्येअवस्थांतोयत्रेतिचभगवान्पंचवर्णनाडीकृतएवास्यक्लेशोभगवत्कृतएवानंदइतिस्वप्नानंदोभगवद्रूपःपरमोलोकः॥सुषुप्तिस्वकामरूपोभगवान्अत्रज्ञाना
भावात्उभयोःस्पष्टतयाभेदनिर्देशःशारीरःप्राज्ञइतिनाद्यछादनाभावोतिछेदःतत्रभगवत्स्वरूपंगतस्यबाह्येन्द्रियधर्माभावमाह।विज्ञानीयादित्यंतेनबाह्येन्द्रियाणांसलिलत्वमितिपूर्वोपपत्तिः
एषब्रह्मलोकइत्यारभ्यअनुशाशासैतदमृतमित्यंतेनानंदरूपोभगवान्प्रतिपादितःफलत्वाय।एतावताउभयासंगःप्रतिपादितःतस्यानुभवारूढत्वायपुनःप्रश्नः।दर्शनादर्शनावापोह्यापा
प्यां।सिद्धमसंगोह्ययंपुरुषइतिएवंजीवंसुषुप्तौभगवंतंचज्ञात्वामोक्षोपायंपृच्छतितत्रयाज्ञवल्क्यस्यभयंजातंसुबुद्धिरयंनिर्बंधेनापिसर्वंज्ञास्यतीतिजीवब्रह्मधर्मानेकीकृत्यजीवोपक्रमेणाब्रह्मो पा२
पसंहारेणाह।तत्रयत्रेतिजीवस्यमूर्छोपितापावस्था।तद्यथाअनइतिमरणावस्थातत्र।भगवानेवैनंलोकांतरेनयति।तद्यथाराजानमिँभगवतःसन्मानंएवंविदमितिवचनात्जीवस्कनैवंविवसिद्ध ३७

ति१

वद्वचनात्तज्ज्ञानविधिः वाक्यभेदप्रसंगाच्चाश्रयत्वेति जीवे मोक्षो धिकः। अथैनमेते प्राणा इति भगवच्चरित्रं संपद्यत इत्यंतेन श्लोकेन तत् ब्रह्म अस्य जीवस्य। अकाममयमनस्य भगवतः स्वरूपं पूर्वमेवोक्तमुवदन्ति भगवन्निर्गमने इन्द्रियाणां निर्गमनात्तस्य चेच्छाधीनत्वात् तदभावे इन्द्रियाणि सुषुम्णेनैव सममवलीयंते ब्रह्मैव सद्रूपरूपस्थः सन्। अपिः समुच्चये मरणस्थिते जीवे ब्रह्माविर्भवतीत्यर्थः। जीवे ब्रह्माविर्भावो न संगत इति तत्प्रतिपादनार्थं श्लोकः। जीवोपदेशप्रकरणाभावेन सिद्धवचनात्तज्जीवन्मुक्तावस्था। नाप्यसंप्रज्ञातसमाधिः मनो तरत्वात् ब्रह्मप्रकरणत्वात् जीवस्य सद्योमुक्तिः फलं उत्क्रमण एव ब्राह्मणस्याप्युक्तत्वात् तद्यथेति सुषुम्नन्नारीरं अनस्थिकश्रुत्यादिसंग्राडित्यंतमुपसंहारः श्लोकास्त्रयोदश सर्वनिर्धारकाः आद्यो ब्रह्मविकृतेः एष इति सुषुम्णो नाडीत्वात्पंचवर्णाः। त्रयं धंतम इति द्वाभ्यामनेवंविदो निंदा। तदेव सत्य इति बुद्धिमतां वचनं आत्मानमिति वैराग्यं यस्यानुवित्तिरिति नवभिर्भगवत्स्तुतिस्तद्धितानं च पुनरेतदेव स्पष्टतयोपदिशति स वा अयमात्मेत्यादि अभयं वै जनक प्राप्तोसीत्यंतं काण्वानां क्वचित्पाठभेदेप्ययमेवार्थः। अत्र प्रकरणे जीवो वा स्यादिति प्राप्ते अभिधीयते ब्रह्मैव प्रकरणार्थः सुषुप्तौ उत्क्रमणे च जीवब्रह्मणोर्भेदेन व्यपदेशात्त्राकाशाव ब्रह्मनिर्हार एव युक्तः॥ ॥पत्यादिशब्देभ्यः॥ ॥किंच सर्वस्य वशीत्यादिशब्देभ्यः स्पष्टमेव ब्रह्मप्रकरणमिति॥ ॥इति श्रीवेदव्यासमतवर्तिविद्वन्मौलिविरचिते ब्रह्मसूत्र ब्रह्मसूत्राणुभाष्ये प्रथमस्याध्यायस्य तृतीयः पादः॥ ॥ब्र। आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च॥ १॥ एवं सर्वेषां वेदान्तानां ब्रह्मपरत्वे निर्णीते केचिद्वेदपठितमात्रं क्वचिद्वेदभागे कापिलमतानुसारिपदर्शनेन तस्यापि वेदमूलकत्वं वदंति तन्निराकरणाय चतुर्थः पाद आरभ्यते। तत्र ईक्षतेर्नाशब्दमिति सांख्यमतमशब्दत्वादिति निवारितं वेदेन प्रतिपादितमिति तत्राशंकते आनुमानिकमप्येकेषां एकेषां शाखिनां शाखासु सांख्यपरिकल्पितप्रकृत्यादिश्रूयते इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः। महतः परमव्यक्तमव्य

गार्य

क्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति काठके श्रूयते। तत्र बुद्धेरात्मा अहंकारः। ततो महान् महत्तत्त्वं ततः अव्यक्तं प्रकृतिस्ततः पुरुष इति न ह्यहंकारादयः पदार्था ब्रह्मवा
दे संभवंति तस्मादेवंजातीयकेष्व तन्मतपदार्थानां श्रवणात् मायाप्रकृत्यविद्यावादात्रपि श्रौता इति चेन्न। शब्दसाम्यमात्रेण न तन्मतं सिध्यति। संदिग्धानां पदार्थानां पौर्वापर्येण निर्णयः॥ न
त्वसंदिग्धवाक्येन सर्वव्याकुलतोचिता। अत्र हि पूर्वमात्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च। इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेंद्रियम
नोयुक्तं भोक्तेत्याहुर्मनीषिणः तदनु चत्वारि वाक्यानि यस्त्वविज्ञानवानित्यादि तदन्विंद्रियेभ्यः परा इति तत्र च पूर्वसंबंध एवार्थ उचितः। तमाह शरीररूपकविन्यस्तगृहीतेः शरीरेण रूप्यंते ये
शरीरेंद्रियादयः ते विन्यस्ता यत्र रूपकभावेन रथादिषु तेषामेवात्र गृहीतिर्ग्रहणं अन्यथा प्रकृतहानाप्रकृतपरिग्रहापत्तेः। जीवप्रकरणं चैतन्मुक्त्युपायोस्य रूप्यते योग्यं शरीरमा
रुह्य गच्छेदिति हरेः पदं। तत्र जीवस्य ब्रह्मप्राप्तौ मुख्यं साधनं शरीरं स रथः सर्वसामग्रीसहितापराधीनयानवांस्तु रथश्च हयाधीनः हयाश्च स्वबुध्यधीनाः सा च प्रग्रहाधीना स च सारथ्य
धीनः स च स्वबुध्यधीनः सा च मार्गाधीना स च प्राप्याधीन इति एवं ज्ञात्वा युक्तसामग्रीकस्तद्देशं प्राप्नोतीति तत्रेंद्रियाणामात्मा विषयाः तेन मनसा सम्यक्त्वेन भावितास्तथा भवंति विरक्तेंद्रि
याणामनर्थात्वात्। बुद्धेरात्मा विज्ञानं तु ब्रह्मविषयकं महद्भवति ततः परमव्यक्तं न प्रकटं भगवद्रूपेव सा तु भगवदधीना न साधनांतराधीना स च भगवान् स्वाधीन इति एवमेवार्थस्तस्योचित
ः किंच दर्शयति स्वयमेवेममर्थं एषु सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति सूक्ष्मयोपनिषदनुसारिण्या बुध्या भगवज्ज्ञानेरितत्वाज्ज्ञिरिति चका पा॰ध
रात्ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरमिति स्मृतिर्गृहीता। तस्मात्साधनोपदेशान्न सांख्यमतमिह विवक्षितमिति॥[१] ॥सूक्ष्मं तु तदर्हत्वात्॥[२] ॥ननु अव्यक्तशब्देन न भगवद्रूपाव ३०

जू२

क्तं श्रुत्या धर्मिप्रवाहात्। इत्याशंकां परिहरति तच्छब्दः सत्त्वं न ब्रह्मैव। धर्मधर्मिणोरभेदात्। अव्यक्तशब्देन हि सत्त्वमुच्यते। तदेव हि सर्वप्रकारेण न व्यज्यते अर्हत्वात्तदेव च हेयोगपंत्र न पत्राप्य।
यं हेतुः तस्माद्धर्मधर्मिणोरभेदाद्भगवानेव सत्त्वमिति तत्स्वरूपेवाव्यक्तवाच्या॥ २ ॥ तदधीनत्वादर्थवत्॥ ३ ॥ ननु धर्मित्वे परत्वमनुपपन्नं अन्यथा ह्युक्तो दोष इत्यत आह। अभेदेपि तत्स्वरूपायास्तदधी
नत्वात्परत्वं॥ तत्र दृष्टांतः अर्थवत्। अर्थः पुरुषार्थः फलं तद्यत् ब्रह्मविदाप्नोति परमित्यत्र एकस्यैव ब्रह्मणः सच्चिद्रूपेण विषयत्वमानंदरूपेण फलत्वमिति न पेचाकुरउकर्षोत्तमं विभागोपि स्वधर्मा
अपि स्वाधीनाः स्वयमपि स्वाधीन इति। तथात्सपाविष्टः साधनं आनंदरूपः फलमिति। अथवाव्यक्तं सच्चिद्रूपमक्षरमेवाक्षतस्मिन्नमतिविज्ञानस्य विषयाधीनत्वमर्थः। एतेनान्येपि सर्वसंज्ञवादिनोनि
राकृता वेदितव्याः। असंबद्धाभिलापाच्च। अनेकरूढिशब्दानां वाच्यं ब्रह्मसेवनापरं। शाकास्तांस्तेन यो ब्रूयुस्ते सन्मार्गद्विड्विञ्च ताः। तस्मादिंद्रियेभ्यः परवाक्येनानुमानिकं। किंचिदस्ति॥ ३ ॥ ज्ञेयत्वा
वचनाच्च॥ ४ ॥ पूर्वापरसंबंधेनार्थः इति पादितः केवलेन तद्वाक्यविचारेपि न तदभीष्टप्रकृतिरूपमव्यक्तं सिध्यतीत्याह। अत्र हि वाक्ये अव्यक्तं ज्ञेयत्वेनोक्तं नैषां तु प्रकृतिपुरुषांतरं ज्ञातव्यं नेष्टसि
रुषार्थः
द्धवन्मात्रनिर्दिष्टो तेषां मते पुरुषार्थसाधनत्वे वा असंबद्धार्थवाक्यत्वमेव स्यात् परत्ववचनं चासंगतं श्लिष्टत्वादुभयोरिति चकारार्थः। अयं हेतुः पूर्वमुक्तोप्यवसरे स्मारितः। तस्मादव्यक्तं न प्रकृतिः॥ ४ ॥
ख्याति।श्र
वदतीति चेन्न प्राज्ञो हि प्रकरणात्॥ ५ ॥ ननु ज्ञेयत्वावचनमसिद्धं पूर्वनिर्दिष्टमात्रमुक्तायेज्ञेयत्ववचनात्। अत्राशब्दमस्पर्शमरूपमव्ययं तथातथारसं नित्यमगंधवच्च यत् अनाद्यनंतं महतः परं ध्रुवं निचा
सु
य्य तं मृत्युमुखात् प्रमुच्यते इति उत्तरवाक्ये वदतीति चेत्। प्रकरणस्य नियामकत्वेनैकवाक्यत्वे द्वयोः सर्वैकवाक्यत्वेन प्राज्ञः परमात्मैव निचाय्यः। न तु द्वयोरैकवाक्यत्वं वक्तुं शक्यं। तस्मात्प्रकरणस्य निया
मकत्वे अत्राशब्दवाक्यमपि भगवत्परमेव॥ ५ ॥ त्रयाणामेवमुपन्यासः प्रश्नश्च॥ ६ ॥ ननु न वयं सर्वमेकं प्रकरणमिति वदामः किंतु इंद्रियेभ्यः परा इत्यारभ्य नाचिकेतमुपाख्यानमित्यंतं भिन्नं प्रकरणं तत्र

।न।२ श्लो २

यमं पदार्था निर्दिष्टाः तदनु एकश्रुतेष्विति पुरुषशब्दानां। अत्राद्यमिति तु प्रकृतिज्ञानं तस्मादेतावत्प्रकरणे सांख्यमतनिरूपणादशब्दत्वमसिद्धमित्याशंक्य परिहरति। त्रयाणामेवमुपन्यासःप्र
श्नश्च अस्मदुक्तव्याख्याने। त्रिप्रकरणत्वं अन्यथा चतुःप्रकरणत्वं स्यात्। तृतीया चैषा वक्षी सत्वमग्निं स्वर्गमध्येपि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यमिति प्रश्नः प्रथमः प्रतिब्रवीमि तदु मे निबो
ध स्वर्गमग्निं नाचिकेत प्रजानन् इत्याद्युत्तरं। येयं प्रेते विचिकित्सा मनुष्ये स्तीत्येके नायमस्तीति चैके इति द्वितीयः प्रश्नः। देवैरत्रापीत्यग्रे उत्तरं। अन्यत्र धर्मादन्यत्राधर्मादिति तृतीयः प्रश्नः।।
सर्वे वेदा यत्पदमामनंतीत्यादिना उत्तरं। एवमग्निजीवब्रह्मणां प्रश्नोत्तराणि तत्र यदि सांख्यमतनिरूपणीयमिंद्रियेभ्य इत्यादि स्यात् तदा चतुर्थस्याप्युपन्यासः स्यात् उपन्यासे हेतुप्र
श्नः अत एव प्रश्नाद्यवर्णनं तस्य प्रकृतेर्भावादस्मदुक्तरीत्या त्रीण्येव प्रकरणानीति सिद्धं उत्तरप्रश्नाभावार्थश्चकारः।। ।।महद्वच्च।। ।।ननु तथापि महदंतरेष्वत्र संकेतिताः कथं ब्रवादे ब्रह्मप ह्म ५
रतंया योज्यं तदस्याशंक्य परिहरति। महद्वत् यथा महच्छब्दो महांतं विभुमात्मानं। वेदाहमेतं पुरुषं महांतमित्यादौ महच्छब्दो ब्रह्मपरो योगेन। एवमव्यक्तशब्दोऽक्षरवाचहु इति। न हि प्य ६
सांख्यमत इव वेदांतेपि महच्छब्दः प्रथमकार्ये वक्तुं शक्यते। तस्मादिंद्रियादिवाक्ये सांख्यपरिकल्पितानां पदार्थानां नाँपि नास्तीति सिद्धं। चकारोऽधिकरणसमुच्चयद्योतकः।। ।।चमसव
द्विशेषात्।। ।।पुनः श्रुत्यंतरेण प्रत्यवस्थितं निराकर्तुमधिकरणांतरमारभते।। ननु प्रकरणवशात् पूर्वमस्मदुक्तोऽर्थोऽन्यथा वा। एतिः यत्र प्रकरणापेक्षैव नास्ति मंत्रे तदस्माकं मतं। अजामेकां लो
हितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्य इति यद्यपीदं श्वेताश्वतरोपनिषदि चतुर्थाध्याये विद्यमानत्वात् पूर्वापरसंब पा० ध
धमेव वक्तव्यं तत्र ब्रह्मवादिनो वदंति किंकारणं ब्रह्मेत्युपक्रम्य ब्रह्मविद्यैव निरूपिता तथापि पूर्वकांडे प्रणवादिमंत्राणां नायं नियम इति प्रकृतेपि मतांतरवाचकस्यैव प्रकृतोपयोग इति शं रू०

स

मा४

कोनेध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढामिति च तथा ज्ञाज्ञौ द्वावजावीशानीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता॥ अग्रे च यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनी
श्च सर्वाः ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येदित्यादिवाक्यानि कपिलतन्मतवाचकानि वर्तन्त इति सांख्यमतमपि वैदिकमेवेत्येवं प्राप्ते उच्यते। चमसवदविशेषात्॥ अर्वा
ग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपं। तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदाना इति मंत्रे यथा न विशेषो विधातुं शक्यते नेदं कर्मविशेषं कल्पयित्वा तत्रार्वाग्बिलच
मसं कल्पयित्वा न त्वयं शिरोरूपं सोमं समं होतारो मंत्रेण भक्षयेयुरिति कल्पयितुं शक्यते। तथा प्रकृतेऽपि न तस्याः कृष्णशुक्ललोहितत्वेन रजःसत्वतमांसि कल्पयित्वा न तद्वशेन सर्ववेदमतं शक्यते कल्पयि
तुं कपिलऋषिवाक्यमप्यनित्यसंयोगभयान्नित्यरूपैरेवानुवादकं तस्मान्न मंत्रमात्रेण प्रकरणश्रुत्यंतरनिरपेक्षेण विशेषः कल्पयितुं शक्यः॥ ॥ज्योतिरुपक्रमा तु तथा ह्यधीयत एके॥ ॥ननु च अस
मंत्रे अर्वाग्बिल इति मंत्रव्याख्यानमस्ति शिरश्चमसः प्राणा वै यशः प्राणा वा ऋषय इति नात्र तथा व्याख्यानमस्ति। तामिमां शंकां परिहरति शास्त्रः॥ अजाशब्देन ज्योतिरेवोच्यते यथा ह्यजा अल्पदोग्ध्री तथेयं
न स्वरसतः सदा शी अग्निः स्वर्यसोमविद्युद्रूपा ब्रह्मणो हंसोऽकचरणरूपा भगवत्कार्यरूपांशत्वात् तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति श्रुतेश्च प्रथमोत्पन्ना देवता अजाशब्देनोच्यते। तत्र रेखः उपक्रमात् श्च
श्चैवोपक्रममेतद्देवाग्निस्तद्वायुस्तदादित्यस्तदु चन्द्रमा इति द्वा सुपर्णेति वाग्नेर्मध्ये चायं मंत्रः पूर्वोत्तरसंबद्धमेवेदं तिसामुख्या सृष्टिः। अजद्वयं जीवब्रह्मरूपमिति। अतः प्रकरणेन स्पष्ट इति निरूपयति
तथा हि श्रुत्यंतरे स्पष्टमेव अधीयत एके। यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति। एवमप्येपि कलात्रये अनेन जीवेनात्मनेति जीवब्रह्मणोश्चानुप्रवेशः बीजे पित्रे विश्वमिति। सत्कृप
त्वं भगवत अभोगेऽहं तु जीवेन तु क्रूनोगामिति। तस्मात्प्रकृतेऽपि चमसवच्छ्रुतावेवार्थकल्पनात् न सांख्यमतप्रतिपादकत्वं॥ ॥कल्पनोपदेशाच्च मध्वादिवदविरोधः॥ ॥ननु द्विविधा शब्दप्रवृत्तिः योगो रूढिर्वा

स्त

१त्या क्य१

तत्राजाशब्दः छागायां रूढः न जायत इति योगः ॥ अनुभयरूपत्वात्कथं सृष्टिवाचकत्वमित्यैतां परिहरति। कल्पनोपदेशाच्च कल्पना चोपदिश्यते आद्या सृष्टिः कल्पनया अजाशब्देनोच्यते यथा स्यजा वर्करमहिनामवस्तास्वामिहितात तथेयमिति उपदेशापदात्र घोपासनमभिप्रेतं। चकारात्परोक्षवादोपि देवस्य हिताय। यथा आदित्यो वै देवमधु वाचं धेनुमुपासीत द्युलोकादीनां चाग्नित्वं पंचाग्निविद्यायां न यथावकृ तेष्व विरोधः योगरूढिव्यतिरेकेणाप्येषा वेदे शाश्वत प्रवृत्तिरिति। तस्मादजामंत्रेण न सांख्यमतसिद्धिः॥ ॥न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च॥ ॥मंत्रांतरेण पुनराशंक्य परिहरति। बृहदारण्यके षष्ठे श्रूयते यस्मिन्पंच पंचजना आकाशश्च प्रतिष्ठितः। तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतमिति। यद्यप्यत्र पंचजनाः पंचोच्यंते न पंचानां पंचगुणत्वं समासानुपपत्तेः। तथाहि आद्यः पंचशब्दः संख्यावाची संख्येयवाची वा आद्ये पंचसंख्याया एकत्वान्न षष्ठीसमासः संख्यायां संख्याभावाच्च। संख्येयपरत्वे द्वितीयस्य संख्यात्वे पंचत्वमेव श्रुतविशेदनन्वयः विधायकाभावाच्च। अतो वा सा पंचजनसंज्ञा विशिष्टानां वा पंचत्वमिति यथासंभवमर्थः। तथापि महदपारेण संख्योपसंग्रहेपि लक्षणया केनचिद्धर्मेण पंचसंख्याहकेणाभाव्यं सचते षां मतेन संभवन्ति तथा सन्ति पंचैव तत्त्वानि स्युः। अतस्तेनानाभावा एवस्त्वीकर्त्तव्याः। यद्यपि महत्तन्मात्रा प्रकृतिविकृति चेन्न स्थितत्वधर्मविकृतशक्यं तेन तथापि न तेन तथोक्तवंतः। मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इत्यभ्युपगमात्। पुरुषे वैलक्षण्याभावप्रसंगाच्च। किंच नायं श्रुत्यर्थ इति श्रुतावेव प्रतीयते अतिरेकात् आकाशश्चेति। चकारादात्मा यस्मिन्निति आधिकरणत्वेनोक्तः। तस्मात्ज्ञानेनापि मंत्रेण तन्मतसिद्धिः॥ ॥प्राणादयो वाक्यशेषात्॥ ॥नन्वत्र पंचमंत्रस्यार्थे विवक्षितस्तदनुरोधेन लक्षणयापि ज्योतिः शास्त्रवत्पंच पा॰ध पंचशब्दः पंचविंशतिवाचकतया परिकल्प्यं स्पष्टमहात्म्याद्यमात्माकाशयोराधाराधेयभावः प्रदर्शितस्तत्र तयोरेव। अतो मंत्रेण तन्मतसिद्धिरि[illegible]शंक्य परिहरति। प्राणादयः पंचजनाः। ४०

त्या

...त्वात्तत्प्रकारकं स्वकार्यजननं स्वतः किंतु भगवत इति द्वयोरेकार्थत्वे सर्वसंगतं स्याद् रवं उत्ताच्च । ज्ञेयत्वं सर्वप्रवृत्तिकृत्वात् । भगवतो न माहात्म्यविरोधः । तत्र प्राणशब्देन त्वक् घ्राणं प्राणा ग्रहीता रसना चान्ये प्रतिष्ठिते ।—
स्यन्ने गृहीतं वाग्वा तेजसि । अत्ता चान्नं चैकत्र भवतः ×२

वाक्यशेषस्यमं चार्थनियामकत्वात् प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मन इति । ननु कथमस्य वाक्यशेषत्वं । उच्यते प्राणादयः संज्ञाशब्दाः करणवाचकास्ते तान न रूपं वा
क्रियारूपं वा कार्यं जनयंति स्वव्यापारेण तत्र तेषां करणांतरापेक्षाभावात् प्राणादीनां पुनः प्राणादिमत्त्वं बाधितं स्यात् भगवतो महात्म्यविरोधश्च । अतः स्वार्थनिर्वाहार्थमन्यार्थो वक्तेति पंचजनवा क्य २
स्य च । अतो बुद्धेः पंचवृत्तीर्निनयंतीति प्राणादयः पंचजनाः संशयोथ विपर्यासो निश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः संभावितत्वात् क्वचिदेकग्रहणं क्वचिदुभयग्रहणमिति नेने ।
ते सर्वेपि चैव नवं त्यतिरिच्यते परमाकाशः तस्मात् प्राणादयः एव पंचजना इति न तन्मतसिद्धिः ॥ ॥ज्योतिषैकेषामसत्यन्ने॥ ॥काण्वपाठे अन्नस्यात्र मितिनाम्नित दा कथं पंचत्वमत्राह ज्योतिषा सं
ख्यापूर्तिः । तेषां यस्मादर्वाक् संवत्सर इति पूर्वपठितो मंत्रः । तत्र तद्देवा ज्योतिषां ज्योतिरिति अन्नस्थाने ज्योतिर्ग्रहणं । व्याख्यानं पूर्वमेव । तस्मात् सिद्धं तन्मतस्याश्रुतिमूलत्वं ॥ ॥कारणत्वेन चाका ८
शादिषु यथाव्यपदिष्टोक्तेः ॥ श्रुतेर्विप्रतिषेधात् स्मृतिरेव ग्राह्येति मतं दूरीकर्तुं श्रुतिविप्रतिषेधो नास्तीत्यधिकरणमारभते । तत्र श्रुतौ सृष्टिभेदा बहवः क्वचिदाकाशादिका आत्मन आकाशः सं
इ ९ भूत इति क्वचित्तेजः प्रथमतिका तत्तेजोसृजतेति क्वचिदन्यथैव एतस्माज्जायते प्राण इति दृ० सर्वमसृजतेति च एवं क्रमयुक्तमनेकविधसृष्टिप्रतिपादकत्वाद् ह्यस्य नोद्देरूप्यासंभवात् । शृद्रान्वाच्चतुश
जापत्रावः प्रजायंत इति वत् सृष्टिवाक्यानामर्थवादत्वेन ब्रह्मस्वरूपज्ञानार्थत्वाद् ध्यारोपापवादन्यायेन न वेदांत ब्रह्म कारणत्वं सिध्यति अतः परिदृश्यमानजगतः कारणान्वेषणे क्रियमाणे वा स्यावा
च्यमतत्नेदेषु सत्सु कपिलस्य भगवत् ज्ञानांशावतारत्वात् तन्मतप्रकारेणैव जगद्व्यवस्थोचितेत्येवं प्राप्ते उच्यते । न सृष्टिभेदेपि ब्रह्मणः कारणत्वे विप्रतिपत्तिः । सर्वप्रकारेषु तस्यैव कारणत्वोक्तेः आका
शादिषु कारणत्वेन ब्रह्मणो यथाव्यपदिष्टमेवैकत्र अन्यत्रापि तदेव कारणत्वेनोक्तं । न तस्य कार्यं करणं च विद्यत इत्यादिनिराकरणं तु लौकिककर्तृत्वनिषेधपरं तस्यैव प्रतीतेः । सर्ववैलक्षण्यार्थं वैदिका

न१

नामबाधितार्थैकवाक्यत्वस्याभिप्रेतत्वादितिकारार्थः।कार्यप्रकारेभेदस्तुमहात्म्यज्ञापकोनतुबाधकः बहुधाकृतिसामर्थ्यंलोकेपिमहात्म्यसूचकमितितस्मान्नश्रुतिविप्रतिषेधःस्मृतिपरि
ग्रहइतिसिद्धं॥ ॥समाकर्षात्॥ ॥पुनरन्यथाशंक्यपरिहरति।ननुक्वचिदसद्वा इदमग्रआसीतिक्वचित्सदेवसोम्येदमग्रआसीत्तद्धैकआहुरसदेवेदमग्रआसीत् अव्याकृतमासीत्तन्नाम
दासीन्नोसदासीत्तमआसीत् इत्यादिवाक्येषुब्रह्मणोपिविगानंश्रूयते।तद्धैकआहुरितिकर्मवत्स्वरूपान्तरंसंभवति।नह्यसत्त्वमशब्दैर्ब्रह्मप्रतिपादयितुंशक्यतेअसत्त्वेनैवसंभवतीतिबाधात् आ
दित्यवर्णंतमसःपरस्तादितिच।तस्मात्कारणत्वेनापिश्रुतिविप्रतिषेधात् ब्रह्मकारणंनेत्येवंप्राप्तेउच्यतेसमाकर्षात् आकृष्यतेस्वस्थानाद्याप्यतइत्याकर्षः सर्वेष्वेतेषुवाक्येषुअसदादिपदानांन
नि ˇशून्यकत्वादिअपदिश्यन्ते किंतुवैलक्षण्येनसर्वज्ञाद्यवाच्यत्वंचसिद्धंब्रह्मणः।यथाकोअद्धावेदकइहप्रवोचत् सर्वेवेदायत्पदमामनंतियतोवाचोनिवर्त्तंतेमनसैवानुद्रष्टव्यमित्यादिसर्वेविरु
ग द्धधर्माभिवत्सुच्यंतेएवमनेकविरुद्धशब्दवाच्यत्वंलोकप्रसिद्धतादृशायत्रसमाकर्षादवगम्यतेनतुयथायथोपासतेतथाभवतीतिफलज्ञापनार्थंचसमन्वेवसंभवतीतियथाकंसादीनांमारकः
तद्धैकआहुरित्यत्रसर्वप्रपंचवैलक्षण्यंप्रपंचरूपोपिसइतिग्रामःपलः।अव्याकृतमसत्त्वेनतुत्वंनासदासीदितिमनसोपिब्रह्मतमआसीदित्यनभिव्यक्तंकर्मणोपिभागत्वात्।पूर्वकांडे व
द्वि पितस्मादेवसहितःनहितमसत्त्वेनगूढत्वंलोकेसंभवतिअतःक्वचिल्लक्षणात्क्वचिद्विलक्षणात्ब्रह्मणोजगत्भावत्वादेवस्वयंकर्तृकताचसंभवतिचैकवाक्यत्वेअज्ञाना।न्निराकरणंचासु पा॰
क्तंस्याद्ब्रह्मवैलक्षण्येनश्रुतिविप्रतिषेधोऽसक्तंनशक्यइतिसिद्धं॥ १५ ॥जगद्वाचित्वात्॥ १६ ॥एवंशब्दविप्रतिषेधंपरिहृत्यार्थविप्रतिषेधंपरिहरति॥कौषीतकिब्राह्मणेवाक्यजातशत्रुसं ध१
वादेबालाकिरजातशत्रवेब्रह्मोपदेष्टुमागतः।आदित्यादिदक्षिणाक्षिपुरुषपर्यंतंपरिछिन्नब्रह्मोपासनान्युक्त्वातथानिराकृतेनतेनैवज्ञानार्थमुपससादततःसुप्तपुरुषसमीपमुभावागत्यब्रह्म

८

रु

ना२

वाद्य च कर्त्तुः। तत्र क्वैष एतद्बालाके पुरुषोऽशयिष्टेत्याद्यो जीवः प्रक्रांतः तस्मादेवमर्थोत्पत्तिरुक्ता ब्रह्मणोप्यनुप्रवेशश्रुतेश्च संदेहः जीव एव ब्रह्मसहितः कर्त्ता ब्रह्मैव वेति। तत्र जीव एव कर्त्तास्य सर्वस्य जगतो ब्रह्मसत्त्वादयस्तस्य धर्मा राजत्ववत् यजमानत्ववद्वा अस्मिन्प्रकरणे ब्रह्मोपक्रमेण जीवपर्यवसानोक्तेः सर्वं चैव ब्रह्मसत्त्वेनोक्तो जीव एव कर्त्तेति प्राप्ते लोकेपि जीवकर्तृत्वं सहजं भवेत् बंधमोक्षव्यवस्था च एवं सत्यपर्यन्ति प्रकृतेरेव फलिष्यतीत्येवं प्राप्ते उच्यते। जगद्वाचित्वात्। एतेषां पुरुषाणां कर्त्ता यस्य चैतत्कर्मेत्युपक्रमे एतच्छब्देन जगदुच्यते पुरुषशब्देन जीवः तत्प्रयुक्तजीवात्मकं जगत् ब्रह्मकर्तृकमिति हि पूर्वं सिद्धं। तदनुरोधेनान्यत्रापि ब्रह्मपरत्वमेवोचितं न च सर्वविज्ञवोश्रुतकल्पनाच्चातः सुषुप्तावपि ब्रह्मण्येव लयस्तस्मादेव सर्वमिति सिद्धा-तव्यं प्राणान्यत्राप्युक्तात्मत्वं तत्पूर्वमेव सिद्धं। तस्मान्न जीवाधिष्ठिता प्रकृतिः कारणं॥ ॥जीवमुख्यप्राणलिंगादिति चेन्न व्याख्यातं॥ ॥किंचिदाशंक्य परिहरति॥ न च जीव एव प्रक्रांतः क्वैष एतद्बालाके पुरुषोऽशयिष्टेति ब्रह्मत्वयापि न सिद्धमेतादृशो नैतादृश इति। अतः शयनोत्थानलक्षणजीवधर्मदर्शनात् तस्यैव ब्रह्मत्वं जगत्कर्तृत्वं च नत्सतोनुपपन्नं प्रकृतोपलिप्सति अथवा मुख्य प्राणलिंगमप्यत्रास्ति प्राण एवैकधा भवतीति सुषुप्तौ तस्यैव हि निरूपलभ्यते विद्यमानादेव सर्वोपि निष्प्र लयोस्तच प्रकृत्यत्रा अतो जडादेव प्रधानात्। सुषुप्तावपि सर्वोत्पत्तिः अतोस्मात्प्रकरणात् जीवद्वारा साक्षाद्वा प्रकृतेः कारणत्वमित्येवं प्राप्ते उच्यते। तद्व्यातं एतयोरुभयलिंगत्वमेव नास्तीति आश्रयत्वादिह तद्योगादित्यत्र सर्वमेव कार्यं भगवत एव नान्यस्मादिति। अतोस्मात् ब्रह्मवाद एव सिध्यति न प्रकृतिवादः॥ ॥अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके॥ ॥स्वमतेन परिहारमुक्त्वा नियतधर्मवादेनापि परिहारमाह॥ ॥स्वापप्रतिबोधो जीवधर्मविवेचनद्वारादिलयाधारत्वं प्राणस्येति नास्मिन्नपि पक्षे अन्यार्थं तद्धर्मकीर्त्तनं भेदे हि तन्निराकरणमवश्यं कर्त्तव्यमिति हि शंकः। ब्रह्मप्रतिपत्त्यर्थ

क्वैषएतद्बालाकेपुरुषोशयिष्टेतिप्रश्नः।तत्रजीवस्यस्वातंत्वादधिकरणमेवनस्यातं।यत्रैष

मेवनीवत्नयोक्रमोभृतिवैलक्षण्येनप्राणकीर्त्तनमाश्रयब्रह्मबोधाय।कुत एतदवगम्यतेतत्राह।उपक्रमोपसंहाराभ्यामेवावगम्यते योवैबालाकएतेषांपुरुषाणामित्युपक्रमेमुख्यं
ब्रह्मैवनिर्दिष्टंतत्तज्ज्ञानेनासुरजयःसर्वेषांभूतानांश्रैष्ठ्यंस्वाराज्यमाधिपत्यंचेतिफलं।नह्येतद्द्वयमुख्येसंभवति।अपिचप्रश्नव्याख्यानाभ्यां॰ एतद्बालाकेपुरुषोशयिष्टेतिमाख्यानं
नहिनाडीज्ञपिधित्वं व्याख्यातिकिंतुप्रतिज्ञातंब्रह्मकथमेतदवगम्यतेनाडीव्यतिरिक्तआत्माज्ञाप्यतइतितत्राह।एवमेकेएकेशा।खिनोवाजसनेयिनः।तत्रापिहस्तवाला।किंब्राह्मणोसहोवा
चाजातशत्रुर्यत्रैषएतत्सुप्तोऽभूद्यएषविज्ञानमयःपुरुषस्तदेषांप्राणानांविज्ञानेनविज्ञानमादाय।यएषोन्तर्हृदयआकाशस्तस्मिन्शेतेइत्यत्रआकाशशब्दंब्रह्मसमतासोम्यतदासं।
पन्नोभवतीव।स्वंह्यपीतोभवतीतिच।तस्मादाधारभूतंब्रह्मसत्तापनार्थत्वाज्जीवमुख्यप्राण।लिंगात्।प्रकृतिवादइत्यसंगतं॥१८॥ वाक्यान्वयात्॥१९॥पुनर्जीवब्रह्मवादेनप्रकृतिकारणवादमा
शंक्यनिराकरोति।बृहदारण्यकेचतुर्थषष्ठेचयाज्ञवल्क्यमैत्रेयीसंवादेयेनाहंनामृतास्यां।किमहंतेनकुर्यामितिविरक्तिमुक्त्वायदेवभगवान्वेदतदेवमेब्रूहीतिपृष्टेतामभिमुखीकृत्यनवा
रेपत्युःकामायेत्यादिनाअमृतत्वायज्ञानमुपदिशतिषष्ठेपुनरुपसंहारेप्येतावदरेखल्वमृतत्वमितिहोक्त्वाप्रवव्राजेतितत्रजीवस्यप्रकरणित्वंब्रह्मणोवेतिसंशयः।तत्रात्मनःप्रियत्वंस्वप्र
तीत्याप्रशाद्यपेक्षयाबोधयन्जीवमेवोपक्रमेआत्मत्वेनवदतीतितदनुतत्रदर्शनादिविधन्नेतेनसर्वंयदयमात्मेत्यंतेनतस्यैवसर्वत्वमाह।तदुकथमस्मिन्संघातेचात्मज्ञानंभवतीत्या कां
क्षायांदुंदुभ्यादिदृष्टांतत्रयमाह॥ यंपरयाबाह्याभ्यंतरभेदेनयथामहाकोलाहलेदुंदुभेर्हन्यमानस्यशब्दोगृहीतोभवति।तत्रकरणंदुंदुभिदर्शनंदुंदुभ्याघातदर्शनंवा।अनुमान द्वारा। पा॰ध
।विज्ञेनतन्निविष्टतस्यसाक्षात्कारोभवतीतितथाआत्मनोबोधककार्यानुसंधानेनतस्यसाक्षात्कारोभवतीति तत्रकथंसर्वत्वमित्याकांक्षायांततएवोत्पन्नंसर्वंनामरूपात्मकंतस्मिन्नेवलीयतइति। ४२

३ × सर्वविदितमितिफलमाह।तत्र [illegible] कथमात्मज्ञानेनसर्वज्ञानमित्याकांक्षायांब्रह्म तंपरादादित्यादिनाइदं॰

सपथेति हृद्येनाहामध्येति म एव नातिरिक्तं विज्ञानीति म यथा सैंधवघन इत्यनेनाहाथेयत्वेन तावन्मात्रतानिराकरणायाह न प्रेत्य संज्ञास्तीति कार्यातिरिक्तरूपं कथयितुं न शक्यत इति तत्र विशेषाकांक्षायामतिरिक्ताकथने वंचकत्वमाशंक्य तत्परिहारायाह स होवाचेति। अविनाशीत्यनेन कार्यत्वेन रूपं सिद्धवत्कारेणोक्ता विषयसंबंधेन संसर्गमाह। मात्रासंसर्गस्त्वस्य भवतीति। विशेषतस्त्वकथने हेतुमाह यद्वैतमित्यादिना यावत्समाप्ति। चक्षू रूपमेव पश्यति नात्मानं। ननु रूपमप्यात्मेति चेत्। तत्राह पश्यन्वै तद्दृष्टव्यत्वेन न पश्यति। न हि दृष्टुः स्वरूपं दृश्यज्ञानेन ज्ञानं भवत्यतद्रूपत्वात्। एवं द्रष्टृदृश्यव्यवहारेऽज्ञानावस्थायां विशेषतः ज्ञानमशक्यमुक्त्वा ज्ञानोत्तरं कर्मकर्तृभाव एव नास्तीत्याह यत्र वा अन्यदिव स्यादित्यादिना इदमेव विज्ञानममृतत्वमिति तत्रादिमध्यावसानेष्वजीवप्रकरणमित्येव प्रतिभाति नस्य ब्रह्मता जगत्कर्तृत्वमित्युत्कर्षः। ननु तस्मादन्यब्रह्मत्वेन वक्तुं पुक्रमयविरोधाच्च तस्माद्देदेस्थिवाक्यानामेतन्न्याये ८

नान्यार्थत्वान्न ब्रह्म जगत्कारणमिति प्रकृतिवादे एव युक्त इत्येवं प्राप्ते उच्यते वाक्यान्वयात्। इदं वाक्यं भगवत्येवान्वेति नात्र जीवप्राधान्यगंधोऽपि सर्वत्र भगवद इत्ययेनैव जीवस्यापि प्रियत्वं तस्यैव सुखरूपत्वात् सर्वोपनिषदनुरोधेनैवास्याप्यर्थस्य वक्तुमुचितत्वात् तमेव विदित्वातिमृत्युमेति आनंदाद्ध्येव खल्विमानि भूतानि जायंते सर्व एवात्मानो व्युच्चरंति एष ह्येवानंदयातीत्यादिश्रुतिसहस्रैर्निःसंदिग्धे ब्रह्मणः स्वरूपं कार्यमंशाश्च प्रतिपादिता इति इदमपि वाक्यं तत्परमेवोचितं सर्वव्यवहारस्य तन्मूलकत्वेन सर्वमुक्तत्वात्। विषयस्य शोविता तत्त्वमपि तस्यैव एवं सति सर्वमेव संगतं भवेत्। अतो वाक्यान्वयान्न जीवपरत्वं येन प्रकृतिवादः स्यादिति॥ ॥प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः॥ ॥नियतधर्मवादिनामपि मतेन प्रकृते सिद्धांतं वक्तुं पक्षांतराण्याह। तत्र ब्रह्मवादैकदेशिवादाः संति तत्र जीवो नाम स्वस्य भोगनिष्पत्त्यर्थं स्वांशो भगवता कृतो। विस्फुलिंगवदित्याश्मरथ्यो मन्यते। अनादिसिद्ध एव जीवश्चैतन्यमात्रं शरीरादिसंघाते प्रविष्ट इति चि

।तिन्नमात्रेण प्रवेशोच मोक्ष इति चऔडुलोमिराचार्यः।काशकृत्स्नस्त्वआसत्त्याविषय मोक्षस्वरूपं भगवत एव जीव इति तेपि स्वमतानुसारेणात्र परिहरंति।तत्रउत्राद्विप्रियमहद्वचनाज्जीव
प्रकरणमेवेनदित्याशंक्य जीवोपक्रमस्यान्यत्र योजनमित्याह।प्रतिज्ञासिद्धेरिति षष्ठीतस्या लिंगंअंशत्वाज्जीवस्य तद्भेदेनोपक्रमः प्रतिज्ञासिद्धेर्लिंगं भवति एकविज्ञानेन सर्वविज्ञानं
प्रतिज्ञातस्यैवार्थेमुत्पाद्यमानत्वात् तस्माएतत्साधकं यथा जीवो भगवानेवंनउइति।एवंआश्मरथ्यो मन्यते।श्रोतव्यादिविषयस्तु भगवानेव तस्मान्नियतधर्मजीववादेपि न जीवोपक्र
मो दोषः॥उत्क्रमिष्यत एवंभावादित्यौडुलोमिः॥ ॥लिंगमित्यनुवर्तते यदत्र जीवोपक्रमेण भगवतः श्रवणादिकमुक्तं तत्संसारभावाउत्क्रमिष्यतो जीवस्य लिंगं मुक्तो जीवो भगवा
नेव भविष्यतीति ज्ञापकं अन्यथा मेव कथममृता भवेदिति शाब्दो हेतो स्त्रियाविश्वासार्थं गोणप्रियवैराग्यार्थं च जीवोपक्रमः कर्तव्य एवेति औडुलोमिः आचार्यो मन्यते।तस्मात्भिन्न
जीवपक्षेपि नात्र दूषणं॥ ॥अवस्थितेतिकाशकृत्स्नः॥ ॥लिंगमित्येव भगवत एवावस्था जीव इति अतः संसारदशायामपि जीवो ब्रह्मेति नात्रोत्क्रमणमुपचारो वा अन्यथा कथमा
त्मनस्तु कामाय सर्वं प्रियं भवतीति न ह्यन्यस्य सर्वं प्रियं भवति।मोक्षस्तु ज्ञानमेव उत्तरत्र कर्तव्याभावात्।अवस्थयाव्यवसायात् सिद्धांताद्विशेषः॥ इति शाब्देनैतावदरे खल्वमृत
त्वमित्युपसंहारो हेतुरस्य पक्षस्येति काशकृत्स्नो मन्यते।तस्माज्जीवोपक्रमो भगवत एवावस्थाविशेषो जीव इत्यस्य पक्षस्य लिंगं तस्मान्मैत्रेयीब्राह्मणेनापि जीवद्वारा प्रकृतिकारण
ति वादस्य सिद्धिरिंसिद्धं॥ ॥प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात्॥ ॥एवं प्रकृतिकारणवादनिराकरणेन ब्रह्मण एव कारणत्वे सिद्धेप्यर्धजरतीयनयोभयस्थापनपक्षपरिहर्तुमधिकर पा·ध
णमारभते।ननु ब्रह्मकारणतां निराकुर्मः श्रुतिसिद्धत्वात्।किंतु समवायिकारणं प्रकृतिरेवं कार्यकारणयोरवैलक्षण्यात् समवायिकारणानुरोधि हि कार्यं अन्यत्सर्वं अन्यत्सर्वभि ४२

गवानन्यत्रापि दृश्यते च समवायिनिमित्तयोर्भेदः। कर्मण्यपि श्रुतिस्मृतिसमवायो धर्मः। एवं ब्रह्मवादेपि स्यात्फक्का [illegible]ना प्रकृतिः समवायिकारणं ब्रह्म निमित्तकारणमित्येवं प्राप्ते उ
च्यते। प्रकृतिश्च निमित्तकारणं समवायिकारणं च ब्रह्मैव प्रकृतिपदप्रयोगात् स्मृतिसिद्धवृत्तीयमर्व धर्मापदेशाः।। चकारात् यत्रेत्यादि सर्वसंग्रहः। कुत एतत् प्रतिज्ञादृष्टांतानुपरो
धात्। प्रतिज्ञा अपि वा तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञानं भवतीति। दृष्टांतः यथैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्यादित्यादि प्रतिज्ञादृष्टांतयोर
नुपरोधः अबाधनं तस्मात्समवायिकारणज्ञाने हि कार्यज्ञानं। उभयोर्ग्रहणमुपचारव्यावृत्त्यर्थमुपक्रमोपसंहारवत्। प्रतिज्ञामात्रत्वे चेद्दृष्टद्वारापि न वेत् दृष्टांतमात्रत्वे त्वनु
मानविधया स्यात्। तथा सति सर्वसमानधर्मवत् ब्रह्म स्यान्न समवायिकारणं। उभयोर्ग्रहणे तु प्रतिज्ञाया दृष्टमेवद्वारमिसमवायत्वसिद्धिः। कार्यकारणयोर्भेदाभेदमतनिराकरणा ति
यपिंडमणिनखनिकृंतनग्रहणं तथा सति यच्च कश्चिद्भगवान् ज्ञातः सर्वज्ञातो भवति सर्वं च ज्ञातं भवतीति सामान्यलक्षणप्रत्यासत्तिनिराकरणाय च वाचारंभणं विकारो नामधेय
मित्यत्र लौकिकत्वनिराकरणाय च मृत्तिकेत्येव सत्यमिति ब्रह्मत्वेनैव जगतः सत्यत्वं नान्यथेति सामान्यलक्षणप्रत्यासत्तिनिराकरणं च स्पष्टमेवाग्रे त्रीणि रूपाणीत्यत्र करिष्यति
। अतो ब्रह्मरूपेण सत्यस्य जगतो ब्रह्मैव समवायिकारणं। देहात्मबुद्धिवत्सत्यां विकारबुद्धौ दोषः। श्रुतिसामर्थ्यं प्रमाणमित्फक्कं। तस्मात् ब्रह्मैव समवायिकारणं न प्रकृतिः।। ।।
अभिध्योपदेशाच्च।। ।।लिंगांतरमाह सोकामयत बहु स्यां प्रजायेयेतीत्यत्र कामनं तस्याभिध्यानं च आप्तकामत्वान्न कामना। तदभिध्यानं सृष्टावुपदिश्यते बहु स्यामिति तस्यैव बहुरूप
त्वाभिध्याने न सृष्टं स्वयमेव भवति सुवर्णस्यानेकरूपत्वं सुवर्णविकृतिकत्व एव च अध्यासाभावात् गौणत्वापत्तेश्च। न हि मुख्यं बहुभवनं योगिनां संभवति। सर्वभवनसामर्थ्यान्मुख्ये संभ

वतिगौणकल्पनायाश्चान्याय्यत्वात्। चकारादिदं सर्वं यदयमात्मेति कार्यस्य ब्रह्मत्वश्रुतिर्ब्रह्मप्रकृतित्वेऽसंभवतीत्यन्यथा। अथवा सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेति तस्य जगद्रूपत्वेना
भिधानमुपदिश्यते न ब्रह्मसमवायित्वे घटत इति चकारादेकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखमिति॥ ॥साक्षाच्चोभयाम्नानात्॥ ॥लिंगमुक्त्वा श्रुतिमेव प्रमाणमाह। साक्षात्स्रुत्यैव ब्रह्मसम
वायित्वमुच्यते चकारात् स्मृत्यापि कथं श्रुत्या उच्यते तत्राह उभयाम्नानात्। ब्रह्मणः साकाशात् ब्रह्म एवैव चसृष्टिप्रलययोराम्नानात् सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आका
शं प्रत्यस्तं यन्तीति। अहं सर्वस्य जगतः प्रभवः प्रलयस्तथेति च॥ न चैतस्मिन्निमित्तत्वे संभवति सुवर्णादिषु तथोपलब्धेः लोकवेदन्यायेन साक्षात्त्वं। तस्माद्भगवानेव समवायिकारणं॥ ॥आत्म
कृतेः परिणामात्॥ ॥ननु स एव सर्वं सृजति स एवावतिदं ति चेति कर्तृत्वप्रतीतेराकाशादिवाक्यमप्यौपचारिकं भविष्यतीति तन्निराकरणायाह आत्मकृतेः तदात्मानं स्वयमकुरुतेति स्वस्यैव
कर्मकर्तृभावात्। सुकृतत्ववचनाच्च। लौकिकत्वं तत्रापि ज्ञानार्थमुपपत्तिमाह परिणामात् परिणमते कार्याकारेणेति च विकृतमेव परिणमते सुवर्णं सर्वाणि च तैजसानि। दृष्टं ह्यालौकिकत्वा
द्ब्रह्मकारणत्व एव घटते। पूर्वविस्थान्यथाभावस्य कार्यश्रुत्यनुरोधादंगीकर्तव्यः वक्ष्यति च श्रुतेस्तु शब्दमूलत्वादिति अन्यानि च युक्तिदूषणानि परिहरिष्यति। तस्मात् ब्रह्मपरिणामल
रूपं कार्यमिति जगत्समवायिकारणत्वं ब्रह्मण एवेति सिद्धं॥ ॥योनिश्च हि गीयते॥ ॥चेतनेषु किंचिदाशंक्य परिहरति। न च स्कजनां ब्रह्मैककारणत्वं चेतनेषु योनिबीजयोः समवा डा
यित्वदर्शनात् पुरुषत्वाद्भगवतो योनिरूपा प्रकृतिः समवायिकारणं भवतु शुक्रशोणितसमवेतत्वाच्छरीरस्येत्याशंक्य परिहरति॥ योनिश्च ब्रह्मैव शाक्तवादनिराकरणाय चकारः तत्र युक्तिं श्रु पा॰ध
तीः प्रमाणयति हि गीयत इति युक्तिस्तावत् सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सर्वमेकमेव प्रतिज्ञातं। आकाशादेव आनंदाद्ध्येवेत्याद्येवकारेणान्यकारणत्वं जगतोऽवगम्यते इतरा ४४

छो

पेक्षायां द्वैतापत्तेः।गीयते च। कर्त्तारमीशं पुरुषं ब्रह्मयोनिं। यद्भूतयोनिं परिपश्यंति धीरा इति च॥ मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहमिति। तासां ब्रह्म महद्योनिरहं बीजप्रदः पितेति च
अक्षरपुरुषोत्तमभावेन तथात्वं। तस्माद्योनिरपि भगवान्पुरुषोपि सर्वं जीवश्च सर्वं भगवानेति। इदं सर्वं यदयमात्मेति सिद्धं तस्मात्केनाप्यंशेन प्रकृतिप्रवेशो नास्तीत्यत्र दुष्टत्वं सांख्यमतस्य
सिद्धं॥ ॥एतेन सर्वे व्याख्याता व्याख्याताः॥ ॥ब्रह्मवादव्यतिरिक्ताः सर्वे वादा अवैदिका वेदविरुद्धाश्चेत्याह। एतेन ब्रह्मवादस्थापनपूर्वकसांख्यमतनिराकरणेन सर्वे पातंजलादिवादा व्या-
ख्याताः॥ अवैदिका अनुपयुक्ताश्च। वैदिकानां हि वेदः प्रमाणं तस्मिन्व्याकुले भ्रांतिप्रतिपन्ना एव सर्वे वादा इति एतत्सौकर्यार्थं विस्तरेणायेवं स्पते॥ आवृत्तिरध्यायसमाप्तिबोधिका॥ ॥ब्र॰ पा॰ ४
इति श्रीवेदव्यासमतवर्त्तिवल्लभविरचिते ब्रह्मसूत्राणुभाष्ये प्रथमस्याध्यायस्य चतुर्थः पादः॥ प्रथमोध्यायः समाप्तः॥ ॥ ॥शुभं भवतु॥ ॥श्रीरस्तु॥ ॥ ॥ ॥। ४५

चार्य

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

रामकृष्णनसमादितामिदं तापीपुरे
ग्रंथमाध्याय संख्या २२५०

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

द्वितीयाध्यायः ५२१६

रामकृस्नेनसमाप्तंतापीपुरे

अ॰ द्वि॰ सङ्ख्या ७०० ग्रंथः

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

स्मृत्यधिकरणं १

श्रीगोपीजनवल्लभायनमः॥ ॥स्मृत्यनवकाशदोषप्रसंगइतिचेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्॥ ॥प्रथमाध्यायेवेदांतवाक्यानांविवादास्पदानांब्रह्मपरत्वेनसमन्वयः प्रतिपादितः
अधुनाश्रुतिस्मृत्यविरोधःप्रतिपाद्यते॥ भ्रांतिमूलतयासर्वसमयानामयुक्तितः न तद्विरोधाद्वचनंवैदिकंशांक्यतांव्रजेत्। श्रुतिविप्रतिषेधस्त्ववश्यंप्रतिविधेयः। प्रथमचतुर्थपादेसर्वथा
नुपयोगेप्रतिपादितेस्मृतिप्रतिपादितेस्मृतित्ववचनेनप्रामाण्यपेक्षयायावत्तदप्रामाण्यंनप्रतिपाद्यतेतावत्तद्विरोधःपरिहर्तुमशक्यइतितन्निराकरणार्थंप्रथमतःसूत्रत्रयमाह। तुल्यबलानां
परस्परविरोधेनप्रकारांतरस्थितिरितिनतोयुक्ताश्रुतिविप्रतिषेधपरिहारः। ततोद्वितीयेपादेवेदबाधकतर्काभावेपितैरपिस्वातंत्र्येणकश्चनपुरुषार्थःसेत्स्यतीत्याशंकांबाह्याबाह्यमता
न्येकीकृत्यनिराकरोति। भ्रांतेरेकरूपत्वात्। ततःसम्यग्वेदार्थविचारायैववैदिकपदार्थानांकमस्वरूपविचारःपादद्वयेनअतःसंग्रहेणानेनाध्यायेनाविरोधःप्रतिपाद्यते। कपिलादिमहर्षिकृतस्मृते
र्नंनचादिवदन्यत्रोपयोगःमोक्षैकोपयोगित्वात्। तत्राप्यनवकाशोवैयर्थ्यापत्तेरितिचेन्नकपिलव्यतिरिक्तमुख्यब्रह्मकारणवाचकस्मृत्यनवकाशदोषप्रसंगः। अहंसर्वस्यजगतःप्रभवःप्रलय
स्तथेति॥ ॥इतरेषांचानुपलब्धेः॥ ॥प्रकृतिव्यतिरिक्तानांमहदादीनांलोकेवेदेचानुपलब्धेः। एतेनयोगःप्रत्युक्तः॥ सांख्यस्मृतिनिराकरणेनयोगस्मृतिरपिनिराकृताद्रष्टव्या। योगस्यवैदिकत्व
शंकयाभेदेननिराकरणं॥ ।नविलक्षणत्वादस्यतथात्वंचशब्दात्॥ ॥बाधकोयंतर्कः। अस्यजगतोविलक्षणत्वादचेतनत्वाच्चेतनंनकारणं। विलक्षणत्वंचशब्दात् विज्ञानंचाविज्ञानंचेति। प्रत्य
स्यभ्रांतित्वंमन्यमानस्येदंवचनं॥ ॥अभिमानिव्यपदेशस्तुविशेषानुगतिभ्यां॥ ॥मृदब्रवीत् आपोब्रुवन्तत्तेजऐक्षत। नेहवाचमृत्युस्त्वंनउज्झायेति। एवमादिश्रुतिभिर्भूतेंद्रियाणांचे अध्या २
त्वंप्रतिपाद्यतइत्याशंकांतुशब्देननिराकरोतितत्तदभिमानिन्यएव देवतास्तथावदंति। कुतः वेदएवविज्ञानंचाविज्ञानंचेतिचेतनाचेतनविशेषोक्तेः। अनुगतत्वाच्च अग्निर्वाक्भूत्वामु १

नं ३

ख्यं प्राविशदित्येवमादि विशेषानुगतिभ्यामभिमानित्वमित्यर्थः॥ देवतापदं चास्मत्पक्षेऽन्तरे॥ ॥दृश्यते तु परिहरति तुशब्दः पक्षं व्यावर्त्तयति। दृश्यते हि कार्यकारणयोर्वैरूप्यं केशगोमयवृश्चिकादौ। चेतनादचेतनोत्पत्तिनिषेधे नदंशस्यैव निषेधः। तुल्यांशासंपत्तिश्चेत्स्वकृतेपि सदंशाः॥ ॥असदिति चेन्न प्रतिषेधमात्रत्वात्॥ अतो कारणत्वेनासदुक्तमिति चेन्न। प्रतिषेधार्थमेव वचनं कथमसतः सज्जायेतेति। कार्यस्य वा सर्वप्रतिषेधो ब्रह्मकारणत्वाय॥ ॥अपीतौ तद्वत्प्रसंगादसमंजसं॥ ॥पूर्वपक्षमाह अपीतिर्लयः कार्यस्य कारणे लये तद्धर्मसंगस्तत्रोल्पत्वसावयवत्वपरिच्छिन्नत्वाशुद्धत्वादिधर्मसंबंधावश्यकत्वादसमंजसं ब्रह्मकारणवचनं। न तु दृष्टांतभावात्॥ ॥नैवास्मदीये दर्शने किंचिदसामंजस्यमस्तीति तुशब्देन परिहरति स्वपक्षस्थापनपरपक्षनिराकरणयोर्वि

घु द्यमानत्वात्तत्तद्वचनं। तत उत्पत्तिस्थितिलयेन कार्यविरुद्धधर्मसंबंधः शरावरुचकादिषु सिद्धः। भवतोपरं न दृष्टांतोस्ति॥ ॥स्वपक्षदोषाच्च॥ ॥स्वपक्षे चैते प्रतिवादिनः साधारणा दोषाः। निर्विशेषात्प्रधानात्सविशेषस्य कार्यता। तस्योत्पत्तिः। लये तद्धर्मसंबंधः असत्कार्यवादप्रसंगः तथैव कार्योत्पत्तौ कारणाभावेन नियमाभावः भावे वा मुक्तानामपि पुनर्बंधप्रसंगः॥ ॥तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसंगः॥ ॥वेदोक्ते पुरुषकृततर्केण प्रत्यवस्थानमयुक्तं तर्कस्याप्रतिष्ठानात्। तर्को नाम स्वोत्प्रेक्षिता युक्तिः सा एकोक्ता नान्यैरंगीक्रियते। स्वतंत्राणामृषीणां मतिभेदात् हस्तनो द्वैरूप्यासंभवान्नियामकाभावाच्च अतो न तर्कस्य प्रतिष्ठा। वपिष्ठिणः परिहारः अप्यन्यथानुमेयमिति चेत् एवमपि अन्यथा वयमनुमास्यामहे यथानाप्रतिष्ठादोषो न भविष्यति नहि कोपि तर्कः प्रतिष्ठितो नास्तीति वक्तुं शक्यते व्यवहारोच्छेदप्रसंगात् आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना। यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर इति स्मृतेः। सावद्यतर्केत परिहारेण निरवद्यस्तर्कः प्रतिपत्तव्यो भवतीति चेन्न। एवमप्यविमोक्षप्रसंगः। ब्रह्मवादिनो निर्दुष्टतर्कसद्भावेपि प्रकृतिवादिनस्तर्कस्य दोषाविमोक्षप्रसंगः। मूलनियमाभावाद्वैमत्यस्याविद्यमानत्वात्॥ ॥एतेन शिष्टापरि

स्त

यहा अपि व्याख्याताः॥ ॥सांख्यमतस्य वैदिकप्रत्यासन्नत्वात् केषांचित् शिष्टानां परिग्रहोप्यस्ति। अणुमायाकारणवादास्तु सर्वथा न शिष्टैः परिगृहीता इति तेषां तर्काः पूर्वोक्तन्यायेन सुतरामेव निरस्ता वेदितव्याः। भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्। कारणदोषं परिहृत्य कार्यदोषपरिहारार्थमारंभः। भोग्यस्य भोक्त्रापत्तिः ब्रह्मणो निर्विशेषस्य कारणत्वात् भोक्तुर्भोग्यत्वं भोग्यस्य च भोक्तृत्वमापद्येत अतो न विभाग इति चेत् स्याल्लोकवत्। यथा लोके कटककुंडलादीनां सुवर्णकारणत्वेन सुवर्णानन्यत्वेपि न कटकस्य कुंडलत्वमेव न भोग्यस्य भोक्तृत्वं॥ ॥तदनन्यत्वमारंभणशब्दादिभ्यः॥ ॥श्रुतिविरोधं परिहरति। वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति तत्र विकारो वाङ्मात्रेणैवारभ्यते न वस्तुत इत्यर्थः प्रतिभाति। तथा च सति कस्य ब्रह्मकारणं भवेत् अतः श्रुतिवाक्यस्यार्थमाह। आरंभणशब्दादिभ्यस्तदनन्यत्वं प्रतीयते कार्यस्य कारणानन्यत्वं न मिथ्यात्वं। ये पुनर्मिथ्यात्वं तामसबुद्धयः प्रतिपादयंति तैर्ब्रह्मवादाः सूत्रश्रुतिनामनेन विलापः कृता वेदितव्याः। अंतः प्रविष्टचोरवधार्थमेवैष आरंभः। अलौकिकप्रमेये सूत्रानुसारेणैव निर्णय उचितः। न स्वतंत्रतया। किंचित्परिकल्पनं न कापि तिष्ठानादिति निराकृतमेव। न चास्मिन्नपि सूत्रे मिथ्यात्वार्थः संभवति एकविज्ञानेन सर्वविज्ञानोपक्रमबाधात् प्रकरणविरोधश्च। तथा विरोधभयपरित्यागेनैकमिदं सूत्रमन्यथा योजयंतीति धृष्टा इत्यलं विस्तरेण॥ ॥भावे चोपलब्धेः॥ ॥भाव एव विद्यमान एव घटे घटोपलब्धिर्नाभावे एवकारान्मृत्तिकेत्येव श्रुतिः परिगृहीता। वाङ्मात्रेण चोपलंभे मिथ्यैवासत् घटोप्यस्तीत्युक्तोपलंभेन। इदं सूत्रं मिथ्यावादिनां तन्मतमेव अत एव पातोतरकल्पनं। सत्वाच्चावरस्य॥ ॥अवरस्य प्रपंचस्य सत्वात् त्रैकालिकत्वात् ब्रह्मत्वं। सदेव सोम्येदमग्र आसीत् यदिदं किंच तत्सत्यमित्याचक्षत इति श्रुतेः॥ ।असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषात्॥ असद्वा इदमग्र आसीत् इति श्रुत्या प्रागुत्पत्तेः कार्यस्यासत्वं बोध्यत इति चेन्न। अव्याकृतत्वेन धर्मांतरेण तथा व्यपदेशः कुतः वाक्यशेषात्। तदा

अ॰२
२

नार्दभावाधिकरणं २

नं स्वयमकुरुतेति स्वस्येव क्रियमाणत्वात् इदमासीत्पदप्रयोगाच्च॥ ॥युक्तेः शब्दांतराच्च॥ ॥युक्तिस्तावत् समवेतमेव कार्यं सद् उत्पाद्यत इति संबंधस्य द्विनिष्ठत्वाच्च कारणांतरेणापि परंप्र
स्यासंबंधः असंबद्धोत्पत्तौ तु मिथ्यात्वमेव प्रवृत्तिस्तु नियमकस्यैवमिति। शब्दांतरं सच्छब्दादात्मशब्दः। आत्मानं स्वयमकुरुतेति। ।पटवच्च। ।यथा संवेष्टितः पटो न व्यक्तं गृह्यते विस्तृतस्तु गृ
ह्यते तथाविर्भावानाविर्भावेन जगतोपि॥ ॥यथा च प्राणादिः॥ ॥यथा प्राणापानानां नियमने जीवनमात्रं अनियमने आकुंचनादि नैतावता प्राणभेदः एवमसत्वं वा तथा जगतोपि। ज्ञानक्रि
याभेदात्तद्वयं॥ ॥इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः॥ ब्रह्मणो जगत्कारणत्वे इतरस्य जीवस्यापि ब्रह्मत्वात् हितं कर्तव्यं तन्न करोतीति तत्करणादिदोषप्रसक्तिः तत्सृष्ट्वा तदेवानुप्र
विशत्। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति। तस्यैव जीवव्यपदेशात्। ।अधिकं तु भेदनिर्देशात्॥ ॥तुशब्दः पक्षं व्यावर्तयति यदि ब्रह्म तावन्मात्रं भवेत् तदायं दोषः न त्वन
न्तो वा जगतश्चाधिकं तु भेदनिर्देशात्। द्रष्टव्यादिवाक्येषु कर्मकर्तृव्यपदेशात् विज्ञानानंदव्यपदेशाद्वा॥ न हि संपूर्णोंशस्य हितं नियमेन करोतीति सर्वेंद्रियव्यापाराभावप्रसंगात्। स्वली
लयैकं तु करोत्येव॥ ॥अश्मादिवच्च तदनुपपत्तिः॥ ॥पार्थिवत्वाविशेषेपि हीरमाणिक्यपाषाणापलाशचंपकचंदनानामुच्चनीचत्वमेव जीवस्यांशत्वाविशेषेपि ब्रह्मादिस्थावरांता
नामुच्चनीचत्वं। कार्यवैलक्षण्यं तत्तदनुरोधश्च द [illegible] दिति॥ ॥उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि॥ ॥ब्रह्मैव केवलं जगत्कारणमित्युक्तं तन्नोपपद्यते। कुलालादेः चक्रादिसाधनांतरस्योपसं
हारदर्शनात् संपादनदर्शनादिति चेत्। न। क्षीरवद्धि यथा क्षीरं कर्तारमनवेक्ष्य दधिभवनसमये दधि भवति। एवमेव ब्रह्मापि कार्यसमये स्वयमेव सर्वं भवति॥ ॥देवादिवदपि लोके॥ ॥य
नो भिन्नकरणे दृष्टांतः। यथा देवर्षिपितरो बाह्यनिरपेक्षा एव स्वयोगबलेन सर्वं कुर्वंति। एवं ब्रह्माप्यनपेक्षत समवाये स्वत एव सर्वं करोति॥ ॥कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा॥

विशेषाधिकरणं १ आक्षेपाद्यनाधिकरणं ४ समवायाधिकरणं ५

यद्येकमेवब्रह्मस्वात्मानमेवजगत्कुर्यात्तर्हि तदा कृत्स्नंब्रह्मैकमेवकार्यंभवेत्। अथांशांशभेदेनव्यवस्थां तथासति निरवयवत्वश्रुतिविरोधः॥ निष्कलंनिष्क्रियंशांतमितिश्रुतेः श्रुतेस्तुशब्दमूलत्वात्॥
॥ ॥तुशब्दः पक्षंव्यावर्त्तयति। श्रुतेः श्रूयतएवद्वयमपि न च श्रुतंयुक्त्याबाधनीयंशब्दमूलत्वात् शब्दैकसमधिगम्यत्वात्। अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेत्। अर्वाचीनविकल्प
विचारकुतर्कप्रमाणाभामज्ञाश्चकलिलांतःकरणदुरवग्रहवादिनांवादानवसरेसर्वभवनसमर्थेब्रह्मणि विरोधाभावाच्च। एवंपरिहृतेपिदोषेस्वमत्यानुपपत्तिमुद्भाव्यसर्वसंज्ञवंवदन्नमंद
मतिः मद्विरूपेस्यः आत्मनिचैवंविचित्राश्चहि॥ ॥सृष्टौदेशकालापेक्षापिनास्ति॥ ॥आत्मन्येवसृष्टत्वात् देशकालसृष्टावप्यात्मन्येवसाधिकरणस्यसृष्टत्वाच्च। बहिरंतश्चजगत्स्
ष्टिंवाआह विशेषाभावेन अनंतरोबाह्य इति विरोधाभावोविचित्रशक्तियुक्तत्वात् सर्वभवनसमर्थत्वाच्च॥ ॥स्वपक्षदोषाच्च॥ ॥प्रधानवादिनोपिसर्वपरिणामसावयवत्वानित्यत्वादि
दोषोऽपरिहरः। युक्तिमूलत्वाच्चतस्य॥ ॥अचिंत्यकल्पनायाप्रमाणाभावाच्च॥ ॥सर्वोपेता च तद्दर्शनात्॥ ॥सर्वशक्तिभिरुपेताउपगतः चकारात्सत्यादिगुणयुक्तश्च। कुतः। तद्दर्शनात्। त
थावेदेदृश्यते। यः सर्वज्ञः सर्वशक्तिः। सर्वकर्मा सर्वकाम इत्यादि॥ ॥विकरणत्वान्नेतिचेत्तदुक्तं॥ कर्त्तुरिंद्रियवान् लोके ब्रह्मणो निरिंद्रियत्वात्कथंकर्तृत्वमितिचेन्न अस्यपरिहारः पूर्वमे
वोक्तः श्रुतेस्तुशब्दमूलत्वादित्यत्र अनवगाह्यमाहात्म्येश्रुतिरेवशरणंनान्यावाचोयुक्तिरिति॥ ॥नप्रयोजनवत्त्वात्॥ ॥नब्रह्मजगत्कारणंकुतः प्रयोजनवत्त्वात्। कार्यंहिप्रयोजनवद्दृष्टंलो
के। ब्रह्मणिपुनः प्रयोजनवत्त्वंसंभावयितुमपिशक्यते। आप्तकामश्रुतिविरोधात्॥ व्यधिकरणोहेतुः नसमासोवा॥ ॥लोकवत्तुलीलाकैवल्यं॥ ॥तुशब्दः पक्षंव्यावर्त्तयति। लोकवत्ली अ॰२
लांपर्यनुयोक्तुंशक्या॥ सा लीलाकैवल्यंमोक्षः तस्यलीलात्वेप्यनपस्यनत् कार्त्तनेमोक्षइत्यर्थः॥ लीलैवकेवलेतिवा॥ ॥वैषम्यनैर्घृण्येनसापेक्षत्वात्तथाहिदर्शयति॥ ॥कांश्चित्सुखिनःकांश्चिद्दुः ३
नहिलीलायांकिंचित्प्रयोजनमस्ति। लीलायाएवप्रयोजनत्वात्। ईश्वरत्वा
देवनेलीला४१

श्री

।विनश्च प्रलयं च कुर्वन् विषमो निर्घृणश्चेति चेत् ।न सापेक्षत्वात् ।जीवानां कर्मानुरोधेन सुखदुःखे प्रयच्छतीति वा विबोधनायैतदुक्तं ।वस्तुतस्त्वात्मसृष्टे वैषम्यनैर्घृण्यसंभावनैव नास्ति ।वृष्टिव
द्भगवान्बीजवत्कर्म ।श्रुतिरेव तथा दर्शयति ।एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते ।एष उ एवासाधु कर्म कारयति तं यमधो निनीषते ।पुण्यो वै पुण्येन कर्मणा भवति पापः पापे
न कर्मणेति च ।सापेक्षमपि कुर्वन्नीश्वर इति माहात्म्यं ॥ ॥न कर्माविभागादिति चेन्नानादित्वात् ॥ ॥न कर्म विभागात् कार्यो क्रमात् पूर्वं संभवति ॥ पश्चात्त्वन्योन्याश्रय इति चेन् ।न ।अनादित्वात् ।बी
जांकुरवत् स्व वा इत्यनादित्वात् ॥ ॥उपपद्यते चाप्युपलभ्यते च ॥ ॥कथमनादित्वमिति चेत् उपपद्यते ह्यन्यथा कस्य संसारः कृतहान्यकृताभ्यागमप्रसंगश्च उपलभ्यते च श्रुतिस्मृत्योः ।अनेन जी
वेनात्मनेति सर्गादौ जीवप्रयोगादनादित्वं ।तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवानिति च ॥ ॥सर्वधर्मोपपत्तेश्च ॥ ॥उपसंहरति ।वेदोक्ता धर्माः सर्वे ब्रह्मण्युपपद्यंते सर्वसमर्थत्वादिति ॥ ॥इति श्री। प
वेदव्यासमतवर्त्तिविद्वन्मोविरचिते ब्रह्मसूत्राणुभाष्ये द्वितीयस्याध्यायस्य प्रथमः पादः ॥ ॥रचनानुपपत्तेश्च नानुमानं ॥ रचनं च तया सर्वे वादा निराक्रियंतेस्मिन्पादे ।लोकानां त्वनुवादो नाम चेतनेन
केवलेन प्रधानेन रचना नोपपद्यते ।रचितत्वादेव न परिणामः ।सर्वस्य संश्लेषप्रसंगात् ।अतश्चेतनकर्तृका रचना नाचेतनेन प्रधानेन कर्त्तुं शक्या ।तस्मात्कारणत्वेन प्रधानं नानुमातव्यं ॥ अन्यथोपपत्त्या बाधितमे
वा वानुमानमिति चकारार्थः ॥ प्रवृत्तेश्च ॥ ॥भुवनानि विचार्य जनान्विचारयति ।सर्वस्य तत्परिणामे प्रवृत्तिर्नोपपद्यते प्रधानस्य वा प्रथमप्रवृत्तिः ।यद्यपि प्रधानकारणवादे फलपर्यंतमंगी ।क्रियमाणे न
किंचिद्दूषणं कृतिमात्रस्य प्रधानविषयत्वात्तथापि वादिनं प्रति लोकन्यायेन वक्तव्यं तत्र लोके चेतनाचेतनव्यवहारोस्ति चेतनाश्च द्विविधा जीवाः सशरीराः अन्ये ।किंकाश्च ।अन्ये अचेतनाः तन्न्यायेन
विचारो नेति न किंचिद्विचारणीयं ॥ ॥पयोंबुवच्चेत्तत्रापि ॥ ॥यथा पयोधिर्विचित्रफेनरचनां करोति ।यथा वा नद्यादिजलं स्वत एव स्यंदत इति चेन्न ।तत्रापि दोहनाधिश्रयणं मेघानां चेतनानामेव

मत्वात्॥आख्यानांतरेत्वन्नांबुवदित्युच्यते।द्वितीयस्यसमाधानंनोभयंवादिसंमतं।व्यतिरेकानवस्थितेश्चानपेक्षत्वात्।प्रधानस्यान्यापेक्षाभावात्सर्वदाकार्यकरणमेवनव्यतिरेकेणतूष्णीमवस्था
नमुचितं।पुरुषाधिष्ठानस्यतुल्यत्वात्।सेश्वरसांख्यमतेप्यैश्वर्यंतदधीनमिति यथा।स्थितमेवदूषणं॥ ॥अन्यत्राभावाच्चनतृणादिवत्॥ ॥तृणपल्लवजलानिस्वभावादेवपरिणमंतेएवमेव
प्रधानमितिचेन्मंतव्यं।अन्यत्रशृंगादौदुग्धस्याभावात्॥चकाराच्चेतनक्रियाप्यस्ति।ततश्चलोकदृष्टांताभावादचेतनंप्रधानंनकारणं॥ ॥अभ्युपगमेप्यर्थाभावात्॥ ॥प्रधानवादांगीकारेपिचेत्स्वका
रित्वाभावान्नपुरुषार्थःसिध्यति॥ ॥पुरुषाश्मवदितिचेत्तथापि॥ ॥प्रधानस्यकेवलस्यकारणवादोनिराकृतः।पुरुषप्रेरितस्यकारणत्वमाशंक्यपरिहरति।पुरुषःपंगुरंधमारूढःअन्योन्योप
कारायगच्छतियथावाअयस्कांतंसंनिधिमात्रेणलोहेक्रियामुत्पादयति॥एवमेवपुरुषाधिष्ठितंपुरुषसंनिहितंवाप्रधानंप्रवर्तिष्यतइतिचेत्।तथापिदोषस्तदवस्थःप्रधानप्रेरकत्वंपुरुषस्य न
स्वाभाविकंप्रधानकृतंवा।आद्येप्रधानस्याप्रयोजकंद्वितीयेप्रधानदोषस्तदवस्थः॥नित्यसंबंधस्यविशिष्टकारणत्वेअनिर्मोक्षः॥अज्ञाकृतस्यतुमोक्षांगीकारःसर्वथानुपपन्नः॥ ॥अंगित्वानुप
पत्तेश्च॥ ॥प्रकृतिपुरुषयोरंगांगित्वेनवेदप्येवं।तच्चनोपपद्यतेपुरुषस्यांगित्वेब्रह्मस्वरूपवैशेषिमतहानिश्च।प्रकृतेरंगित्वेत्वनिर्मोक्षः।अनेनपरिहृतोपिमायावादोनिर्लज्जानांहृदयेनास्मते॥ ॥अ
न्यथानुमितौचज्ञशक्तिवियोगात्॥ ॥अन्यथावयंसर्वमनुमिमीमहे।यथासर्वेदोषाःपरिहृताभवेयुरितिचेत्।तथापिपूर्वंज्ञानशक्तिर्नास्तीतिमंतव्यंतथासतिबीजस्यैवाभावान्नित्यत्वाच्चा
निर्मोक्षइति॥ ॥विप्रतिषेधाच्चासमंजसं॥ ॥परस्परविरुद्धत्वान्नवनिर्णायंचवेदादिप्रत्यक्षांगीकारात्।वस्तुतस्तुलौकिकार्थेवेदएवप्रमाणंनान्यदिति॥ ॥महद्दीर्घवद्वाह्रस्वपरिमंडलाभ्यां॥ ॥ अ०२
इदानींपरमाणुकारणवादोनिराक्रियते।तत्रस्थूलकार्यस्यप्रथमंपरमाणुद्वयेनद्व्यणुकमारभ्यते।परमाणुद्वयसंयोगेद्व्यणुकंभवतीत्यर्थः।तच्चोपर्यधोभावमिलनेद्व्यणुकंमहत्स्यात्द्विगुणपरिमाणवत्त्वा ४

न२ ते

त्प्राक्पश्चान्मिलने दीर्घत्वह्रास्यात् परमाणुपरिमाणं ह्रस्वं परितोमंडलं च। उपहासार्थं तस्य मतस्यानुवादः॥ किमतो यद्येवमत आह॥ ॥उभयथापि न कर्मातस्तदभावः॥ ॥उभयथापि न कुतः नक
र्मकारो देहलीप्रदीपन्यायेनोभयत्र संबध्यते। अतो द्व्यणुकाभावः। उभयथापि न परमाणुसंघट्टनं। प्रदेशाभावात्। कल्पनामनोरथमात्रं। असंयुक्तांशाभावान्न देवनतस्यात् संयोगजं कर्मापि न संभवति नकं
कारणांतराभावात्। प्रयत्नवदात्मसंयोगे अदृष्टवदात्मसंयोगे चाभ्युपगम्यमाने निरवयवत्वान्न देवनतस्यात्। विशेषाभावाद्विभागस्याशक्यत्वाच्च। अतो द्व्यणुकस्याभावः॥ ॥समवायाभ्यु
पगमाच्च साम्यादनवस्थितेः॥ ॥परमाणुद्व्यणुकयोः समवायोंगीक्रियते स संबंधिनोरवस्थांमपेक्ष्य संबंधस्योभयनिष्ठत्वात्। स च नित्यः सदा संबंधित्वमपेक्षते। अतोपि न द्व्यणुकउत्पद्यते किंच।
समवायो नांगीकर्तुं शक्यः संयोगेन तुल्यत्वात् संबंधत्वात्तस्यापि यथा संबंधिनि संबंधांतरापेक्षा एवं समवायस्यापि तथा सत्यनवस्थितिः॥ ॥नित्यमेव च भावात्॥ ॥परमाणोः कारणांतरस्य च नित्यमे
वभावात्सदा कार्यं स्यात्। रूपादिमत्त्वाच्च विपर्ययो दर्शनात्॥ ॥यद्रूपादिमत्तदनित्यं परमाणोरपि रूपादिमत्त्वाद्विपर्ययः अनित्यत्वमपरमाणुत्वं च। न च प्रमाणबलेन तदतिरिक्ते व्याप्तिरिति वाच्यं
अदर्शनात्। कार्यानुपपत्तिः श्रुत्यैव परिहृता॥ ॥उभयथापि च दोषात्॥ परमाणूनां रूपादिमत्त्वेन तदभावे च दोषः॥ एकत्रानित्यत्वमन्यत्र कार्यरूपस्य निर्मूलत्वं च। हरिद्राचूर्णसंबंधे रूपांतरस्य जन।
नाद्विरोधोपि च कार्यार्थः॥ ॥अपरिग्रहाँत्यंतमनपेक्षा॥ ॥सर्ववैदिकानामपरिग्रहाच्चात्यंतं सर्वथा नापेक्षते॥ समुदाय उभयहेतुकेपि तदप्राप्तिः॥ ॥अतः परं बौद्धमतनिराकरणं। ते समुदायद्वयं
जीवभोगार्थं संहन्यत इति मन्यंते परमाणुसमूहः पृथिव्यादिस्तत्समुदाय एकः रूपादिस्कंधसमुदायश्चापरः॥ रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकाः पंचस्कंधाः। तदुभयसंबंधे जीवस्य संसारस्तद
पगमे मोक्ष इति। तत्र उभयहेतुकेपि समुदाये जीवस्य तदप्राप्तिः। क्षणिकत्वात्। सर्वक्षणिकत्वे जीवेक्षणिकत्वे वा तदप्राप्तिः॥ ॥इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्॥ ॥क्षणिकत्वे

मात्र २

प्र१ ज्जडत्वा

पिपूर्वपूर्वस्योत्तरोत्तरप्रत्यँविषयत्वात्कारणत्वात्संततेरेवजीवत्वाँच्चनकाप्यनुपपत्तिरितिचेन्न।उत्पत्तिमात्रनिमित्तत्वात् अनुसंधानाद्युपगमे स्थिरत्वापत्तिः।संबंधवियोगार्थकोवायत्नेनतांस्थे
प्यभावात्समुदायानुपपत्तिश्च॥ ॥उत्तरोत्पादेचपूर्वनिरोधात्॥ ॥उत्तरोत्पत्तिरपिनसंभवति।उत्पन्नस्यपरवस्तूत्पादकत्वं॥ अतउत्तरोत्पत्तिसमयेपूर्वस्यनष्टत्वात्।उत्पत्तिक्षणएवस्थिति
प्रलयकार्यकारणसर्वांगीकारेविरोधादेकमपिनस्यात्॥ ॥असतिप्रतिज्ञोपरोधोयौगपद्यमन्यथा॥ ॥एकाक्षणिकत्वप्रतिज्ञाअपराचतुर्विधान्हेतून्प्रतीत्यचित्तचैत्ताउत्पद्यंतइतिवक्तुनः
क्षणांतरसंबंधेप्रथमप्रतिज्ञानउपपति।असतिद्वितीयाद्वितीयाचेत्त्रांगी।क्रियनेनदाप्रतिबंधाभावात्सर्वंसर्वत्रएकदैवोत्पद्येत॥ ॥प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविछेदात्॥ ॥अपिच
वैनाशिकाःकल्पयंति।बुद्धिबोध्यंत्रयादन्यच्चसंस्कृतंक्षणिकंचेतित्रयंतुननिरोधद्वयमाकाशंच।तत्रेदानींनिरोधद्वयांगीकारंदूषयति।प्रतिसंख्यानिरोधोनामभावानांबुद्धिपूर्वकोवि
नाशः।विपरीतोप्रतिसंख्यानिरोधः।उभयमपिनिरूपाख्यं।निरोधद्वयमपिनप्राप्नोतिसंततेरविछेदात्।पदार्थानांचनाशाकसंबंधाभावात्।प्रतिबंधसंबंधाभावः।आद्योनिरोधःपदार्थविष
यकोव्यर्थः।द्वितीयःक्षणिकांगीकारेणैवसिद्धत्वात्रांगीकर्तव्यः॥ ॥उभयथाचदोषात्॥ ॥प्रतिसंख्यानिरोधांतर्गताविद्याविनाशोमोक्षइतिक्षणिकवादिनोमिथ्यावादिनश्चमन्यंतेअवि
द्यायाःसपरिकरायानिर्हेतुकविनाशोनास्वतंत्रैवैफल्यंचविद्यानत्कार्यनिरिक्तस्याभावात्रसहेतुकोपि।नहिवंध्यापुत्रेणरज्जुसर्पोनिवर्तते।अतउभयथापिदोषः॥ ॥आकाशेचाविशेषात्॥
॥यच्चोक्तमाकाशमप्यावरणाभावोनिरूपाख्यमितितन्नआकाशोपिसर्वपदार्थवद्वस्तुत्वव्यपहारस्याविशेषात्॥ ॥अनुस्मृतेश्च॥ सर्वोपिक्षणिकवादोबाधितःसएवायंपदार्थइत्यनुस्मरणात्। च॰२
[illegible]त्।अनुभवस्मरणयोरेकाश्रयमेवविषयत्वंच॥ ॥नासतोदृष्टत्वात्॥ ॥अपिच॥ नानुपमृद्यप्रादुर्भवंतिवैनाशिकामन्यंते।तत्स्थामतच लीकानकोर्भस्यात्।नत्र।अदृष्टत्वान्नहिश ५

ग्राम्यंगादिभिः किंचित्कार्यं दृश्यते॥ एवं सतः कारणत्वं पूर्वपादे उपपाद्यासतः कारणत्वं [illegible] निराकृत्य व्यासचरणैर्वेदानामव्याकुलत्वे संपादिते पुनर्दैत्यव्यामोहनार्थं
प्रवृत्तस्य भगवतो बुद्धस्याज्ञया तंच रुद्र महाबाहो मोहशास्त्राणि कारय॥ अतथ्यानि वितथ्यानि दर्शयस्व महाभुज॥ स्वागमैः कल्पितैस्त्वं च जनान्मद्विमुखान्कुरु इत्येवंरूपयामाहादेवादयः स्वां
श्रोनावनीयवैदिकेषु प्रविरूपविश्वासार्थं वेदभागान्यथार्थनिपिध्याख्याय सदसद्विलक्षणामसदपरपर्यायामविद्यां सर्वकारणत्वेन स्वीकृत्य तन्निवृत्त्यर्थं ज्ञानिज्ञं ब्रह्मरूपं सत्यामपार्थं उंप्रमा
र्थं सर्वमेव लोकं व्यामोहितवंतः। व्यासोपि कलहेलं कृत्वा ग्रोकरं शास्त्रमूत्स्त्रीमास॥ अतोत्रिनामयासवृत्तिः सउद्धारार्थं यथाश्रुतानि श्रुतिसंज्ञाणि योजयता सर्वमोहो निराकृतो वेदितव्यः॥ प्रथमाध्या
य एव न मनुष्य विस्तरेण निराकृतमिति नात्रोच्यते॥ ॥उदासीनानामेनोपि चैवं सिद्धिः॥ ॥यद्यभावाद्भावोत्पत्तिरंगीक्रियते तेन तथा सत्युदासीनानामपि साधनरहितानां सर्वोपि धान्यादिः सिध्येताभा
वस्य सुलभत्वात्॥ ॥नाभाव उपलब्धेः॥ ॥एवं कारणासत्त्वं निराकृत्य विज्ञानवाद्यभिमतं प्रपंचासत्त्वं निराकरोति। सच ज्ञानातिरिक्तः प्रपंचो नास्तीत्याह। तत्र। अस्य प्रपंचस्य नाभावः। उपलब्धेः। उ
पलभ्यते हि प्रपंचः। यस्तूपलभ्यते चैवं नाहमुपलभ्य इति सकथमुपादेयवचनः स्यात्॥ ॥वैधर्म्याच्च न स्वप्नादिवत्॥ ॥न तूपलब्धिमात्रेण वस्तुसत्त्वं॥ स्वप्नमायाभ्रमेष्वन्यथा दृष्टत्वादिति चेत्। न वैध
र्म्यात्। स्वप्नादिषु तदानीमेव स्वप्नांते वा वस्तुनोन्यथाभावोपलंभात्॥ न तथा जागरिते वर्षानंतरमपि दृश्यमानः स्तंभः स्तंभ एव। अत्र स्वप्नमोहे। यद्वन्निर्व्याघातश्च कार्यः॥ ॥न भावोनुपलब्धेः॥ ॥यदप्यु
च्यते बाह्यार्थव्यतिरेकेणापि वासनया ज्ञानवैचि[illegible]ंभविष्यतीति। तच्च वासनानां न भाव उपपद्यते। त्वन्मते बाह्यार्थस्यानुपलब्धेः। उपलब्धस्य हि वासनाजनकत्वं। अनादित्वेप्यंधपरंपरान्यायेनाप्रति
ष्ठेवा। अर्थव्यतिरेकेण वासनाया अभावाद्वासनाव्यतिरेकेणाप्यर्थोपलब्धेरन्वयव्यतिरेकाभ्यामर्थसिद्धिः॥ ॥क्षणिकत्वाच्च॥ ॥वासना[illegible]याश्चाधारोपि नास्ति आलयविज्ञानस्य क्षणिकत्वात्॥ ब

मानणव ४

त

ति। विज्ञानवत्। एवं सौत्रांतिको विज्ञानवादी च प्रत्युक्तः। माध्यमिकस्तु मायावादिवदसंबद्धप्रलापित्वादुपेक्ष्य इति न निराक्रियत आचार्येण॥ ॥सर्वथानुपपत्तेश्च॥ ॥किं बहुना बाह्यवादो
यथा विचार्यते तथा तथा असंबद्ध एवेत्यलं विस्तरेण। चकाराद्वेदविरोधो मुख्यः॥ ॥नैकस्मिन्नसंभवात्॥ ॥विवसनमतमपि निराक्रियते तेषां तन्निर्दिष्टाः प्रपंचे उदासीना सप्तविभक्तीः परेच्छया
वदंति स्याच्छब्दो नीषवचनः। अस्तिनास्त्यवक्तव्यानां प्रत्येकसमुदायाभ्यां स्यात्पूर्वकः सप्तप्रकारो भवति। तदेकस्मिन्न योजयंति विरोधेनासंभवादयुक्तं। एवं चात्मा कार्त्स्न्यं। ॥ननु कथं बहिरुदा-
सीनस्य तद्दूषणमत आह। एवमपि मतित्वात्मनो वस्तुपरिच्छेदादकार्त्स्न्यं न सर्वत्वं। अथवा शरीरपरिमाण आत्मा चेत्तदा सर्वशरीरेणामहदल्पत्वादात्मनो नकार्त्स्न्येन कृत्स्नशरीरं स्वल्पत्वं। न
च पर्यायादप्यविरोधो विकारादिभ्यः॥ ॥शरीराणामवयवोपचयापचयानुसारेणात्मनोऽपि देवतिर्यङ्मनुष्येषु अवयवोपचयापचयाभ्यां तत्तुल्यतास्यात्। तथा मतिपर्यायेणाविरोध
प इति न वक्तव्यं तथा सति विकारादौ तत्संकोचविकासेऽपि विकारस्य दुष्परिहरत्वात्॥ ॥अंत्यावस्थितेश्चोभयनित्यत्वादविशेषः॥ ॥अंत्यावस्थिते मुक्तिसमये स्थितिस्तस्माद्धेतोः। पूर्वदोषप- याव ६
रिहाराय च उभयनित्यत्वं न वेदरूपत्वं वा महत्त्वं वा उभयथापि शरीरपरिमाणो न भवतीति न तवाभिमतसिद्धिः॥ ॥पत्युरसामंजस्यात्॥ ॥पराभिप्रेतान् जडजीवान्निराकृत्येश्वरं निराकरोति। वेदो-
क्तादणुमात्रेऽपि विपरीतं स्यद्भवेत्॥ तादृशं वा स्वतंत्रं चेदुभयंभूतनो मृषांता। किं कादिमतं निराकरोति। पतिश्चेदीश्वरः स तस्माद्भिन्नः तदा विषमकरणाद्वैषम्यनैर्घृण्ये स्यातां कर्मापेक्षायां त्वनी-
श्वरत्वं युक्तिमूलत्वाद्दोषः। असामंजस्याद्धेतोर्न पशुपतित्वेनेश्वरसिद्धिः॥ ॥संबंधानुपपत्तेश्च॥ ॥जीवब्रह्मणोर्विभुत्वादजसंयोगस्यानिष्टत्वात्पतित्वानुपपत्तिः। तुल्यत्वादप्यनुपपत्तिरिति चकारार्थः अ॰२
॥ ॥अधिष्ठानानुपपत्तेश्च॥ ॥स च ईश्वरो जगत्कर्तृत्वेन कल्प्यमानो लौकिकन्यायेन कल्पनीयः। स चाधिष्ठित एव किंचित्करोतीति ईश्वरेऽप्यधिष्ठानमंगीकर्तव्यं तस्मिन् कल्प्यमाने मतविरोधो ६

जीव

नवस्त्वाश्च संभवश्च।। ।।करणवच्चेन्न भोगादिभ्यः।। ।।करणवदंगीकारेच संबंधदोषः परिहृतो भवति। न च न युक्तं भोगादिप्रसक्तेः।। ।।अंतवत्त्वमसर्वज्ञता वा।। ।।ईश्वरः प्रकृतिर्जीवनियमार्थ
मंगीकृतः तत्तन्वयोः परिच्छेदे संभवति। न तत्स्वतो कल्प्यायेन जीवप्रकृत्योरंतवत्त्वं न वेत्। तन्मस्वाद्यनित्यतायां मोक्षशास्त्रवैफल्यं। एतद्दोषपरिहाराय विभुत्वनित्यत्वे अंगीक्रियमाणे संबंधाभावाद
सर्वज्ञता वा स्यात्। तस्मादसंगतस्तार्किकवादः।। ।।उत्पत्त्यसंभवात्।। ।।भागवतमते कंचिदंशं निराकरोति। ते च चतुर्व्यूहोत्पत्तिं वदंति वासुदेवात्संकर्षणः तस्मात्प्रद्युम्नः तस्मादनिरुद्ध इतित
च एषामीश्वरत्वं सर्वेषां तत्र संकर्षणस्य जीवत्वं चान्यान्यत्वं तत्पत्तिपक्षे जीवस्योत्पत्तिर्न संभवति यथा सति पूर्ववत्सर्वनाशः स्यात्।। ।।न च कर्तुः करणं।। ।।कर्तुः संकर्षणसंज्ञकाज्जीवात्प्रद्युम्न
संज्ञकं मन उत्पद्यत इति। तल्लोकेन सिद्धं।। न हि कुलालाद्दंड उत्पद्यत इति चकारादग्रिमस्य निराकरणं। विज्ञानादिभावे वा तदप्रतिषेधः।। ।।अपि सर्वे परमेश्वराः विज्ञानादिमंत इति तथा सति न द
प्रतिषेधः। ईश्वराणामप्रतिषेधः। अनेकेश्वरत्वं च न युक्तमित्यर्थः।। वस्तुतस्तु स्तातं अमेव दोषः।। ।।विप्रतिषेधाच्च।। ।।बकुकल्पनया वेदनिंदया च विप्रतिषेधः।। चकाराद्वेदप्रक्रियाविरोधः।।।।
श्री ।।इति वेदव्यासमतवर्त्ति[redacted]विरचिते ब्रह्मसूत्राणुभाष्ये द्वितीयस्याध्यायस्य द्वितीयः पादः।। ।।२।।२।। ।।न वियदश्रुतेः।। ।।श्रुतिवाक्येषु परस्परविरोधः परिह्रियते विप्रतिषेधपरिहाराय
मीमांसायास्तदर्थं प्रवृत्तत्वात्। शाक्यविरोधाभ्यां। यथा च ब्रह्मवादे जडजीवयोर्विरुद्धांशानिराकरणाय तृतीयपादारंभः। द्विविधा हि वेदांतेषु सृष्टिः भूतभौतिकं सर्वं ब्रह्मण एव विस्फुलिंगन्याये
नैक।। अपरा वियदादिक्रमेण सा चानामरूपात्मनो नामरूपत्ववत्त्वेनाभिव्यक्तिः। सैजडस्यैव कार्यत्वात्तस्य जीवस्य त्वंशत्वेनैव न नामरूपसंबंधः। अनित्ये जननं नित्ये परिच्छिन्ने समागमः। नित्यापरिच्छि
न्ननो प्राकट्यं चेति सा त्रिधा। तत्र क्रमसृष्टौ संदेहः। छांदोग्ये हि सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तदैक्षत तत्तेजोऽसृजतेति तेजोबन्नसृष्टिरुक्ता न वाय्वाकाशयोः। तैत्तिरीय

४४ श्रीवल्लभाचार्य ४७

केतुनः ब्रह्मविदाप्नोति परमित्युपक्रम्य तस्माद्वा एतस्मादात्मन आकाशः संभूत इति आकाशादिसृष्टिरुक्ता। तुनयमपिक्रमसृष्टिवाचकमित्येकवाक्यता युक्ता। छंदोग्येपि मुख्यतया सा। हि तै-
त्तिरीये गौणी मुख्या तथैव दृश्यते। सोकामयतेत्यादिना। तत्र संशयः। किमाकाशमुत्पद्यते न वेति। किं तावत्प्राप्तं नोत्पद्यत इति कुतः अश्रुतेः श्रुतिवादिनां श्रुत्यैव निर्णयः। श्रुतौ तु न सृष्टेः क्रमस्पष्टो
न श्रूयते॥ ॥अस्ति तु॥ ॥तु शब्दः पक्षं व्यावर्तयति तैत्तिरीयके वियदुत्पत्तिरस्ति यद्यपि मुख्येनास्ति तथापि विरोधाभावादन्यत्रोक्रमप्यंगीकर्तव्यमेकवाक्यत्वाय। एकविज्ञानेन सर्वविज्ञा-
नानुरोधाच्च॥ ॥गौण्यसंभवात्॥ ॥वियदुत्पत्तिर्गौणी भविष्यति। कुतः। असंभवात्। न ह्याकाशस्योत्पत्तिः संभवति निरवयवत्वात्। व्यापकत्वाच्च। मुख्ये चाभावात्। एकविज्ञाने सर्वविज्ञानप्र-
तिज्ञा तु तदधिष्ठानत्वेन जीववत्तदंगत्वेन शरीरत्वेन वा एकविज्ञानकोटिनिवेशात्। लोकेप्यवकाशं कुर्वित्यादौ गौणप्रयोगदर्शनात्॥ ॥शब्दाच्च॥ ॥वायुश्चांतरिक्षं चैतदमृतमिति आ-
काशवत्सर्वगतश्च नित्य इति न ह्यमृतस्य ब्रह्मसदृशोतस्तस्योत्पत्तिः संभवति॥ ॥स्याच्चैकस्य ब्रह्मशब्दवत्॥ ॥ननु कथं वियदुत्पत्तिर्गौणी भविष्यति तत्र हि संभूत इत्येकमेव पदमुत्तरत्रावर्तते
। तथा सत्युत्तरत्र मुख्या आकाशे गौणीति युगपद्वृत्तिद्वयविरोध इति चेत्। न। एकस्यापि स्यात् क्वचिन्मुख्या क्वचिद्गौणीति ब्रह्मशब्दवद्यथा तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेति। प्रथमवाक्ये मुख्या
द्वितीये गौणी। न चात्र प्रयोगभेदोस्तीति वाच्यं। संभूतशब्दोप्यावर्तते। ननु तादृशार्थयुक्तोप्यात्मसत्त्वेनैव तत्सत्त्वमितिमत्वगुणो वचनहेतुः। तत्र शावापत्तं ब्रह्मैव सर्वत्र कारणमिति नाने-
कत्वलक्षणा। तच्छावापत्तिविशेषणव्यावृत्त्यर्थमपि न लक्षणा स्वभावतोपि ब्रह्मणः सर्वरूपत्वात्। तस्माद्गौणी आकाशसंभूतिश्रुतिरित्येवं प्राप्ते इदमाह॥ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः॥ अ०२
॥ ॥न वेदे तदेवं यदिंशोप्यश्रुतिर्न विरुध्येत। कथं एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञानप्रतिज्ञाबाध्येत। अव्यतिरेकात्॥ अनुक्रमात्। यदिमं बद्धमेव ब्रह्मणा आकाशं तिष्ठेत तदा ब्रह्मवि- ७

ज्ञानेनाकाशाविषयीकरणे तन्नैकविज्ञानं आकाशस्य चालौकिकत्वात् ब्रह्मज्ञानं सर्वज्ञतायामपेक्षितमेव। न च जीवेत् लौकिकत्वात्। व्यवहारमात्रविषयत्वान्नातीन्द्रियत्वादिचिंता॥
अनुक्रमेऽपि वस्तुसामर्थ्यात्कथं प्रतिज्ञा हीयत इत्यत आह। शब्देभ्यः येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवतीति शब्दाः प्रकृतिविकारभावेनैव व्युत्पादयन्ति ज्ञानं। शब्दे-
भ्यो हेतुभ्यः प्रतिज्ञाहानिरिति योजना॥ ॥यावद्विकारं तु विभागो लोकवत्॥ ॥तुशब्द आकाशोत्पत्त्यसंभावनाशंकां वारयति॥ यद्यद्विकृतं तस्य सर्वस्य विभाग उत्पत्तिः। आकाशो विकृतं मपि
लौकिकव्यवहारविषयत्वात्। यथा लोके विकृतमात्रमुत्पद्यते। आकाशोत्पत्तौ श्रुत्या सिद्धायां आकाशवत्सर्वगतश्च नित्यः। आकाशशरीरं ब्रह्म। स यथानंतोऽयमाकाश एवमनंत आ-
त्मा वेदितव्यः आकाशा आत्मा इत्यादिश्रुतयः समोनेन सर्वेण य आकाशे तिष्ठन् सर्वमात्मेत्येवमादिभिरेकवाक्यतां लभंते व्यवहारे [illegible]त्वरूपबोधनं वाक्यानामुपयोगः॥ ॥एतेन
मातरिश्वा व्याख्यातः॥ ॥आकाशोत्पत्तिसमर्थनेन मातरिश्वोत्पत्तिः समर्थिता॥ सैषाऽनस्तमिता देवतेत्यभौतिकवायुव्यावृत्त्यर्थं लौकिकपदं॥ ॥असंभवस्तु सतोऽनुपपत्तेः॥ ॥ननु
ब्रह्मणोऽप्युत्पत्तिः स्यादाकाशवत्सर्वगतश्च नित्य इति श्रुतेराकाशन्यायेन सर्वगतत्वनित्यत्वयोरभाव इतीमामाशंकां तुशब्दः परिहरति। सतः सन्मात्रस्योत्पत्तिर्न संभवति। न हि कुंड-
लोत्पत्तौ कनकोत्पत्तिरुच्यते। नामरूपविशेषाभावात्॥ उत्पत्तिश्च स्वीक्रियमाणा नोपपद्यते। स्वतो न संभवति अन्यतस्त्वनवस्था। यदेव च सल्लक्षणं तदेव ब्रह्मेति॥ ॥तेजोऽतस्तथा ह्याह॥ ॥तेजो-
ऽतः वायुतः तथा ह्याह वायोरग्निरिति श्रुतेः हिशब्देनैवमाह। छांदोग्यश्रुतिः प्रतिज्ञाहानिनिराकरणार्थं तैत्तिरीयकमपेक्षते वाय्वाकाशयोरुत्पत्त्यर्थं। तथा चोपजीव्यस्य प्राधान्यात्वा सभावा-
पन्नमेवमतस्तेजस उत्पादकमिति स्वीकरोति। ब्रह्मण एव सर्वोत्पत्तिपत्तिपक्षस्त्वविरुद्धः॥ ॥आपः॥ ॥तथा ह्याहेत्येव। इदमेकमनुवादसूत्रमविरोधख्यापकं। न श्रुत्योः सर्वत्र विरोध इति॥

ओ ओ

य

पृथिव्यधिकाररूपशब्दांतरेभ्यः।ता आप ऐक्षंत बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजंतेति तत्रान्नशब्देन व्रीह्यादयः आहोस्वित् पृथिवीति संदेहः॥ ननु कथं संदेहः पूर्वन्यायेनोपजीव्यश्रुतेर्बलीयस्त्वादिति चेत्॥ उच्यते॥ ॥अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योन्नमित्यप्येवर्त्तते।तथा सति पृथिवीमोषधीश्चस्रष्टा आपोन्नं सृजंति। आहोस्विदन्नशब्दे नैव पृथिवीति।न चैवमस्तु पृथिव्योषधिसृष्ट्यनंतरमन्नसृष्टिरिति चेन्न।छांदोग्यश्रुतेरपेक्षाभावान्महाभूतमात्रस्यैवाभिलषितत्वात्।एकपदलक्षणापेक्षयातत्स्वीकारस्य गुरुत्वात् पूर्वोक्तिरेवसंशयः॥तत्रान्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति त्र्याणां सहचारः सर्वत्रोपलभ्यते लोकप्रसिद्धिः वर्षणं च।यच्च लिंगं च तस्मात् पृथिव्योषधयन्नानां मध्ये अभेदविवक्षया यत्किंचिद्दृष्ट्वेऽन्नमुक्तमित्येवं प्राप्ते उच्यते।अत्रान्नशब्दे पृथिवी कुतः अधिकाररूपशब्दांतरेभ्यः।अधिकारो महाभूतानामेव न भौतिकानां।नीलं च रूपं पृथिव्या एवभूतमहपाठात्।शब्दांतरमद्भ्यः पृथिवीति।तस्मादन्नशब्देन पृथिव्येव॥ ॥तदभिध्यानादेव तु लिंगात्सः॥ ॥आकाशादेव कार्यविशेषादिकार्येष्वनिर्जैत्राद्वोवारयति।स एव परमात्मा वाय्वादीन्सृजति।कथं तच्छब्दवाच्यत्वे इति चेत् तदभिधानात्।तत्तस्य कार्यस्योत्पादनार्थं तदभिधानं तत्तदात्मकत्वं तेन तच्छब्दवाच्यत्वमिति॥ननु यथाश्रुतमेव क्रमो न गृह्यत इत्यत आह।तल्लिंगात्।सर्वकर्तृत्वं लिंगं तस्यैव सर्ववेदांतेष्ववगतं।नउतो देवतायावायत्किंचिज्जायमानं तत्सर्वं ब्रह्मण एवेति सिद्धं।विपर्ययेण तु क्रमोत उपपद्यते॥ ॥यथोत्पत्तिर्न तथा प्रलयः किंतु विपर्ययेण क्रमः अत उत्पत्त्यनंतरं प्रलयः कुत उपपद्यते॥एवं च विपर्ययेण हि निर्गमनं क्रमस्य प्रावेशेन तत्।अंतरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात्।तैत्तिरीयके आकाशादिरन्नपर्यंतमुत्पत्तिरुक्ता अन्नमयादयो निरूपिताः।तत्रान्नमयस्य प्राणमयस्य च सामग्री पूर्वमुत्पत्तौ उक्ता आनंदमयस्तु परमात्मा मध्ये विज्ञानमनसी विद्यमाने कचिदुत्पत्तेरितिवक्तव्यो।

तु

अ०२

७

तत्रक्रमेणोत्पत्तेइतिवक्तव्यं।क्रमस्तुप्रातिलोम्येनसत्त्वेविपर्ययानंतरकथनात्॥ ॥अंतरेतिचवचनात्॥ ॥तेजोवन्नानामन्नमयेगत्वान्नुवाघ्राकान्नायोः प्राणस्वगतत्वात्आकान्त्रदं विज्ञानमनसीउत्पत्तेइतिवक्तव्यं।तयोरप्येवचनमेवलिंगमिति अतस्तयोरुत्पत्तिर्वक्तव्येतिचेत्।न।अविशेषान्नामरूपविशेषवतामेवोत्पत्तिरुच्यते।नत्वनयोः।विज्ञानमयस्यजीवत्वात्मनोमयस्यचवेदत्वात्अतोन्तरभौतिकप्रवेशाभावात्तयोरुत्पत्तिर्वक्तव्या॥ ॥चराचरव्यपाश्रयस्तुस्यात्तद्व्यपदेशोभाक्तस्तद्भावभावित्वात्॥ ॥ननुविज्ञानमयस्यजीवस्याप्युत्पत्तौसर्वव्यवहारोच्छेदः।उत्पत्तिस्तुत्रिविधानिरूपिता।अनित्येजननं।नित्येपरिच्छिन्नेसमागमइति।तत्राचजीवस्यसमागमलक्षणाप्युत्पत्तिर्नस्यादितिइमामाशंकांनिराकरोतितत्राह।चराचरेस्थावरजंगमेशरीरेतयोर्विशेषेणाश्रयश्चाश्रयःशरीरसंबंधइतियावत्।सतुस्यात्नतुस्वतः।ननुशरीरस्योत्पत्तौजीवोप्युत्पद्यतेअन्यथाजातकर्मादीनामभावप्रसंगादितिचेत्।न।तद्व्यपदेशःतस्यशरीरस्यजन्ममरणधर्मवत्त्वेनजीवव्यपदेशोभाक्तःस्याद्गौणिकः।कुतः।तद्भावभावित्वात्।शरीरस्यान्वयव्यतिरेकाभ्यामेवजीवस्यतद्भावित्वंदेहधर्मोजीवस्यभाक्तःतत्संबंधेनैवोत्पत्तिव्यपदेशाइतिसिद्धं॥ ॥नात्माश्रुतेर्नित्यत्वाच्चताभ्यः॥ ॥ननुजीवोप्युत्पद्यतांकिमितिभाक्तत्वंकल्प्यतइतिचेत्।न।आत्मानोत्पद्यते।कुतः।अश्रुतेः।नहिआत्मनउत्पत्तिःश्रूयतेदेवदत्तोजातोविष्णुमित्रोजातइतिदेहोत्पत्तिरेव।नतुतद्व्यतिरेकेणपृथक्जीवोत्पत्तिःश्रूयते विस्फुलिंगवदुच्चरणंनोत्पत्तिः।नामरूपसंबंधाभावात्।एतस्यगुणाःस्वरूपंचाग्रेवक्ष्यते।किंचनित्यत्वाच्च।ताभ्यःश्रुतिभ्यः।अयमात्माजरोमरःनजायतेम्रियतइत्येवमादिभ्यःगुणान्निरूपयन्प्रथमतश्चैतन्यगुणमाह॥ ॥ज्ञोतएव॥ ॥ज्ञःचैतन्यस्वरूपःअतएवश्रुतिभ्यःविज्ञानमयइत्यादिभ्यःसर्वविज्ञवशादिब्रह्मवाक्यास्तुदाहृत्यसूत्रोक्तसिद्धांतमन्यथातत्तत्श्रुतिस्वरोधत्वंघनेनप्रगल्भते।सवक्तव्यः।किंजीवस्यब्रह्मत्वंप्रतिपाद्यते।जीवत्वंवानिराक्रियतइति।आद्येइष्टापत्तिर्न।द्वि

स्व

स्फुलिंगोपसंश्रोक्तत्वानांशित्वे द्वितीये स्वरूपनाशः। जीवत्वं कल्पितमिति चेन्न। अनेन जीवेनात्मनेति श्रुतिविरोधात्। नचानादिरयं जीवब्रह्मविभागो बुद्धिकृतः प्रमाणाभावात्। सदेव सोम्येदम

ग्र आसीदेकमेवाद्वितीयमिति श्रुतिविरोधश्च। न च जीवातिरिक्तं ब्रह्म नास्ति सर्वश्रुतिसूत्रनाशप्रसंगात्। यः सर्वज्ञः सर्ववित्। किंच अयमात्मापहतपाप्मा अधिकं तु भेदनिर्देशादित्यादिबाधः

तस्मात्सदंशस्य तत्त्वपदेशावाक्यमात्रं। स्वीकृत्याशिष्टपरिग्रहार्थमाध्यमिकस्यैवायमपरावतारो नितरां सद्भिरुपेक्ष्यः॥ ॥उत्क्रान्तिगत्यागतीनां॥ ॥अत एवेति वर्त्तते॥ ॥स यदास्माच्छरीरादु

मा त्क्रामति सहैवैतैः सर्वैरुत्क्रामति। ये के चास्मास्माल्लोकात्प्रयान्ति चंद्रमसमेव ते सर्वे गच्छंतीति तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण इत्युत्क्रान्तानामुत्क्रान्तिगत्यागतीनां श्रवणाद्यथायोग्यं तस्य

परिणां[illegible]मंगीकर्तव्यं। यद्यपि आराग्रमात्रो ह्यवरोपि दृष्ट इति श्रुत्यैव परिमाणमुक्तं तथापि बृहद्वादिविप्रतिपन्नत्वान्न युक्तिभिः साधयति। ब्रह्मवैलक्षण्यार्थमुत्क्रान्तिपूर्वकत्वमुक्तं॥ ॥स्वात्म

नाचोत्तरयोः॥ ॥उत्क्रान्तिगत्यागतीनां संबंधे इंद्रियादिभिः परिष्वंगोप्यस्तितत: संदेहोपि न वेत् किमुपाधिनैतेषां संबंधी भवेत् स्वतो वेति उत्तरयोर्गत्यागत्योः स्वात्मना केवलस्वरूपेण कृत्स्ना

निर्यथानंडत्रस्मजनने संचरत्यपि जा॥ यस्त्वेनेन यो जीवो गच्छत्यागच्छते पुनः॥ ब्रह्मोपनिषत्। अनेन जीवेनात्मनानुप्रविश्य ब्रह्माप्येति कामरूप्यनुसंचरन्निति वा॥ अथवा। उत्क्रान्तिगत्यागतीनां

जीवसंबंध एव बोध्यते नाणुत्वं। स्वात्मना चोत्तरयोरित्यणुत्वं चेदंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति उत्क्रमे गत्यतिरिक्ते स्वातंत्र्याभावात्। स्वात्मना जीवरूपेण चकाराद्देहेंद्रियैश्च गत्यागतो

:संबंधी जीवस्य तात्पर्यः॥ अतो मध्यमपरिमाणमयुक्तमित्यणुरेव भवति॥ ॥नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्। जीवो नाणुर्भवितुमर्हति कुतः। अतच्छ्रुतेः। अणुत्वविपरीतव्यापकत्वश्रुतेः॥ स अ०२

वा एष महानज आत्मा योऽयं विज्ञानमयः इति चेन्न। इतराधिकारात्। इतरः परं ब्रह्म तस्याधिकारे महानज इति वाक्यं प्रकरणेन त्राह्मास्वनियम्यंते। अन्यपरा अपि योगेन ब्रह्मपरा भविष्यंति॥ ॥ ९

स्वशब्दोन्मानाभ्यां च॥ ॥स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति स्वशब्दोणुपरिमाणं जीवं बोधयति। न हि सर्वव्यापकस्य वा शरीरपरिणामस्य वा रणं संभवति। वालाग्रशत
भागस्य शतशतधा कल्पितस्य तु। भागो जीवः स विज्ञेय इति आराग्रमात्रो ह्यपरोपि दृष्ट इति चोन्मानं। चकारात् स्वप्रबोधयोः संधा वा गतिर्दर्शितं॥ ॥अविरोधश्चंदनवत्॥ ॥अणुत्वे सर्वशरीर
व्यापि चैतन्यं न घटत इति विरोधो न भवति चंदनवत्। यथा चंदनमेकदेशस्थितं सर्वदेहसुखं करोति। महानसतैलस्थितं वा तापनिहंति॥ ॥अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि॥ ॥चं
दने अवस्थितिवैशेष्यं अनुपहतत्वचि सम्यक्तया अवस्थानं तस्मात् त्वच एकत्वात् न च भवतु नाम नतु प्रकृते तथा संभवतीति चेन्नान। अभ्युपगमात् अभ्युपगम्यते जीवस्यापि स्थानविशेषः। हृदि हि
हृदि जीवस्य स्थितिः। गुहां प्रविष्टावित्युक्तेः॥ ॥गुणाद्वालोकवत्॥ ॥जीवस्य हि चैतन्यं गुणः स सर्वशरीरव्यापी। यथा मणिप्रवेकस्य कांतिर्बहुदेशं व्याप्नोति तद्वत्। प्रभाया गुणत्वमेवस्य
शानुपलंभात्। उदकगतोष्मवत्। न च विजातीयस्यारंभकत्वं। प्रमाणाभावात्॥ लोकप्रतीतिस्तु सर्ववादिभिरुपपाद्या तत्र च गुणिकल्पनापेक्षया गुण एव स्थलांतरे आरभ्यत इति कल्प्यतां त स्य
थैवं लोकप्रतीतेः पुष्परागादेरपि प्रभारूपमेव तावद्देशं व्याप्नोतीति स हि स्वभावादेवं गौणी कर्तव्यं। आरंभकस्य तेजसस्तत्राभावात्। कांतिः प्रभारूपमिति हि लोके पर्यायः॥ वाशब्दो यथालोकं यु
क्तिः कल्पनायेति सूचयति। ब्रह्मसिद्धांते तु यथैव लोके दृश्यते तथैव ब्रह्मणो ज्ञानमिति न कल्पनालेशोपि॥ ॥व्यतिरेको गंधवत्॥ ॥सिद्धं दृष्टांतमाह। यथा चंपकादिगंधस्य पंकव्यवहितस्थलेप्युपल
भ्यते। वेशेकत्वादस्य दृष्टांतत्वं। यथा वृक्षस्य संपुष्पितस्य दूरात् गंधो वात्येवं गुणस्य कर्मणो दूरात् गंधो वातीति। अन्यथा कल्पनात्वयुक्तेत्यवोचाम॥ ॥तथा च दर्शयति॥ ॥हृदयायतनत्वमणुपरिमा
णत्वं चात्मनो भिज्ञायते स्यैवालोमभ्य आनखाग्रेभ्य इति चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति॥ ॥पृथगुपदेशात्॥ ॥प्रज्ञया शरीरं समारुह्येति करणत्वेन पृथगुपदेशाच्चैतन्यं गुणः

॥तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्॥ ॥ननु तत्त्वमस्यादिवाक्यैः परमेव ब्रह्म जीव इति कथमणुत्वमितीमामाशंकां निराकरोतिद्धत्राद्दः। तस्य ब्रह्मणो गुणाः प्रज्ञादृष्टत्वादयस्त एवात्र जीवे सा
रा इति जडवैलक्षण्यकारिण इतिऽमात्ये राजपदप्रयोगवत् जीवे भगवद्व्यपदेशः। मैत्रेयीति संपूर्णे ब्रह्मण एव भगवत्त्वेन जीव उक्तः। ननु कथमन्यस्यान्यधर्मवत्त्वेन कथनं॥ नहि निरूपणस्थल एवो
पचारः संभवति तत्राह प्राज्ञवत्। न यथा प्रियया स्त्रिया संपरिष्वक्त इत्यत्र एवमेवायं शारीरश्चात्मा प्राज्ञेनात्मना संपरिष्वक्त इत्यभिधाय प्राज्ञस्वरूपमाह। तद्वा अस्यैतदतिछंदोपहतपाप्माभ
यं रूपमत्र शोकांतरमत्र पिता अपिता भवतीत्यादि। प्राज्ञस्य सुषुप्तिसाक्षी। नहि तस्यापहतपाप्मत्वमस्ति ब्रह्मलिंगात्। एवमेव शारीरस्यापि जीवस्य ब्रह्मधर्मबोधिकाः श्रुतयः। इदमत्र वक्तव्यं।
थे सर्वोपिनिषत्सु ब्रह्मज्ञानं परमपुरुषार्थसाधनमिति निर्णयार्थं भगवान् व्यासः सूत्राणि चकार। तत्र ब्रह्मस्वरूपे विचारं प्रतिज्ञाय जगत्कर्तृत्वाद्यसाधारणलक्षणं ब्रह्मणः प्रतिज्ञाय समन्व
नै यनिरूपणे जीववाक्यानि दूरीकृत्य विरोधे [illegible] क्ये[illegible]हिताकरणादिदोषमाशंक्य अधिकं तु भेदनिर्देशादिति परिहृत्य जीवस्याणुत्वं उपचारात् ब्रह्मत्वमंशत्वं पराधीनकर्तृत्वादिकं प्रतिपा
द्यतस्यैव दक्षिणमार्गेण पुनरावृत्तिमुक्त्वा समाधनेन ब्रह्मतानेनार्चिरादिद्वारा ब्रह्मप्राप्तिमुक्त्वा न च पुनरावर्तत इत्यनावृत्तिं वदन् शास्त्रपर्यवसानेन सर्वान् वेदांतान् व्याकुलतया योजित
वान्। तत्र कश्चित् तद्व्यपदेशेन प्रोक्तानि तत्त्वमस्यादिवाक्यानि स्वीकृत्य जीवमात्रं च ब्रह्म स्वीकृत्य तदतिरिक्तस्य सर्वस्य कारणांशाकार्यरूपस्य मिथ्यात्वं परिकल्प्य तद्बोधकश्रुतीनाम
र्थवादत्वेन मिथ्यात्वं स्वीकृत्य सुषुप्तिसंपत्त्योर्भगवता प्रकटीकृतमानंदरूपत्वं तत्प्रतिपादकवाक्यानां सद्योमुक्तिरूपफलबाधकत्वमुक्त्वा क्रममुक्तिमुपासनापरत्वेन योजयित्वा वेदसूत्राणि अ०२
व्याकुलीचकार तद् वेदांतानां ब्रह्मपरत्वं जीवपरत्वं वेति यदत्र युक्तं तत्सद्भिरनुसंधेयं॥ ॥यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्॥ ॥ननु कथमन्यस्य नीचस्य सर्वोत्कृष्टव्यपदेशोपि। नहि १०

तद्

प्रामाणिकैः सर्वथा अयुक्तो व्यपदेशः। क्रियते न चोक्तं गुणसारत्वात् ब्रह्मणः आनंदांशस्य प्राकट्यादिवाच्यं तथा सति प्राज्ञवत् पुनस्तिरोहितं स्यादिति तस्य न व्यपदेशो व्यर्थः अयुक्तश्चेति चेत्। नायं दोषः। कुतः। यावदात्मभावित्वात् पश्चाद्यावत्पर्यंतमात्मा नित्यत्वात् सर्वदा आनंदांशस्य प्राकट्यात्। तस्य तथैव दर्शनमस्ति। अनादृत्यैश्वर्यादीनामुक्तत्वात् प्राज्ञासंपन्नत्वे विशेषः। चकारात्तस्य चानंदः प्रकटित इति न दूषणगंधोपि। व्यपदेशो वा नात्यंतमयुक्तस्य यावदात्मा ब्रह्मत्ववत्स्वानंदांशप्राकट्येन तावदेव तद्व्यपदेशः राजज्येष्ठपुत्रवत्। एतदेवोक्तं व्यापकत्वश्रुतिस्तस्य भगवत्वेन युज्यते। आनंदांशाभिव्यक्तौतु तत्र ब्रह्मांडकोटयः। प्रतीयेरन्न परिछेदो व्यापकत्वं च तस्य तदिति॥ ॥पुंस्त्वादिवत्त्वस्य सतोभिव्यक्तियोगात्॥ ॥व्यपदेशादशायामपि आनंदांशस्य नात्यंतमसत्वं॥ पुंस्त्वादिवत्तु यथा पुंस्त्वं सेकादिसामर्थ्यं बाल्ये विद्यमानमेव यौवने प्रकाशते तथा आनंदांशस्यापि सतएव व्यक्तियोगः॥ ॥नित्योपलब्ध्यनुपलब्धिप्रसंगोन्यतरनियमो वान्यथा॥ ॥ ननु कथमेवं स्वीक्रियते। इदानीं संसारावस्थायां सच्चित्प्राकट्यमेव मोक्षे त्वानंदांशोपि प्रकट इति न निवारयति तथा सति नित्यमुपलब्धिः स्यादानंदांशस्य तथा सति न संसारावस्थोपपद्येत। अथानुपलब्धिः सर्वदा तथा सति मोक्षदशा विरुध्येत। अथान्यतरनियमः जीवो निरानंद एव ब्रह्म त्वानंदरूपं। तथा सति ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतिविरोधः तस्मात्पूर्वोक्त एव प्रकारः स्वीकर्तव्य इति सिद्धं॥ ॥कर्ता शास्त्रार्थवत्त्वात्॥ ॥सांख्यानां प्रकृतिगतमेव कर्तृत्वमिति। तन्निवारणाद्यमधिकरणारंभः। कर्ता जीव एव। कुतः शास्त्रार्थवत्त्वात्। जीवमेवाधिकृत्य वेदे अभ्युदयनिःश्रेयसफलार्थं सर्वाणि कर्माणि विहितानि ब्रह्मणोनुपयोगात्। जडस्याशक्यत्वात्। संदिग्धेपि तथैवांगीकर्तव्यं॥ ॥विहारोपदेशात्॥ तथैव गंधर्वादिलोकेषु यद्यत्कामयते तेन तद्भवतीति विहार उपदिष्टः न तस्य कर्तृत्वभोक्तृत्वयोः साधुकारी साधुर्भवतीति समानाधिकरणश्रवणात् जीव एव कर्ता॥ ॥उपादानात्॥ ॥तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति जीवेन सर्वेषां विज्ञानमुपादीयते। त

स्यादिंद्रियादीनां करणत्वमेवस्यात्तं आत्मस्यैव कर्तृत्वं। यत्तुमन्यते जीवसंबंधात् जीवस्यकर्तृत्वमितिसप्रष्टव्यः। किंबुद्धिकर्तृत्वंजीवेसमायाति अथवाजीवगतमेवकर्तृत्वंबुद्धिसंबंधाद्बुद्धे
ति अथवाशशविषाणायितमेवकर्तृत्वंसंबंधेसमायाति। नाद्यः जडत्वात्। अनंगीकारात् पूर्वंनिराकृतत्वाच्च। द्वितीये त्विषापत्तिः उपादानविरोधश्च। तृतीयेशास्त्रविरोधः। ब्रह्मणिसिद्धत्वाच्च
। असत्कार्यस्यनिराकृतत्वात्सर्वविज्ञवस्तूमाध्यमिकवदुपेक्ष्यः॥ ॥व्यपदेशाच्चक्रियायांनचेन्निर्देशविपर्ययः॥ ॥व्यपदेशः विज्ञानंयज्ञंतनुतेकर्माणितनुतेपिचेति। अत्रसांख्येबुद्ध्यादीनामे
वकर्तृत्वंनजीवस्येति क्रियायांयागादिकर्मसुनतुभोगे जीवस्यकर्तृत्वंनचेत्। न। तथासतिनिर्देशस्यविपर्ययोभवेत्। विज्ञानेनविज्ञानमादायेतिश्रुत्यनुरोधात् प्रकृतेपितृतीयांतताप्याप
द्येत। अथस्वव्यापारेकर्तृत्वंतथापि हर्वनिर्देशस्यविज्ञानमयस्यविपर्ययः स्यात्। विकारित्वंस्यात्। तच्चासंगतंअसत्त्वात्। विज्ञानमादायेत्यत्रविपर्ययएव। एकस्यव्यपदेशभेदेनायंभेदोपि। भ
गवतिसर्वेशाद्याः स्वभावतएवप्रवर्तंते। औपचारिकत्वज्ञापकाभावात्। यज्ञोजायमानइतिश्रद्धादीनां शिरस्त्वादिः। तस्मात् विज्ञानमयोजीवएवजडस्यचस्यात्तं आत्मावानकर्तृत्वं॥ ॥उपल
ब्धिवदनियमः॥ ॥ननुजीवस्यकर्तृत्वेहिताकरणादिदोषप्रसक्तिरितिचेत्। न। उपलब्धिवदनियमः। यथाचक्षुषेष्टमनिष्टंचोपलभते एवमिंद्रियैः कर्मकुर्वन्निष्टमनिष्टंवाप्राप्नोति॥ ॥शक्ति
विपर्ययात्॥ ॥नन्वीश्वरवत्स्वार्थमन्यथानकुर्यादितिचेत्। शक्तिविपर्ययात् तथासामर्थ्याभावात्। इतएवदैवाद्धितमपिकरोति॥ ॥समाध्यभावाच्च॥ ॥जीवस्यक्रियाज्ञानशक्तीयोगेनसि
ध्यतः समाध्यभावात्शक्त्यभावश्चस्पष्टः॥ ॥चकारान्नाहंशामंचाभावोपि। नचसहजकर्तृत्वेअनिर्मोक्षः। पराधीनकर्तृत्वएवैतत्। ब्रह्मवत्सांख्यस्यतन्मतानुसारिणोवान्यस्यभ्रमएव। कर्तृत्वेनमुक्तिरि अ०२
ति। नपुंसकएवमुच्येतेतिबाधवत्। निरिंद्रियस्यैवसमाधिरित्यपि। करणत्वेनबुद्धिवन्नकेनापिदृष्यते। तस्माज्जीवस्यस्वाभाविकंकर्तृत्वं। ध्यायतीवलेलायतीवेत्यपिपरधर्मानुकरणं। अयम ३३

ते १

स्म

ष्येको धर्मः। स्वाप्ययसंपत्त्यो र्ब्रह्मव्यपदेशं ड्डरस्कृन्य सर्वविज्ञत्वं वदन्त्युपेक्ष्यः॥ ॥यथा च तक्षोभयथा॥ ॥ननु कर्मकारिणां कर्तृत्वभोक्तृत्वभेदो दृश्यते तत्कर्तृत्वभोक्तृत्वयोर्भेदो भविष्यतीति चेत्
न। यथा तक्षा रथं निर्मायतत्रारूढो विहरति पीठं वा। स्वनो वा न व्याप्रियते वाश्यादिद्वारेण वा। चकारादन्येपि स्वार्थकर्तारः। अन्यार्थमपि करोतीति चेत्। तथा प्रकृतेपि सर्वहितार्थं प्रयतमानत्वा
त् न च कर्तृत्वमात्रं दुःखरूपं। पयःपानादेः सुखरूपत्वात्। तथा च स्वार्थपरार्थकर्तृत्वं कारयितृत्वं च सिद्धं॥ ॥परात्तु तच्छ्रुतेः॥ ॥कर्तृत्वं ब्रह्मगतमेव तत्संबंधाज्जीवे। कर्तृत्वं तदंशत्वादैश्वर्या देव
दिवत्। नतु जडगतमिति। अतो नान्योतोस्तीति सर्वकर्तृत्वं घटते। कुत एतत्तच्छ्रुतेः। तस्यैव कर्तृ च कारयितृत्वश्रवणात्॥ यमधो निनीषति तमसाधु कारयतीति। सर्वकर्तारमिवं भोक्तारं सर्वनियं
न्तेति। सर्वरूपत्वान्न भगवति दोषः॥ ॥कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः॥ ॥ननु वैषम्यनैर्घृण्ययोर्न परिहारः। अनादित्वेन तस्यैव कारयितृत्वादिति पसंडशङ्कां निवारय
ति। प्रयत्नपर्यंतं जीवकृत्यं। अथैतस्माद्वाक्य त्वात्स्वयमेव कारयति यथा उत्तं यतमानं बालं पदार्थगुणदोषैर्वर्णयित्वा पितृत्वप्रयत्नान्निवेशं दृष्ट्वा तथैव कारयति। सर्वत्र तत्कारणत्वाय तदानीं।
नी फलदातृत्वे यादृशानामेवानुवदति तत्रैव तिनिनीषतीति। अन्यथा विहितप्रतिषिद्धयोर्वैयर्थ्यापत्तेः। अप्रामाणिकत्वं च। फलदाने कर्मापेक्षः कर्मकारणे प्रयत्नापेक्षः। प्रयत्ने कामापेक्षः कामे
प्रवाहापेक्ष इति मर्यादारक्षार्थं वेदं चकार॥ ततो न ब्रह्मणि दोषगंधोपि। न चानीश्वरत्वं मर्यादामार्गस्य तथैव निर्माणात्। य न्यथा मत्सृष्टिमध इति॥ ॥अंशो नानाव्यपदेशादन्यथा चापि दा
शकितवादित्वमधीयत एके॥ ॥जीवस्य ब्रह्मसंबंधिरूपमुच्यते। जीवो नाम ब्रह्मणोंशः॥ कुतः। नानाव्यपदेशात्। सर्व एवात्मानो व्युच्चरंतीति कस्य च रणाः रमणीयचरणा इति च। ननु ब्रह्मणो नि
रवयवत्वात्कथं जीवस्यांशत्वमिति वाच्यं। नहि ब्रह्म निरंशं सांशमिति वा कश्चिल्लोके सिद्धं वेदैकसमधिगम्यत्वात्। सा च श्रुतिर्यथोपपद्यते तथा तदनुसंधानेन वेदार्थज्ञानार्थं युक्तिर्वक्तव्या। सा

प्र द तं

चेत्स्वयंनावगतात्तपोविधेयं।अनिज्ञावांश्चआइतिनहुसर्वविप्लवःकर्त्तव्यः।तत्रैषायुक्तिः।विस्फुलिंगाइवाग्नेर्हिजडजीवाविनिर्गताःसर्वतःपाणिपादांतात्सर्वतोक्षिशिरोमुखात्।निरिंद्रि
यास्स्वरूपेणतादृशाइतिनिश्चयः।सदंशेनजडाःपूर्वेचिदंशेनेतरेअपि।अन्यधर्मतिरोभावान्मूलेच्छातोस्वंत्रिणइति।ब्रह्मवादेअंशअपरूपएव।ननुअंशत्वेसजातीयत्वमायाति।अंशस्यांतरेपुनर्ब्रह्म
दाशाब्रह्मेमेकितवाउत।अत्रसर्वस्यापिब्रह्मविज्ञानेनविज्ञानप्रतिज्ञानात्दाशादीनामपिब्रह्मत्वंप्रतीयतेनेनत्कार्यत्वएवस्यादितिचेत्।न।अन्यथाचापिप्रकारांतरेणापिएकेशाखिनःदाशाकि
तवादित्वमधीयते।शरीरत्वेनअंशत्वेनचास्वरूपतःकार्यभावेपिप्रकारभेदेनकार्यत्वात्।तथाचनसाजात्यं।आनंदांशस्यतिरोहितत्वात्।धर्मांतरेणतुसाजात्यमिष्टमेव॥ ॥मंत्रवर्णात्॥॥
पुरुषएवेदं०सर्वमित्यस्यांपादोस्यविश्वाभूतानीतिभूतानांजीवानांपादत्वंपादेषुस्थितत्वेनवाअंशत्वमिति॥ ॥अपिस्मर्यते॥ ॥वेदेस्वतंत्रतयाउपपाद्यवेदांतरेपितस्यार्थस्यानुस्मरणं।
।ममैवांशोजीवलोकेजीवभूतःसनातनइति॥ ॥प्रकाशादिवन्नैवंपरः॥ ॥जीवस्यांशत्वेहस्तादिवत्दुःखेनपरस्यापिदुःखित्वंस्यादितिचेत्।न।एवंपरोनभवति।एवमितिप्रकारभेदःदु
ष्टत्वेनानुभवइतियावत्।अन्यथासर्वरूपत्वात्।अतएवंनत्राइप्रकाशादिवत्।नाग्नेर्हितापोनहिमस्यतत्स्यादिति।प्रकाशग्रहणंधर्मत्वद्योतनाय।दुःखादयोपिब्रह्मधर्माइति।अतोद्वैत
बुध्याअंशस्यैवदुःखित्वंनपरस्य।अथवाप्रकाशःपवृत्तपदोषेणायथानुष्णपापस्यापितदंशत्वादितिस्मरंतिच॥ ॥स्मरंतिचसर्वे।ऋषयोग्निनंदुःखसंबंधंस्मरंति।तत्रयःपरमात्मा
।हिसनित्योनिर्गुणःस्मृतः।नलिप्यतेफलैश्चापिपद्मपत्रमिवांभसेतिकर्मात्मात्वपरोयोसौमोक्षबंधैःसयुज्यते।एकस्तथासर्वभूतांतरात्मानलिप्यतेलोकदुःखेनबाह्यः।चकारात्तयोरस्य अ०२
।पिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति॥ ॥अनुतापरिहारोदेहसंबंधात्ज्योतिरादिवत्॥ ॥ननुजीवस्यचपुनरनेकदेहसंबंधात्कःसूइःकाभार्यतिज्ञानमप्यशक्यं।अतःकर्ममार्गस्य १२

१×भगवदंशत्वेविधिविषयत्वाभावात्कर्मसंबंधाभावेनकथंफलसंबंधः×१
जीवस्य×१

३×दुःखासंबंधमंशस्य×२

व्याकुलत्वात् कथं जीवस्याविदुःखित्व मिथ्यात्वं च परिहरति। अनुरूपपरिहारौ विधिनिषेधौ जीवस्य देहसंबंधात्योरेसोयदा गृहीतस्तत्कृतौ॥ यथाग्निर्वाग्निः चांडालगांउल्मुकं न ग्रहा दिष्वपरि
ह्रियते एवमुत्कर्षं परिहरन्ने। तथा जीवे विदेहसंबंधकृतः संबंधस्त्वार्थकौ भिन्नगवत्कृतस्य॥ आध्यात्मिको तानात्रिवर्तनेहिता यो भगवनैव। जीवन्मुक्तानामपि व्यवहारदर्शनात्॥ श्रुतिस्तु भगवत्कृतसंबंधमेवा
भित्वा। मिश्रो चादिकं विधत्ते। अन्यथा विद्वांस्वज्ञानं च बोधयंती कर्माणि न विदध्यात्। ज्ञातृज्ञानस्य पूर्वमेव सिद्धत्वात्। कथं सिद्धवद्यां जीवं विदध्यात्॥ स्यामोपि देहसंबंध एव॥ ॥असंततेश्चाव्यतिकरः॥
॥ननु देहस्यापि बाल्यकौमारादिभेदात् कथं कर्मकाले ज्ञासंएत्वादि जीवैक्यादि निचे देहांतरेपि स्यादिति न चाह॥ देहांतेर्मनं निरपिना। स्निबाल्यादिभेदे पुनः संततिरेका। अतः संततिभेदान्न कर्मणां सां
एव
कर्यमिति॥ ॥आभास एव च॥ ॥ननु सच्चिदानंदस्य ब्रह्मणोंशाः सच्चिदानंदं भवेदतः कथं प्रवारे प्रवेशो भगवतश्च सर्वकार्याणि तचाह। आभास एव जीवः आनंदांशास्य तिरोहितत्वात्। चकारादाकारस्याप्य
भावः। नतु सर्वथा प्रतिबिंबवन्मिथ्यात्वं जलचंद्रवदित्येकस्यानेकत्वेऽष्टांतः। तथा सत्यध्यासश्च स्वप्नस्यात्। तत्र हत्यादिदोषप्रसंगश्च। अतो न मिथ्यात्वरूप आभासोत्र विवक्षितः॥ ॥अदृष्टानियमात्॥ ॥
दृष्टिं वायने धिकाद्यग्रिमं जीवरूपं निराकरोति। नानात्मानो व्यवस्थात इति भोगव्यवस्थया जीवनानात्वमंगीकृतं। तत्राहृष्टस्य नियामकत्वं तन्मते सिद्धं देशांतरवस्थत्वस्यान्यथानुपपत्या व्यापकत्वं चांगी
कृतं। एवं च क्रियमाणे मूल एव कुठारः स्यात्। सर्वेषामेव जीवानामेकशरीरसंबंधात् कस्याहृष्टं न भवेत्। न च मिथ्याज्ञानेन व्यवस्था। तस्यापि तथा। न चानुपपन्ना परिकल्पनं श्रुत्यैवोपपन्नेः। एतेन विरोधादृष्टि
प्रामाण्यमपि निराकृतं॥ ॥अभिसंध्यादिष्वपि चैवं॥ मनःप्रवृत्तीनां नियामकत्वात्तेषामीश्वरेच्छया नियतत्वान्न दोष इति चेत् न। पूर्ववदेव दोषप्रसक्तिः। ताहृशेश्वरकल्पना च पूर्वमेव निराकृता॥ प्रदेशादिति चे
न्नांतर्भावात्॥ ॥आत्मनो विभुत्वेपि प्रदेशभेदेन व्यवस्था आत्मनि ताहृशाः प्रदेशा विशेषोस्ति येन सर्वमुपपद्यत इति चेत् न। अन्यस्यापि प्रदेशस्तत्रांतर्भवति। तस्यैव वा देहस्य देशांतरगमने पूर्वदेशस्य त्यक्त्वा

२ ॥ ॥ननु

त्मांशः चांतर्व्वद्वेन्निरोत्न तो भवेदिति॥ ॥३॥ ॥इति श्रीवेदव्यासमतवर्त्ति[illegible] विरचिते ब्रह्मसूत्रभाष्ये द्वितीयस्याध्यायस्य तृतीयः पादः॥ ॥तथा प्राणाः॥ ॥जीवशरीरमध्यवर्त्तिनां प्राणादीनां विचारार्थं पादारंभः॥ तत्र जीवं निरूप्य तादृशधर्मवत्त्वं प्राणेष्वतिदिशति। प्राणशब्दप्रयोगः प्रियत्वाय। प्राणाः इंद्रियाणि मनसो मुख्यत्वादेकवचो। उत्क्रांतिगत्यागतीनामित्यारभ्य सर्वेष्वपि प्रतिरत्रादिष्टा। चिदंशस्यापि तिरोभाववत्तेर्दग्ध्यग्निरूपाणां। ननु न गुणसारत्वादयः कथमुपदिश्यंत इति चेत्। न। सत्तामस्तित्वाविशेषात् प्राणं ब्रह्मोपासन इति॥ गौणमसंभवात्॥ ननु उत्क्रांत्यादिश्रुतिर्गौणी जलविस्फुलिंगदेशात् २ संभवत्समस्तश्रुतिर्गौणी न भवतीति एकैव श्रुतिर्जीवे मुख्या प्राणे गौणीति कथं संभवति॥ ॥तत्प्राक्श्रुतेश्च॥ ॥उक्तत्वेनाधिकविचारो न क्रियते। सृष्टेः पूर्वमपि प्राणादीनां स्थितिः श्रूयते। असद्वा इदमग्र आसीत्तदाहुः॥ किं तदसदासीदित्यृषयो वाव तेऽग्रेऽसदासीत्तदाहुः। के ते ऋषय इति प्राणा वा ऋषय इति। ननु सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं इति विरोध इति चेत्। न। स्वरूपोत्पत्तिरेवात्र निषिध्यते जीववत्तत्क्रमः। उक्तमात्पूर्वं हि सदेवेति श्रुतिः। चराकारान्मोक्षे तस्यापि संपत्तिः श्रूयते स्थलांतरे। एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चेति श्रुतिर्विस्फुलिंगसदृशी। तत्पूर्वकत्वाद्वाचः मनः पूर्वरूपं वागुत्तररूपमिति तस्य यजुरेव शिर इति। तथा च वेदानां स्वतउत्पत्त्यभावात्तत्पूर्वरूपमनसः कथमुत्पत्तिः॥ ॥सप्तगतेर्विशेषितत्वाच्च॥ ॥तमुत्क्रामंतं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीति पूर्वोक्तानां च सुरादीनां। अथारूपतो न वर्त्तत्येकीभवति न पश्यतीत्याहुरित्यादिनिर्णीतविगतिः सप्तानां गतिर्निर्दिश्यते। सप्तगतयस्तेन विशेषिताः एकीभवंतीति च ततो जीवसमानयोगक्षेमत्वाज्जीववदुत्पन्नेति। चकारात्तत्तदुपाख्यानेषु चक्षुःप्रभृतीनां देवतात्वं संवादश्चात्र श्वेतनवत्त्वं। केचिदिदं सूत्रमुत्तरसूत्रं पूर्वपक्षत्वेन योजयंति। तन्नायमर्थः। ते प्राणाः कतीत्याकांक्षायां सप्त प्राणाः प्रभवंति तस्मात्सप्तार्चिषः समिधः सप्त जिह्वाः॥ अष्टौ ग्रहा अष्टावतिग्रहा इति। सप्त वै शीर्षण्याः प्राणा द्वाववांचाविति नव वै पुरुषे प्राणा नाभिर्दशमी दश वै पशोः प्राणा आत्मैकादश इत्येवमादि

अ०२
१३

षुनामासंख्याप्राणानांप्रतीतातत्वश्रुतिविप्रतिषेधेकिंयुक्तमितिसंशयेसप्तैवेतिप्राप्तं।कुतः।गतेः।सप्तानामेवगतिःश्रूयतेसप्तइ लोकायेषुचरंतिप्राणागुहाशयानिहिताःसप्तसप्तेति।किंच।विशेषि
तत्वाच्चजीवस्योत्क्रमणसमयेसप्तानामेवविशेषितत्वं।अन्येतुपुनरेतेषामेववृत्तिभेदाद्दशविधत्वंप्राप्तेउच्यते॥ ॥हस्तादयस्तुस्थितेतोनैवं॥ ॥पूर्वसंबंधेउत्तरंसूत्रंपूर्वपक्षः।तुशब्दःपूर्वपक्षंव्यावर्त्त
यति।हस्तादयःसप्तभ्योधिकाःहस्तौचादातव्यंचउपस्थश्चानंदयितव्यंचपायुश्चविसर्जयितव्यंचपादौचगंतव्यंचेति चक्षुरादिगणनायामेतेपिचत्वारइंद्रियत्वेनगणिताः।स्थितेसतिश्रुतौगणनयाचक्षु
रादितुल्यत्वेसतिश्रुतोहेतोःसप्तैवेतिनकिंत्वेकादश।अवांतरगणनासूचनयासंभवात्त्रिप्रायाच्च।धिकंसंख्यातःकरणभेदादिति।एकादशैवेंद्रियाणीतिस्थितं॥ ॥अणवश्चसर्वप्राणाअणुपरि
४॥ माणाःगतिमत्वेननित्यत्वेअणुत्वमेवपरिमाणप्रमाणाभावात्पुनर्वचनं।श्रेष्ठश्चमुख्यश्चप्राणःनित्यगतिमात्रअणुपरिमाणश्च।चकारादतिदेशः।नासदासीदित्यत्रआनीदवातंस्वधयातदेकमितित्र
ननात्मकस्यसर्वस्मिन्नप्रदर्शिता॥ ॥नवायुक्रियेपृथगुपदेशात्॥ ॥ननुमुख्यःप्राणोवायुरेवभविष्यति।इंद्रियाणांक्रियावा।एवंहिश्रूयतेयःप्राणःसवायुः।एषवायुःपंचविधःप्राणोपानोव्यानउदानः
समानइतिसामान्यकरणवृत्तिःप्राणाद्यावायवःपंचेति।तत्रांतरीयाश्चाचक्षतेतदुभयमपि।न।कुतःपृथगुपदेशात्॥एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच।खंवायुर्ज्योतिरापःपृथिवीविश्वस्य
धारिणीतिप्राणवाय्वोःपृथगुपदेशात्तद्वृत्तिमतोरभेदेनततोपिपृथक्पृथगुपदेशाच्च॥ ॥चक्षुरादिवत्तुतत्सहशिष्ट्यादिभ्यः॥ ॥सप्राणःस्वतंत्रःपरतंत्रोवेतिविचारेस्वतंत्रइतितावत्प्राप्तंमुख्येषुवागा
पु दिषुप्राणएकोस्मैंनामात्रःप्राणःसंवर्गोवागादीन्संवृंक्तेप्राणइतरान्प्राणान्रक्षतिमातेवपुत्रानितिइमामाशंकांनिराकरोतितुशब्दः॥चक्षुरादिवदयमपिप्राणोऽस्वतंत्रःमुख्यतोगवदधीन
:व्यवहारेजीवाधीनः।कुतः।तत्सहशिष्ट्यादिभ्यःचक्षुरादिभिःसहशासनात्।इंद्रियजयवत्प्राणजयस्यापिदृष्टत्वात्।आदिशब्देनजडत्वादयः॥ ॥अकरणत्वाच्चनदोषस्तथाहिदर्शयति॥ ॥

हशास

ननु प्राणस्य जीवोपकरणत्वेन उपकारकव्यापारवत्वमपेक्ष्यते। तच्चैकादशैव वृत्तयस्तंत्रांतरेपि सिद्धाः एकादशामी मनसोपि वृत्तय आकूतयः पंच धियोभिमानः। मात्राणि कर्माणि पुरं च तासां वदंति चै-
कादश वीर भूमीरिति। तथा कश्चित्प्राणस्य व्यापारोस्तीति चेत्। नैष दोषः। कुतः। अकरणत्वात्। करणस्यैव हि व्यापारोपेक्षितः। अन्यस्य कार्यमात्रमपेक्षितं तच्चास्ति। तथा हि कार्यवत्वं युक्तं तच्छ्रु-
तिरेव दर्शयति। तस्मिन्नुत्क्रामत्यथेतर इत्यादिश्रुतिभिः प्राणनिमित्तैव शरीरस्थितिरिति। तस्माद्व्यापाराभावेपि स्वरूपस्थितिमात्रेण तस्योपकारित्वं॥ ॥पंचवृत्तिर्मनोवद्व्यपदिश्यते॥ ॥व्या-
पारव्यतिरेकेणोपकारित्वमसमंजसमिति चेत्तत्राह। पंचवृत्तेः अहमेवैतत्पंचपंचधात्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामीति यथा मनसो द्वारभेदे नैवैकादशवृत्तयः स्वरूपत एव।
एवमेव प्राणस्यापि पंचधात्मानं। विभज्य कार्यकारणं व्यपदिश्यते॥ ॥अणुश्च॥ ॥अतिदेशेन प्राणस्याप्यणुत्वं पंचधात्मानं विभज्येति वचनात्समं दिग्धं तु न विधीयते। अतस्सोप्यणुः। चका-
रात्पूर्वोक्तसर्वसमुच्चयः॥ ॥ज्योतिराद्यधिष्ठानं तु तदामननात्॥ वागादीनां देवताधिष्ठानवतां प्रवृत्तिः स्वत एव वा अधिष्ठानब्रह्मप्रेरणायो विद्यमानत्वादिति संशयः। विशेषकार्याभावान्न देव-
तापेक्षेति पूर्वपक्षं निराकरोति तुशब्दः। वागादीनां ज्योतिरादि अग्न्यादिरधिष्ठानमवश्यमंगीकर्तव्यं। कुतः। तदामननात्। तथा ह्याम्नायते अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि। अयमर्थः। यो-
ध्यात्मिकोयं पुरुषः सोसावेवाधिदैविकः। यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिक इति। आध्यात्मिकादीनां स्वरूपं वागादयश्चानुरूपाणि स्युः। न त्रयद्वैविध्यं न कल्प्यं न तदेकस्मिन्नेव शरीरे उप- त्ये
लीनं शरीरांतरे न भवेत्। कल्प्यमाने तु अग्निर्देवतारूपोनेकरूपभवनसमर्थो वायुरूपो भूत्वा सर्वत्र प्रविष्ट इति संगच्छते। तेषामग्न्यादयश्चेतना भगवच्छास्त्रे रोहितानंदाः सामर्थ्ययुक्ता इति कार्यविचार- अ० २
वगम्यते। आध्यात्मिकाधिदैविकयोरेकत्वात्तद्वदनादिकार्यमाध्यात्मिका एव निरूपिता। उक्तमनेन एतस्माज्जायते प्राण इत्यादिषु। वागादीनां नियमेन तत्र जीवसान्निध्यं स्वतश्च। निर्गमनं मृत्युरूपश्च २४

न्यसहि तस्यचेतिसूत्रेणाभ्युपु ५

ना

मेणतत्त्वलयः पुनरुत्क्रमणंमपि अस्य विनाव्यवस्थान्यथानोपपद्येत।आधिभौतिकरूपत्वादयंदेह इत्यपेक्षांनीकरिष्यते।एवमेवब्रह्मणोपि अनेनजीवेनात्मनानुप्रविश्येत्यपिनिःसंदिग्धंद्रष्टव्यं।यदत्रात्म

वविशब्दवादिभ्यामोहः।प्राणवताशब्दात्।यदधिष्ठानमस्मादितिकिंस्वतएवत्रैन्योधिष्ठितंवेतिसंदेहः।किंतावत्प्राप्तंस्वतएवेतिसर्वेक्रियायेनतावत्तैवसिद्धेरनवस्थानाच्चदेवतात्वव्याघातश्चेत्येवंप्रा

- प्तेउच्यते प्राणवताधिष्ठितंवागादिकंतत्रशब्दात्।सोयमग्निःपरेणमृत्युनातिक्रांतोदीप्यतइत्यादिअयमर्थः।ह्ययाद्यप्राजापत्याइत्यत्राधिष्ठानत्वमग्नीनामुक्तंदेवादित्यविशेषेणेंद्रियाधिष्ठा

त्र्यो स्याम्।तेषांप्रतिबंधकासुरातिक्रमेणस्वर्गलोकेगमनेश्रावश्रुत।तत्रयज्ञेनैवस्वर्गइतितत्रजनकोहवैदेहइतिब्राह्मणेकेनाक्रमेणयजमानःस्वर्गलोकमाक्रमतइत्यत्रत्वंविज्ञावायुनाप्राणेने

तिउत्तरेवाक्रमणमितिसिद्धं।तत्रान्योन्योज्ञातृत्ववरणेनयोनांसेयोवाविभोगःस्वंदेवेभ्यइत्याम्नातंतदनुस्मरूपप्राणानावेदानंतरमप्रतिरूपंवदतीतिनिरूपितंसोपिद्वोघोदेवानांप्राप्तोतितत्र

श्रुतिविप्रतिषिद्धंनस्वैदेवान्पापंगच्छतीति।तदनुप्राणएवोक्तानामिद्धःतेनान्येषामपिपाप्मसंबंधोनिवारितः।ततःपरेणैवमृत्युमतिक्रांतोदीप्यतइतिअतोदीप्यमानस्येवाधिष्ठातृत्वात् प्राणवतैवाधि

ष ष्ठानमितिसिद्धं॥ ॥तस्यचनित्यत्वात्॥ ॥अग्न्यादेःप्राणसंबंधोनित्यइतिसर्वदाधिष्ठातृत्वं।प्राणस्यतत्संबंधस्यचेत्विकारार्थः।प्राणसहायेनैवयद्योचितवस्त्रोभ्रमइतिलोके स्वामिवत्तन्याये

नजीवेभोगःफलिष्यति॥ ॥इंद्रियाणितद्व्यपदेशादन्यत्रश्रेष्ठात्।इदमत्रविचार्यतेइंद्रियाणांप्राणाधीनसर्वव्यापारत्वात्तन्नामव्यपदेशाच्चप्राणवृत्तिरूपाणींद्रियाणिउततत्त्वांतराणिवेतिसंशयः

तत्त्वांतराण्येवेतिसिद्धांतः।तानींद्रियाणितत्त्वांतराणिकुतः।तद्व्यपदेशात्।इंद्रियशब्देनव्यपदेशात्।एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचेतिभिन्नशब्दव्याख्यानांकचिदेकशब्दव्यास्ते

पिनैकत्वं॥ आसन्नेपितर्हिभेदःस्यादित्यतआह।अन्यत्रश्रेष्ठात्।तस्यतेयौगिकाःशब्दाइतिभेदश्रुतेः।यत्रापिप्राणशब्दप्रयोगःतत्रापिभेदेनस्मूयते।तमुत्क्रामंतंप्राणोनूत्क्रामति।प्राणम

न्तं क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति॥ वैलक्षण्याच्च॥ ॥वैलक्षण्यं च प्राणस्येन्द्रियाणां च। सुप्तेषु वागादिषु प्राणो जागर्त्ति स्वामिसेवकवज्ञानेकं वैलक्षण्यं॥ ॥संज्ञामूर्त्तिकॢप्तिस्तु त्रिवृत्कुर्व
त उपदेशात्॥ ॥न्तत्वनौतिकसृष्टिः परमेश्वराद्देवेति निर्णये नामरूपव्याकरणमपि परमेश्वराद्देवेति निश्चयार्थमधिकरणारम्भः। लोके नामरूपकरणं कुलालादिजीवेष्वप्रसिद्धमिति। अलौकिके
पि स्थावरजंगमे मश्वादिसंज्ञां मूर्त्तिं च जीवादेव हिरण्यगर्भादेर्न विष्यतीति वह्न्यादिदेवानां जीवरूपाणामेव [illegible] वागादिरूपेणानुप्रवेशात् तत्साहचर्येण नामरूपयोरपि जीव एव कर्त्तेति
विष्यतीति प्राप्ताशंकां निराकरोति तुशब्दः। संज्ञामूर्त्तिकॢप्तिः नामरूपयोर्निर्माणं त्रिवृत्कुर्वतः यस्त्रिवृत्करोति। तस्मात्सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य
नामरूपे व्याकरवाणीति। तासां त्रिवृतं त्रिवृतमेकैकं करवाणीति। त्रिवृत्कर्त्ता परमेश्वरः। स एव नामरूपयोरपि कर्त्ता। कुतः उपदेशात् तदुपसमीपे एकवाक्ये अन्यकरणस्य प्रतिज्ञानात्॥
जीवस्य तु त्रिवृत्करणानन्तरं शरीरसंबंधे कर्तृत्वात् तस्मान्नामरूपप्रपंचस्य भगवानेव कर्त्तेति सिद्धं॥ ॥मांसादि भौमं यथाशब्दमितरयोश्च॥ ॥इदमिदानीं विचार्यते। अन्नमशितं त्रेधा विधीय
ते। तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति। यो मध्यमस्तन्मांसं यो ऽणिष्ठस्तन्मनः। आपः पीतास्त्रेधा विधीयन्ते। यः स्थविष्ठो धातुस्तन्मूत्रं यो मध्यमस्तल्लोहितं यो ऽणिष्ठः स प्राणः। तेजो ऽशितं त्रेधा वि
धीयते। तस्य यः स्थविष्ठो धातुस्तदस्थि भवति। यो मध्यमः स मज्जा। यो ऽणिष्ठः सा वाक्। अन्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी वागिति तत्र संशयः वाक्प्राणमनांसि किं भौतिकानि आहो
आ स्वित् स्वतन्त्राणीति। एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति श्रुतिविप्रतिषेधात्संशयः। त्रिवृत्करणप्रसंगेनोदितामाशंकां निराकरोति तत्र पूर्वपक्षमाह॥ मांसादिभौमं पुरीषमांसादि तेजोबन्न अ०२
प्रकृतिकं॥ ॥कुतः॥ ॥यथाशब्दं अन्नमशितमित्यादिश्रुतितो निःसंदिग्धं प्रतिपादनात्। किमतो यद्येवं तदाह॥ ॥इतरयोश्च॥ वाचि तुल्यत्वान्न संदेहः॥ ॥इतरयोर्मनःप्राणयोरपि भौतिकत्वं यथा १५

८२

४ X तासं

मी३

शब्दं तु क्रमश्रुतिस्वकृतित्वेनानुवादपरा भविष्यति। उपपादकश्रुतिबाधात्। तस्मात् भौतिकान्येव मनःप्रभृतीनीत्येवं प्राप्तेउच्यते॥ ॥वैशेष्यात्तु तद्वादस्तद्वादः॥ ॥अन्नादिभिर्विशेष्यन्ते मनःप्रभृ
तिमप्यक्कार्यत्वमेव भवति। तथादर्शनादुपादानाच्च॥ अतो वैशेष्यादेव हेतोरन्नमयत्वादिवादः। न तु कथमेतदवगम्यते। वैशेष्याद्गौणोवादस्तूच्यते॥ अथात्मनेन्नाद्यमागायदित्यत्रप्राणए
व सर्वस्यान्नस्यात्ता निर्दिष्टः। स कथं तत्परिणामकार्यं स्यात्। आगादयश्च तत्त्वांर्थमनुप्रविष्टाः॥ स्पष्टोप्ययमनोभिन्नतया निर्देशात्॥ अतोनन्यौनि कानि मनःप्रभृतीनि। किं तु तत्त्वान्तराणीति सिद्धं त
द्वाद् इति वीप्साध्यायसमाप्तिसूचिका॥ ॥छ॥ ॥इति श्रीवेदव्यासमतवर्ति श्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये द्वितीयाध्यायस्य चतुर्थः पादः। ॥ समाप्तोयं द्वितीयोध्यायः श्री॰
॥श्रीकृष्णाय तुभ्यं नमः॥ ॥ ॥श्रीकृष्णः॥ ॥छ॥ ॥श्रीरस्तु॥ ॥शुभं भवतु॥ ॥ ॥छू॥ ॥छू॥ ॥श्री॥ ॥ ॥ ॥ ॥ १६

श्री

श्री ३

श्राह्लंउक्रमश्रुतिस्कृतित्वेनानुवादपराभविष्यति।उपपादकश्रुतिबाधात्।तस्मात्।भौतिकान्येवमनःप्रभृतीनीत्येवंप्राप्तेउच्यते॥ ॥वैशेष्यात्तुतद्वादस्तद्वादः॥ ॥अन्नादित्रिविशेष्यतेमनःप्रभृ
तिसम्यक्कार्यत्वमेभवति।तथादर्शनात्उपादानाच्च॥अतोवैशेष्यादेवहेतोरन्नमयत्वादिवादः।ननुकथमेतदवगम्यते।वैशेष्यात्पौणोवादइत्युच्यते॥अथात्मनोन्नाद्यमागायदित्यत्रप्राणए
वसर्वस्यान्नस्यात्तानिर्दिष्टः।सकथंतत्परिणामकार्यंस्यात्आगादयस्तत्रांशमनुप्रविष्टाः॥स्पष्टोमध्यमनोभिन्नतयानिर्देशात्॥अतोनभौतिकानिमनःप्रभृतीनि।किंतुतत्वांतराणीतिसिद्धं।त
द्वाद्इतिवीप्साध्यायसमाप्तिसूचिका॥ ॥४॥ ॥इतिश्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचितेब्रह्मसूत्राणुभाष्येद्वितीयाध्यायस्यचतुर्थःपादः॥ ॥ समाप्तोयंद्वितीयोध्यायः श्री॰
॥श्रीकृष्णायतुभ्यंनमः॥ ॥ ॥श्रीकृष्णः॥ ॥४॥ ॥श्रीरस्तु॥ ॥शुभंभवतु॥ ॥ ॥छ॥ ॥छ॥ ॥श्री॥ ॥ ॥ ॥ ॥ १६

श्री

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

॥ जैनोपनामोद्धारामहल्लस्य मद्दस्पै ॥
॥ अ. हि. सं. ६०० दामोदर
॥ सपूर्ण ॥

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

॥श्रीमदणुभाष्यस्य तृतीयाध्यायः प्रारभ्यते॥

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

॥श्रीमद्यदुनाथकुलोत्पन्नगोपालात्मजश्रीगिरिधरचरणारविंदमिलिंदमधु॥

॥पायमानगोकुलग्रामस्थ॥

॥रामकृष्णस्य॥

श्री

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

अए०३ ॥श्रीकृष्णायनमः॥ ॥तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तःप्रश्ननिरूपणाभ्यां॥सर्वेपिनिषदांसिद्धोह्यविरोधेसमन्वयः।कथंबोधकतातासांसातृतीयेविचार्यते।एवं[illegible]करणं

१ शारदाःसर्वान्सहैववा।एकांविद्यामनेकांवाजनयंतीतिचिंत्यते।ससाधनेरिपुरूपेजन्मनाकर्मणाशुचो।केवलेवायथायोगेप्रथमंतद्विचार्यते।विचारपूर्वकंतस्यब्रह्मस्वभावाभिनोप

ता।अधिकारेततःसिद्धेविषयावधृतिस्ततः।अंतरंगविचारेणगुणानामुपसंहृतिः।बहिरंगविचारेणकर्मणामितिसाद्विधा।तस्मादधिकारिणोजन्मनिर्द्धारिः।तदनुतस्यब्रह्मभावयोग्य

ताततोगुणोपसंहारःततोंगविचारइति॥तत्रप्रथमेपादेजीवस्यब्रह्मज्ञानोपयिकजन्मविचार्यते।तत्रपूर्वजन्मनिनिष्कामयज्ञकर्तुर्ज्ञानरहितस्यमरणेज्ञानाभावेनयज्ञानिष्कामनावा

तत्संस्कारकएवयज्ञोजातइति।निष्कामत्वाच्चतदधिकारिदेवाधीनान्येवभूतानि।तेदेवास्तत्रतत्रकृत्वातस्यशरीरंसंपादयंतीतिपंचम्यामाहुतावापःपुरुषवचसोभवंतीतिश्रु

तिः।तत्रजीवेंद्रियाणांहोमाभावेनाशुद्धिमाशंक्यतेषामपिहोमंप्रकुर्वन्निदम।धिकरणमारभ्यते।नचपंचाहुतयोधूममार्गएवतत्रगमनागमनयोर्वक्ष्यमाणत्वात्।तद्यइत्थंविदुर्येचेमे

७ ति रण्येश्रद्धातपइत्युपासतेतेर्चिषमभिसंभवंतीतितत्रज्ञानवतोपियज्ञादिःप्राप्तिस्तत्रतथादेवकृतानांकर्ममानस्यात्।ज्ञानार्थमेवतयोरुत्पत्तेःपुनरावृत्तिपरंस्तुत्या॥अथवानिष्कामएवधूममार्गःयोगी।

प्राप्यनिवर्तंतइतिस्मरणात्।भोगार्थमेवधूमादिलोकाःनिष्कामैस्तुपंचाग्न्यादेवा।अन्येप्रविष्टानामन्येषामपिरेतोद्वारायोनितत्त्वस्यनिरितिकपूयचरणवर्णनं॥एवंत्रयीधर्ममनुप्रपन्नागता

गतंकामकामालभंतइतिकामनायांभिन्नएवप्रकारःपृथगुपदेशात्।तस्माद्योग्यशरीरनिष्पत्तयेस्वयमेवगच्छतिभूतसहितःश्रद्धाहोमानंतरंसोमभावेवासंबंधइतिसंशयःभिन्नपक्षे पा०१

योनोवेति।तत्रश्रौतेर्थेश्रौतन्यायेनैवनिर्णयस्योचितत्वादाकृतावध्यगौणत्वापत्तेःसंस्कृतभूतानामुपस्थापकत्वाभावाच्छरीरवियोगेदेवानांचतावद्विलंबेकारणाभावाच्चश्रद्धारूपाभ्या। १

भ्यां ४ प्र २

प एवरूप्यंते। अतो नत्तैः परिष्वक्तो गच्छतीत्येवंधा मेउच्यते। तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां। तस्य जीवस्य यज्ञादिकर्त्तुः अंतरप्रतिपत्तौ अंतरे मध्ये मुख्य प्रतिपत्तेर्मोक्षलक्षणाया अवकि
योग्य शारीरनिष्पत्त्यर्थं नहि वस्तुतो यज्ञानामिदं फलं भवति अतो मुख्ये विलंबात् प्रतिपत्तिरेषां तस्य मुख्य फलस्य वा अंतरे या प्रतिपत्तिस्तदर्थं वा तत्कारणभूतैः संपरिष्वक्त एव रंहति मरणानंतरमेव कर्मसमाप्तेः सम्प
न्नतानि तद्देवसंस्कृतानि प्रतिदिनसंस्कारार्थं च नैकद्यमपेक्षंते अतः सम्यगेव च परिष्वक्तः पूर्वशारीरेणाव्यवधानात् शारीरदाहे वा तत्कृतानि भूतसूक्ष्माणि सम्यक्कृतमेवासक्तानि। तं विद्याकर्मणी समन्वारभेते इ
र्वप्रज्ञा चेति। जीवपक्षे ज्ञानकर्मणी कर्मणो हि स्वरूपभूता आपः। तत्र हेतुः। प्रश्ननिरूपणाभ्यां। वेत्थ यथा पंचम्यामाहुतावापः पुरुषवचसो भवंतीति प्रश्नः। असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिदित्या
दिनिरूपणं। प्रश्ने हि पुरुषत्वं वदति न देहमात्रं तज्जीवाधिष्ठितानामेव भवति सिद्धवत्कारवचनाच्च। निरूपणेपि चंद्रो भवतीति। तत्रापि सोमो राजा चेतनः न घन्याः। धिष्ठानेषु तस्य शारीरं भवेत्। तथा तत्रेतोगत्या
श्रद्धयापि विनियोगमंत्रवान्। जीवसाहित्येप्यपामेव मुख्यत्वं शारीरत्वं तु। अयं होमस्तच तथा तं जनयंतीति न दुःखहेतुः। तस्मात्प्रश्ननिरूपणाभ्यामुपपत्त्या संपरिष्वक्त एव संस्कृतैर्भूतै रंहतीति। निमि
त्तं॥ ॥त्र्यात्मकत्वात्तु भूयस्त्वात्॥ ॥ननु कथं भूतसंस्कारमात्रत्वमवगम्यते यावता प्रश्ननिरूपणाभ्यामाप एवावगम्यंते। न च तावन्मात्रसंस्कारवत्त्वं नियामकमाद्भावान्। अस्ति चैवं तेन मा सं च यजमानः संस्कुरुत इति वि
रोधश्चेति। शंकां निराकरोति तु आह॥ आपामेव ग्रहणे न तेजोबन्नानि गृहीतानि ज्ञानव्याकृतः॥ त्र्यात्मकत्वात्। लोकादिनिर्माणानंतरमाविर्भावितानां पञ्चीकृतता एव। अत त्रयोपि गृहीता अपां ग्रहणे तु
पलक्षणत्वेमि अपामेव ग्रहणे हेत्वंतरमाह। भूयस्त्वात्। अस्तु उक्तात् द्विदोषाभावात् मध्यभावाच्च दीक्षितस्याल्पत्वेन नाः रूपत्वेन आर्ष्यैवक्रमत्वात् तदुद्भ्यामामेवेदं शारीरं बहु हेतुकत्वमेव भूयस्त्वं बहुशः णरिणाम च॥ इ
त्यन्तःकरत्वं च। तस्मान्नियामकानां भूयस्त्वादपामेव ग्रहणं॥ ॥प्राणगतेश्च॥ वैदिकीं युक्तिमुक्त्वा लौकिकीमाह। प्राणस्य गतिः प्राणगतिः तमुत्क्रामंतं प्राणोनूत्क्रामतीति प्राणस्याप्यनुज [illegible] रूपं। प्राणो

स्व २

अएफ॰२गछन्स्वाप्यायकं गृहीत्वैव गच्छति। उत्क्रान्तेकावस्न्यदेहसंबंधः मुक्तो न प्राणागछति कम मुक्तावपि देहसंबंध इति पौराणिकाः देवभावश्चौपनिषदः। अतोऽङ्गेषु प्राणागतिरत्रैव। अगोपां संस्ले[illegible]व्यः। चका

२ रान्विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति कर्मसद्भावं बोधयति श्रुतिः। तस्मादद्भिः परिष्वक्तो गच्छति॥ ॥अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्॥ ॥श्रुतिविरोधं परिहरति। परस्परवि[illegible]रोधेव्या।

वस्थावाबोध्यते। ननु यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राण इत्यादिना अग्न्यादिगतिः प्राणानां श्रूयते। न च ओषधीर्लोमानि वनस्पतीन्केशा इत्यत्र प्रत्यक्षविरोधाद्बाधितविषयेयं श्रु

तिरिति वाच्यं॥ आध्यात्मिकेन्द्रियमध्यपाताल्लोमकेशा अप्याध्यात्मिका एव यास्ताः यैः कण्डूला वएपप्रतीतिः हृत्पमाना निह गोलकस्था[illegible]नि तस्मात्प्राणोत्क्रमणश्रुतिरग्न्यादिभावश्रुत्यावध्यत इति चेत्।

न। भाक्तत्वात्॥ प्रकरणव्यतिरेकेण मुक्तविषयेऽप्रवृत्ता भाक्ता भवति। अपरैर्न जारत्कारवआर्त्तभागः पप्रच्छेत्यत्र यत्रेति रूपणानंतरं मच्छ्रपृष्टश्चाम्रियमाणप्रश्ने नामैवनजहात्यनंतं जहातीति प्रतिज्ञातेश्चा

णोत्क्रमणप्रश्ने नेति प्रतिवचने वागादीनामग्न्यादिभावानुवादस्ततो मंत्रणा जीवस्य ब्रह्मभावोवगम्यते साम ग्यागतत्वान्नतोस्य ह च तु रिति कर्मप्रशंसा मित्र प्रश्नोत्तरा उभयोर्वचनविधानात् ब्रह्म

विद्या च गोप्या। उत्क्रमणश्रुतिस्तु समयत्राय शारीर आत्मेति ब्रह्मणे जीवस्य परलोकविहारार्थं निष्क्रामति चक्षुष्टो वेत्यादिना प्राणानां विहारसाधकानां निर्गमनमाह॥ अतोऽमुक्तामुक्तविषयभेदस्य मृदुर्वे

व्यवस्थापकस्य विद्यमानत्वादग्न्यादिभावश्रुतिर्नोत्क्रमणश्रुतिवाधिका। तस्मादन्यत्रसिद्धो धर्मोन्यत्रावस्थासाम्याद्योज्यमानो भाक्तो भवति। अतः प्राणोत्क्रमणमस्ति तस्मात्संपरिष्वक्तो गच्छतीति सिद्धं॥

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः॥ ॥किंचिदाशंक्य परिहरति॥ असौ वाव लोको गौतमाग्निरित्यत्र देवाः श्रद्धां जुह्वतीति श्रुतेरापोत्र संकीर्तिताः। अपां हि पंचम्यामाहुतौ पुरुषवचनं। श्रद्धा पा॰१

शमनो धर्मः सकथं द्रवत्यन इति चेत्। न। मनसा सह न विष्पतिं तथाप्युरुणा न्यायेन धर्मस्य मुख्यत्वं। तर्हि कथं प्रश्नोपसंहारो। परो ह्य वा दाऽज्ञविप्पति च मसवन्। श्रद्धा वा आप इति श्रुतेः। शुद्धिहेतुत्वसाम्या २

२x पक्रमोपसंहारयोर्वलीयस्त्वात्। ननुमध्येश्रुतेनश्रद्धाशब्देनो x

त्ये श्रवादाद्

त्। चंद्रमामनसोजातइतिश्रुतिश्चैवंपरोन्नविष्यति। तस्मात्प्रथमाकृतावपामश्रवणात्तन्नताभिः संपरिषक्तोगच्छतीतिचेत्। न। ताएवचापएवश्रद्धाशब्देनोच्यंते। हियुक्तोयमर्थः। यथाकर्मकांडेआपः
श्रद्धाशब्देनोच्यंते तथाश्रुतेपिपरंनोपचारः उपपत्तेः। उपक्रमोपसंहारावन्यथाकर्तुंयुक्तौ। श्रद्धामहभावः संस्कारेणसंस्कृतेष्वप्सुसिद्धः तेनमंस्थानेचापएववाच्याः चंद्रमामनसोजातइ न
तिश्रुतिभिन्नास्वद्भिः श्रद्धाप्रयोगस्तुकामनाकृतव्यावृत्यर्थः। तत्रफलएवश्रद्धानकर्मणियोयच्छ्रद्धः सएवसइतिश्रद्धायाआश्रयस्यविषयभावजनकत्वात्कर्तृकर्मणावायश्रद्धाप्रयोगः। ततःसंस्कृ
नाश्चापः यजमानरूपाहूयमानाभवंतीतिसिद्धंभवति। तस्मात्प्रथमेप्यपाम। स्तिश्रवणं॥ ॥अश्रुतत्वादितिचेन्नेष्टादिकारिणांप्रतीतेः॥ ॥स्थितमेतज्जीवःसंपरिष्वक्तोरंहतीतितत्रवि
चार्यतेसर्वेजीवाः संपरिष्वक्तागच्छंतिआहोस्वित्ज्ञानोपयोगिनइतिविमर्शेनत्रपंचाकृतिश्रवणेनाधिकारिणःश्रुताः वेदेहिश्रुतानुसारिकल्पना। अतोविशेषस्याश्रुतत्वात्सर्वेषामेवपंचा णी
कृतिप्रकारइतिचेत्। न। इष्टादिकारिणांप्रतीतेः साधारणपक्षंदूषयतिकुतःइष्टादिकारिणांप्रतीतेः। इष्टादिकारिणःप्रतीयंते। श्रद्धापदेनदेव कर्तृत्वेनच। सोमभावसाम्यत्वाच्चइष्टादिका
रिणांधूममार्गव्युत्पादनेसोमभावउक्तः। अत्रापिप्रथमाकृतिफलंसोमभावउच्यते। अतश्रुतिसाम्यादपिइष्टादिकारिणोरंहंतीतिसिद्धं। भाक्तंवानात्मवित्वात्तथाहिदर्शयति॥ ॥किंचि
द्दूषणंपरिहरति॥ ननुयदिश्रुतिसाम्येनसोमभावादिष्टादिकारिणोरंहंतीत्युच्यते। तदासोमभावेनेषामप्यनिषिध्यते तद्देवानामन्नंतंदेवाभक्षयंतीतिसमानश्रुतौचाप्यायस्वापक्षी
यस्वेत्येवमेनांस्तत्रभक्षयंतीतिचंद्रदृष्टांतेनचभक्ष्यंते। ततश्चदेवाःस्यात्तंपर्जन्येश्नोकयंमकुर्युः॥ अतःपंचाकृत्यभावइत्याशंक्यपरिहरतिभा[illegible]त्वाहः तेषांसोमभावोगौणः भक्षणंचप्र[illegible]त्यंगा
रत्वाच्चंद्रमसःकथमाकृतिफलंभवेत्सोमभावस्यभाक्तत्वमग्रेनिरूपयिष्यामः। इदानींभक्षणस्यगौणत्वंनिरूपयति। अन्नंभावेहिमुख्यंभक्षणंभवतितन्दस्यस्यभावोनोप[illegible]स्मज्ञाने

न्ते २

न

ब एक·२ द्भवति स सर्वं भवति तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति प्रकृतेऽस्मिन्नत्र च नात्मवित्त्वात्तथा मतिमोक्षणे न भवेत्। अतो भक्षणमपि गौणं। तथाहि श्रुति[illegible]मावंश

३स्प ध्वँबोधयति। अथ योऽन्यां देवतामुपास्तेऽन्यस्त्वयथापशुरह एवमत्रापि हरणं सह कीर्तनं सेवकभावः। चं इत्युपदेशाय तथा वचनं। तथा मन्त्रितेषाममरत्वेन तथा स्तुतिः। [illegible] एणं

ह्यादनुमीयते श्रुत्या। अथ मां पिबते वह्निरित्यादिरूपया। देवानामभक्षणं भगवद्वयसानामेव च ज्ञानानज्ञानेन स्याविरुद्धेच्छा धिनौति कानां देवानां मन्त्रानमेव। तस्माद्भक्षणमप्यगौणत्वात्सोमभावे

न काचिच्चिन्ता॥ ॥कृतात्ययेनुज्ञायवान्नदृष्टस्मृतिर्यां पथेतमनेवं च॥ ॥प्रथमाकृतिमफला विचारिता। द्वितीयो विचारस्त्वधिकरणान्तरः। सोमस्य पर्जन्यहोमे दृष्टित्वमिति। सोमात्तु दृष्टिना

वे स्वरूपरमादीनां हि ननु तया प्रतीयमानत्वात् यागस्यावान्तरफलं तच्चेत्कृ इति निश्चितं न तत्र संशयः। किं सर्वमेवावान्तरफलं नं चेत्केच होस्विदनुज्ञायवान्न दृष्टिमत्तौ। निमद्धासनायायिमजन्म निमदा व

चारयुक्त एवस्याद्विति आचारहीनं न जनं निवेदाद्गतिबाधोपलब्धेः अतो विचारउचितः। तत्रावान्तरफलस्यावशेषे अवान्तरफलत्वबाधान्नज्ञानोपयिकशरीरभावादेव सदाचारसिद्धेः प्रयोजनाभावाच्च

निरनुज्ञाय एवदृष्टिभावं प्राप्नोतीत्येवं प्राप्ते उच्यते। कृतात्ययेऽनुज्ञायवाद्। कृतस्य सोमभक्षणस्य अस्य येनाशेषयति अनुज्ञायवान्न अवान्तरफलसाधकत्वेनाम हितएव दृष्टिभावं प्राप्नोति। कुतः। दृष्टस्मृति छि

न्यांदृष्टं नावत् भोगसाधकसल प्रयनाशोपि भोगसाधनत्वाद्दृशादेरेवस्वाद्विमहितएव तस्मात्स्वधानाद्दपगच्छति अन्यथा मध्यएव देहपातः स्यात्। अतो यथा लोके सानुज्ञायः। स्मृतिश्चयं यद्यजनः स्वर्गसुखवा

वशेषितं क्विप्समदत्तस्य कृतस्य शोभनं। तेनाज्ञनामेस्मृतिम कृन्मनः स्यात् दृष्टेऽहरिर्यज्ञ ज्ञतां शान्तनोति। निदेवगाथा अतो ज्ञानोपयिकजन्मसानुज्ञायवत एव भवति। अन्यथा पूर्वजन्मस्मृत्यभावे विर पा·१

षयासक्तिः प्रसज्येत। ननु अनुज्ञाय सहकृत एव जीवो नाडिः परिपक्वो भवेद् अत आह यथेनं यथागतं अन्यथा प्रश्ननिरूपणयोर्बाधः स्यात्। तर्हि तावदवान्तरफलसाधकमस्तिस्यादत आह अने २

तथात्रापि ×३

५ वे च एवंप्रकारयुक्तागमनं नास्ति भोगस्य जातत्वात्। चकाराद्वैराग्यसहितोपि। तस्मादनुशयवान्भिन्नप्रकाराद्भिः परिष्वक्तो देवरूपामहिनोह्स्थिर्भवतीति। चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः॥ ॥ किंचिदाशंक्य परिहरति। ननु नात्रोत्तमजन्मार्थमनुशयोपेक्ष्यते चरणादेव तन्निष्पत्तिः। तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्नित्यादिना यः श्रुतिजन्म निर्दिष्टाचरणं करोति स उत्तमं जन्म प्राप्नोति॥ यस्तु निषिद्धाचरणं करोति स श्वादियोनिं प्राप्नोतीति साधुकारी साधुर्भवतीत्यादिश्रुत्या च प्रतिपाद्यते प्रकृते तस्य रमणीयचरणस्य चरणादेव तस्य सम्यग्जन्मनिष्पत्तिः किमनुशयसद्भावेनेति चेत्। न। चरणश्रुतौ या योनिरुक्ता सा उपलक्षणार्था अचिरेण पूर्वजन्मनि समीचीनं कृतमिति ज्ञापिका नन्तरस्मिञ्जन्मनि समीचीनकरणे नियामिका अन्यथा ब्राह्मणानां निषिद्धकरणं न स्यात्। तस्मादनुशयोपेक्ष्यते तेन नोपयोगार्थमिति कार्ष्णाजिनिराचार्यो मन्यते कार्ष्णाजिनिग्रहणं पंचाग्निविद्यायां भिन्नप्रकारत्वज्ञापनार्थं तस्मादस्य स्वमते भिन्नत्वान्नशंका नचोत्तरं। न हि पंचाग्निविद्यायां उरुषादन्यभावः संभवति प्रकरणपरिग्रहो नाश्रुतिर्नान्यत्र न्यायसंपादिका॥ ॥आनर्थक्यमिति चेन्न तदपेक्षत्वात्॥ ॥नन्वेवं सति चरणश्रुतिरनर्थिका ज्ञापनाप्रयोजनाभावात् अतो विधायकत्वं श्रुतेः इष्टानिष्टफलबोधकश्रुतिवत्। अतः कर्मतारतम्येन फलविधानात्। निष्कामकर्मकर्तुः ज्ञानोपयोगि देहविधानं न निष्पत्तीत्यनुशयसद्भावो व्यर्थ इति चेत्। न तदपेक्षत्वात् धूमादिमार्गस्य तस्याः श्रुतेरपेक्षत्वात् काम्येष्टादिकारिणः फलभोगानंतरमुत्पत्तौ सुखानंतरं दुःखमिति न्यायेन पापस्यैवोपस्थितत्वादसमीचीनशरीरप्राप्तिर्भवतीति रमणीयानुष्ठानां रमणीयशरीरप्राप्तिरेव बोध्यते न न्यायेनासमीचीनशरीरमिति। तस्मादत्र निषेधार्थं सार्थकत्वान्नानुशयप्रतिषेधिका। किंच रमणीययोनिः किमाकस्मिकी सकारणा वा। नाद्यावेदवादिनां॥ द्वितीयेत्तस्य कर्मणा पितृलोक इति वस्वादिरूपता च वक्तव्या प्रजामनुप्रजायंते स्मशानानां तक्रियाकृत इति च। त्रैविद्या मां सोमपा इत्यादिना इंद्रलोकभोगानंतरं नचै[illegible]वनं च वक्ष

एफ॰ ३ वां।नच सर्वेषामेक्यं नित्ररूपसत्वात्तस्मात्कर्मकर्तृवैचित्र्येण श्रुतिस्मृतिभेदाः समर्थयितव्याः।नत्वेकमपरत्र निविरुध्यते।उपरोधप्रसंगात्।तथा च प्रकृतेपि अनुज्ञायाभावेन रक्षणाभवनयो[illegible]स्यात्।ब्रा
ध ह्मणादीनामप्यत्रैव लिङ्गहरणेश्व चंडालयोर्भक्षणं ब्राह्मणभक्षणेपि मलभावे शूकरभक्षणं अनुज्ञायस्य नियामत्वेतद्भावादिष्वत्र भावएव यावत्समीचीनरेतोभावः तस्मादुपलक्षणमेतद्रक्षणश्रु[illegible]युक्ति।।त
स्मादनुज्ञायसहितएव वृष्टिभावं धाम्नोतीति सिद्धं॥ ॥सुकृतदुष्कृतेएवेति बादरिः॥ ॥फलांशाएवानुज्ञायइति स्वमतं।कर्मफलंच द्वयमेवेश्वरेछयानियतंकर्मभूनर्भगवत्स्वरूपमेव ब्रह्मवादेसो
।नियक्तः फलपर्यंतं नदादिसंयोग इति स्वमतं अंतसंयोगपक्षमाहैकदे।शीलतापनाय।सुकृतदुष्कृतेएवेहिननिषिद्धकर्मणो अनुज्ञायइति बादरिराचार्यो मन्यते।तेन मोक्षपर्यंतमनुज्ञा
योनुवर्त्तिष्यत इति स्वत्रफलं उज्ञाहेन निरनुज्ञायपक्षत्रो केवनास्तीत्फक्तं।एवं द्वितीयाकृतिर्निर्धारिता॥ ॥अनिष्टादिकारिणामपि च श्रुतं॥ ॥तुल्यत्वेन विचारे ऐक्यवापं चाकृतिधूममार्गयो
:सोमभावेगतस्यभुनरावस्फपसंहारेउपलक्षणेनापि पापाचारवतामुपसंहारदर्शनात्।तेषामप्याकृतिसंबंधो धूममार्गश्च प्राप्तो।तितन्निराकरणार्थमधिकरणारंभः।ननु अनिष्टादिकारिणामपिसो
मभावः श्रूयते।इष्टादिकारिव्यतिरिक्तानां ये वैके चास्माल्लोकात्प्रयांति चंद्रमसमेव ते सर्वे गछंतीति कौषितकिनः समामनंति।अत्र चकारपर्यायो निमापद्यंत धति पर्यवसानं तेन सर्वे चंद्रमसं गछंति।अ
कर्म यमाशयः।।कर्माकर्मविकर्मेति त्रिविधं विधायको वेदः।अग्निहोत्रं जुहुयात् यः एवं वेद अवेदी च विछिद्येते वित्र रूपं।नहिंस्याद्भूतजातानि॥ब्राह्मणादीनामपि त्रिविधकरणं संभवति।नहि सर्वो
प्येकांततो विहितं वा प्रतिषिद्धं वा करोति।ततो विहितकर्तुरपि त्रयसंभवात् ज्ञानाभावेन फलभोगनेयत्वात्।सोमभावानंतरमेवाकर्मविकर्मभोगो वक्तव्यः अतएवाविशेषोपसंहारो।तस्मात्सो पा॰ १
मभावानंतरमेव सर्वेषां जन्मेति प्राप्तं॥ ॥संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्॥ ॥छान्दोग्यः पक्षं व्यावर्त्तयति।विहितव्यतिरिक्तकर्तॄणां संयमने यमसंनिधाने सुखं दुःखं वानु ध

ह्यस्यारोहावरोहौ च अनुभवार्थमारोह अनुभूयावरोह इति। कुतः। तद्गतिदर्शनात्। तेषां गतिर्विमदृपते। वेदे हि त्रयमं विहिताद्द्वेधा गतिः सकामा निष्कामा चेति सकामा यथाकाममनंतविधा।
॥निष्कामा ज्ञानरहिता द्विविधा वैदिका गृह्यस्मार्त्तभेदेन तत्र गृह्यस्मार्त्तेयमः श्रौते सोमभावः। तत्र त्रेताग्निविधानेन निष्कामानामदंभानां पुण्यस्यादित्यधिकारिविशेषणात् विशेषतः सामान्य
तश्च प्रायश्चित्तविधानात्। यदर्वाचीनमेनोऽन्यत्र हत्यायास्तस्मान्मुच्यत इति तरति तरति ब्रह्महत्यामिति च सर्वप्रायश्चित्तविधानात् उक्तानुभवाभावे सोमगतिरेव। पूर्वजन्मधर्मस्य चित्तशुद्धा
वुपयोगः तदानीं तस्य गंगास्नानादेः श्रौतांगत्वं। अतः पापस्याभावात् पुण्यस्योपक्षीणत्वात्तस्य पंचाग्निप्रकार एव ज्ञानोपयोगिजन्मनि पापसंश्लेषाभावो पापमयेवस्यति। पितृमेधप्रथमाङ्क इति मंत्र
विद्या स्कमत्रत्वाच्च ममसवत्रगतिनियामकः। त्रेताग्निरहितानां पुण्यपापोपभोगो यम एव। वैवस्वते विविच्यंते यमे राजनि ते जनाः। ये चेह सत्येनेच्छंते य उ चानृतवादिन इति। यमगतेः पंचाग्निविद्यायामश्रे
षाद्यवस्था। चित्तशुद्धिभावाभावाभ्यां वा च वद्रूपं को उद्युपव्यवस्था एकस्मै तद्दकत्वं सकामनिष्कामभेदो वा वेदांतिनामपि पापायमापेक्षणात् सा गर्वि क्रव्येव। तस्मात्सर्वेषां सोमगतिः॥ ॥ र्थं
स्मरंति च॥ ॥स्मरंति व्यासादयः यमेन रथस्त्रत्राहं देवदेव जगत्पते। पूर्वं त्वमभिषिक्तोहुं छत्ताहो नृपते शुनमित्यादि च काणःलोकप्रसिद्धिः॥ ॥अपि सप्त॥ तत्रेत्यनुवर्त्तते पापोपभोगार्थं यमाल
यगमनमंगीकर्त्तव्यं यतस्तत्र नरकाः सप्त संति रौरवादयः। सप्तसंख्यासंख्यानेदेष्ववरकत्ता सर्वथा निराकरणाभावाय सप्तग्रहणं। तस्माद्यमगतिरस्ति॥ ॥तत्रापि च तद्व्यापारादविरोधः॥ ॥किं पा
नेर विद्वांसं परिहरति। ननु रौरवेषु चित्रगुप्तादयोऽभिन्ना एवाधिकारिणः संतीति यासतिहतीयः पक्षः स्यादत आह॥ ॥न तत्र नरकादिषु येऽधिकारिणस्ते यमायत्तास्तत्सेवकाः अतो यमस्यैव तत्रा
पि व्यापारान्न तृतीयपक्षप्राप्तिः चकारस्तु खड्गःखभोगेपि तृतीयपक्ष एव विरोधः। अथवा यमगतेर्मंत्रलिंगसिद्धेः पापस्य च पौराणिकत्वाच्चेद्गतिरेकैव स्यादिति विरोधः। ते स्वयं यमसेवका

ब्र०सू०३ त्वेतु मंत्र।लिंगपोषकत्वान्मार्गद्वयसिद्धेरविरोधः।तस्माद्यमगतिरस्तीति सिद्धं॥ ॥विद्याकर्मणोरितिप्रकृतत्वात्॥ ॥साधारणत्वाभावाय पूर्वोक्तार्थसाधकमधिकसूत्रमारभते॥॥
५ ननुयेकेचास्माल्लोकात्प्रयंतिचंद्रमसमेवतेसर्वेगच्छंतीत्यस्याःश्रुतेःकागतिः।पंचाग्निविद्याप्रस्तावेवायमगतिःकुतोनोक्तातस्माद्वेदविरोधात्नतृतीयपक्षसिद्धिरित्याशंकांपरिहरति उ
त्राह्वः।अत्रवेदांतेगौणमुख्यफलदेहार्थंविद्याकर्मणोरेवहेतुत्वेन।निरूपणं।विद्ययादेवयानंकर्मणासोमभावइतितयोरेवप्रकृतत्वात्।कारणत्वात्।तेनकौषीतकिब्राह्मणेपिप्रकृत
त्वात्कर्मिणएवसर्वत्राह्वेनोक्ताः अत्रापिनियममार्गउक्तः।तस्मात्विद्याकर्मणोर्मुख्यत्वान्मार्गद्वयमेवोक्तंनैतावतातृतीयबाधः॥ ॥नतृतीयेतथोपलब्धेः॥ ॥ननुद्वयोःस्थलयोर्यस्तृत
योमार्गउक्तः अथैतयोःपथोर्नकतरेणचनता।नीमानिक्षुद्राण्यसकृदावर्त्ती।निभूता।निभवंतीत्यादिनानुगम्यतेत्वंतेनतृतीयनिंदयाद्वयोःस्थितिरितिमतएवतृतीयोस्थः।किंयममार्गेणेत्य
तत्राह।नतृतीयेमार्गेतथाक्षुद्रपापयोरुपभोगउपलभ्यते।यतःसमानब्राह्मणेकीटःपतंगोयदिदंदंदशूकमितियोनोनिर्द्दिष्टे।विद्यमानत्वान्नमहापापोपभोगः।नापिकीटादिषुमहासुखो
पभोगः।एकवाक्यताचोभयोर्युक्ताः।यद्यपिमहाराजादिराजदंडादिषुतथोपभोगःसंभवतितथापिरंभादिसंयोगेनरकेचयथातथानसंभवति।उक्तेउपंचम्याहुतिभिरंतरावल्लीश्चरेतस्याजन्मद्वयमधि
कंत्रिभिरितिवचनात्।भरतोहमितिप्रतीतेश्चततःपूर्वमस्मरणाद्वात्यादिवदेवजन्मचयंतस्माज्जायस्वेत्यादिवैलक्षण्यादतिरिक्तोयंमार्गः।पंचाहुतिनियमाभावस्तुहानोपयोगिदेहेष्वं। म
शावतारणे शुद्धिमार्गत्वान्नतत्रदोषः॥ ॥स्मर्यतेपिचलोके॥ ॥साधकांतरमाह॥अपिचलोकेपिमरुत्तादिषुयमलोकगमनसंभाषणपुनरागमनानिस्मर्यंते॥ ॥दर्शनाच्च॥ ॥यमपुरु पा०१
षादृश्यंतेपिकैश्चिदजामिलप्रभृतिभिःचकारात्तेषांवाक्यादिश्रवणं।तस्माद्देवस्यतमार्गेनकिमपिबाधकमितिसिद्धं॥ ॥तृतीयेशब्दावरोधःसंशोकजस्य॥ ॥तृतीयामाहुतिंविचारयन्नितन्न ५

क

वृष्टेरन्नं भवतीति तृतीया कृतिः। स फलार्थं द्वयं यज्ञाद्वै समधिगम्यं वृष्टेरन्नमिति साधनफलयोः प्रत्यक्षत्वात्तत्र वृष्टिमात्रेणान्नं भवति बीजव्यतिरेकेण। बीजस्य हि फलं न निमित्तमात्रेण तद्भावो वक्तुं शक्यते॥
तस्मादसंगतं वृष्टेरन्नमित्याशंक्याह॥ तृतीये त्वाशावरोधः तृतीया कृतौ त्वाद्बेन त्वाद्बसाम्येन कारणान्तस्य जलस्याब्वरोधो ग्रहणं। स देवसोम्येदमग्र आसीदित्यत्र तत्तेज ऐक्षत बहु स्यां प्रजायेयेति
तदपोऽसृजत तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायंते इत्यत्र कारणरूपां पनिरूपणे शोकजत्वमपामुक्तं। अयेच तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवतीतित्र
नः पंचाग्निविद्यायामपि देवहोमात्कारणान्तैव वृष्टिजाते तिनान्नबीजांतरापेक्षा शोकपदेन यदस्य ज्ञायते तदुज्जनं हिरण्यमन्नं वदति मरायः सूचितः॥ यद्यपि तत्रान्नत्राद्वेन पृथिवीतयाप्यत्र दृष्ट
धियाऽग्निसमिद्रूपत्वादन्नमेव तस्मात्कारणत्वाक्तियुक्तायां वृष्टेरन्नं भवतीति न काप्यनुपपत्तिः॥ ॥साभाव्यापत्तिरुपपत्तेः॥ ॥किंचिदाशंक्य परिहरति। ननु कारणजलरूपवृष्टिरेव वक्तुं न
भाव शक्यते यतः समानश्रममार्गश्रुतो वृष्टेरन्नभावे ऐक्यं वा तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तंते यथेतमाकाशमित्यादिना तिलमाषा इति जायंत इत्युक्तेन तत्र यथेतमित्याकाश
एव आकाशाच्चंद्रमसमिति पूर्वमुक्तत्वादाकाशस्य मार्गत्वेन वायुर्भूत्वा धूमो भवतीत्यादिश्रुततद्भावः श्रूयते ते च विलंबाः तदनंतरभावित्वाद्वृष्टिरपि विलंबैव तस्मात्कारणत्वमिति आशंक्य परि
हरति साभाव्यादिरूपापत्तिः आभासापत्तिरेव वायुवदाभासमाकाशमध्ये वायुमंडलमागच्छतीत्याकृतिर्वायुभवनशब्देनोच्यते आकृतेरेव पदार्थत्वात् व्याप्तिशब्देन च तेजोभावापन्नस्य जलस्याभावाप
त्तौ कात्र नाशान्नाश इवेति द्योतयति। कुतः उपपत्तेः तथैवोपपद्यते चित्रकुरंगादिषु विकारस्य विकारांतरापत्ताविर्यमेव व्यवस्था उपासनायोन तदपि। न च भूत्वाश्रुतेर्बाधः प्रतिनियतपदार्थाप्ति
ते भवनावरोहास्यामेव तथाव्यचनात्। अन्यस्यान्यभावं वदं श्रुतिरेव गौणत्वं वदति कारणं त्वाभावव्यतिरिक्तस्थलेन यथैव प्रतीतेः। तस्मात्तदाकृतिमात्रेण न स्वरूपान्यथाभावः॥ ॥नातिचिरेणाविशे

ति

४× भावः।मर्यादाभंगप्रसंगात्।तस्मात्कथमन्नस्यरेतोभावइत्याशंक्यपरिहरति।अन्याधि
ष्ठितेपूर्ववत्×

षात्॥ ॥उपपत्यंतरमाहतत्रस्थश्चनातिचिरेणनबहुकालंतत्रस्थता॥कुतःविशेषात्अत्राभावापन्नस्यैवबहुकालश्रवणात्अतोवैखलुदुर्निष्प्रपतरमितिश्रापतदंप्रपततरंवावर्णलोपश्छां
दसः।अतस्तृतीयाकृतौनचिरेणेत्यायातिबहुकालस्थितौहितत्रस्थता॥कारणवशाद्देवानांमनुष्याणांवत्।भिन्नपक्षेनकोपिदोषः।ऐक्यपक्षेपिज्ञानवतोग्रेरु इत्युक्तत्वाद्देववत्।तस्माद
हेरन्नंभवतीतिसिद्धं॥ ॥अन्याधिष्ठितेपूर्ववदभिलापात्॥ ॥चतुर्थ्याकृतिर्विचार्यते।ननुसंसर्गजैःकर्मदोषैर्यातिस्थावरतांनरइतिकथंतस्मात्तत्रपूर्ववत्त्वेपिकंडनपाकादि
क्लेशेनजीवस्यापगमात्कथंरेतोभावः।चर्वणोदर्यपाकस्तावद्वत्रूपकएव।नचजीवस्यजडभावसमयएवअन्यैर्जीवैरधिष्ठितोव्रीह्यादिस्तस्मिन्नत्रपूर्ववत्तद्भावापत्तिः।अतिदिश्यते
पूर्ववैलक्षण्येनवा।कुतः।अभिलापात्।व्रीहियवाओषधिवनस्पतयस्तिलमाषाइतिपूर्ववत्तद्भावमात्रंनवदतिकिंतुजगतिस्थितव्रीह्यादिभावएवाभिलप्यतेतथासतिपथान्येष्वत
दधिष्ठातृदेवतयानियुक्ताजीवास्तान्यात्मत्वेनाभिमन्यंते।एवमत्रापीतिनकोपिदोषः।अधिष्ठानेहिवेदनामरणानंतरंकृमिभावस्यदृष्टत्वात्।तस्मादन्नस्यरेतोभावोयुक्तः॥ ॥अशुद्ध
मितिचेन्नशब्दात्॥ ॥किंचिदाशंक्यपरिहरति॥ननुअन्याधिष्ठानेअंगीक्रियमाणेयातनाजीवानामशुद्धत्वादशुद्धमन्नंस्यात्तथाचकथंयोग्यदेहइतिचेत्।न।शब्दात्देवाअन्नंजुह्वति
तस्याआहुतेरेतःसंभवतीतिदेवैराकृतिरूपेणहोमवचनात्शुद्धत्वंअत्रअन्यस्यहिसंस्कारेणैवशुद्धिरन्यथायावज्जीवंकागतिःस्यात्॥तस्मात्संस्कारशुद्धत्वाज्जीवशुद्धमेवान्नं॥ ॥रेतःसिग्योगो
थ॥ ॥पंचमीकृतिंविचारयति॥ननुकथंपुरुषेत्रहोमाद्रेतोभावः।बाल्यकौमारवार्द्धकेष्वव्यभिचारात्।तारुण्येपिनहिसर्वमन्नंरेतोभवति।जातमपिननियमेनयोनौसिच्यतेनापिदेवापेक्षापु पा०१
रुषप्रयत्नस्यविद्यमानत्वादित्याशंक्यपरिहरति।रेतःसिग्योगःपुरुषशरीरेणयोगोपुरुषधर्मवानुच्यतेपौरुषंचदेशकालसंनिधानेनमंत्रवद्रेतःसेकसामर्थ्यंनैहोतऋतवर्जनीनंसार्वत्रिकंवान ६

मा

दर्शं देवापेक्षातयास्तिन कोपिव्यभिचारः। कथं पुरुषशब्दमात्रेणच ज्ञायते तत्राह॥ ॥अथयच्चानंतर्यात्॥ ॥शारीरार्थमेव देवैस्तत्र तत्र होमः कृतः तत्कथं पंचमाकृतावेवान्यथा भवेत्
तस्मादानंतर्यात् पुरुषाकृतिर्न निरेतःसिग्योगः योगशब्देनात्रापि अन्याधिष्ठानेन रेतःसिग्योगाभावः॥ ॥योनेःशरीरं॥ ॥क्रियमानं निरूप्य फलं निरूपयति। नस्याश्चाकृतेर्गर्भः संभ
वतीत्युच्यते। तत्र संदेहः योन्यावंतःस्थितमेव फलं बहिर्निर्गतं चेति। तत्र गर्भशब्देनांतःस्थित एव शारीरपरत्वे श्रुतिबाधः स्यात् उपसंहारोप्यग्रेकर्तव्याभावादुपपद्यते। ततश्च षण्मासानंतरं
गर्भे ज्ञानसंभवात् जन्मनामांतरं पुनरूपसत्यादिकर्तव्यमित्याशंक्य परिहरति। योनेर्निर्गतं शरीरं गर्भशब्देनोच्यते। अनेकुत्थितस्यैव फलरूपत्वात् मध्यभावस्याप्रयोजकत्वात् मातृपरिपाल्य
त्वाय गर्भवचनं। कलिलादिभावे पुरुषवचनत्वाभावादुपसंहारानुपपत्तिश्च। शारीरशब्देन वैराग्यादिप्रयुक्तः सूचितः न तु स्वयं तदभिमानेन जातइति। तस्मात् योग्यदेहः साधनसहितो ब्र
बैं वि ह्मज्ञानाधीनो निरूपितः॥ ॥इति श्रीवेदव्यासमत वर्तिन[illegible]विरचिते ब्रह्मसूत्राणुभाष्ये तृतीयस्याध्यायस्य प्रथमः पादः॥ ॥ब्॥ ॥संध्ये सृष्टिराह हि॥ ॥पूर्वपादेऽधिकारियोग्यदेहो नि
रूपितः॥ ॥द्वितीये जीवस्य मुक्तियोग्यता निरूप्यते। तत्र प्रथमं स्वप्नं निरूपयति। स्वप्नस्य सत्यत्वे नतु गुणदोषसंबंधो जीवस्य भवेत्। ततश्च निरूपिता शुद्धिर्व्यर्था स्यात्। अतः स्वप्नस्य मिथ्यात्वं
ह प्रदर्शयितुमधिकरणारंभः। तत्र पूर्वपक्षमाह॥ संध्ये स्वप्ने सृष्टिराह तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च संध्यं तृतीयं स्वप्नस्थानमित्युपक्रम्य न तत्र रथा न रथयोगा न पंथानो
र भवंत्यथ रथान् रथयोगान् पथः सृजत इत्यादिना सृष्टिराह। संध्ये स्थाने सृष्टिरस्ति यतः श्रुतिः स्वयमेवाह। युक्तश्चायमर्थः यथाश्रुतिर्वदति तथैव स्वप्ने दृश्यते देवादिवाक्यानां प्रबोधेऽपि बाधा
भावात्। न चेयमेव सृष्टिस्तत्र दृश्यते न तत्र रथा इत्यादिना निषेधात् श्रुतिवादिनां श्रुतिरेव प्रमाणं। किं पुनरनुभवसंवादिना। तस्मात् स्वप्ने सृष्टिरस्ति॥ ॥निर्मातारं चैके पुत्रादयश्च॥ ॥कामकेचतु

ब्रसु·२ र्थवज्ज्यांश्रूयते य एषसुप्तेषु जागर्त्ति कामंकामंपुरुषो निर्ममाणः तदेवशुक्रंतद्ब्रह्मतदेवामृतमुच्यत इति निर्मातारमेकेवदंति यद्यपि सुषुप्तुकांस्पोद्देशेनेत्यत्र न तत्र रथा इत्यपि ब्रह्मप्रकर
७ णं तथापि नियतधर्मपक्षे जीव एव कर्त्तेति प्रतिभातीति तदर्थं निःसंदिग्धं वचनमुदाहरति। जगव न्निर्मितत्वात्स्वप्नस्थस्यापि सत्यत्वं नादिकर्त्तुः स्वापोस्ति येन तत्र सः स्यात् जागर्त्तीति वचनात्। इष्ट
र्थकंच सर्वंस्स्रजति ज्ञाता पुरुषः पुत्रपौत्रानिति कामविषयाः पुत्रादयउक्ताः ते च निर्मितापरलोकसाधका इति लोकत्रयकल्पना च कारद्वयेन कार्यकारणगताः सर्वे धर्मा उक्ताः। तस्मात्श्रुत्युपपत्तिभ्यां
स्वप्नप्रपंचस्य सिद्धत्वात् तत्कृतगुणदोषसंबंधे स्वर्लोके देहनिर्माणं व्यर्थमित्येवं प्राप्तं॥ ॥मायामात्रंतु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्॥ ॥तुशब्दः पक्षं व्यावर्त्तयति स्वप्नसृष्टिर्मायामात्रं न
तुः त्र हेतुः कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् कृत्स्नत्वेन यस्य यादृशं स्वरूपं देशकालवस्तुसापेक्षं तथाभिव्यक्तिः कार्त्स्न्येनाभिव्यक्तिस्तदभावात्तच्चयमात्रायः। श्रुतिः सृष्टिमेवाह न तस्य सत्यत्वमपि
यथैतदात्म्यमिदंसर्वंतत्सत्यमितिच्चात्मानं स्वयमकुरुत तत्सत्यमित्याचक्षते कथमसतः सज्जायेतेत्यादिश्रुतिसहस्रेभ्योस्य सत्यत्वं प्रतीयते नैवं स्वप्नप्रपंचस्य श्रुतिराह। सत्यप्रयोजनाभावाच्च
॥स्वप्नमात्रविहारस्य महामायावित्वान्मायापि सिध्यति नापि भिन्नः प्रपंचः जीवस्यैकत्वात्॥ ॥अविद्यया मन्यत इति वचनान्न तस्सुखदुःखभोगार्थमपि सत्यत्वमंगीकर्त्तव्यं स्थानद्वयप्रतिज्ञा च विरु
ध्येत जीवतो मृतांश्च पश्यतीति लोकद्वयदर्शनं चतो लोकद्वयप्रतिज्ञायरूपत्वान्माययाक्रीडायामन्यानुरोधाभावेनातिसुखत्वाद्भगवत्कृतमात्रवाचकत्वाच्च श्रुतेरतिरिक्तकल्पनायां प्रमाणा
भावात् ज्योतिःशास्त्रनियमाभावाच्च मायामात्रमेव स्वप्न इति न तत्कृतगुणदोषसंबंधः दीक्षितस्यात्र भोजनादिप्रायश्चित्तं तु भगवत्क्रीडायामपि प्रतिज्ञायत्वात् क्रियते तदानीं कर्तृत्वस्यारोपा पा·२
त्। अन्यदा कर्त्तृत्वस्याज्ञातत्वान्न धर्माधर्मजनकत्वं। देवताज्ञादिषु जीवब्रह्मणोर्विद्यमानत्वाद्युक्ताश्चलौकिकज्ञाने द्विप्रतिज्ञायत्वाऽसंवादः क्वचिद्भगवदावेशेऽपि संवादोपि तस्मात्स्वतंत्रमत्यनार ७

यं प्रमाणाभावान्मायामात्रं स्वप्नप्रपंच इति सिद्धं॥ ॥सूचकश्च हि श्रुतेराचक्षते च तद्विदः॥ ॥ननु नादिर्जीवसाक्षिकमेकदेशेन किमिति सृजति तत्राह सूचकः शुभाशुभफलसूचको भवति स्व
प्नः चकारात् क्वचिदाज्ञाविशेषदानं कल्पिकालादेः प्रत्यक्षे बाधकत्वात् उक्तश्चायमर्थः प्रातः सूचकफलस्यैव दृष्टत्वात्तु स्वप्नपदार्थस्य। सूचकत्वे प्रमाणमाह॥ यदा कर्मसु काम्येषु स्त्रियं स्व
प्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने इत्यादिश्रुतेः। किंच आचक्षते च तद्विदः स्वप्नाध्यायविदस्तथैवा चक्षते। आरोहणं गोवृषकुंजराणामित्यादिना तस्मात् सूचनार्थं जीवप्रद
र्शनमिति॥ ॥पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधविपर्ययौ॥ ॥किंचिदाशंक्य परिहरति॥ ननु जीवायं भगवादृशः किंकरोति प्रदर्श्यमिति च स्वस्य सर्वलीलां चेंशश्चायं कथमस्य दुःखित्व
मित्याशंक्य परिहरति तत्राह॥ अस्य जीवस्यैश्वर्यादि तिरोहितं तत्र हेतुः पराभिध्यानात् परस्य भगवतोऽभिध्यानं स्वस्यैतस्य च सर्वतो भोगेच्छा तस्मात् ईश्वरेच्छया जीवस्य भगवद्धर्मतिरोभावः ऐश्व भितो
र्यतिरोभावाद्दीनत्वं पराधीनत्वं वीर्यतिरोभावात् सर्वदुःखसहनं यशस्तिरोभावात् सर्वहीनत्वं श्रीतिरोभावाज्जन्मादि सर्वापद्विषयत्वं ज्ञानतिरोभावाद्देहादिष्वहंबुद्धिः सर्वविपरीतज्ञानं चाप
स्मारसहितस्य वैराग्यतिरोभावाद्विषयासक्तिः बंधश्च एवं कार्यौ विपर्ययो ह्यस्तिरोभावादेवैवं नान्यथा युक्तोऽयमर्थः एकस्यैकांशप्राकट्येपि नयाभावात् आनंदांशस्तु सर्वमेव तिरोहि
तो येन जीवभावः अत एव काममयः अकामरूपत्वादानंदस्य निद्रा च सुतरां तिरोभावकर्त्री भगवच्छक्तिः॥ अतोऽस्मिन्स्वप्ने जीवस्य धर्मतिरोभाव उक्तः। अन्यथा भगवत ऐश्वर्यादि लीला निर्विषया स्या
त् तस्मान्न जीवस्वरूपपर्यालोचनया किंचिदाशंकनीयं॥ देहयोगाद्वा सोऽपि॥ ॥ईश्वरेच्छयैश्वर्यादितिरोभावं स्वमते निरूप्य मतांतरेणापि नियतधर्मवादेन निरूपयति देहयोगाद्देहसंबंधादेवा
स्य सर्वतिरोभावः। विपर्ययो वा अपिशब्दादन्यत्॥ अस्मिन्पक्षे देहवियोग एव तु नैश्वर्यादिप्राप्तिः पूर्वस्मिन्कल्पे विद्यमानेपीति विशेषः। न त्वीश्वरेच्छया विकल्पः। कश्चित्परत्वाच्छेन देहादिमाह। नदा

अणु०३ अभिध्यानयोगयोरेकस्मिकता स्यात्। सर्वस्य वशी सर्वस्येशान इति विरोधश्च। कश्चित्तु तस्याभिध्यानात् तृतीयं देहभेद इति श्रुत्यनुरोधेन जीवकर्तृकाभिध्यानं मत्वा अतिरोहितमिति कल्पयंति

८ विपर्ययमत्राद्ये नच मोक्षंबंधकध्याहारेण च सूत्रद्वयं योजयंति। तत्त्वमस्यादापरिज्ञानाद संगतेश्च साधनोपदेशस्य चांतोक्तमित्यपेक्षं। निद्रायाविवेकज्ञानाभावावसरत्वाद्यथाव्याख्यातमेवार्थः

:॥ ॥तदभावो नाडीषु तच्छ्रुतेरात्मनि च॥ ॥प्रसंगाज्जीवस्याज्ञानं निरूप्य सुषुप्तौ केवलमज्ञानं निरूपयितुं स्थानस्वभावाभावेन निरूपयति। एवं श्रूयते नाडीरनुक्रान्तासु तदा भवति यदा सुप्तः स्वप्नं न कं

चन पश्यति अथास्मिन् प्राण एवैकधा भवतीति तथा प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति तत्र संशयः स्वप्नवत्प्रपंचसृष्टिं मायिकमपि भगवान् करोति न वेति संशयः तत्रए य

षसुप्तेषु जागर्तीत्यत्र जीवस्वापमात्रे भगवत्कर्तृत्वोक्तत्वात् स्वप्नं न कंचन पश्यतीत्यत्रापि दर्शनमात्रनिषेधात् न बाह्यं किंचन वेद नांतरमिति च जागरणस्वप्नप्रपंचयोरविशेषेण दर्शनकथ

नात् सुषुप्तावपि प्रपंचनिर्माणमस्तीत्यवगंतव्यं ततश्च कस्यामप्यवस्थायां प्रपंचव्यतिरेकाभावात् मुक्तावपि स्यात् स्वाप्ययसंपत्त्योरज्ञानमात्रविशेषात् सति संपद्य न विदुः सति संपद्यामह इति। त

स्मान्न बाह्यमत्संपदोर्विद्यमानयोरपि यथाज्ञानाभावादग्रहणं एवं प्रपंचस्यापीत्येवं प्राप्ते उच्यते। तदभावो नाडीषु तस्य स्वप्नस्याभावो नाडीषु तथात्मनि च कुतः। तच्छ्रुतेः प्रपंचाभावश्रुतेः कामन

यादिप्रपंचः सुषुप्तावस्थाया अकामरूपत्वश्रुतेः तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपमिति नाडीषु आत्मनि चेति यद एतत् सुषुप्तिर्द्विविधेति सूचयति। तथा हि हिता नाम नाड्यः पुरीतत्सं

नाहृदयदेशान्न बाह्याः अभ्यंतरः परमात्मा हृदयदेशस्थः जीवस्य इंद्रियाणां च स एव देशः। तत्र निद्रया भगवत्कृपाबहिर्दृष्ट्याच्छादने भगवल्लीलायां तां पश्यति तत्राप्याच्छादने गाढं सुप्तो ज्ञानरहितः कि पा०२

यात्रास्या अंतर्भगवंतं वा प्रविशति बहिर्नाडीषु वा समायातीत्यत एव बृहदारण्यकषष्ठे यत्र सुप्तो न कंचन कामं कामयत इति वाक्यद्वयमाह॥ ता वा अस्यैता हिता नाम नाड्यः तद्वा अस्यैतदाप्तकाममिति ८

भेदेन। सुषुप्तिस्तु न यत्र ज्ञानशक्तेः सर्वथा तिरोधानात् तस्मात् सुषुप्तौ न प्रपंचस्मृतिः। अतः प्रबोधोस्मात्। प्रबोधे संदेहः प्रतियोन्याद्रवति बुद्धांतायैवेति जीवसमोने। धर्मप्रकरणे निरूपितं न।
तो नाडीभ्यः पुनर्हृदयदेशं गत्वा भगवतो वासमागत्य जागर्तीति अपरोस्ति यत्र स्थितस्तत एव जागर्तीति तन्न श्रुत्यनुरोधात् हृदयदेशमागत्य जागर्तीत्येवं प्राप्ते उच्यते। अतः नाडीभ्य एव प्रबोधः गर्त्तप
तितस्य प्रबोधे हि ततो गमनं प्रतियोन्याद्रवणं तु भगवत इति। किंच प्रबोधोस्मात् अस्मादात्मनः सकाशादेव प्रबोधः प्रियमेव संपरिष्वक्तस्य बोधाज्ञानाभावे कथमागमनं। अत एव संपरिष्वक्तो निविड
निद्रः। तस्माद्यथैवेति श्रुति तत एव प्रबोध इति सिद्धं॥ ॥स एव तु कर्मानुस्मृतिशब्दविधिभ्यः॥ ॥किंचिदाशंक्य परिहरति। ननु प्रिययेव प्राज्ञेनात्मना परिष्वक्तस्य ब्रह्मलोकं गतस्य प्रबोधेन ज्ञाने मु
क्त एव भवेत् न तु पुनरागच्छेत्। अतो भगवदिच्छया देहनिर्वाहाय तत्स्थाने नियुक्तोन्य एव जीवः समायातु अस्य ततः प्रबोधे तु स एव व्यवहारः कृतावता सेत्स्यति मुक्तश्च पूर्वप्रयत्नस्य न कर्तव्य इत्याशं
क्यपरिपरिहरति तु शब्दः। अस्मादपि प्रबोधे स एव। कुतः। कर्मानुस्मृतिशब्दविधिभ्यः। चत्वारो हेतवः। लौकिकवैदिकयोर्ज्ञानकर्मभेदात्। तत्र लौकिके कर्मणि स्मामि कृतकर्मणः शेषसमा
पनात्। नहि कश्चिदपि सुप्तः प्रतिबुद्धः स्वाभिमतं तं न समापयतीति क्वचित्सिद्धं। तथानुस्मृतिः। नहि पूर्वदृष्टं न स्मरतीति क्वचित्सिद्धं। शब्दास्तु पुण्यः पुण्येन कर्मणा भवति पापः पापेन केषत
दाम्रत् कुत एतदागादिन यथामतिसंमयेत्यादयश्च विधयः अश्वोन्ते ब्रह्माणं वृणीते सोन्ते शेषं समाप्नुयात् एक एव यजेत द्वादशरात्रीर्दीक्षितः स्याद्यः कामयेत वीरो म आजायेतेत्याद
यः। भगवतैव मर्यादारक्षार्थं तथाकरणात् सर्वपक्षयुक्तयो दुर्बलाः। तस्मात्स एव प्रतिबुध्यते॥ ॥मुग्धेर्धसंपत्तिः परिशेषात्॥ ॥किंचिदाशंक्य परिहरति। ननु यत्र कर्मादिस्मृतयो न
संति तत्रान्यो न विष्यति क्वचिन्मूर्छादिविशेषे सर्वस्मृतिनाशेन मुग्धभावदर्शनात् न च यथा लौकिकवैदिकव्यवहारास्तथान्यत्रापि न विष्यंति। अनुस्मरणादयश्च बुद्धिवृत्तयः गंगाप्र

रा

अ०३ वाइजलस्य गंगावद्य एव चिदं शास्त्रे याति स एव तथा न वद्ध। किं स एवेति निर्बंधेनेत्याशंक्य परिहरति। मुग्धे मुग्धभावे ऽर्धसंपत्तिरेव न सर्वा नि हि मुग्धस्य यज्ञादीष्वधिकारो ऽस्ति सर्वप्र
५ वृत्तानि उजीवनाधिकारात्। क्रियंते लौकिकव्यवहारोऽपि नाश्वर्वाः। सिध्य निष्पूर्वोक्तिहेतुसद्भावे तु न को ऽपि दोषः। अतो मुग्धे ऽर्धसंपत्तिः सर्वैव नो ऽन्तराउक्तन एतत्परिशेषात्। स एव वा न वेति
निश्चयप्रमाणानामभावाद यस्मिन्देहो न त्रिष्यते। तस्मात्संदेहात् मुग्धे ऽर्धप्रतिपत्तिः न तत्प्राणायन। विधानत्वता मूर्छा विचार्यते। तस्याः प्राणधर्मत्वात् यथा बाल्यं शरीरधर्मः। अथ
स्व विचारः जीवावस्था एव हि विचार्यते केवलमास्तिवादस्तु न ब्रह्मवादः तस्मादेक एव जीवः स्वप्नादिदोषसंबंधरहितत्वात् वृत्ताजन्मयुक्तो भगवज्ज्ञानरहितो ज्ञानाधिकारीति सिद्धं॥
न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि॥ ॥इदानीं विषयनिर्धारणार्थं ब्रह्मस्वरूपं विचार्यते। तत्र प्रथममन्योन्यविरुद्धवाक्यानां निर्णयः। क्रियते तैतदर्थमेतावत्सिद्धं समन्वयाविरोधाभ्यामे
कमेव ब्रह्म प्रतिपाद्यत इति तत्र यथा कार्यविरोधः परिहृतः एवं ब्रह्मधर्मविरोधोऽपि परिहरणीयः अन्यथाबोधकता स्यात्। तत्र स्वगतधर्माणाम विरुद्धानामग्रिमपादे विचारः। उउजीव
धर्मत्वेन प्रतीतानामत्र विचारः। क्रियते तत्र कचिदुजीवधर्मा भगवति बोध्यंते कचिन्निषेध्यंते। यथा सर्वकर्मा सर्वकामः। न चैते जीवधर्मा एव न भवंतीति वाच्यं उच्चावचकर्मणां कामा
नां च जीवगतत्वप्रतीतेः नेतरोनुपपत्तेरिति सर्वत्र वैलक्षण्यस्योक्तत्वात् कार्यविशेषधर्माणां कारणे वक्तुमशक्यत्वात्। न च कारणधर्मा एव सर्वे कार्ये ऽंशो वा प्रतीयंत इति वाच्यं अस्थू
लमनण्वित्यादिवाक्यैः प्रापंचिकसर्वधर्मवैलक्षण्यस्योक्तत्वात्। अत्र केचिदविरोधमेवमाहुः सर्वत्र कारणत्वाद्भगवानस्थितस्तत्र अस्थूले अस्थूलः अनणो अनणुः उच्चावचकर्तरि पा०२
उच्चावचक उच्चावचकामे उच्चावचकामः पृथिव्यां सर्वगंधः अन्नादावगंधः एवं रसादिष्वेवं स्थानतः। परस्योभयलिंगमुपपद्यते। अथवा कारण एवरूपं चावच्छेदभेदेन अचिंत्यसामर्थ्या ८

र्ता

द्याच्चन्यथा असतः सत्त्वं न प्रसंग इति अपिना संगृहीतमिति एतदुभयमपि न। कुतः। सर्वत्र हि। सर्वज्ञैनादृशं रूपं भगवतत्तत्पदिरूपतौ हि युक्तो यमर्थः भगवत्स्वरूपप्रतिपादकानि हि एता
निवाक्यानि न त्वनुवादकानि वैयर्थ्यापत्तेः। अचिंत्यत्वेन ज्ञानानुदयः। तमेव विदित्वाति मृत्युमेति भक्त्या मामभिजानाति यावान्यश्चास्मि यादृशः ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरमिति ज्ञाना
नंतरमेव सायुज्यप्राप्तेः। न च यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानतामिति वाच्यं। शास्त्रानारंभप्रसंगात्। अयं च विरोधः परिहरणीयः। सर्वो हि विरोधात्राचिं
त्यं तेनापि न तदुपादानभूतप्र[illegible]देशविशेषेण विरोधः अनुवादकत्वेन वैयर्थ्यापत्तेः। न च भगवति भेदोस्ति प्रत्यारंभमे
कमेवाद्वितीयमिति वचनात्। अल्पकल्पनायामपि श्रुतिविरोधः सिद्धः। श्रुत्यविरोधार्थमेव हि प्रवृत्तेः। तस्मात्त्वमतानुसारेण जडजीवधर्मिणां सत्त्वासत्त्वे परिहर्तुं शक्ये॥ ॥न भेदादि
ति चेन्न प्रत्येकमतद्वचनात्॥ ॥प्रकारांतरेण समाधानमात्रं कश्च परिहरति। न चवदुक्तो विरोधः संभवति भेदात्। कारणकार्ययोः सर्वत्र भेदांगीकारात् प्रपंचविलक्षणं ब्रह्म भिन्नं प्रपंचध
र्मवद् ब्रह्म भिन्नं यथा ज्ञानं ज्ञातं च एकस्य भेदस्यांगीकारे सर्वमुपपद्यत इति चेन्न। प्रत्येकमतद्वचनात्। अभेदवचनात् इयं पृथिवी सर्वेषां भूतानां मध्विति ब्राह्मणे अयमेव स योयमिति सर्वत्राभेद
वचनात् कार्यकारणरूपप्रकाराणां भेदनिषेधात्तस्मात् भेदांगीकारेण उक्तयोयोजयितुं शक्या॥ ॥अपि चैवमेके॥ ॥भेदांगीकारे बाधकमाह। अपि च एवमेवाभेदमेव च भेदनिषेधेनै
केशा। विनोवदंति मनसैवेदमाप्तव्यं नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति भेददर्शननिंदावचनात्। तस्मान्न भेदांगीकारः कर्तुं शक्यः इवशब्दे व कल्प्यामिति भाव
त्यर्थः। तस्मादुपनिषत्सु सर्वप्रकारो विरोधः सिद्धः॥ ॥अरूपवदेव हि तत्प्रधानत्वात्। एकदेशिमतेन समाधानमाह॥ ॥कथमत्र संदेहः विरोधो वा जडजीवधर्मिणां विधिनिषेधयोः जडजीवध

१ जडजीवयोर्हि

०२ मन्निवंति अन्यत्र रूपदिश्यमानाउपासनार्थान्भवंति। नन्वेको भेदाभावः। सत्यं तथापि कार्यकारणांशाभावकृतस्य चग। व्यवहारार्थं जातस्य भेदस्य निषेद्धुमशक्यत्वात्। तस्माद्ब्रह्मणि जडजीव
धर्माणां निषेधो युक्तः॥ उपचारात्तु सर्वकर्मादयः। विपरीतं किं न स्यादत आह। अरूपवदेव रूप्यते व्यवह्रियत इति रूपं सर्वव्यवहारविषयत्वं तद्युक्तं रूपवद्धि स्वं। ब्रह्म तु तद्विलक्षणं कार्यका
रणांशयां। शिनो वैलक्षण्यस्य युक्तत्वात्। न चैवं लक्षणमपि युक्तं कारणत्वादत आह। तत्प्रधानत्वात्। तस्य ब्रह्मणः प्रधानत्वान्मुख्यत्वात् यत्र हि तत्प्रतिपाद्यते। न च तस्य मुख्यत्वं ब्रह्मप्रतिपादनेश
स्य धर्माणामेव मुख्यत्वं नान्यधर्माणां यथा प्रशासनस्य मुख्यत्वं तथा सर्वकर्मेति लौकिककर्मानुवादेन भगवत्संबंधे स्पष्टमेवामुख्यत्वं विशिष्टबोधनेपि सर्वशास्त्रस्य प्रसिद्धानुवादकत्वाद
तिरिक्तकल्पनायां च गौरवात् प्रमाणाभावाच्च यथाकथंचिद्धर्मवत्त्वेन ज्ञानस्यैवोपयोगाल्लोकधर्मनिवारणपूर्वं विशिष्टबोधनमुचितं। अरूपमिति वक्तव्ये अरूपवदिति वचनं भिन्नधर्माणामेवैवं
निर्णयः। न तु प्रशासनवद्भगवद्धर्माणां तस्मात्कार्यवत्तद्धर्माणामपि कार्यत्वात् भगवत्त्वं भगवद्धर्मत्वमिति सिद्धं॥ ॥प्रकाशवच्चावैयर्थ्यात्॥ ॥ननु सर्वव्यवहारातीते वा शास्त्रवैफल्यं मनसैवेत
दाप्तव्यमिति विरोधश्च न परिहृतः। तं त्वौपनिषदं पुरुषं पृच्छामि यतो वाचो निवर्त्तंत इति चेत्तत्राह। प्रकाशवत्। यथा सौरप्रकाशो व्यवहार्यः अव्यवहार्यश्च। न हि स्वतः संपादयितुं शक्यते
स्थापयितुं वा आगते तु सूर्ये मिथ्याभावे च सान्निध्यमात्रेण व्यवहारः कर्तुं शक्यते न यथा लौकिकवाङ्मनोभिर्न शक्यते व्यवहर्तुं ऐश्वर्ये सौरे विधाने तु शक्यत इति हृदयमारस्तुतिः कृत एतदवगम्य
ते न त्वाह। अवैयर्थ्याच्च अन्यथा शास्त्रं व्यर्थं स्यात्। चकाराद्धर्माणां तथात्वविरोधः परिहृतः॥ आसीनो दूरं व्रजति अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यादौ च लौकि पा० २
काद्भगवद्धर्मातिशयं तेन कारणककार्यवचनात् तद्धर्माणां चाकार्यत्वं बोधयति तस्माद्व्यवहार्येपि न शास्त्रवैफल्यं॥ ॥आह च तन्मात्रं॥ ॥किंचिदाशंक्य परिहरति। न च लौकिकानी १०

त्व

द्रियाणि विरोधाभावाय कथं न कल्प्यंते। अन्यथा अकारणककार्यत्वं तस्य च निर्मलौकिकत्वं तत्स्व पत्रपत्यच रुत्त रितिविरोध इति आशंक्य परिहरति आह चक्षुर्निः स्वय
मेवतन्मात्रं प्रज्ञानघन मात्रं स यथा सैंधवघनो नंतरो बाह्य - कृत्स्नो रसघन एवं वा अरेयमात्मानंतरो बाह्यः कृत्स्नः प्रज्ञानघन एवेति स्वरूपातिरिक्तानामिंद्रियाणामभा
वात्। न च क्रियाभावोपि वेदविरोधेन तथा कल्प्य इति तत्र वाक्यत्वात्। वेदनिश्वासायनप्रतमसुखानादेरुक्तत्वाच्च। अतो नेंद्रियाणां परिकल्पना। किंतु सर्वाकारस्वरूपं वस्त्वेवता
दृश्यमिति मंतव्यं स्ववचनाच्चकारात् सर्वेंद्रियविवर्जितमिति स्मृतिरपि। तस्मान्नेंद्रियकल्पनया विरोधः॥ दर्शयति चाथोपि स्मर्यते॥ ॥पुनः प्रकारांतरेण विरोधमाशंक्य
परिहरति। ननु ब्रह्म जगत्कारणमिति। सिद्धांते च समवायिनि भिन्नं चेति चाकारणधर्मा एव हि कार्येऽनिवंति। अमंभावनायां त्वन्यथाकल्पनं। कामादयो धर्माश्च श्रुतौ विहिताः। ते ब्र
ह्मण एवेत्यनविद्युक्ताः। निषेधिकापि श्रुतिः। न हि वेदवादिनामणुमात्रमप्यन्यथाकल्पनमुचितमित्याशंक्य परिहरति। दर्शयति श्रुतिरेव जडजीवधर्माणां भगवत्यभाव इति द्विवाच
ब्रह्मणो रूपे स्थूलमूर्तपक्षस्य द्वेधा पंचभूतावतिन नैवं प्रकारकं। तत्र धायतिन न भवत्येव ब्रह्मता दृश्यं हि युक्तोयमर्थः एतस्मात् तेन मिति। नहि कार्यकारणयोरेकः प्रकारो भव
ति। अतो नेति नेति प्रकारनिषेधोपसंहारः। न तु समवायित्वमात्रत्वं किं त्वन्यत्परमस्तीति रूपं निरूप्य नाम निरूपयति सत्यस्य सत्यमिति। तेन प्रपंचातिरिक्तब्रह्मणो विद्यमानत्वात्
प्रपंचधर्मवचनं तस्मिन्नौपचारिकमेव युक्तं श्रुत्यैव तथा प्रतिपादनात्। चकार एवं युक्त्यनुसंधानार्थः। अथो इति प्रक्रमभेदोपि अथात आदेशा इति भिन्नप्रक्रमेणाह। श्रुतेरन्यार्थतानि
राकरणायाह। अपि स्मर्यते। अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यत इति। सदसतोः क्षेत्रत्वात् ज्ञेन निरूपणे निषेधः। प्रपंचधर्मा भगवति उच्यंते वेदादौ न तु तद्धर्मा भवंतीति ज्ञापयति स्मा

[illegible]॥

२ तच्छ्रुतिस्मृतिभ्यामेव तथा निर्णयः॥ ॥अत एव चोपमा सूर्यकादिवत्॥ ॥प्रपंचधर्मभगवत्स्वरूपचारोऽयं न इत्यत्र निदर्शनानां नरामाह अत एव इममेव निर्णयमाश्रित्य समः प्लुषिणा समो ना
गेन समो मशकेन सम एभिस्त्रिभिर्लोकैः समोनेन सर्वेणेति निरूपमस्य भगवतो यदुपमानं तत्र तद्धर्मसंबंधात् । न चाच स्वातंत्र्यतादृशधर्मवत्त्वं ब्रह्मणो वक्तुं युक्तं । नन्विदमपि विरुद्धमित्याशंक्य
दृष्टांतमाह । सूर्यकादिवत् सूर्येण सहितं जलं सूर्यकं । यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । एकधा बहुधा चैव दृश्यते जलचंद्रवदिति यथेनरसंन्निष्ठस्योपमानत्वमेवं
समः प्लुषिणेत्यपि । चकारस्तु विरोधाभावो वक्तव्य अधिकरणं च संपूर्णमेकदेशिन इति सूचयति । तस्माज्जडजीवधर्मणो भगवत्स्वरूपचारो निषेधस्तु मुख्य इति॥ ॥अंबुवदग्रहणात्तु
न तथात्वं॥ ॥मुख्यसिद्धांतं वक्तुमेकदेशिनं दूषयति॥ तुशब्दस्तथा सिद्धांतं व्यावर्त्तयति । तथात्वं समवायातिरिक्तस्य तद्धर्मयोगात् जडजीवधर्मयोगात् सर्वकामत्वादयो न भवंतीत्यतः अंबुव
दग्रहणात् ॥सर्वपरस्य हि प्रतिबिंबे अधिकरणधर्मवत्त्वं तत्र रूपरहितं न तु विद्यमानं च न [illegible] प्रतिबिंबं न इति वक्तव्यं तथापि स्वमतविरोधा
दंबुवदग्रहणमिति स्वच्छमंबु प्रतिबिंबग्राहकं न तथा धर्मान् ग्रहीतुं शक्नुवंति धर्मत्वाच्च । सर्वाधारत्वेन तथोच्यमाने वैयर्थ्यमिति पूर्वमेवोचाम । न च भ्रमात्कल्पनं वेदेनोच्यते । अप्रतारकत्वात् सर्वज्ञत्वा
च्च । विरुद्धधर्मवादिन एवैवं वचनं न वैदिकस्य । पृथिव्यां तिष्ठन्नित्यादिविरोधश्च तस्माद्ब्रह्मस धर्मा एव सर्वकामादयो न तूपाधिसंबंधादौपचारिका इति॥ ॥वृद्धिह्रासभाक्त्वमंतर्भावादुभयसा
मंजस्यादेवं॥ ॥सिद्धांतेन विरोधपरिहारमाह । विरोधो हि परिहरणीयो लोकवेदाभ्यां तदनुसारेण महानवकाशोऽल्पोवकाशो यथावकाशं दृश्या चमसानिति लौकिकवैदिकव्यवहारो वस्तुध पा॰२
र्मविरुद्धो दृश्यते । व्यापकत्वं हि वृद्धिह्रासौ च आकाशस्यैव तत्र यथा करके प्रविष्ट आकाशस्तथा व्यपदिश्यते तथा सत्युभयसामंजस्यं भवति अन्यथा एकतरबाधो भवति एवं नतरनुप्रवेशात् ब्र ३१

६ ४ प्रकृतेयदेतावत् परिदृश्यमानायावंतःपदार्थालौकिकास्तेषामेवधर्मान्निषेधति ६

६ ४ वास्थला ४ ६

मी १

स्याप्येवंनचोपाधिकत्वं।जपाकुसुमलौहित्यवद् न्यधर्मत्वाभावात्।अन्यानुविधायित्वेपिस्वधर्मएवतने कारणत्वादिवत्तानत्वागंतुकत्वात्तद् एवनन्तनवंतांनिवाचां।अन्यधर्मत्वेप्रमाणाभावात्।त
तत्वप्रतीतेस्तुदृष्टत्वाच्चाविरोधः।अविरोधप्रकारोयंयथोभयसामंजस्यंभवतिप्रकारोपितस्यैवनयावक्रव्यतस्याद्यथाआकाशस्यवृद्धिक्रमसमनाल्कंकरका।दृश्यतत्रापितत्तथैवोभयसामंज
स्यादेवंब्रह्मण्यपिवृद्धिक्षयमपदेनशरीरेआकाशजीवयोरेकमुदाहरणंबोधयति॥ ॥दर्शनाच्च॥ ॥हेत्वंतरमाह।भगवतिसर्वविरुद्धधर्मदर्शनंतेनदृष्टेअनुपपन्नंनामव्याधानानन्तनादृश्चा
२रा मेवतद्धस्तिनिन्चध्यवसायः।ग्रामालिकःचकाउलूखलबंधनादिप्रत्यक्षमेवोभयसाधकंदृष्टमितिश्रयोअमुष्येवममात्मकस्येतिचतस्मात्श्रुतिस्मृतिप्रत्यक्षैःसर्वविरुद्धधर्माश्रयत्वेनब्रह्मप्रतितेर्न
विरोधः॥ ॥प्रकृतैतावत्त्वंहिप्रतिषेधतिततोब्रवीतिचभूयः॥ ॥परमार्थतोविरोधंपरिहृत्ययुक्त्यापिप्रतिषेधति।ननुसर्वविशेषधर्माणामस्थूलादिवाक्यैर्निषेधात्कथमविरोधःप्रश्नेतव्यइतिचेत्
तत्राहप्रकृतैतावत्त्वंहिप्रतिषेधतिप्रतीतस्यैवहिनिषेधात्॥अतोजगद्वैलक्षण्यमे[illegible]ादिवाक्यैःप्रतिपाद्यतेनतुवेदोक्ताब्रह्मधर्मानिषिध्यंते।कुतएतदवगम्यतेतत्राहततोब्रवीतिचभूयः।यत्रैववाक्येपू
र्वंनिषेधःतितस्मिन्नेववाक्येपुनस्तमेवविधत्ते।यतोवाचोनिवर्तंतेअप्राप्यमनसासहआनंदंब्रह्मणोविद्वानितितथाअस्थूलवाक्येपिएतस्यैवप्रशासनेएतद्दितिआकाशश्रोतश्चेतिचकारादेकवा
क्योपाख्यानेद्वौसंगृहीतौ।सर्वज्ञोलौकिकंप्रतिषेधत्यलौकिकंविधत्तइतियुक्त्यानिर्णयः।तस्मात्युक्त्याप्यविरोधः॥ ॥तदव्यक्तमाहहि॥ ॥श्रुतिबलविचारेणाविरोधंपरिहृत्यार्थबलविचारे
णाविरोधप्रतिपादनायाधिकरणमारभ्यते।सर्वाणिवि[illegible]रुद्धवाक्यान्युदाहृत्यचिंत्यंतेनचलक्षणागृह्यतेकश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तनापिवाचासर्वेवेदायत्पदमामनंति।अप्राप्यमनसासहमनसै
वैतदाप्तव्यंअस्पर्शमगंधमरसंसर्वरूपःसर्वगंधःसर्वरसःअपाणिपादइत्यादिविश्वतश्चक्षुरित्यादिनिर्गुणश्चयःसर्वज्ञःसर्वशक्तिरित्यादिविरुद्धवाक्यानि।नहिवस्तुद्वैरूप्यंभवति।वाक्यद्वयमपिप्रमा

१ द्विरू

क॰२ णां तथा सति प्रमाणान्तरानुरोधेनैकस्य स्वार्थप्रामाण्यमन्यस्योपचरितार्थत्वमिति युक्तं॥ तत्र प्रत्यक्षानुरोधेन निर्णयो विचार्यते। तत्र पूर्वपक्षमाह। तदव्यक्तं तत् ब्रह्म अव्यक्तमेव न वित्तुमर्हति। कुतः श्रा
द्दिश्रुतिप्रसिद्धाभ्यां नेति नेत्यात्मा। अग्राह्यो न हि गृह्यत इति। [illegible] इति। न हि गृह्यत इत्यनुभवसाक्षिकं प्रमाणं श्रुतिराह। न हि केनचिदपि चक्षुषा मनसा वा ब्रह्म दृष्टमस्ति सर्वरूपत्वेन सर्वैरेव चक्षु
श्राव्येतु तस्मात्सर्वधर्मवत्त्वेन प्रतिपादकानामुपचरितार्थत्वमेवानुभवविरोधादित्येवं प्राप्ते॥ ॥अपि संराधने प्रत्यक्षानुमानाभ्यां॥ ॥अपीति पूर्वपक्षगर्हायां सर्वथा मूर्खः पूर्वपक्षवादी। यतः संराधने सम्प्र
क्सेवायां भगवत्तोषे ज्ञाने दृश्यते श्रद्धाभक्तिज्ञानयोगादवेहि यमेवैष वृणुते तेन लभ्यः भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतपेति। द्विविधमपि रूपं दृश्यते तत्र सकलं पश्य
ते निष्कलं ध्यायमानः। अनेकबाहूदरवक्त्रनेत्रं पश्यात्वां सर्वतोऽनन्तरूपमिति संराधकस्य स्वानुभवः। ध्रुवादीनामनुमापकत्वं च। तस्मात्प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यां वा ब्रह्म साकारमनन्तगुणपरिपूर्णं।
चेति नाव्यक्तमेवेति निश्चयः। अतो लौकिकालौकिकप्रमाणविषयत्वादुभयवाक्यार्थरूपमपि ब्रह्म॥ ॥प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्म्मण्यभ्यासात्॥ ॥पुनः प्रकारान्तरेण पूर्वोक्तमेवास्थिरी
कर्तुमधिकरणान्तरमारभते। तत्र सूत्रद्वयेन पूर्वपक्षद्वयमाह। ननु प्रत्यक्षानुरोधेनोभयविधवाक्यसमाधानं नोपपद्यते। वस्तुशक्त्यैव निर्णय उचितः न तु श्रुतिप्रसिद्धाभ्यां। यथा प्रकाशजलसुवर्णादी
नामनेकविधत्वं नाङ्गीक्रियते। सूर्यचन्द्रमणिप्रकाशादिषु उष्णशीतानुभवरूपस्पर्शाः प्रतीयन्ते। न हि तेजसि तावन्तः स्पर्शा अङ्गीक्रियन्ते। जले च हिमतप्तकुण्डादिषु तथा सुवर्णे वर्णभेदाः। न हि सर्वे स्वाभावि
काः तेजस्त्वादिस्वभावहानिप्रसङ्गात्। तथा ब्रह्मणोऽप्यवैशेष्यमङ्गीकर्तव्यं निर्विशेषं हि ब्रह्मेति सर्वप्रसिद्धिः चकारादेवं साधका। अग्राह्यो न हि गृह्यत इत्येवमादयः। ननूक्तं भक्तस्य तथा साक्षात्काराद्दृशा पा॰२
श्रुतेश्च [illegible] नैकविधत्वमङ्गीकर्तुं शक्यत इति नैष दोषः प्रकाशश्च कर्मणि तपःप्रणिधानादिकर्मणि भगवतः प्रकाशः तत्र यथा तेषां कामस्तथा प्रकटीभवति चकाराद् प्रकाशान्यथाप्रकाशो। तत्र हेतुः १२

२। अनंतेन।

अभ्यासादावृत्तेः यद्येकवारं प्रकटः स्यात् तदा तद्रूपत्वमंगीक्रियेत। पि प्रतिभक्तं प्रतिकर्मणाविर्भाविः। अतः प्रकाशोपि वृत्तिमयएव दीपप्रकाशवत्। अन्यथा सर्वदा स्यात्। तस्मात्तत्कृतत्वेन निर्ण
यः। अतोनंतेनतथाहिलिंगं॥ ॥फलितमाह॥ अतअभ्यासात् अनंतरूपेणाविर्भाविः। नह्येकंवस्तु प्रतिक्षणमन्यादृशंभवति निमित्तभेदव्यतिरेकेण क्वचिद्भक्तकामस्य निमित्तत्वेनप्रतीयते। नहि निमि
त्तभेदेनज्ञायमानंवस्तु भवति। किंतु तथामतिर्विपर्यय एवभवति। उक्तंचायमर्थः। यद्यद्धिया तउरुगाय विभावयंति तत्तद्वपुः प्रणयसेसदनुग्रहायेति। अतः कल्पाधत्वेनवा तथानिर्णयः कर्त्तुंशक्यः। त
स्मात्सर्वागोचरमेव ब्रह्मेत्येवंग्राह्यं। उभयव्यपदेशात्त्वहिकुंडलवत्॥ ॥तुशब्दः पक्षंव्यावर्त्तयति नैवंकेवलयुक्त्यालोकदृष्टांतेन निर्णयःशक्य नेकर्त्तुं अन्यथेदंशास्त्रंव्यर्थमेवस्यात्। अत्र हि वेदादेव
ब्रह्मस्वरूपज्ञानं तत्कथंस्वरूपशंक्या निर्णयः ब्रह्मतत्त्वं उभयरूपं उभयव्यपदेशात्। उभयरूपेण निर्गुणत्वेनानंतगुणत्वेन सर्वविरुद्धधर्मेण रूपेण व्यपदेशात्। नहिकथमेकंवस्त्वनेकधाभासते। तत्राह। ..
अहिकुंडलवत्। यथासर्पोनुस्यूतोनेकाकारकुंडलश्चभवति तथा ब्रह्मस्वरूपंसर्वप्रकारं भक्तेच्छयातथास्फुरति। कल्पनाशास्त्रे हीदंबाधकं अनेककल्पनागौरवंचेति। नह्येकेवलंश्रुत्येकसमधिगम्येन च शा
स्त्रवैफल्यं। एवंसाधनार्थत्वात् अत्रैव हि स्मरिष्यामो हादन्यशास्त्रोत्पत्तिः। अतः सर्वविरुद्धधर्माणामाश्रयो भगवान्। नहि प्रमाणसिद्धे दृष्टे अनुपपत्तिरस्ति यदर्थंयुक्त्यपेक्षा लोकेपि शरीरांतःकरणादौ निपर
स्परविरुद्धद्वयाधारकत्वादौ निर्विषयभेदेनेकस्मिन्क्षणे प्रतीयंते। तस्मात्सकलविरुद्धधर्माभगवन्त्येववर्त्तंते इति नकापि श्रुतिरुपचरितार्थेति सिद्धं॥ ॥प्रकाशाश्रयवद्वा तेजस्त्वात्॥ ॥धर्मरू
पविचारेण स्वैकिपक्षद्वयं स्थापयित्वमधिकरणारंभः। ननुधर्मानामके ब्रह्मणो भिन्नास्तत्कार्यरूपाः आहोस्वित् ब्रह्मैवेति संशयः। तत्र लोके कार्यस्यैव घटरूपादेस्तद्धर्मत्वात् समवेतत्वात्तन्नित्यतायां प्रमा
णाभावात् स्वाभाविकत्वमात्रेण नित्यत्वकल्पनायां गौरवापत्तेरेकमेवाद्वितीयमिति श्रुतिविरोधाच्च। धर्माः प्रपंचवत्कार्याः। तथासति ब्रह्म सर्वकल्पनारहितमेव सेत्स्यतीत्येवंप्राप्तेइदमुच्यते। प्रकाशाश्रय

वद्दा।वाक्याद्वःपक्षंसावर्त्तयति।यथाप्रकाशाश्रयाःसूर्यादयःप्रकाशेनानतिरिक्तापृथक्स्थितप्रभावात्समवेतत्वाच्च।मूलाविच्छेदरूपेणतदाधारतयास्थितत्वाच्चनापिसूर्यएवमित्रप्रतीते र्विद्यनत्वाच्च
र्तोद्दमेवतद्धस्तूत्पन्निसिद्धमितिमंतव्यंकल्पनायामपियथासूर्यप्रकाशयोःकल्पनाएवंब्रह्मधर्मयोरपि।नघन्यथावेदेप्रवृत्तिर्निबेधत्रोषलासत्यज्ञानानंतानंदपदानांसामानाधिकरण्यंवा
संभवतिलक्षणायांतुसुतरामेवधर्मापिज्ञाच्छनोविशिष्टपदार्थएवतात्पर्याद्वेदसिद्धइतिमंतव्यंतत्रहेतुःतेजस्त्वात्रेनःज्ञाह्त्वाच्यत्वात्बक्रुद्दश्यास्पर्शमेवहेतुरुक्तः।आनपादेधर्मत्वेनध
र्मित्वेनचप्रतीतेः।अपूर्ववदेवहृष्टत्वात्श्रुतत्वाच्चनधर्मेषपिश्रुत्यपेक्षातस्मात्सिद्धंयथाश्रुतमेवब्रह्मेति॥ ॥पूर्ववद्धा॥ ॥एकदेशिमतेनापिसर्वसमाधानमाह।अथवाअरूपवदेवहा
त्यादिपंचसूत्र्यायःसिद्धांतःकथितः।तादृशंवाब्रह्मप्रतिपत्तव्यं।अयमाशयः।वेदस्थापनार्थंहिप्रवृत्तिः।नत्रेणाक्षरमात्रस्यापिबाधोनभवतितथावक्तव्यंयद्धर्मिउभयरूपताअंगीकृता
तत्रधर्मिणःस्वरूपनिर्वाहार्थमवश्यंब्रह्मवैलक्षण्यमंगीकर्तव्यंतथासत्येकमेवाद्वितीयमितिबाधःप्रसज्येत।तथाचोत्पत्त्याविचारेनिर्द्धर्मकमेवसर्वंब्रह्मेतिप्रतिपत्तव्यं।उपपत्त्यापिविचारः
पूर्वानुरोधेनेवकर्त्तव्यः।तत्रधर्माणामपिब्रह्मत्वेएकविज्ञानेनसर्वविज्ञानमुपपद्यतेनान्यथा।ततश्चप्रथमंब्रह्मस्वधर्मरूपेणभवतिनदनुक्तियाद्विरूपेणचनावतैवसर्ववेदार्थसिद्धेःन
चजो।किंकायुक्तिस्तत्रापेक्ष्यतेयेनतादृशस्यकथंसर्वभावइतिपर्यनुयोगोभवेत्।धर्मकल्पनायामपिनैयानर्केणमतिरापनेयेतिसमानांउपपत्त्याचोपपत्त्याचविचारद्वयंउपपत्त्यापूर्वतनयनंस्वसिद्धांतःए
कदेशिनस्तद्विपरीतंउभयमपिसूत्रकारस्यसंमतमिति॥ ॥प्रतिषेधाच्च॥ ॥एकदेशिमतेउपपत्त्यंतरमाहएकमेवेत्यत्रकाप्यनरद्वितीयमितिद्वितीयंप्रतिषेधतिम एवकारेणैवसिद्धोव्यर्थःसद्धर्म पा॰२
निषेधमपिसंयतिएतत्तेनिवचनानन्युत्पत्तिः।चकारादेकविज्ञानेनसर्वविज्ञानोपक्रमःपरिगृहीतःतस्मात्तब्रह्मणिकश्चिद्विरोधइतिसिद्धं॥ ॥परमतःसेतून्मानसंबंधभेदव्यपदेशेभ्यः॥ ॥धर्मिधर्मवि ९३

च

रोधः परिहृतः धर्म्मान्तरविरोधपरिहाराय धर्ममधिकरणमारभन्ते। तत्र पूर्वपक्षमाह। परमतः अतोपि ब्रह्मणः परमन्यदुत्कृष्टं फलमस्ति। तत्र वैदिकहेतवः। सेतून्मानसंबंधभेदव्यपदेशेभ्यः। य
द्यपि समन्वय एवैते दोषाः परिहृताः तथापि स्वरूपविरोधपरिहारप्रस्तावात्पुनरुच्यन्ते। सर्ववाक्यप्रतिपाद्यमेकमेवेत्यपि न सिद्धं एतैर्हेतुभिः परिच्छेदेन धर्मिभेदे सिद्धे न सर्वाधिकरणं सिद्धं
त विरोधः। ननु समन्वयेन ब्रह्मत्वं उत्तरपादेनैक्यं सर्वाधिकरणेनाविरोध इति व्यर्थमिदमधिकरणमिति चेत्। न। अर्थबलविचारोयं समन्वये चोत्तरपादे च शब्दबलविचारः। धर्मिविचारात्र
भ्या ४ पूर्वेण गतार्थत्वं फलतः साधनैश्च प्रमेयाच्च प्रमाणतः। विचारेण बृहत्त्वं चेत् कोन्यः साधयितुं क्षमः। अतो हेतून् बाधकानाह। एकदेशाबाधकत्वात्। तत्र फलतो बाधहेतुमाह। सेतुव्यपदेशा
त्। अथ यच्चात्मा स सेतुर्विधृतिरिति दहर उत्तरेभ्य इत्यत्र ब्रह्मत्वमस्य सिद्धं। अथ य इहात्मानमनुविद्य व्रजन्तीत्युपक्रम्य सर्वेषु लोकेषु कामचारो भवतीत्फलकथामनुपपाद्य ज्ञानस्य व
त- धानं ज्ञानप्रशंसार्थमुक्ता ज्ञानानन्तरं संसारसंबंधाभावाय सेतुत्वं वदति पापाद्वितरणार्थं यस्यैरतितस तास्तु दोषा गच्छन्तीति च अतः संसारफलयोर्मध्ये विद्यमानत्वान्नीरस्यैव फलत्व
वणात् फलरूपं वस्तु किंचिदन्यदस्तीति ज्ञायते। निधित्वेन फलवचनमवान्तरफलपरं भविष्यति एतमानंदमयमात्मानमुपसंक्रम्येत्यत्रोदाहरणं। तथा उन्मानव्यपदेशात्। तत्रैव यावा
न्वा अयमाकाशस्तावानेषोन्तर्हृदय आकाश इति साधनयुक्तिप्रमेयानुमानेन परिच्छेदं निरूपयति दृष्टान्तदार्ष्टान्तिकत्वेन ज्ञानं साधनं तत्र बहिरेकाकाशज्ञानमपि साधनं भवतीति चतुष्पाद्ब्रह्म
भूतादिपादाश्चतानव्याः। तथा संबंधव्यपदेशात्। तत्रैव प्रमेयनिरूपणप्रस्तावे उभावस्मिन्नित्यादिना आधाराधेयसंबंधो निरूपितः अत्र च वस्तुपरिच्छेदो निरूपितः। प्राज्ञेनात्मना संपरि भा
ष्वक्त इति च। तथा भेदव्यपदेशात्। य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते य एषोन्तरक्षिणि पुरुषो दृश्यते। इत्यत्र स्थानद्वयस्थितयोः पुरुषयोः परस्परं धर्मातिदेशमाह। अक्षिस्थितनिरू

४४ अयुक्तमित्याशंक्य दृष्टांतमाह। यथा सेत्वादीनां पादत्वज्ञा॰

अ३० २ पक्रम॥ तिदेशः प्रमाणमिति धर्म्मातिदेशस्तु स एवायमिति। वदेतुच्यते देशकालवस्तुस्वरूपपरिच्छेदाच्च विधिपरिच्छेदः। इति मन्य। किंचिदस्तीति प्रतिपत्तव्यमित्येवं प्राप्ते॥ ॥सामान्यात्तु॥ ॥उत्राह:
१४ पत्त्वं व्यावर्त्तयति। समानस्य भावः सामान्यं सेत्वाकाशादिशा दृष्टान्तधर्मातिदेशार्थमुच्यते न तु तत्कृतं दोषमपि कल्पयंति। संसारसागरोत्तरणोपायत्वात् सेतुत्वं निर्लेपायाकाशत्वं कामादिभि
र्दोहाय चतुष्पात्त्वं अमृतत्वाय षोडशकलत्वं चतुर्लब्धत्वाय संबंधः। द्विमत्त्वाय धर्मातिदेशाः उक्तं उपायिनामयने मासाग्निहोत्रवत्गुणार्थमेव वचनं न दोषार्थमिति। ननु तोन्यशंकाउमादनी
यात स्मात्पूर्वोक्तो दोषाः॥ ॥बुध्यर्थः पादवत्॥ ॥अन्यसमानधर्मवत्त्वं कुत्रोपयुज्यत इत्यत आह। बुध्यर्थः तथा व्यपदेशो बुध्यर्थः बुद्धिरेव प्रयोजनं यस्य। तथोपासनार्थं तथा तत्र तु एव
त्वेन ज्ञानार्थं स्वधर्मप्रशंसार्थमेव मुच्यते॥ ॥स्थानविशेषात्प्रकाशादिवत्॥ ॥ननु स एवायमित्यतिदेशे [illegible] पितया बुद्धिः संपद्येते वेति व्यर्थो धर्मातिदेश इत्याशंक्य तथोक्ते पि समानधर्मत्व
व ज्ञानाभावे हेतुमाह। स्थानविशेषादिति। धर्म्यैक्येपि स्थानविशेषप्राप्यान समानधर्मत्वं दृश्यतेऽन्यत्रेत्य[illegible]चापि नत [illegible] पान्वमायास्पतीत्यतिदेशो धर्माणामपि कृत इत्यर्थः। अस्मिन्नर्थे दृष्टांतमा
मा ह। प्रकाशादिवदिति। यशादित्यगतं तेजन इति वाक्याशादिस्य चंद्राग्निगततेजसामैक्येपि न स न प्रकाशत्वं यथा तथात्रापीति ज्ञानसंभवादित्यर्थः। आदित्यपदादेकस्यैव कालस्य यथोपाधि विशे
ष संबंधाद्व्रायणात्वा द्युत्तमधर्मवत्त्वं तद्विपरीतधर्मवत्त्वं तथेसपि संगच्छते॥ ॥उपपत्तेश्च॥ ॥किंच। सम्यज्ज्ञानायुक्तधर्मविशिष्टब्रह्मणोऽन्य उत्तमोस्तीति वदतां तत्रैतत्कृष्टधर्मवत्त्वं वाच्यं॥
तच्चाशक्यं। प्रमाणाभावात् साम्येपि तया विशेषाभावो हेतुरुक्त इति विरोधश्चा तस्मादितः परस्यानुपपन्नत्वादुक्तरूपमेव परमकाष्ठापन्नं वस्त्वित्युपपद्यत इत्यर्थः॥ ॥तथान्यप्रतिषेधात्॥ ॥यथासे॰ पा० २
त्वादयः श्रुत्युक्तास्तथैव नत श्रस्त्वाप्यधिकस्य हेतुपत इतिस्मृत्यैव ततोधिकस्य प्रतिषेधात्त्वयाप्यस्मदुक्त एव मार्गोऽनुमन्तव्य इत्यर्थः। अवतारकाले पूर्वस्वच्छ रूपाविर्भावि मकृत्वा पश्चात्तदाविर्भावे कृतेन्नोका १४

१ पूर्वविस्थानो

नां भगवत्येवाधिकरणमिव घ्नतीनं भवतीत्यभिप्रायेणान्यपदोपादानं॥ ॥अनेनसर्वगतत्वमायामशब्दादिभ्यः॥ ॥प्रकरणमुपसंहरन्फलितमर्थमाह।अनेनसेत्वादिव्यपदेशानांमुख्यार्थकत्वमि राकरणेनव्यापकत्वंब्रह्मणःसिद्धमित्यर्थइतिकेचित्।तन्न॥ जन्माद्यस्ययतइत्यादिनासर्वदेशागतकार्यकर्तृत्वमुक्तमितितेनैवव्यापकत्वस्यसिद्धत्वात्।नचाविरोधसाधनप्रकरणत्वात्पूर्वमि दंसर्वगतत्वमनेनोक्तंयेनकृत्वासेत्वादिवाक्यैःसममविरुद्धमित्यर्थमितिवाच्यं।अग्रिमपदवैयर्थ्यापत्तेरितिचेत्॥ ॥अत्रेदंहृदयं॥ ॥नोक्तकर्तृत्वेनव्यापकत्वमेकान्ततोब्रह्मणिसेद्धुंशक्नोति।यो गसिद्धस्यश्रवणादिवत्परिछिन्नेनाप्यनेकदेशागतकार्यकरणसामर्थ्यविशेषस्यवक्तुंशक्यत्वात्।अन्यथापूर्वसिद्धव्यापकत्वविरोधेनसेत्वादिव्यपदेशैःपरिछिन्नत्वेनब्रह्मणोऽन्यस्यपरत्वंनशंके त।विरोधपरिहारायत्तुसर्वोऽप्यात्मविरोधइतिवदेत्।तस्मादेवंसूत्रार्थोज्ञेयः।अनेनब्रह्मणोऽन्यस्यपरत्वनिरासेनायामशब्दादिभ्योव्यापकत्ववाचकश्रुतिवाक्यादिभ्यःसाक्षात्सर्वगतत्वप्र तिपादकेभ्यएवसर्वगतत्वंसिध्यतिनतुगौतमीयानामिवकर्तृत्वाद्यनुपपत्त्येत्यर्थः।तेचशब्दाःआकाशवत्सर्वगतश्चनित्यःज्यायान्दिवोज्यायानाकाशात्वृक्षइवस्तब्धोदिवितिष्ठत्येकस्तेनेदंपू र्णंपुरुषेणसर्वमित्यादयः।आदिपदात्सर्वतःपाणिपादंतत्सर्वतोऽक्षिशिरोमुखं।सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठतीत्यादिस्मृतयःसंगृह्यंते।अनेनब्रह्मणिश्रुतिरेवमुख्यंप्रमाणमनुमानंतु विलंबोपस्थितिकत्वेनसाध्यसिद्धिपराहतमपीच्छाविशेषेणजननीयंचेदनुच्चयत्वमात्रंपर्यवशिष्यतीतिभावः॥ ॥फलमतउपपत्तेः॥ ॥एवंसर्वोत्तमत्वनिरूपणेनोत्तमाधिकारिणांभजनीयत्वप्रयो जकंरूपमुक्त्वातदितराधिकारिणांतदाह।तेहिफलप्रेप्सवएवभजिष्यंति।नचफलदातृत्वएवसंभवतीतितदाह।अतःईश्वरादेवफलंभवँतिर्वस्तुमात्रेशिष्टत्वमसंकुचितमाह।नह्यन्यस्यवस्त्वन्योदातुंसम र्थोनोभगवानेवतथेत्यर्थः।केचित्त्वत्रैवकर्मणस्तत्कार्यस्येश्वरस्यचफलदातृत्वमाशंक्यतच्चानुपपन्नमित्रोपपत्तित्वेनव्याकुर्वंति।तन्नग्रेजैमिनिमतोपन्यासस्वमतोपन्यासाभ्यांव्यासएवव्यक्तीकरिष्य

ति।यत्किंचिद्देहिकृपारत्नौकिंकंवा।कुतःउपपत्तेः।सर्वस्यवशीसर्वस्येशानइतिश्रु

मा

रा

चि

रा२

नान्यथुनैवाप्राप्तनिराकरणमग्रिमसूत्रद्वयवैयर्थ्यंस्यादितिचिंत्यं॥ ॥श्रुतत्वाच्च॥ ॥पूर्वसूत्रेणश्रुतमीश्वरस्यफलदातृत्वमुपपत्तित्वेननिरूपितं।इहत्वसाक्षाच्छ्रुतिमेवफलदातृत्वबोधिकांप्रमाणयति।सचसवाएषमहानजआत्मान्नादोवसुदानइत्यादिरूपा।चकारात्सुखंदुःखंभवोभावइत्युपक्रम्यभवंतिभावाभूतानांमत्तएवपृथग्विधाइत्यादिरूपास्मृतिःसंगृह्यते॥ ॥धर्मंजैमिनिरतएव॥ ॥अत्रकर्मवादीप्रत्यवतिष्ठते।ननुकर्मणएवफलमितिपक्षेप्युपपत्तिश्रवणेतुल्ये।तथाहि॥ ॥ईश्वरवादिनापिकर्मनिरपेक्षेणतेनफलमितिनवक्तुंशक्यंविधिवैयर्थ्यप्रवृत्त्यनुपपत्तिप्रसंगा त्।तत्सापेक्षत्वेतदेवास्तुकृतंतत्सापेक्षेणतेन।नचाचेतनंचेतनाधिष्ठितमेवकार्यक्षममितिकेवलेनतेनफलंसंभवतीतिवाच्यं।कर्मस्वरूपंस्वर्गादिकंचनलोकसिद्धं।किंतुश्रुतिसिद्धं।तत्रचस्वर्गादिफलसाधकत्वेनैवोत्पत्तिवाक्येष्वर्थवादेषुच।अग्निष्टोमेनस्वर्गकामोयजेत।अग्निहोत्रंजुहोतिप्रजाकामइत्यादि।दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतपरमेष्ठिनोवाएषयज्ञोग्रआसीत्तेनसपरमांकाष्ठामगच्छदित्यादिषुकर्मश्रूयते।सचतत्साधनत्वेनैव।एवंसतिलोकेयथादृष्टंतथैवधर्मिग्राहकप्रमाणेनतथैवसिद्धत्वान्नात्रकाचनशंका।ईश्वरवादिनोनित्यज्ञानादिमत्वईश्वरस्यामुष्मिकफलत्वेनतत्प्रतिबंधकापगमेभवतीत्यावश्यकल्प्यं।तस्याशुतरविनाशित्वेपिश्रुतिसिद्धकारणतानिर्वाहायतद्व्यापारोऽपूर्वंकल्प्यते।अविषमादीश्वराद्विषमफलोत्पत्त्यनुपपत्तिर्वैषम्यनैर्घृण्येचस्यातामतःकर्मएवफलमितिजैमिनिर्मनुते॥ ॥पूर्वंतुबादरायणोहेतुव्यपदेशात्॥ ॥तुशब्दःपूर्वपक्षव्युदासार्थः।बादरायणआचार्यस्त्वितःपूर्वोक्तमीश्वरमेवफलदातृत्वेनमनुते।कुतःहेतुव्यपदेशात्।हेतुत्वेनश्रुतौव्यपदेशादित्यर्थः।एषह्येवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतएषउएवासाधुकर्मकारयतितंयमधोनिनीषतइतिश्रुतौनकेवलंकर्मकारयितृत्वमुच्यतेऽपितुफलदित्सयातयातयातथात्वमतःफलदातृत्वमीश्वरस्यैवव्यपदिष्टंभवतीतिनानुपपत्तिःकाचित्।नत्वीश्वरस्यस्वतःफलदानेसमर्थस्यफलदित्सायांसत्यांकर्मकारणेकोहेतुःकार्यवैचित्र्यं

रा

पा॰२

२५

त्रि

भाष्यार्थं

वकथमित्यादि चोद्यं कृतमुपपत्त्यापि हस्तं विहितप्रतिषिद्धत्वेयप्यादिन्यदत्यत्र निरस्तं। विद्वन्मंडने श्रीविठ्ठलेनेन च। अतः सकामैरपि स एव भजनीयो नान्य इति सिद्धं॥ ॥८॥ ॥इति श्री
वेदव्यासमतवर्त्तिश्रीवल्लभदीक्षितविरचिते ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य द्वितीयः पादः॥ ॥सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात्॥ ॥पूर्वपादे जडजीवधर्मनिराकरणेन शुद्ध।
सच्चिदानंदविग्रहरूपत्वं ब्रह्मणो निरूपितं। इह तु ब्रह्मगता एव धर्मा विचार्यंते। ते वेदेकस्मिन्वाक्य एव सर्वे पठिता न वेयुस्तदा न विचारणीया। न चेयुर्विरोधाभावात्। पठिताश्चेत्तत्तदुपास
नप्रकरणेषु क्वचित्त्र एव क्वचिद्भिन्नाः पाठा वाजसनेयिनः पंचाग्निविद्यां प्रस्तुत्य षष्ठमन्यमग्निं पठंति तस्याग्निरेवाग्निरिति। छंदोगास्तु पंचसंख्ययैवोपसंहरंति। अथ य एतानेवं पंचाग्नीन्वेद
ति। तथा प्राणसंवादे मुख्यप्राणादन्यांश्चतुरः प्राणांश्चाक्षुस्त्वक्श्रोत्रमनांसि पठंति। वाजसनेयिनस्तु तमपि पंचमं पठंति॥ अपरं च॥ ॥अथर्वोपनिषत्सु क्वचित्कोकनदं राकाननं संचरञ्जो
परूपमनल्पकल्पद्रुमप्रसूनविरचितविचित्रस्थलीककालिंदीसलिलकल्लोलसंगिमंदतरपवनचलदलकविराजमानगंडमंडलद्युतिमंडितकुंडलप्रभानुभावितवामांसमिलन्मृदुस्मितम महा
णिकमुरलिकामुखावली मिलदंति नरलकरकमलयुगलांगुलीवर्ग्यांवदविविधस्वरमूर्छनामोहितव्रजवरनितंबिनीकदंबकराहं कुवलयार्चितं। क्वचित्कोदंडमंडितभुजदंडखंडितप्रचंड
रक्षोमुंडमति विचित्रचरित्राभिरामं रामस्वरूपं। क्वचिद्दतिकरालवदनविन्यासितकमलाकमलासनवृषवाहनादिकं नृकेसरिरूपं। क्वचिदुरुक्रमादिरूपं च निरूप्यते ते। तथा च श्रुत्यर्देव
ताभेदाद्यागभेदवदुपास्याभेदादुपासनाभेदे वा पाठोद्धपाप्यांतरधारपफलभेदाच्च वेद्यभेदे प्राप्ते ब्रह्माभेदे कृत्वा पत्रे श्रुतिविरोधादि निगमकाभावात्सर्वेषामुपासनाविषयाणां ब्रह्मत्वमापतितं। तद्रूपास रं
नाविषयाणामोपाधिकत्वात्तेषां चाविद्याकल्पितत्वात्तद्विशिष्टानां तथात्वं युक्तमेव न त्वेवं तन्निरूपकाणां वेदांतानां ब्रह्मपरत्वभंगः। शुद्धस्य ब्रह्मणो ज्ञेयत्वेनोपाधिविशिष्टोपास

न्नया चित्तशुद्धौ सत्यां स्वत एव तज्ज्ञानं भविष्यतीत्येतत्तात्पर्यकत्वादिति चेत् । मैवं । समन्वयविरोधापत्तेः । तामां ब्रह्मविद्यां च हाने श्रुतेः प्रतारकत्वापत्तेश्च । अपरं च । योन्यथा संतमात्मा॰
नमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणेत्यन्यथाज्ञानं निंदती श्रुतिः कथं फलसाधकत्वेन तदुपासनं वदेत् । स्पष्टार्थानां श्रुतिवाक्यानां निर्णयमकृत्वा संदिग्धार्था
नां ज्योतिराकाशादिशब्दानां तद्वाचकत्वेन निर्णयाद्भगवान्व्यासः एवं च सत्फलकत्वात्यागवत्तेषां परस्परं भेदश्चावश्यक इत्याशयतः पादारब्ध इति शास्त्रेभिधीयते । सर्ववेदांतप्रत्ययं
अनेकरूपनिरूपकैः सर्ववेदांतैः प्रत्ययो ज्ञानं यस्य तत्तथा । ब्रह्मणोनंतरूपत्वेपि यानि यानि रूपाणि विविधैर्जीवैरुपासितुं शक्यानि तानि रूपाणि तैस्तैर्वेदांतैर्निरूप्यंत इति । तावद्रूपा॰
त्मकमेव ब्रह्मेत्यर्थः । तत्र हेतुश्चोदनाद्यविशेषादिति । चोद्यते कर्तव्यत्वेन बोध्यतेऽनेनेति चोदना विधिवाक्यमिति यावत्तस्या अविशेषादित्यर्थः । यथैकस्मिन्नग्निष्टोमे शाखाभेदेपि चोदना तथै
वमेवत्यग्निष्टोमेन यजेतेति तथेहापि सर्वेष्वपि वेदांतेषु ब्रह्मत्वेनैवोपासना विधीयत इति तथा । आदिपदात्साक्षात्परंपराभेदेन मोक्षफलकत्वकथनमप्युपासनानामविशिष्टमिति प्रयोजन॰
संयोगः संगृह्यते ॥ ॥भेदान्नेति चेदेकस्यामपि॥ ॥ननु द्रव्यदेवताभेदाद्यागभेदवदुपास्यानां धर्मभेदेन मिथो भेदादुक्तहेत्वसिद्धिं भेदान्नेति चेदित्यनेनाशंक्य तत्परिहारमाह सूत्रकार एक
स्यामपीति सूत्रावयवेन । यथैकस्यामपि गृहीतषोडशिकायामतिरात्रव्यक्तावगृहीतषोडशिकायाः सकाशाद्गुणाधिक्येपि नातिरात्रत्वयागत्वमतिरात्रत्वलक्षणकर्मैवाधिकृत्य [redacted] न ग्रहणायोर्विधानादेवमिहापि ब्रह्मैवाधिकृत्य तत्तद् पा॰२
र्वैशिष्ट्यावैशिष्ट्ययोरुक्तत्वान्न ब्रह्मोपासनाभिन्नत्वमुपासनानां । तथा च ब्रह्मत्वेनाभेदस्य विवक्षितत्वादुक्तहेत्वसिद्धिरेवं सति यथैकस्मिन्नुपास्ये रूपेऽन्यस्माद्रूपादधिकगुणा उक्ते १६

ग्रहण

नेतत्र तेषामुपसंहार उचित इति भावः। अत्रायं विशेषो ज्ञेयः। उपासनाविषयेष्वखिलेष्व विशिष्टं ब्रह्मतत्त्वं ज्ञात्वा तेष्वेकतरं रूपं य उपास्ते तस्य तत्र सर्वे गुणा उपसंहर्त्तुमुचिताः। यस्त्वनंतेष्व विभूतिरूपेषो
मित्यक्षरादिष्वो। मित्येतदक्षरं ब्रह्मेति ज्ञात्वोपास्ते तस्य शाखांतरीयाण्यप्येतदक्षरोपासनप्रकरणोक्ता एवोपसंहर्त्तव्या नान्ये। तद्रूपमधिकृत्यैव तेषां गुणानां कथनादन्यथा। तिप्रसंगादियं तद्रूपासन
भागरेयाव्यवस्थोक्ता। भक्तिमार्गीया त्वेतद्विलक्षणा साग्रे वाच्या। नन्वग्निष्टोममेवोद्दिश्य यावंतो धर्मास्तैत्तिरीयके पठ्यंते न तावंतो वाजसनेयके। तथा च त्वदुक्तरीत्या वाजसनेयिनां तद्धर्मोपि
संहारोपि न्याय्यो न वेत्यत्रत्वेवंसः। शिष्टाचारादिविरोधात्तथा पंचाग्निविद्यामेवाधिकृत्योक्तोपि षष्ठोग्निर्न छंदोगैः शक्यत उपसंहर्त्तुं। तथैवाथर्वणिके नैकस्मिन्नपि रूपांतरधर्मा इति प्राप्त उत्तरं प
ठति॥ ॥स्वाध्यायस्य तथात्वेन समाचारेऽधिकाराच्च सववच्च तन्नियमः॥ ॥स्वाध्यायो वेदः स एकमेव कर्म शाखाभेदेन भिन्नभिन्नप्रकारकं बोधयतीति तत्स्युक्तः सम्प्रयुक्तेग्निष्टोमादिलक्षण
आचारे तत्तदंगाचारनियमोऽन्यूनानधिककरणलक्षण इत्यर्थः। तावद्भिरेवांगैर्यागसंपत्तेरधिककरणस्याप्रयोजनकत्वात्। तावतामेवांगानां करणं। ननूक्तं तद्धर्माणामप्युपसंहारस्त्व
दुक्तरीत्या संभवतीत्यत आह॥ ॥अधिकारादिति॥ ॥सर्वेषां शाखिनां स्वस्वशाखोक्तकर्मण्येवाधिकारो न परशाखोक्तेप्यतोपि तथा नियमः। चकारात्स्वशाखोक्तात्कर्मणोतिरिक्त
त्करणे न्यूनकरणे च यदस्य कर्मण इत्यादिप्रायश्चित्तश्रवणमपि तन्नियमे हेतुः समुच्चीयते। अत एव क्वचित्परशाखोक्तमपि व्यवस्थितविकल्पविषयत्वेन कल्पसूत्र उच्यते। विकल्पे तूभयस्या
ऽशास्त्रार्थत्वमुपसंहारे तूभयस्यापि शास्त्रार्थत्वमतोपि नात्रोपसंहाराशंका। अत्र दृष्टांतमाह सववदिति। यथा सवा होमाः सप्तसूर्यादयः शतौदनपर्यंता वेदांतरोदितत्रेताग्न्यनभिसंबंधादथर्वणो
दितैकाग्निसंबंधाच्चाथर्वणिकानामेव कार्यत्वेनैयम्यं तेन तथा तत्तच्छाखायास्तथात्वात्तत्तदुक्त एव कर्मणि तत्तच्छाखिनामधिकाराच्च स्वस्वशाखोक्तादन्यूनानतिरिक्तकर्मकरणनियम इत्यर्थः।

नि

स

२ ।प्रकृते।पि यद्रूपोपासनाप्रकरणे यावंतो धर्मा ज्ञातास्तस्मिन्नुपितावद्धर्मवत्त्वेनैवोपासना कार्या यानि शोधकप्रमाणान्तरोधान्तनुरूपांतरोपासनप्रकरणोक्तास्साधारणधर्मवत्त्वेनापि।तदुपासति
मत्स्योपासकस्य चापत्रारादिकमपि भावनीयं स्यात्तद्रूपरूपोपासकस्य च लक्ष्ययोजनायामश्वंगादिकं।न च एवं गोपनिषत्सु श्रीरामोपासनायां यो वै ये मत्स्यकूर्माद्यवताराभूर्भुवःसुवस्तस्मै
वै नमो नमः इति वाक्येन तदितरावताररूपत्वमुच्यते तेनैन तद्धर्मवत्त्वमप्याक्षिप्यते।सत्यमाक्षिप्यते तद्धर्मवत्त्वं तत्रायमभिसंधिः।परमकाष्ठापन्नं ब्रह्मस्वरूपमिदमिति ज्ञात्वा उपासना कार्या।तेनैनतस्मै
नास्येवतारास्तत्रूपेणानाभिता।निकर्षेऽपि यमेवकृतवानिति ज्ञेयं परंतु तस्मिन्नेवरूपेऽन्यावतारधर्मवत्त्वमपीति।तथा च तस्मिंस्तस्मिन्नवतारे तत्तद्धर्मवानिति श्रुत्याबोधनेन तु सर्वत्रेति।तच्च बाध
कमुक्तमेव प्राणाद्युपासनास्वेतावाचित्रोषोयथा कर्मण्यपि तिरेके प्रायश्चित्तश्रवणं बाधकं श्रीरामस्वरूपाद्युपासनासु चतेनावतारेण कृतकर्मणस्तत्रभावनेऽपराधो बाधको योऽन्यथा संतमात्मा
नमित्यादिवाक्यं च न तथा प्राणाद्युपासनास्वधिकगुणस्येतरत्रोपसंहारे।किंचिद्बाधकं दृश्यत इति स कर्तुश्राक्यत इति।ननु पुरुषादिरूपस्य विग्रहस्यैव षड्ब्रह्मत्वादयमेवावतारांतरेष्वपि लीलाक
र्तेति ज्ञानमनुपपन्नमिति चेन्नैवं।। ।।धर्मिग्राहकमानेनैकस्यैव ब्रह्मद्वस्यैवानंतरूपत्वेन सिद्धत्वात्।वस्तुन एव तथात्वात्तत्का चिंता।यथैकस्यैवान्योन्याभावस्यानंतप्रतियोगिकत्वरूपत्वं तावत्प्रतियोगि तभा
कात्यंताभावरूपत्वं चाभावप्रतियोगिकान्योन्याभावात्यंताभावरूपत्वं चाभावाभावरूपत्वेऽप्यभाववत्त्वमेव चांगी।क्रियते तेन यथेहाप्युक्तस्वभावत्वस्याप्रयोजकत्वात् धर्मिग्राहकमानस्यैव तथात्वात्।तच्चैतेत्ति
रीयोपनिषत्सु।अतः परं नान्यदणीयसं हि परात्परं यन्महतो महांतं।यदेकमव्यक्तमनंतरूपं विश्वं पुराणं तमसः परस्तात्।इत्यादिश्रुतिरूपं प्रसिद्धमेव।अपरं च।। ।।सर्वासामुपासनानां हि ब्रह्मविज्ञानसा
धनत्वेन श्रुतौ निरूपणं क्रियते।यत्प्रकारिकोपासना विज्ञानहेतुः स प्रकारश्च निरूप्यते।एवं सत्येकस्यां शाखायां कतिपयगुणनिरूपणं तदितरस्यां शाखायां तदतिरिक्तानामपि गुणानामित्यचको १७

हेतुरिति पृच्छामः। उपसंहारेणाभिमनिरूपणे हेतुं चेद्ब्रवीषि न च वदामः। एवं मतिस्तून्गुणनिरूपिकाश्रुतिः स्वोक्तानपि गुणान्न वदेत्। तथा हि। उपासनानां फलकत्वस्य निर्णीतत्वात्तस्य चैकज्ञानीयत्वाद्भूटवच्छ्रुताशेषसाधनसाध्यत्वादशेषन्निरूपिके वक्ष्ये निर्निरूपयेदन्यान्युपासनायानामोक्षोपासीनेन्येतावद्देववद्देगुणानाक्षेपलभ्यत्वान्न वदेत्। उपसंहार्यानपि वा वदेत्। निरूपयति च गुणान्नोपसंहार्यान्हि। न च स्वस्वशाखामात्राध्येतॄणामुपासनासिध्यर्थं सर्वशाखास्थोपासनप्रकारोक्तिरिति वाच्यं। परशाखास्वाऽज्ञानेन तदुक्तगुणोपसंहारस्याप्यसंभवेनोपासनाया एवासंभवापातात्। तस्मात्स्वस्वशाखोक्तप्रकारिकोपासनायामेव सर्वेषामधिकारान्न येव ब्रह्मविज्ञानं भवति। तैत्रिरीयाणां वाजसनेयिप्रभृतीनां चाग्निष्टोमसंपत्त्या स्वर्ग इव। प्रकृते ब्रह्मैक्यानन्त्र द्वितानं ब्रह्मविज्ञानमेव। न हि रूपरसगंधादिमत्त्वानुविद्धरूपभेदेनैकस्यैव वैकैकप्रकारकं यद्ज्ञानं न तद्ज्ञानं। एतेनानंतधर्मवत्त्वं ब्रह्मणो ज्ञापितं। तदुक्तं। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति। अत्र स्वाभाविकीति विशेषणेंदविद्याकल्पितत्वंशंकीनां निरस्तं। केचित्त्वाथर्वणिकानां विद्यां प्रति शिरोव्रतापेक्षणादन्येषां तदनपेक्षणाद्विद्याभेद इति प्राप्त उच्यते। स्वाध्यायस्यैष धर्मो न विद्यायाः। कथमिदमवगम्यते यतस्तथात्वेन स्वाध्यायधर्मत्वेन समाचारे वेदव्रतोपदेशान परेग्रंथ्य आथर्वणिका इदमपि वेदव्रतत्वेन समामनंति नैतदचीर्णव्रतोऽधीत इति चाधिकृतविषयादेतच्छब्दादध्ययनशब्दाच्च स्वोपनिषदध्ययनधर्म एवैष इति निर्धार्यते। तस्मादनवद्यं विद्यैकत्वमिति सत्यार्थं वदंति। स चिंत्यते॥ न तस्य विद्याधर्मत्वं विद्याभेदकं॥ ॥उक्तन्यायेनान्यत्रापि तदुपसंहारस्य वक्तुं शक्यत्वात्तान्न चानुपसंहार्यमेवातद्धर्मत्वं बोध्यत इति वाच्यं। उपक्रमोपसंहाराभ्यां विद्यैकत्वनिर्णयस्यैव दृश्यमानत्वादपेक्षसद्भावाति। ननु तदुक्तिर्यथा तथास्तु च श्रुत तद्धर्मत्वबाधनस्मादुपसंहारार्थकत्वेकानुपपत्तिरिति चेत्॥ ॥उच्यते॥ ॥स्वशब्दस्य तदुक्तार्थत्वे हि तत्रान्यार्थकल्पना स एव च न साधीयान्॥ ॥तथा हि॥ ॥स्वाध्यायोऽध्येतव्य इत्यादिषु स्वाध्यायशब्दस्य वेदवाचकत्वं

त्वी

४ तेनिर्दूरःसंभवति।किंच।ब्रह्मणोनिरवयवत्वेनै ×४

गु०२ प्रसिद्धं समाचारत्वात्तस्य विहितक्रियावाचकत्वं च। तत्रोभयोरपि मुख्यो योर्थो न लभ्यते तस्मिन्संभवति तदा धस्त्वयुक्तः।। किंचैवं। तत्त्वग्निष्टोममेवेत्यादिरूपेत्यादिनोक्तत्वं कायार्थ्यं निदग्निरिति।। न च थ
१० र्वणोपनिषत्सु पठ्यते महोपनिषदि चाङ्गयोनिः सोवतारणां मध्ये श्रेष्ठोवतारः कोन्न विनायेन लोकाः कृष्णादेवास्तु एवं नवं नियं संसृत्या मुक्ताश्चस्मात्संसारादेवं नि कथं चास्यावतारस्य ब्रह्मता न भवति।
महोवाचनत्त्रंरिनारायणोदेव इत्युपक्रम्य मधुरास्वरूपं निरूप्य निगद्यते यत्रासौ संस्थितः कृष्णः स्त्रीभिः शक्त्या समाहित इति तेनास्यावतारस्यान्योषावताराणां मध्ये श्रेष्ठ्यं निरूप्यते श्रीभागव
ते पि च। एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयं मिति गीयते। एवं कैकरीत्या त्वमर्वत्वस्यतापनीयत इति नैकं स्यांशित्वमन्येषां नंदं शत्वमित्यपि वक्तुं शक्यमिति। प्राप्ते त्रिधी मते। सत्त्वं यस्य प्रिया
मूर्त्तिः विशुद्धसत्त्वं तव धाम शांतमित्यादिवाक्यैः प्राकृतो भगवत्स्वान्तः सत्त्वनामा भगवद्धर्मरूप एव कश्चनास्ति या दृशेन रूपेण भगवान्कार्याणि करोति यस्मिन्यस्मिन्नवतारे स सोंश इत्यु
ह च्यते तेन तत्र हि विग्रहस्तत्राविर्भूतं वस्तु स स्वरूपं च प्रतीयते विग्रहस्य सत्त्वात्मकत्वेन धर्मरूपत्वात्तु तत्राविर्भूतस्यैव ब्रह्मत्वात्स्वमुदितस्यावतारत्वेनगणनात्तत्रैकस्यैवांशत्वस्य तद्रूपत्वं यत्त देवांशत्वं। यत्रा
७ तो०९ - धिष्ठानमनपेक्ष्य स्वयमेव शुद्धसाकारं ब्रह्माविर्भवति न कार्यमस्य संपूर्णो भगवानुच्यते देशमे स्थामत एव सर्वतः पाणिपादांतत्वं स्व स्मिन्स्फुटं तापयितुं लोकादिभावेनाविर्भूव। तेन यादृग्यादृशी र्व
लाविशिष्टं यद्यदात्मयोगं जायते वस्था विशिष्टं तत्त्रूपं नित्यमेवेति वयं जानीमः। न चैवं सच्चिदानंद विग्रहेण किः सर्वत्र विरुद्धमवेदिति वाच्यं। सत्त्वस्यापि भगवद्धर्मत्वेन सच्चिदानंदरूपत्वाद विरोधात्
। मंत्राद्यधिष्ठातृरूपाणि तु विचित्ररूपाणि। एतत्त्वयथा तथा न कि हंसे प्रपंचितं। तत्त्वं च प्रकाशाश्रयवद्वा तेजस्त्वादिति न्यायेन भगवद्धर्माणामपि सच्चिदानंदरूपत्वाद्दीनाधिकारिणामप्युपास पा
कानां फलप्रेप्सूनां तत्फलदानाय मैत्र्यादिरूपेणा तत्तत्र स्थितत्वमेव। न चैकस्यैव वस्तुनस्यैवानंतरूपत्वं भवतैवोक्तमतो मत्स्यादिरूपेष्वपि नाधिष्ठानत्वेन सत्त्वं वक्तुं शक्यं। किं चैवं निराकारस्तनाव १०

५ कार्यकर्तुमिच्छतितादृग्रूपंतत्प्रकटीकृत्यतस्मिन्स्वयमाविर्भूयायःपिंडेवन्ति
न्त ५

त्वं ब्रह्मणः। मिध्यतीति सत्वा व्यवहितप्राकट्योक्तिरप्यनुपपन्नेति चेन्न। मैवं। सत्वाधिष्ठानत्वस्य प्रमाणसिद्धत्वेनानपनोद्यत्वात्तच्चोक्तं यदेकमव्यक्तमित्यादि। प्राकट्यं हि भक्तिनिमित्तकं माउ
बकुविधेति तदनुरूपं प्राकट्यमपि तयामगादिकार्येष्वधिकृतानां भक्तानामितरासक्तिरप्यस्तात्तुपाध्यं तरितस्वेहवत्वाच्चानंतरूपत्वेन मत्स्यादिरूपोपि तदर्थं तिष्ठवहितए वशकरीभवतीये
छु भगवत्स्वरूपमात्रामक्तास्तदर्थं स्वयमेवातव्यवधानेन प्रादुर्भवंति॥ एतेनैव निराकारत्ववादोक्तापि निरस्ता। एतेन सोपधित्वेहवदर्थमेव मत्स्यादिरूपप्राकट्यस्य प्रमाणसिद्धत्वात्रिरूपधि
तदर्थमेव श्रीव्रजनाथप्राकट्यस्यापि तपात्वात्सोपाधित्वेहवत्वपिउरूपार्पदानस्यानुषंगिकत्वात्तु रूपविध इति श्रुते श्चैतदेव रूपं रसो वै स इत्यादिश्रुतिप्रतिपाद्यं निरुपाधित्वेहवतां
ध्य विषय इदमेव वचश्चेद्धर्मत्स्यादिरूपं तु सोपधितद्वतामेव तथा। न हि कृत्तोर्थ एव प्राकट्यादित्यंवसीयते। एवं सति गुणत्रेदस्याप्रयोजकत्वात्सर्वदेशंतप्रत्यपत्वं ब्रह्मणो निष्प्रत्यूहं॥ ॥दर्श
यति च॥ ॥वेदैकत्वेन विद्यानामेकत्वं श्रुतिर्दर्शयति मिसर्वे वेदा यत्पदमामनंतीत्यादिना। उपासनाप्रकारभेदेनोपास्यभेदः दर्शनेदोषं च दर्शयति यदाह्येवैष एतस्मिन्नुदरमंतरं कुरुतेऽथ
तस्य भयं भवतीति। उदित्यव्ययमप्यर्थकं। तथाचारमत्य मप्यंतरं कुरुत इत्यर्थः॥ ॥उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च॥ ॥एवं सत्त्वोक्तरीत्या गुणोपसंहारो न क
चिदपि प्राप्तावसर इति सिद्धं। इत्रपते चोपसंहारः श्रीरामोपनिषत्सु यो वै ये मत्स्यकूर्माद्यवताराः इत्यादिनोक्तावताररूपस्य च स्य श्रीरामे। नमस्ते रघुवर्याय रावणांतकराय चेत्यादिश्रुतध
ति सुषमछह्व विषये श्रीव्रजनाथे रघुवर्यत्वादेरित्याशंक्य तत्प्रयोजकं रूपमाह। उपसंहार इत्यादिना। उक्तस्थलादिष्वयउपसंहारः सत्त्वधर्मस्य पदार्थस्य भगवत्स्वलक्षणस्योभयत्राप्यभेदा
त्यर्थः। न चैवं सति मत्स्येश्वरवापादिकं तु रूपे शृंगारादिकं भावनीयं स्यादिति चेन्न॥ ॥विधिशेषवदिति विधा यथा विधिशेषाणामग्निहोत्रादीनामग्निहोत्रत्वादिलक्षणे धर्मे समानेपि सति

तस्या२

अ०३ स्वशाखोक्तप्रकारस्यैवकरणंनान्यशाखोक्तधर्मोपसंहारएवमिहापितत्तद्देवतारोपासकस्यतत्तदसाधारणधर्मवत्त्वेनैवोपासनंनान्यावतारधर्मवत्त्वेनापीत्यर्थः।यद्वा।मत्वर्थीयोव
१८ प्रत्ययोत्रतथाचविधिशेषोपचारस्तद्वसमानंचभवतियत्रचोपसंहारइत्यर्थः।।अत्रैवंज्ञेयं।। ।।एकस्यांश्रुतौयस्यकर्मणोयत्फलमुच्यतेतदितरस्यांतस्यैवकर्मणस्तदितरत्फलमुक्तं
ते।एवंमतिद्वितीयश्रुत्युक्तफलकामनयापितदेवकर्मकर्तव्यंभवतीतितत्फलसाधकत्वस्योपसंहारः।यथायद्वैश्वदेवेनयजते।।प्रजाएवतद्यजमानःसृजतइत्येकाश्रुतिरस्ययाग
स्यप्रजाफलकत्वमाह।यद्वैश्वदेवेनयजते।अग्निमेवतत्संवत्सरमाप्नोतितस्माद्वैश्वदेवेनयजमानःसंवत्सरीणांस्वस्तिमाशास्तइत्याशासीतेतिद्वितीयाश्रुतिराहतत्रोक्तरीतिरिति।यत्तुवि
धिशेषाणामग्निहोत्रादिधर्माणांतदेवैकमग्निहोत्रादिकर्मसर्वत्रेत्ययमिहाउपसंहारइतितत्रसाधु।।अग्निहोत्रादेस्तत्तच्छाखिनांस्वस्वशाखोक्तप्रकारस्यैवकरणादतिरेकेप्रायश्चि
न त्तश्रवणान्नान्यशाखोक्तधर्मोपसंहारःशाक्यवचनः।प्राणाद्युपासनास्वधिकगुणस्येतरत्रोपसंहारेणकिंचिद्बाधकंदृश्यतइतितत्रसकर्तुंशक्यतइतिचकारेणतद्वादयःसंगृह्यंते।व
क्ततस्तद्वसमुच्चयार्थश्चकारः।शाखांतरोक्तधर्मोपसंहारप्रयोजनाभावस्यस्वाध्यायस्यतथात्वेनेत्यत्रनिरूपितत्वात्।उपसंहारबीजमनेनसूत्रेणोक्तं।अन्यथात्वंशब्दादिचेन्नावि
शेषात्।। ।।ननुउपासनासूक्तन्यायेनगुणोपसंहारोस्तूपास्यानांब्रह्मत्वेनैक्येमति।मिथोविरुद्धानांगुणानांशांतत्वक्रूरत्वतपोभोगादीनामुपसंहारेक्रियमाणेस्वरूपाणामन्यथा
त्वंचब्रह्मत्वंस्यादित्यर्थः।तत्रहेतुःशब्दादिति।एकत्वैकरसत्वादिधर्मनिरूपकश्रुतेरित्यर्थः।समाधत्ते।नाविशेषादिति।एकरसत्वंयथाश्रुतिबलान्निर्णीयतेतथाविरुद्धधर्मवत्त्वमपितत
एवनयेत्यर्थः।तेनवस्त्वेवनत्राहझंतव्यमितिभावः।। ।।नवाप्रकरणभेदात्परोवरीयस्त्वादिवत्।। ।।पूर्वसूत्रोक्ताशंकानिराकरणंवाविकल्पेनपूर्वोक्तात्प्रकारांतरेणकर्तव्यमित्याहनैवे

दि२

ति॥ तमेवाह॥ ॥प्रकरणभेदादिति॥ [illegible]॥ अ[illegible]त्रायं भावः॥ ॥श्रुतिप्रामाण्यादेवात्र ऽकथमविरुद्धेति मंतव्यं। एवं मतिर्यादृशोऽधिकारिणो यादृग्वेद्यं रूपं तादृशस्य तस्य तादृक्तत्र निरूपयति
प्रकरणभेदेन तथा च ज्ञानप्रकरणे ज्ञानाधिकारिणो यादृग्रूपं ज्ञेयं तादृक्तत्रास्मै निरूपयन्परत्र उपमयात्मत्वमित्यादित्यादिरूपाश्रुतिः। न। किं प्रकरणेषु भक्तेर्बहुविधत्वाद्यादृग्यादृगुपासकानां यादृक्
तादृक्तत्तदनुभवविषयस्तादृक्तादृक्तं निरूपयत्यथर्वणोपनिषदिति। अत्र दृष्टांतमाह॥ परोवरीयस्त्वादिवदिति। अस्मिन्मे लोके ध्रुवं स्यादिति कामवत आराग्यावांतरदीक्षा सर्वमुक्ता। तदयं
परोवरीयसीमवांतरदीक्षामुपेयाद्यः कामयेतामुष्मिन्नो लोके ध्रुवं स्यादिति चतुरोऽग्रेथ त्रीनथ द्वावथैकमेषा वै परोवरीयस्यवांतरदीक्षेति पठितं। अस्य दीक्षाप्रकरणे पठितत्वाद्दीक्षा
विनोक्तरीत्या ज्ञानेऽतु न परोवरीयस्त्वमेवं न। किं प्रकरणीयानामथर्वणोपनिषदायुक्तरूपाणां न भ। किंत्वर्हितोपास्यत्वं। ज्ञानसाधनत्वेन विस्मृतस्मरणादावपि क्रियमाणे न। किंत्वनेनेति। अथवा
सर्वस्त्वेनासर्वरूपेषु मिथः सर्वधर्माणामुपसंहारप्राप्तः सत्येकांतिनश्चानुभवविरुद्ध इत्यत्र व्यवस्थितविकल्पमाह॥ न वेत्यादिना॥ ॥सर्वेष्ववतारेषु भगवदवतारत्वेन साधारणी न॰
क्रियस्य सर्वत्रोपसंहारं करोतु नाम यस्त्वेकांती तस्य स्नेहोत्कर्षेणांतःकरणमेकस्मिन्नेव रूपे पर्यवसितमिति रूपांतरमंतःकरणारूढं न भवत्येवेति नोपसंहारसंभावनापीति। तदेतदुच्य
ते न वेत्य[illegible]नेन। तत्र हेतुः प्रकरणभेदादिति श्रुत्यादिषु तत्तदधिकारिणस्तु द्विपलत्वात्प्रकरणस्थमुक्तं तेनात्र प्रकरणपदेनाधिकार उच्यते एवं मत्कृपामकादिश्य उक्तरीत्योक्तस्याधिकारादित्यर्थ
ःसंपद्यते। परोवरीयस्त्वादिवदिति। परस्मात्परश्च वराच्च वरीयानिति परोवरीयानुद्गीथः तथा चा[illegible]दित्यादिगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोपास[illegible]नायाश्च सुद्गीथोपासनत्वेन साम्ये
पि सर्वोत्कृष्टत्वेनैवोद्गीथोपासनत इति न हिरण्यश्मश्रुत्वादिगुणोपसंहारः परोवरीयस्त्वगुणविशिष्टोद्गीथोपासनायामेवं प्रकृतेऽपीति॥ ॥संज्ञातश्चेत्तदुक्तमस्ति तु तदपि॥ ॥एकांत्प

पी

ति ३ दे

३ नेकां।तिनोरपिश्रीरामोपासकत्वादिसंज्ञाविशिष्टेसेकांतिनोस्तुपसंहारोयुक्त इत्याशंकोत्तरं खंडनवाप्रकरणचेदादित्यनेनैवोक्तं।संज्ञा उलौकिक्यधिकारस्त्वांतरःमएवबलीयानि
ति।संज्ञैकत्वस्यहेतोरव्यभिचारमाह।लिंगतदर्पी।निप्रमितमेवंप्युपासनेषुपरोवरोपस्त्वा।दिषुसंज्ञैकत्वमुत्क्षीयोपासनेत्यस्तीत्यर्थः॥ ॥व्याप्तेश्च समंजसं॥ ॥अथेदं विचार्य
ते॥उपास्येषुरूपेषुबाल्यपौगंडादिकमप्युच्यते।तथासंविग्रहेन्यूनाधिकभावश्चापततीति।तत्रोक्तं सच्चिदानंदत्वमनुपपन्नंस्यात्तेषां सदैकरूपत्वात्साक्षात्त्वेचसर्वमसमंजसंस्यादितिप्रा
प्तआह।व्याप्तेरिति।सर्वतःपाणिपादांतमित्यादिश्रुतेःसाकारमेवव्यापकमितिचकाशत्सर्वरसइतिश्रुत्यारसात्मकत्वेनभक्तानां यादृग्रूपेणलीलारसानुभवस्तादृ रूपं क्रमेण योगमा
यापमारणेनप्रकटीकरोति।निबाल्यादिभावोपपत्तेः सर्वमुपपन्नमित्यर्थः।नेनयावदुक्तधर्मविशिष्टे नि सि।ननु ब्रह्म धर्मवत्वेन ते सर्वे नित्या वाच्यास्ते च तत्र इक्त।विशिष्टास्तत्र चैकस्यैव भक्तस्यपौ
र्वापर्येणानेकलीलासंबंधित्वंश्रूयते।तथाचपूर्वलीलायानित्यत्वेननसंबंधिनक्तस्यापितथात्वंवाच्यं।एवंमतितस्यैवाग्रिमलीलासंबंधोशक्यवचनः।तथावचनेतुपूर्वलीलायानित्यत्वंभज्ये
त।नित्यत्वेत्वग्रिमलीलासंबंधिनोभिन्नत्वंस्यात्तच्चानुभवतदावेदकमानविरुद्धमित्यतउत्तरंपठति॥ ॥सर्वाभेदादन्यत्रेमे॥ ॥लीलामध्यपातिनांसर्वेषांपदार्थानांब्रह्मणामहाभेदाद्ब्रह्मसंबंधि त्र
कत्वात्पूर्वलीलातोन्यत्रोत्तरलीलायामपीमेपूर्वलीलासंबंधिनएवत इत्यर्थः॥ ॥अत्रेदमाकूतं॥ ॥रसोवैसइतिश्रुत्यासर्वरसइतिश्रुत्याचसर्वरसात्मकत्वंब्रह्मणोनिर्णीतंतथाचयस्यरसस्य
येविभावानुभावादिरूपास्तैःसरसःसंपद्यतेचातानविनानात्मकत्वंतैःपरइत्यातस्तत्रतात्पर्यंरसस्येतिसर्वविशेषोनिमग्नमूह इति।ननुविरुद्धदिक्कयोरेकजातीयभावयतोर्नक्रियतित्रायेनयुग पा
पदेकजातीयलीलासहित भगवत्प्रादुर्भावे भगवतोव्यापकत्वेनैवंप्रादुर्भावस्योपपन्नत्वे।पिलीलापदार्थानामव्यापकत्वाद्युगपदा।विर्भावोनुपपन्नः।भक्तयोःसमानत्वाद्भक्तिमार्गविरोधापा २०

ने।

पाता। दृष्टि निगमकानां वाचैकत्र मायया प्रदर्शयतीति च वक्तुं युक्तमिति शंकाप्येताभ्यां सूत्राभ्यां निरस्तेति ज्ञेयं ब्रह्मणो व्यापकत्वाल्लीलायाश्च तेन सहाभेदात्तथात्वादेकस्मिन्नकाये यथा
ब्रह्मणा सह लीलापदार्थाश्चाविर्भवंति तथैव न देवान्यत्राप्यक्रममानदेशाच्चाविर्भवंतीति सर्वमामंजस्यात्। ननु व्यापकत्ववत्पूर्णानंदैश्वर्यवीर्यादयोपि धर्मास्तेषु प्रतीतानन्वेयुर्न चैवम
स्तिऽः स्वसंभावनायां प्रत्युतमेव पार्थयंतीयतः। एवं सति व्यापकत्वमपि न वक्तुं शक्यं तत्तुल्यत्वादतत उत्तरं पठति। ॥आनंदादयः प्रधानस्य॥ ॥पूर्णानंदैश्वर्यादयः प्रधानस्य धर्मिणो ब्रह्मण एव
धर्माः। लीलापदार्थास्तु ब्रह्मधर्मत्वेन व्यापका उच्यंते। व्यापकस्य धर्मिणो नागंतुकधर्मस्य व्यापकत्वनियमात्। न हि धर्मेषु पूर्णानंदत्वादयः संभवंति। धर्मित्वापत्त्या धर्मत्वव्याहतेः। अतएवा
त्र प्रधानपदमुपात्तं गुणाभावेन लीलापदार्थानामाविर्भाव इति ज्ञापयितुं॥ ॥प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे॥ ॥ननूपासकस्य प्रियत्वादिप्रकारकज्ञानक्रममादाय
त्वा प्रियादिधर्मणां शिरस्त्वादिरूपत्वमानंदमयाधिकरणे निरूपितमिति लीलास्थानामपि प्रियत्वादिहानस्य समत्वात्तत्रापि स्वरूपोपासकस्य प्रियशिरस्त्वादिधर्माणामुपसंहारः कार्य इत्याशंक्य
परिहरति प्रियशिरस्त्वाद्यप्राप्तिरिति। चित्तस्थितारतम्यहेतुकप्रियत्वादिज्ञानं लीलास्थानां चित्तस्थ्यपेक्षाभावान्न संभवतीति न तेषामत्रोपसंहारकार्य इत्यर्थः। अथवानंदमयोपासना
मथर्वणोपनिषदुक्तपंचरात्राद्यागमोक्तप्रकारेण कुर्वतः पुरुषरूपे पक्षाद्युपसंहारस्यायुक्तत्वादानंदमयाधिकरणे तद्रूपस्यैवोक्तत्वात्पुरुषरूपः कथमानंदमयः तथात्वे वा कथं नोक्तोपसंहा
रः। अपरंच॥ ॥मोदप्रमोदयोरुपचितानुपचितानंदरूपयोर्युगपत्त्वेन देशभेदेनापि स्थितत्वात्। नित्यानंदैकरसे ब्रह्मणि तादृक्प्रकथनमनुपपन्नमित्याशंक्य परिहरति॥ ॥प्रियशिरस्त्वा
द्यप्राप्तिः॥ यद्यथर्वणोपास्यात्प्रियशिरस्त्वादिविशिष्टस्य भेदः स्यात्तदा तदप्राप्तिः स्यान्न च तथेति प्रियशिरस्त्वादिकमुपासनामात्रविषयमाथर्वणिकादेरुपसंहार्यमेवेत्यर्थः। चित्तस्थितारतम्यहेतु

ज्ञानतारतम्ये

(एफ-३ कं प्रियत्वादिज्ञानमिति पक्षे परोक्षवादपक्षेपि तत्र भेदाभावान्मोदप्रमोदयोर्नत्विङ्करूपत्वमित्यर्थः। ब्रह्मधर्मा एव भिन्ना इत्युपासनार्थं तानादाय शिरःपाण्यादिनिरूप्यन्त इति तत्रैव निरू-
२१ पितमस्माभिः। यद्यप्यानंदमयाधिकरण एवास्यार्थस्योक्तत्वात्त्रेयं शंका संभवति तथापि गुणोपसंहारप्रसंगे मिथ्यावादिन आपाततः शंका संभवतीत्याचार्येणोक्ता निरस्ता। ननूपास्यरू-
पस्याविरुद्धा एव गुणा उपसंहर्तव्या न तु विरुद्धाः। तथा च पुरुषरूपे पक्षादि विरुद्धमिति न तदुपसंहार्यमित्याशंक्याह॥ ॥इतरे त्वर्थसामान्यात्॥ ॥इतरे पुरुषरूपे विरुद्धत्वेन ये भासमाना धर्मास्ते
प्युपसंहर्तव्याः। तत्र विरोधव्यवछेदज्ञापनाय सूत्राह्रः। तत्र हेतुरर्थसामान्यादिति। अर्थः पदार्थ आनंदमयस्वलक्षणस्तस्य समानत्वादेकत्वादित्यर्थः। अथानंदमयाधिकरण उक्तप्रकारेण ये प्रिय-
त्वादिधर्मास्तेषामेवोपसंहारः कार्यो न तु पुरुषरूपे पक्षादीनामपीत्यभिमन्यन्ते॥ ॥आध्यानाय प्रयोजनाभावात्॥ ॥आनंदरूपस्य यावंतो धर्मास्त्रिक्रिमागीयाः परोक्षवादेनोक्तास्ते प्रियत्वप्रा-
धान्यादयस्तेषां सर्वेषां ध्यानमासमंताध्यानं तदर्थं ये धर्मा उपयुक्तास्त एवोपसंहर्तव्या नान्येन तु हेतुः प्रयोजनाभावादिति। ध्यानपदार्थस्य तावद्भिरेव सिद्धेरधिकोपसंहारे तथात्वादित्यर्थः। अन्ये-
षामनुपसंहारे हेत्वंतरमप्याह॥ ॥आत्मशब्दाच्च॥ प्रियमेवेत्यादिना परोक्षवादेनोक्तानां प्रियप्राधान्यादीनामेव भावना कार्या न तु यथाश्रुतानां शिरःपक्षादीनां। तेषामविवक्षितत्वात्। तत्र हेतु-
रात्मशब्दादिति। आनंद आत्मेत्यनेन पूर्वोक्तानां प्रियप्राधान्यादीनां रसात्मकानामात्मस्वरूपमानंदमित्युक्तं। अये रसो वै स इति वस्तुप्रमाणत्वात्तस्य च स्थायिभावात्मकत्वात्तस्यैवानंदम-
यत्वाच्च। प्रियविषयकलीलामध्यपातिनः कृतानप्रकाराणामपि रसात्मकत्वेनानंदरूपत्वात्तेषामुपासनाकृतन्नमाधिकाराभावात्। शिरःपक्षादिरूपेण कार्येति भाँवता। स्कृतिमन्यान्यरूपयत्। प.
एतेन यत्परं परामं बंधेप्युपास्यत्वं तदस्य महत्वं। कियदवधि वाच्यमिति ज्ञाप्यते। एवं सत्युपासनामार्गे योपास्यं विभूतिरूपं न तु मूलरूपं यत्त्रयोगेन वाक्यादिति ज्ञेयं॥ ॥आत्मशब्दो। तिरिति २३

वे२

तरवदुत्तरात्॥ ॥तैत्तिरीयकेऽन्नमयादिनिरूपणे पुरुषविधत्वं तेषां निरूप्य तस्यैष एव शारीर आत्मा यः पूर्वस्येति सर्वत्र निगद्यनेन आनंदमयपर्यंतं शारीरात्मत्वकथनाच्चेति संशयः शारीराभिमानी जीव एव कश्चिदुत ब्रह्मैव। तत्र शारीरपदाज्जीव एव न विद्वमर्हति। तथा सत्यानंदमयस्यापि ब्रह्मत्वं नोपपद्यते। उच्यते च भार्गव्यां विद्यायामन्नं ब्रह्मेति व्यजानादित्यारभ्यानंदमयपर्यंतमानंदो ब्रह्मेति व्यजानादित्यंतया श्रुत्या ब्रह्मत्वमित्यन्यतः पाशास्कुरिति प्राप्त आह। इतरवत् जीववदात्मगृहीतिरात्मग्रहणं तस्यैष एव शारीर आत्मेति यदुत्तरात् यः पूर्वस्येति सर्वत्रोक्तत्वात्सर्वेष्वप्युत्तर आनंदमयस्तस्माद्धेतोरित्यर्थः। अन्नमयादिषु सर्वेष्वेवानंदमयस्यैवोक्तत्वान्नशरीराभिमानित्वान्नपा। एतद्यथा तथानंदमयाधिकरणे प्रपंचितमस्माभिः। अथवाऽन्योंतर आत्मेत्यन्नमयादन्यत्र सर्वत्रोक्तत्वात्पूर्वपूर्वनिरूपितो यः स इतर इत्युच्यते। तथा च यः पूर्वस्येति श्रुत्येतरवत्पूर्वनिरूपितवत्प्रकृतस्याप्यात्मग्रहणं कथनं यदुत्तरादिति पूर्ववत्॥ ॥अन्वयादिति चेत्स्यादवधारणात्॥ ॥ननु सर्वत्रान्योंतर आत्मेति श्रुत्या प्रत्येकमन्नमयादीनां भेदनिरूपणाच्छारीरपदाच्च भिन्नो भिन्नो जीव आत्मा शारीराभिमानी सर्वत्रोच्यते। आनंदमयेन घोक्रि यस्माच्चानंदमयस्य ब्रह्मत्वेन व्यापकत्वेन सर्वत्रान्वयात्सर्वेषु शारीरेषु संबंधादित्याशंक्य तन्निरासायोक्ते यदुपपत्तिमाह। स्यादित्यादिना स्यात्। आनंदमय एवोक्तसर्वशारीराभिमानी भवतीत्यर्थः। तत्र हेतुरवधारणादिति। एष एवेत्येवकारेणेतरनिषेधपूर्वकमानंदमयस्यैवात्मत्वनिर्द्धारादित्यर्थः॥ ॥कार्याख्यानादपूर्वं॥ ॥तैत्तिरीयके पठ्यते तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्युपक्रम्य मरान्नतस्माद्धि मुक्ताम्नायते पृथिव्या ओषधयः ओषधीभ्योऽन्नं अन्नात्पुरुषः स वा एष पुरुषोऽन्नरसमय इति। एतदग्रेऽन्नस्योत्पत्तिस्थितिलयहेतुत्वमुक्त्वा येऽन्नं ब्रह्मोपासत इत्युच्यते। भृगुवरुणसंवादे चान्नं ब्रह्मेति व्यजानादित्युच्यते। तत्र स वा एष पुरुषोऽन्नरसमय इत्यनेनापूर्वोक्तिरेव पुरुष उच्यत उत तद्भिन्न इति भवति संशयः॥ किमत्र

रू

पू·२ युक्तं पूर्वोक्तिरेवेति। यतः पूर्वोक्तिस्यैव स वा एष इत्यनेन प्रत्यभिज्ञानं प्रतीयते तत्र ब्रह्मत्वेनोपासनाकार्येत्यभिप्रायेण ब्रह्मत्वेन स्तूयत इति प्राप्त आह। कार्याख्यानादपूर्वमिति। पूर्वस्यात्र कार्य
१ · स्यापूर्वस्याख्यानात्स वा एष इत्यनेनाग्निमश्रुतिर्ब्रह्मत्वेन प्रतिपिपादयिषितमन्नरूपमेवोच्यते न तु पूर्वमित्यर्थः स वा एष इति प्रत्यभिज्ञानमिति यदुक्तं तत्र। अत्रान्नरूप इत्येनेनाधिदैवि
कतन्निरूपणात्। स वा एष इत्यनेनाध्यात्मिकतन्निरूपणाद्वयोरभेदात्। अत एव मंत्रा याभाचार्या याह॥ वै निश्चयेन॥ एष त्वसमाणः पुरुषः सः। आध्यात्मिकत्वेन प्रसिद्धोत्र रसमय इति
प ।अन्यथा ब्रह्मात्मकत्वयौलक्षणसाधनेनाधिकारे संपन्ने तं ब्रह्मेति व्यजानादिति न वदेत्। न चातद्रूपितत्रयात्वेन स्तूयत इति वाच्यं। श्रुतेः प्रतारकत्वापत्तेः आनंदमयांतमेवमेव निरूपणाच्च॥
अत एवास्याध्यात्मायं निरूपितो यः पूर्वस्येति सत्वाधिदैविक आनंदमयः। अथ यो वाजसने। यिनामाख्यायामात्मेत्येवोपासीतेत्युपक्रम्य तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोन्यस्मात्सर्वस्मादंत --
रतरं यदयमात्मेत्येतदग्रेन्यस्य प्रियत्वं निराकृत्येश्वरो हितथास्यादात्मानमेव प्रियमुपासीतेति पठ्यते। अत्रात्मोपाधिकत्वात्सर्वत्र प्रियत्वस्यात्मपदेन जीवात्मन एव प्रियत्वेनोपासनाविध
धीयत उत ईश्वरपदात्परमात्मन इति भवति संशयः। किमत्र युक्तं जीवात्मन एवेति। कुतः। यथा पुत्रादेरात्मोपाधिकप्रियत्वात्तस्याजीवात्मन एव प्रियत्वमुच्यते अन्यत्र श्रुतौ। तथेहापि प्रेयः पुत्रादिभ्यो
कथनाज्जीवात्मैव भवितुमर्हतीति प्राप्त आह॥ ॥कार्याख्यानादपूर्वमिति॥ ॥इतः पूर्वमाम्नायते प्राणन्नेव प्राणो नाम भवति वदन्वाक्पश्यंश्चक्षुः शृण्वञ्छ्रोत्रं मन्वानो मनस्तान्यस्यैता
नि कर्मनामान्येवेति। तथा च प्राणनवदनादिकार्यैः कृत्वा प्राणवागादित्वेनैकस्यैवात्मन आख्यानात्कथनादपूर्वं। पूर्वं पुत्रवित्ताद्यभिमानदशायां नवा अरे पत्युः कामाय पतिः प्रियो
भवतीत्यादिना यत्प्रियत्वेनोक्तमनेन तस्माद्भिन्नमात्मशब्दवाच्यमन्येत्यर्थः। लोके हि प्राणवायुवागिंद्रियादीनामेव तत्तच्छब्दवाच्यत्वात्तु जीवस्यात एवापेक्षति राहेश्वरो हितथास्यादिति। त्र

न एव प्रेयोन्यस्मात्सर्वस्मादंतरतरं यदयमात्मेत्यादौ। अंतरो जीवात्मा ततोप्यतिशयेनांतरमंतरतरं तद्रूपोत्तमस्वरूपमेव भवितुमर्हतीति एतेन विग्रहस्यैवात्मरूपत्वं सिध्यति। तेना
।चिद्रूपत्वपरमानंदत्वादयोपि धर्मा उपसंहर्त्तव्याः। ननु विग्रहे चक्षुःश्रोत्रादीनां वैलक्षण्यप्रतीतेरात्मनश्चैकरसत्वादुक्तकर्मनामवत्त्वं ब्रह्मण एनुपपन्नमित्याशंक्योत्तरं पठति।।
।।समान एवं चाभेदात्।। ।।चोपपद्यते यद्येवमपि सति श्रोत्रचक्षुरादिवैलक्षण्यप्रतीतावपि सति समान एव रूप एव न तु विषमस्तत्र हेतुरभेदादिति। चक्षुरादीनां ब्रह्मत्वेन परस्प
रमभेदादित्यर्थः।। ।।अत्रेदमाकूतं।। ।।तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेरुपनिषद्वेद्यमेव ब्रह्मस्वरूपं। नाश्च प्राणन्नेव प्राणो भवति वदन्वागित्यादिरूपाः। प्रतिनियतेंद्रियग्राह्या
नर्थान्स्वरूपेणैव रश्मि ब्रह्मणत्वब्रह्याच्यं भवतीति वदंति। तद्वाच्यता च व्यवहार्यत्वे। स च न देतत्प्रेयः पुत्रादित्यादिवाक्यैकवाक्यतया निरूपणे धिस्त्रेद्यवतामेवंमैंहा यदशति ज्ञाप्यते व
।स चाविर्भूते वताररूप एव संभवति। एवं सति तत्र भक्तैर्भगवद्विग्रहे तत्तदवयवचेष्टाभेदेन यथा यथा व्यवह्रियते तथा तथैकमेवाखंडसच्चिदानंदरूपं ब्रह्मेत्यर्थः संपद्यते। एवं विधो
लोके न प्रसिद्ध इत्यसंभावनास्यात्तदभावाय येक्षति गृहे ईश्वरो हितपाम्यादिति। एतेनाविर्भूतिरूपे व्यापकत्वैकरसत्वसच्चिदानंदत्वादयो धर्मा उपसंहर्त्तव्या अनाविर्भूतेपा निल्कि
तं। एवं सत्याविर्भावेनाविर्भावेपीश्वरः समानः न ह्याविर्भावे कांश्चनागंतुकान्धर्मानादायाविर्भवतीति वक्तुं शक्यमनाविर्भूतस्यापि एवं चाविर्भूतप्रकारे एवाभेदादित्यपि सूत्रार्थः
सूत्रकाराभिमत इति ज्ञातव्यं। नकारेण विरुद्धसर्वधर्माश्रयत्वं समुच्चीयते। एवं साक्षादाविर्भूतभगवद्रूपे पूर्णानंतधर्मास्तदुपासके नोपसंहर्त्तव्या इति सिद्धं। अथ यत्र कार्यचिकीर्षया
जीवे स्वयमाविशति तदावेशात्तद्धर्मा अपि केचित्तस्मिन्नाविर्भवंतीति तत्रोपासकेनाखिलब्रह्मधर्मोपसंहारः कर्त्तव्यो न वेति शंकासमाधानं विकल्पेनाह सूत्राभ्यां। तत्रादौ विधिपक्षमाह

णु॰ ३ ॥ ॥संबंधादेवमन्यत्रापि॥ ॥अन्यत्रापि जीवेप्येवं ब्रह्मणीवोपासना कार्या तत्र हेतुः संबंधादिति। अयोगोलके वह्नेरिव तस्मिन्नावेशलक्षणः संबंधोस्तीति तत्वेन व्यपदेशाच्च तथेत्य
२३ र्थः॥ ॥अत्रैवं ज्ञेयं॥ ॥अयं तु जीवोत्राविष्टं भगवंतमहमुपास इति ज्ञानाति चेत्तदा न सा जीवगामिन्युपासना। किंतु ब्रह्मगामिन्येव तत्राखिलधर्मोपसंहारे न किंचिद्बाधकं। यत्र ब्रह्मत्वे।
नैव ज्ञात्वोपास्ते न ज्ञापितं यथायथोपासते तथैव भवति तद्धैतान्भूत्वावतीति श्रुतेर्गुर्वादौ जीवत्वबुद्धिनिषेधाच्च तथा। तत्र यादृग्गुपासकस्तदुपासनासिध्यर्थं तत्फलदानार्थं च तादृग्रूपो
त भगवानाविशतीति च तथा। यस्त्वैरंगं भगवद्भक्तं बुद्ध्याविर्भूतभगवत्कं ज्ञात्वैतद्भजनेनाहं भगवंतं प्राप्स्यामीति ज्ञात्वा तमेव भजते स भक्तिमार्गीय इति भक्तबुद्ध्याविर्भूतेपि रूप उप
संहारो धर्माणां तेन न कार्य इत्यग्रिमं पठति॥ ॥न वा विशेषात्॥ ॥अनुपसंहारे हेतुर्विशेषादिति। अस्य भक्तत्वेन तद्भजनरसास्वादनेन विस्मृततदाविष्टभगवत्कत्वेन तन्निर
पेक्षत्वेन वा तदाविष्टभगवति गुणोपसंहारेनुपसंहारे वा भक्तोपासनायां विशेषाभावादित्यर्थः॥ ॥अनुपसंहारस्यात्र बाधकत्वाभावज्ञापनाय वाशब्दः। विशेषादिति वा। पूर्वं विहितत्वे
न भगवदाकाराविष्टभजनं कुर्वन्नप्युक्तरूपभक्तसंयोगेन तद्भजनेन च पूर्वस्माद्विशिष्टरसमनुभूतवानिति रसास्वादे विशेषाद्गुणोपसंहारं मन करोतीत्यनुवादः॥ विहितत्वेन गुणोप
संहारपूर्वकोपासनायां नीरसत्वेनानादरज्ञापनाय वाशब्दः। भगवदवताररूपोपि बादरायणः प्रासंगिकेपि भक्तिमार्गस्मरणेन तदीयरसावेशपरवशस्तद्भावस्य भावमनूक्तवान्॥
अपि च॥ उपसंहारो हितत्वानुक्तानामन्यत्रोक्तानां गुणानां तत्र सत्वेन ज्ञानमात्रं उक्तरूपभक्तायतु तद्भजनीये भक्त एवालौकिकानुभावाद्भगवान्स्वस्वरूपं दर्शयतीति न तत्रोपसंहा पा॰ ३
रापेक्षा गंधोपीत्युत्तरं पठति॥ ॥दर्शयति च॥ ॥ननु भक्तभक्तः स्वसेव्येत्पत्तौ किंकंबीयं दृष्टं तदाविष्टे भगवति न संभारकत्वस्येंद्रादीनामपि तदाज्ञापेक्षित्वं दृष्ट्वा द्युलोकव्यापक २३

त्वस्योपसंहारंकरिष्यतीत्याशंक्याह॥ ॥संभृतिद्युव्याप्त्यपिचातः॥ ॥राणायनीयानां।खिलेषुपठ्यते ब्रह्मज्येष्ठावीर्यासंभृतानि ब्रह्माग्रेज्येष्ठं।दिवमाततान। ब्रह्मभूतानां प्रथमंतु जज्ञे तेनार्हति
ब्रह्मणास्पर्द्धितुंक इति।अस्यार्थस्तु॥अन्यैर्हि पुरुषैः सहायानपेक्ष्य विक्रमाः संभ्रियंतेतेन तत्पराक्रमाणांतत एवनियतपूर्वभावित्वरूपकारणत्वेनज्येष्ठाः ब्रह्मधर्माणांतु ब्रह्मैवज्येष्ठमनन्यापे
क्षं स्पर्द्धादिकरोतीत्यर्थः।एवंसति ब्रह्मज्येष्ठंयेषांतानि ब्रह्मज्येष्ठानिवीर्याणि।अत्र छंदसि बहुवचनस्यडादेशः।किंचान्येषांवीर्याणांबलवद्भिर्मध्ये भंगो।पि च वर्तितेनतु स्ववीर्याणिनसंभिद्यंति ब्रह्म ह
वीर्याणितु ब्रह्मणा संभृतानि निष्प्रत्यूहं संभृतानीत्यर्थः॥तत्रज्येष्ठं ब्रह्माग्रेइंद्रादिजन्मनः प्रागेवदिवं स्वर्गमाततान व्याप्तवन्नित्यमेव विश्वव्यापकमित्यर्थः।देशतोपरिच्छेदमुक्त्वाकालतोपित
माह।ब्रह्मेति।भूतानामाकाशादीनां पूर्वमेवजज्ञे।आविर्बभूवेत्यर्थः।एतेनवीर्यसंभृतिद्युव्याप्तिप्रभृतिमाहात्म्यमुक्तंभवति।तथाच संभृतिश्च द्युव्याप्तिश्च तयोः समाहारस्तया।एतावपिसतत्र।
नोपसंहरति।नचहेतुर्नवाविशेषादितिसूत्रोक्तएवेत्यतिदिश त्यतएवेति।एतद्यथातत्रैवोक्तं।विषयवाक्योत्तराद्धोक्तिधर्मानुदेशोनैवंशायनेतकस्यैहिकपारलौकिकोपयोगिधर्मोपलक्षणा
पेक्षयोरेवोद्देशात्तत इति।चकारेणदर्शनमप्युक्तंसमुच्चीयते।अन्यच्च।स्पर्द्धोक्तिनिसंभावनायांहितयोग्यतानिषेधः संभवतिसाचाविर्भूतएवभगवतिसंभवतीत्यखिलतत्त्वाख्याविर्भावविपूर्व ··
कमाविर्भूतस्यतस्यैवयावत्क्रत्वा माहात्म्यमुच्यत इतिगम्यते।एवंसत्येतद्वाक्योक्तधर्मयोरेवानुपसंहार्यत्वेनयत्कथनंतत्तुभक्त्याह्याविर्भूतंब्रह्माप्येवंभूतमेवेतिज्ञापनायातोयुक्तएवानुपसं
हारः।पुरुषविद्यायामिवचेतरेषामनाम्नानात्।तैत्तिरीयकेसहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्।सभूमिंविश्वतोवृत्वा।अत्यतिष्ठद्दशांगुलंपुरुषएवेदंसर्वंयद्भूतंयच्चभाव्यमित्यादिना च
पुरुषविद्या निरूप्यते।तत्रैवब्रह्मविदाप्नोतिपरमितिप्रश्ने सेऽध्याये एष पुरुषोऽन्नरसमय इत्यारभ्य प्राणमयमनोमयविज्ञानमयानंदमयात्मकंब्रह्मस्वरूपंनिरूप्यते।तत्रसर्वत्रस च पुरु
न

अ॰उ॰३ षविध एवेति च पठ्यते। अत्रान्नमयादिषु पुरुषस्योक्तेश्च पुरुषपदश्रवणादन्नमयादिषु सर्वत्र शीर्षत्वाद्युपसंहारः कर्त्तव्यो न वेति भवति संशयः॥ किमत्र युक्तं॥ उपसंहर्त्तव्यमेवेति। कुतः स
२४ र्वत्र ब्रह्मण एवोपास्यत्वादत्राप्युपामनोक्ते ब्रह्मत्वपुरुषत्वयोरविशेषाद्वैक्यादिति प्राप्त उच्यते। पुरुषविद्यायामिवेति॥ अन्नमयादिषु सर्वत्र शीर्षत्वादिकं नोपसंहर्त्तव्यं॥ कुतः पुरु
षविद्यायां यथा पुरुषस्वरूपं निरूप्यते न तथेतरेषामन्नमयादीनां विज्ञानमयान्तानां स्वरूपं प्रकरणे निरूप्यते। तत्र हि पुरुषत्वमुच्यते सहस्रपदमनेकत्वोपलक्षकमस्य यादृशं शिरोस्यो द्वैगुण्यं
वदेत्तेन साकारव्यापकत्वमुक्तं भवतीति तत्र पुरुषविधत्वं स चाध्यात्मिकरूपेण शरीराभिमान्यात्मा चान्यत्राधिदैविक उच्यते। तथा च॥ ॥किंच॥ पुरुष एवेदं सर्वमित्यादिना प्रपंचात्मकत्वमुक्तं हि
तत्त्वं चोक्तं नैतावन्मात्रमस्य महात्म्यमितोपि महन्महात्म्यमस्तीति वक्तुं प्रपंचरूपं न द्विरुक्तिरूपमित्येतावानस्य महिमेत्यनेनोक्तात्तत आधिक्यमाह। अतो ज्यायांश्च पूरुष इति। एवमपि वैलक्षण्या
त्पुरुषपदमात्रसाधर्म्येणानेकविद्यत्वं वक्तुं शक्यं न वोपसंहार इति चकारादेतस्य पारेषु वनस्य मध्ये नाकस्य पृष्ठे महतो महीयानित्यादिषु तयः सर्वतः पाणिपादं तमित्यादिस्मृतयश्च संगृह्य
न्ते। एतेन यत्किंचिद्धर्मसाम्येपि न मूलत्वत्त ब्रह्मरूपमत एव नत्त्रोपास्यता तथात्वेनेति ज्ञापितं। अत एवानुरूपाख्यानेनान्नमयादि ब्रह्मज्ञानेपि जिज्ञासैवोक्ता भृगोरानंदरूपपरब्रह्मज्ञानेनोक्ता। ते
नाशेषगुणपूर्णब्रह्मसेत्युक्तं भवत्यन्नमाधिकारिभिस्तदेवोपासनीयं न विरूप्तिरूपमिति ज्ञापितं। अपनिर्दोषित्वं ज्ञात्वा भजनीयमिति ज्ञापयितुमधिकरणान्तरमारभते॥ ॥वेधाद्यर्थभेदात्॥ ॥वा
जसनेयिशाखायां द्वया ह प्राजापत्या इत्युपक्रम्य तेषां मिथस्पर्धामुक्तोच्यते ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ते ह वाचमूचुस्त्वं न उद्गायेति तथेति तेभ्यो वागुदगायद्यो वाचि भोगस्तं देवे
भ्य आगायद्यत्कल्याणं वदति तदात्मन इति ते विदुरनेन वै न उद्गात्रात्येष्यंतीति तमभिद्रुत्य पाप्मनाविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव स पाप्मेति। एवमेव प्राणचक्षुःश्रोत्रप्रभृतीन्पाप्मवेधमुक्त्वो २४

च्यते। अथेनमासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्ते विदुरनेन वै न उद्गात्रात्येष्यंतीति तमभिद्रुत्य पाप्मनाविध्यन्स यथाश्मानमृत्वा लोष्टो विध्वंसेतैवं हैव विध्वंसमाना विष्वंचो
विनेशुरिति छांदोग्येपि प्राणादिष्वेवमेव पाप्मवेधमुक्त्वा मन्येन तथेत्युच्यते। एतावान्परं विशेषो वाजसनेयिनां गानकर्तृत्वं सामगानामुद्गीथत्वेनोपास्यत्वमुच्यते वाक्प्राणादीनामिति अत्र देहसंबं
धित्वगानकर्तृत्वयोरुपास्यत्वस्य वा विशेषेपि वागादिषु पाप्मवेध आसन्यप्राणे वेति नवति जिज्ञासा। न चासन्योपासनाया विधेयत्वात्तत्तात्पर्यमन्येषु पाप्मवेधउच्यते स्मिन्नेति वाच्यं। नहि प्रयोजनाया
संतमप्यर्थं बोधयति श्रुतिरिति वक्तुं शक्यं प्रमाणत्वव्याहतिप्रसंगात्। एकत्र प्रतारकत्वे सर्वत्रापि तत्त्वशंकया तदुक्ते कोपि न प्रवर्तेतापि मा हा क्रियार्थत्वाभावे पि नाम निरूपकत्वमर्थवादानां। वक्तव्यक।
यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति श्रुतेर्ज्ञात्वा ज्ञात्वा च कर्माणि जनोयमनुतिष्ठति। विदुषः कर्मसिद्धिः स्यान्न यथाविदुषो न वेदिन्यादिवाक्यैर्य एवं वेदेति वाक्येष्वर्थवा
दोक्तस्वरूपं ज्ञात्वा कर्मकरणे स्वर्गफलमन्यथानेत्यर्थवादानां फलोपकार्यंगनिरूपकत्वान्नानर्थक्यमनुक्तेर्थे हेतुं न पश्याम इति प्राप्ते नमेवार। वेधादीति। वाक्प्राणादिषु यः पाप्मवेध आदिपदाद्दृष्ट
विषयसंबंधश्च तत्र हेत्वर्थभेदः। अथेत्यादिगद्यांतस्माद्देवादित्यर्थः। आसन्यस्तु य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतेति छांदोग्यउपास्यत्वेनोक्तः सर्ववेदांतप्रत्ययमित्याद्याद्वेदांतेषूपास्यं ब्रह्माति
रिक्तो न्यत इत्यासन्योपि ब्रह्माभिन्नोत एवापहतपाप्मा ऽत एष इति सामगैः पठ्यते। अतस्तत्र न पाप्मवेध इति भावः। ब्रह्मणः स्वतंत्रमुक्तरूपार्थत्वस्थापनायार्थपदे नोक्तिः॥ एतेन विभूतिरूपेपि यत्रैवं त
तत्र मृत्यून्नू। ब्रह्मणि निर्दोषत्वं किं वाच्यमिति ज्ञापितं अत्र पदार्थः प्रयोजनं विषय इति यावत्। तद्देदादित्यर्थः। अथेदमाकूतं। देवाहि स्वस्यासुरजयाय गानार्थं वागादीनूचुस्त्वं न उद्गायेति गानेन त
द्यो वा वियोगस्तं देवेभ्य आगायदित्युच्यत एवमेव प्राणादिष्वपि स्वस्य भोगं देवेभ्य आगायदिति। एवं सति देवार्थमेवेन गानं न तु भगवदर्थं यद्यप्यासन्येप्येवमुच्यते तेभ्य एष प्राण उदगायदि

कैमुतिकन्यायः सूचितो भवति। एतेन लोके दोषत्वेन ये धर्माः प्रतीयंते त एव धर्मा भवंतीति नि

णु॰ ३
२५

गा स
तितथापि यथा वांदिषु सर्वं निषन्नोगं देवेभ्य आगायदित्युक्तं तथा नामन्येतेनोक्रमानैर्ब्रह्मात्मकत्वेनासुरजयहेतुर्भगवत्संबंध एवेति ज्ञान्वानपैवागायदामन्य इति ज्ञायते अत एवान्यत्र वेधउक्तोऽ
चतकरणेछायामप्यासुराणां नाशउक्तः। अये च भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य एवं वेद इति पक्यते। तेन परब्रह्म निर्दोषमिति। किमुवाच्यं यत द्विभूतिरूपास न्यस्योक्तरूपतां योवे
त्रिस्मोपि गुणएयुक्तो दोषरहितश्च भवतीति रूप्यमाणा न दोषत्वेन ज्ञेयाः। किंतु गुणत्वेनैव वक्तव्यास्त एव तथात्वादिति भावो ज्ञाप्यते। एवं भगवत्संबंधाभावे दोषसंबंधमुत्कालेपासत्तु गुणहानि
चवदंस्तत्र विशेषमाह॥ ॥हानौ तूपायनशब्दशेषत्वात्कुशाछंदस्तुत्युपगानवत्तदुक्तं॥ ॥तदा विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीत्याथर्वणिकैः पठ्यते परमपदेन ब्रह्मो
च्यते तथा च सकार्यविद्यारहितः परममुपैति तदनंतरं साम्यमुपैतीति योजना। तदेवं विचार्यते साम्यं हि समानजातीयधर्मवत्वे तत्र कतिपयधर्मैर्विशेषतः निखधर्मैर्वा भवति। तत्राद्यपक्षो ब्रह्म
णाममेन संभवति न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुतिविरोधात्। तत्र द्वितीयपक्षोनुमन्तव्यस्तत्र कैर्धर्मैः साम्यमिहोच्यत इत्याकांक्षायामाह। हानाविति। ब्रह्मणः सकाशाद्विभागो जीवस्य हानि
शब्देनोच्यते। तथा च तस्यां सत्यां ये धर्मा जीवनिष्ठा आनंदांशैश्वर्यादयो भगवदिच्छया तिरोहितास्ते ब्रह्मसंबंधे सति पुनराविर्भूता इति तैरेव तथेत्यर्थः। भगवदानंदादीनां पूर्णत्वाज्जीवानंदादी
नामल्पत्वात्तान्यैव समैर्धर्मैः स्तत्वाद्ब्रह्मसाम्यं जीव उपचर्यते साम्यमुपैतीति वस्तुतस्तु नैतैरपि धर्मैः साम्यमिति भावः। अत एव न तत्सम इति श्रुतिरविरुद्धा। अत एव सूत्रकृता साम्यमुपैती
ति साम्योपायनशब्दमात्रं तु साम्यपदार्थः स्वारसिको नास्तीति भावप्रकटनाय शब्दशब्द उक्तः। ननु तैरेव धर्मैः साम्यं नेतरैरित्यत्र को हेतुरित्याकांक्षायामाह। उपायनशब्दशेषत्वादिति। पर
ममुपैतीति य उपायनशब्दस्तच्छेषत्वात्साम्योपायनस्येत्यर्थः। ब्रह्मसंबंधहेतुकत्वादानंदांशाद्याविर्भावस्य तदैव साम्योपायनकथनात्तैरेव धर्मैः साम्यमभिप्रेतमिति भावः। नन्वानंदादीनां ब्रह्म २

२ कारेणैवगानाक्रियतानाहतदगावकवर्णधर्मोगानमत्राप्युपसंहारात्मा ततद्दृग
कत्वंभकारस्यसंभ ४२

द

धर्मत्वाज्जैस्तत्साम्यकथनं तेनेदमेवगमयतीत्यात्रांक्यतद्धर्मवित्त्वमात्रस्यनतदभेदसाधकत्वमित्यत्र दृष्टांतमाह॥ कुशोत्यादि॥ कुशाअउंबर्यःम मिथस्ताश्चाग्निष्टोमादियागेषु प्रस्तोत्रा स्थाप्यंते। त
दातज्ज्ञेबंधियच्छंदस्कत्सुपगानंनद्दित्यर्थः। तत्राभित्वाशूरनोनुमोदुग्धाइवधेनवइत्यृचिमेवर्णास्तेषामचएवोपसंहृत्यभेंवत्येवंप्रकृतेपि ब्रह्मधर्मप्राकट्येननतदात्म्यकत्वं जीवस्यसंभवति। न
नुतत्त्वमस्यादिवाक्यैरत्राभेदबोधनादस्कृतयेति चेत्तत्राह तत्क्रमिति। जीवब्रह्मणोरभेदबोधनतात्पर्यमुक्तमित्यर्थः। तत्कुत्र सार त्वात्तुतद्व्यपदेशः प्राज्ञवदिति सूत्रेणेति शेषः। अपिचकृतो ब्र
सोपायनस्यसाम्योपायनहेतुत्वोक्त्यातदनुपायनस्यसाम्यानुपायने हेतुत्वमिति ज्ञाप्यते। तथाच पराभिध्यानात्तु तिरोहितं ततोह्यस्य बंधविपर्ययाविति सूत्रे जीवस्य ब्रह्मांशत्वे नानंदैश्वर्यादिब्रह्म
धर्मवत्त्वाद्ब्रह्मणः सकाशाद्विभागे सति तत्तिरोधानात्तद्धर्मतिरोधानस्यसंसारित्वे हेतुत्वमुक्तं यत्तदपि तदुक्तमित्यनेन स्मार्यत इति न विस्मर्तव्यं। यथान्यशाखोक्तधर्माणामप्येकस्यां विद्यायामु
पसंह्रियंते एवं ब्रह्मनिष्ठा धर्मा जीवेप्येतयाश्रुत्याबोध्यंत इत्येतावता साम्यमस्तीत्युपसंहारप्रकरण एतस्य निरूपणं कृतं॥ ॥सांपराये तर्तव्याभावात्तथाह्यन्ये॥ ॥वाजसनेयिशाखायां
स एष नेति नेत्यात्मेत्युपक्रम्यनव्ययत इत्यंतेन ब्रह्मस्वरूपमुक्त्वा य एतावेवब्रह्माणस्तद्धिदपि विवक्षितरूप इत्यभिप्रायेणाग्रे पठ्यते अतः पापमकरवमतः कल्याणमकरवमित्युभे उ ह्येष
एवैतरत्यमृत इत्यादिनाग्रिमयेषनित्यो महिमा ब्राह्मणस्येत्यृचा च ब्रह्मविदो माहात्म्यमुक्त्वा पठ्यते तस्मादेवंविच्छांतो दांत उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्यति सर्वमेनं पश्यति
सर्वोस्यात्मा भवति सर्वस्यात्मा भवति सर्वं पाप्मानं तरति नैनं पाप्मा तरतीत्याद्यक्रांते पठ्यते। य एवं वेदेति। अत्र दिपाप्मतरणादिरूपं ब्रह्मज्ञानमाहात्म्यमुच्यते ज्ञानस्य संसारमुक्तिहेतुत्वात्। अथ
र्वणोपनिषदादिषु च भगवद्भक्तेर्मुक्तिहेतुत्वमुच्यते। परं ब्रह्मैतद्यो धारयतीत्युपक्रम्य भजति सोमृतो भवति सोमृतो भवतीति। अयेपि मुक्तो भवति संसृतेरिति। एतद्विषयव्यवस्थाप्युपरे वोक्ते २

३ तिनाशोच्यते। एतावानूपरं संदेहो य एवंवेदमपाप्मानं तरतीति वचनाज्ञानदशायामपि पापसत्त्वं वाच्यमन्यथा तरणासंभवापत्तेः एवं सति भक्तिदशायामप्येवमेव न वेति भवति संशयः तत्र
श्रुतावविशेषेण पापनाशश्रवणान्मुक्तिपूर्वकाले पापनाशावश्यंभावादेकत्र निर्णीतः शास्त्रार्थोपरत्रापि तथेति न्यायेन भक्त्या पापनाशादत्रापि तथैवेति प्राप्त आह संपराय इत्या-
दि। संपरायपरलोकस्तस्मिन्प्राप्तये सतीत्यर्थः। अथवापरः पुरुषोत्तमस्तस्यायोस्थानं। तथा च सम्पश्रुतं पुरुषोत्तमज्ञानं येन संपरायो भक्तिमार्ग इति यावत्। अथवापरे पुरुषोत्तमेऽ
यनमयोगमनं प्रवेश इतिवत् तथा च सम्पस्परायो येन स तथा भक्तिमार्ग इत्यर्थः ज्ञानमार्गेऽक्षरप्राप्त्या भक्तिमार्गे पुरुषोत्तमप्राप्त्या तस्माद्विशेषमत्र ज्ञापयितुमेवं कथनमतो भक्तेः पू-
र्वमेव पापनाशो युक्त इति भावः॥ ब्रह्मभूतस्य भक्तिलाभानंतरं भक्त्या मामभिजानातीति भगवद्वाक्यात्पुरुषोत्तमस्वरूपज्ञानस्य भक्त्येकसाध्यत्वाच्च तथा। एवं सति मुक्तानामपि सि-
द्धानां नारायणपरायणः सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने। मुक्तोपसृप्यव्यपदेशात्। जन्मांतरसहस्रेषु तपोध्यानसमाधिभिः नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते। जन्मांतर-
सहस्रेषु समाध्य वृष ध्वजं। वैष्णवत्वं लभेत्कश्चित्सर्वपापक्षयादिहेत्यादिवाक्यैः पापनाशानंतरमेव भक्तिसंभवाद्भक्तस्य तत्त्वपापादेरभावात् ज्ञानमार्गीयतुल्यतेत्यर्थः। ननु य एवं वेदे-
ति सामान्यवचनात्पुरुषोत्तमविदोऽप्येवमेवेति चेत्तत्राह॥ ॥तथा ह्यन्ये। तथा ज्ञानानंतरमपि पापवंतोऽन्ये भक्तिमार्गीयेभ्योऽन्य इत्यर्थः। उक्तवचनरूपोपपत्तिर्दिशाह्येन ज्ञाप्यते। ननु भक्ति-
मार्गीयाणामपि गोपस्त्रीणां दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः। ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमंगला इति वचनेन दुष्कृतसुकृतयोरपि हानिश्रवणात्पूर्वोक्तिवचनैर्विरोध इत्या-
शंकायामुत्तरं पठति॥ ॥छंदत उभयाविरोधात्॥ ॥छंद इच्छा तथा च भक्तिमार्गीयाणामपि पूर्वं पापनाशो यः स भगवदिच्छाविशेषतोऽतो भक्तेः पूर्वमेव पापनाशनिरूपकात्तन्नाशानि २९

व

रूपकवचनयोरविरोधाद्धेतोर्भक्तेः पूर्वमेवपापनाशावश्यकइत्यर्थः। एवंसतिभक्तेः पूर्वमेवतन्नाशाअसंसर्गिकः सकृच्चिद्विशेषेऽपापनोद्यनइतिभावोज्ञापितोभवतिँश्चेच्छाविशेषेवक्तव्यवक्तृत्वेपिकिंचिदुच्यते। चिकाविनिलीलामध्यपातिभक्तान्सोपधिस्नेहवत्सोनमगुणाविप्रहानवामुहूलतादियुक्ताः इतिज्ञापयितुंकतिपयगोपीस्तद्विपरीतधर्मयुक्ताःकृत्वातस्यांदशायांस्वदशाप्रेमोप्रतिबंधंकारयित्वास्वयमेवतांदशांनाशयित्वास्वलीलामध्यपातिनीः कृतवानिति। नस्वेनावतासार्वदिकएवायंभावोभवति। नहिमंत्रप्रतिबद्धशक्तिरग्निरदाहकइति। तत्स्वभावत्वमेवतस्यसार्वदिकमितिवक्तुंशक्यं। एतच्चश्रीभागवतदशमस्कंधविवृत्तौप्रपंचितमस्माभिः॥ ॥गतेरर्थवत्वमुभयथान्यथाहिविरोधः॥ ॥ननुसत्यंज्ञानमनंतंब्रह्मयोवेदनिहितंगुहायांपरमेव्योमन्निति। तमेवंविद्वानमृतइहभवतिनान्यःपंथाविद्यतेयनायेत्यादिश्रुतिभिःफलरूपब्रह्मज्ञानेसत्येवमोक्षइत्युच्यते। यमेवैषवृणुतेतेनलभ्यइतिश्रुत्यात्मीयत्वेनांगीकारात्मकवरणस्यभक्तिमार्गीयत्वात्तस्मिन्सतिभक्तिमार्गप्रवेशाद्भक्त्यैवमोक्षइत्युच्यते। किंच ॥भक्त्यामामभिजानातीत्युक्त्वाततोमांतत्त्वतोज्ञात्वाविशतेतदनंतरमितिभगवतोक्तमितिभक्तिमार्गेपिपुरुषोत्तमज्ञानेनैवमोक्षउच्यते। ज्ञानमार्गेत्वक्षरज्ञानेनेतिविशेषः। तस्मान्मभक्तियुक्तस्ययोगिनोवैमदात्मनः। नज्ञानंनचवैराग्यंप्रायःश्रेयोभवेदिहेतिवचनेनभक्तिमार्गीयस्यज्ञाननैरपेक्ष्यमप्युच्यते। तथाचैवंमिथः श्रुत्योःस्मृत्योश्चविरोधान्नैकतरनिर्धारःसंभवति। नचज्ञानेनैवमोक्षउभयत्रापितथोक्तेः ज्ञाननैरपेक्ष्योक्तिस्तुभक्तिस्तुत्यभिप्रायेतिवाच्यं। विषयभेदेनज्ञानभेदान्मुक्तिसाधनंकतमंज्ञानमित्यनिश्चयात्। नचश्रौतत्वाविशेषात्समुच्चयइतिवाच्यं। ज्ञानिनोक्षरेभक्तस्यपुरुषोत्तमेलयात्समुच्चयासंभवात्। तर्ह्येवंविरोधाभावादुपपन्नंसर्वमितिचेत्॥ न। पूर्वंज्ञानमार्गीयज्ञानवतःपश्चाद्भक्तिमार्गीयज्ञानवतोलयस्थाननिर्द्धारासंभवात्॥ ॥अपरंच॥ ॥ततोमांतत्त्वतोज्ञात्वेतिवनाद्भक्तिमार्गेतित्वतोभगवज्ज्ञानमेवप्रवेशसाधनमितिमंतव्यं। तथाचम

अणु॰२ त्कामारमणंजारं मत्स्वरूपाविदोबलाः। ब्रह्ममांपरमंप्रापुः संगाच्छतसहस्रशः इति वाक्याज्ज्ञानमार्गीयभक्तिमार्गीयतानरहितानामपि भगवत्प्राप्तेस्तत्साधननिरूपकश्रुतिविरोधः। त
२७ थाच क्वचिज्ज्ञानं मुक्तिसाधनत्वेनोच्यते क्वचिद्भक्तिः क्वचित्तूभयमपीत्येकतरसाधनानिश्चयान्मुक्तिसाधने मुमुक्षोः प्रवृत्त्यसंभव इति प्राप्त आह। गतेरर्थवत्त्वमित्यादि। गतेर्ज्ञानस्यार्थवत्त्वं।
फलजनकत्वमुभयथा मर्यादापुष्टिभेदेनेत्यर्थः॥ ॥अत्रायमाशयः॥ ॥एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषतीत्यादिश्रुतिभ्यो भगवान्सृष्टिपूर्वकाल एवैतस्मै
जीवायैतत्कर्मकारयितृत्वेन तत्फलंदास्य इति विचारितवानिति तेन यथैव भवति तच्चोक्तरीत्या मुक्तिसाधनानुगमे हेतुरवश्यं वाच्यः। एवं सति त्वतिसाध्यं साधनं ज्ञानं भक्तिरूपं शास्त्रेण बोध्य
ते। ताभ्यां। विरहिताभ्यां मुक्तिर्मर्यादा। तद्रहितानामपि स्वस्वरूपबलेन स्वप्रापणं पुष्टिरित्युच्यते। तथाच यं जीवं यस्मिन्मार्गेऽङ्गीकृतवांस्तं जीवं तत्र प्रवर्तयित्वा तत्फलं ददातीति सर्वं सुस्थं
अत एव पुष्टिमार्गेऽङ्गीकृतस्य ज्ञानादिनैरपेक्ष्यं मर्यादायामङ्गीकृतस्य तदपेक्षित्वं च युक्तमेवेति भावः। अत साधकत्वेन विपक्षे बाधकमाह। अन्यथा हि विरोध इति। अन्यथा मर्यादापुष्टि
भेदेन व्यवस्थाया अकथने विरोधाद्धेतोस्तथेत्यर्थः। विरोधस्तु सर्वपक्षे ग्रंथ उपपादितः। एतेनैव। ननु श्रवणादिरूपा प्रेमरूपा च भक्तिरविशेषेण पापक्षय एवोदेत्फलं न कश्चिद्विशेषोस्ति तत्रा
धुनिकानामपि भक्तानां दुःखदर्शनाच्छ्रवणादेः पापनाशकत्वं श्रवणाद्या विशेषपक्षस्त्वसंगतः। अथ श्रवणादिरूपा पापे सत्यपि भवति प्रेमरूपा तु तन्नाश एवेति विशेषो वाच्यः सोपि प्रेम
वतामप्यजामिलादीनामपि प्रसंगे भगवन्नामसंकाप्त्यस्त्वनिश्रवणात्साधीयानित्यपि शंका निरस्ता वेदितव्या। तथाहि। मर्यादापुष्टिभेदेनांगीकारे चैतत्सएपादाद्यायामंगीकृतानां मुमुक्षये
व श्रवणादौ प्रवृत्तिस्तदा हृत्त्वे नैव भगवति प्रेमापि न तु निरुपाधिः कदाचिदस्तु स्वभावेन मुक्तीच्छा निवृत्ता वपितन्नकेः साधनमार्गीयत्वादनिश्चितो मे गतिमेवीप्रकृष्ट इति वाक्यादतेमुक्ति

३ पततलं प्रतिबंधकमिति वक्तुं शक्य। तदुक्तं श्रीभागवते। स्वपादमूलं भजतः प्रियस्य ×३

रेवचवित्री। अस्मिन्मार्गे श्रवणादिभिः पापक्षये प्रेमोत्पत्तिस्ततो मुक्तिः पुष्टिमार्गेगीकृतेस्तत्तु यत्नसाध्यत्वात्तत्र च पापादेरप्रतिबंधकत्वाच्छ्रवणादिरूपा प्रेमरूपा च युगपत्पौर्वापर्येण वा वैपरीत्ये
न वा च वक्तेवा। अत्र श्रवणादिकमपि फलरूपमेव स्नेहेनैव क्रियमाणत्वान्न विधिविषयः। न च विद्यादिमुक्त्यंतरूपत्र जननानंदासंतरायरूपात्वंकषाविर [illegible] लविविधमज्ञानरूपगहनानां दहनेनोत्तुपस्य
नुग्रहानलस्यनदांतरालिकपांक्तिपनावस्पइरिःप रेवाः। विकर्मयच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि संनिविष्ट इति। विकर्म प्राकृतं। तद्दुःखदमिति स्वयं च हरित्वेन दुःखहन्त्रीति धुनोति। उक्तविशेषणविशि
ष्टस्य स्वतो विकर्मकृत्संभव ~~[illegible]~~ वात्संमार्गे किंमन्त्रोक्तं नतमयात्कृतमिति विद्वायत्कृतं विकर्म तत्कथंचिदुत्पतितमित्यु-
न्य च्यते। त्यक्तान्यभावत्वेन भगवत्सेवाव्यासंगे नेंद्रद्युम्नाख्यपांड्यराजवन्महदागमनाद्यज्ञानं वा। कक्कोकरूपेन केविकर्मेक्रियावत्तद्विज्ञापनाय वा कथंचिदित्यंवा। तेनन्तर्कितं विकर्मत्रा [illegible] निप्तेतमिति ज्ञायते
नइति । एतादृशस्यापि यदि विकर्म भवेत्तदा तन्निवृत्त्यर्थं ततेनान्यत्कर्तव्यं भगवानेव हृदि निविष्टस्तद्धुनोति। कदाचित्स्वचक्षिबलस्फूर्त्या सदोषमपि जनं तत्तापीकरिष्यामीत्यंगीकुर्याच्चेद्भक्तस्तु दैन्यादिस्वार्थेन
तत्संसर्गजं दोषमस्येतदंगीकारेण तद्दोषमपि धुनोतीति सर्वपदेनोच्यते॥ चिरकालभोग्यमपि तत्क्षणेनैव नाशयतीति तत्राज्ञाने कालादेरप्रतिबंधकत्वमित्यपि ज्ञापयितुं परस्य कालादेरीशत्वमुक्तं। अत्र भजना
दिष्वन्निवेशांतानांस्यष्टस्यैव विक र्मणि सत्यपि संभव इति। उपपन्नस्तत्क्षणाघोनिष्ठे लोकवत्॥ ॥ननु मुक्तेरेव सर्वत्र फलत्वमुच्यते। मुक्तं चैतत्संसृतेर्दुःखात्मकत्वात्तन्निवृत्तेः सर्वेषामिष्टत्वात्। पुष्टिमार्गी
यत्नकानां तु तत्र नपेक्षितत्वमुच्यते। तदुक्तं मपर्वणोपनिषत्स्वष्टादश्यां एभिं च स्वरूपमुक्त्वा पठ्यते परब्रह्मसेतद्योधारयतीत्यादेरंते मोमृतो भवतीत्यादि एतदग्रे किंतद्रूपं किंरमनं कथं [illegible] हेतद्भजनमित्यादिप्रश्नो-
त्तरं पठ्यते भक्तिरहस्यभजनं नदिहामुत्रोपाधिनैराश्येनैवामुष्मान्मनः कल्पनमेतदेव नैष्कर्म्यमिति एतदत्र विचार्यते इमं ज्ञात्वा निदध्यासनादिरूपध्यानादेरमृतत्वं फलमुच्यते भजनस्य रूपं च यावत्फलत्वे

पु·३ राश्येन भगवस्यात्मनः कल्पनमित्युच्यते। न च फलनैराश्येन भजने प्यं तेमुक्तिरेव भवित्रीतिवाच्यं तं यथा। यथोपासने तथैव भवतीति न द्वैतात्म्यत्वावतीतिश्रूने मुक्तिसाधनत्वेन तात्वा भजनः सैव फलं स्वरूप
८ स्यैव स्वतंत्रपुरुषार्थत्वमनुभवन्यो भजते तस्य तदेव फलमिति यत्नो निर्णयः संपद्यते। ये यथा मां प्रपद्यंते तां तथैव भजाम्यहमिति भगवद्वाक्याच्च। अत एव रहस्य भजनंन त्समुक्तं। तथा च श्रोतत्व भगव
त्संबंधिन्वयोर विशेषात्कतमो गरीयानिति तस्मै श्रायेगूढाभिसंधिः प्रवृत्ति मुमुक्षोः सकाशाद्रहस्यभजनकर्त्तैवोपपन्नः उपपत्तिमुक्तः तमेवोद्घाटयति तत्र लक्षणाधेपिल र्षे रिति तल्लक्षणो भगवत्स्व
रूपात्मको योर्थः स्वतंत्रपुरुषार्थरूपस्तदुपलब्धेः स्वाधीनत्वेन तत्प्राप्तेरित्यर्थः। यद्यपि पुरुषो नमेप्रवेशेन दानं दासभावो भवति। तथापि न प्रभोस्तदधीनत्वं न किंचिदेभावा त्युत वैपरीत्यं भजना
नंदस्य तन्नत्राधि क्यं त्वमुक्तिं ददाति कर्हिचित्स्म न भक्तियोगं। दीयमानं न गृह्णंति विना मत्सेवनं जनाः॥ नारायणपराः इत्युपक्रम्य स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन इत्यादिवाक्यैरध्यवसीयते। अ
त एव स्वामी प्यवाच्युपसंगत्युक्तः तेन दासीत्वेन दासत्वेन जीवानां मुख्यत्वेन प्रस्तुतिकरे। स्थितिरुक्ता भवति न च महत्पदार्थस्वरूपाज्ञानादल्पएवानंदेयघा स्वर्गाधिक्यं मन्वानः स्वर्वोकिं न वांछति। त
थाप्यपीति वाच्यं दीयमानानामर्थानां स्वरूपाज्ञानासंभवात्। अनुभवविषयीक्रियमाणत्वस्यैवात्र दीयमानपदार्थत्वात्। तदज्ञाने स्वर्गादित्रयेऽतुल्यदर्शित्वासंभवश्च। मुक्तिं ददाति कर्हिचित्स्म
न भक्तियोगमिति वाक्ये भक्तेराधिक्यं स्पष्टमेवोच्यते। तस्मादानूनार्थेति प्रभोः सकाशात्पूर्णार्थवान्महानिति प्रक्रमे वास्योपपन्नं त्वं इममेवार्थं दृष्टांतेनाह लोकवदिति। यथा स्वाधीनभर्तृका नायिका
तदवस्थानतुल्पणगृह वित्तादिकं दीयमानमपि नोरीकरोतीति तथेत्यर्थः। अथवा स भगवानेव लक्षणमसाधारणो धर्मो यस्य मतं लक्षणाद्भगवद्भक्ति भावः स एवार्थः। स्वतंत्रपुरुषार्थरूप इत
ये हरिर्वदता। भगवत्स्वाकृष्टवानेव हि भक्तो भक्तत्वेन ज्ञायत इति तथा। एतेन ज्ञाप्यं हि ज्ञापकादधिकं भवति। एवं सति य ज्ञापकं परमकाष्ठापन्नं च स्वपुरुषोत्तमस्वरूपं सर्वफलरूपं तन्म ह

व भ

१४ रसति भजति ध्यायते प्रेमनिश्चणो निश्रावयत्युपदिशत्याच
मृतो भवतीति ४१

त्वं कथं वक्तुं शक्यमिति सूत्र्यते॥ अनियमः सर्वासामविरोधः शब्दानुमानाभ्यां॥ ॥अथर्वणोपनिषत्सु पठ्यते परब्रह्मैतद्यो धारयति तत्र धारणादीनां समुदितानामेव साधकत्व
त प्रत्येकमपीति भवति संशयः। अत्र धारणादिसाधनकलापमुक्त्वा फलमुच्यत इति समुदितानामेव मुक्तिसाधकत्वमुपलक्षणं चैतच्छ्रवणादिनवविधभक्तीनामप्येवमेव तथा त्व
[illegible] पूर्वपक्षे। सिद्धांतमाह। अनियम इति। समुदितानामेव तेषां फलसाधकत्वमिति नियमो नास्तीत्यर्थः। तत्रोपपत्तिमाह सर्वासामविरोध इति। चिंतयंश्चेतसा कृष्णं मुक्त
वति संसृतेरिति श्रीकृष्णचिंतनमात्रस्य तथात्वमुच्यते। पंचपदीं जपन्नित्या कृष्णं ब्रह्मसंपद्यन्ते ब्रह्मसंपद्यत इति श्रीकृष्णकीर्त्तनमात्रस्य तथात्वमुच्यते। तथा च प्रत्येकपक्ष एव सर्वासां श्रुती
य नामविरोधः स्यात्। एवं सति परब्रह्मैतद्यो धारयतीत्यादिषु सोऽमृतो भवतीति पदं प्रत्येकं संबध्यत इति ज्ञेयं। ननु यथा दंडादीनां प्रत्येकं घटहेतुत्वोक्तावपि नैकस्यैव तज्जनकत्वमेवमत्राप्येके
ध स्य चिंतनादेस्तथात्वोक्तावपि फलसाधकत्वं समुदितानामेव तेषामिति चेत्। मैवं। यो धर्मो यत्प्रमाणैकसमधिगम्यः स तेन प्रमाणेन यथा सिध्यति तथा मंतव्यः। दंडादेस्तथात्वं प्रत्यक्षेण
सिध्यत इति तत्र तथास्तु प्रकृते तु तेषां तथात्वमलौकिकं शब्दैकसमधिगम्यं श्रुतिसूक्तेन चोक्तन्यायः श्रुतिष्वपि तात्पर्यनिर्णायको भवतीति वाच्यं। अलौकिके धर्मे लौकिकस्यासामर्थ्यात्।
अन्यथा ब्रह्मणा मनसैव प्रजाजनने निषेकादिकमपि कल्प्येत। स्मृतिरपि केवलेन हि भावेन गोप्यो गावः खगा मृगाः। ये न्ये मूढधियो नागाः सिद्धा मामीयुरंजसा। एतावान्सांख्ययोगाभ्यामित्यप
क्रम्यांते नारायणस्मृतिरित्यादिरूपैवमेवाह। इममेवार्थं हृदि कृत्वाह सूत्रकारः शब्दानुमानाभ्यामिति श्रुतिस्मृतिभ्यामित्यर्थः। ते चोक्ते। एतेन सूत्रकारस्यान्योप्यभिप्रायोस्तीति ज्ञाति। यत्रो
क्तसाधनस्तोमसंपत्तिरेकस्मिन्भक्तेस्ति न त्वेकेनैव मुक्ताविति रसाधनत्वबोधकश्रुतिविरोधाच्छ्रवणकीर्त्तनस्मरणानां युगपद्व्यवहितपूर्वक्षणे युगपदपि संभवादन्यथा सिद्धिसंभवेति

अणु०२ निगमकाभावादेकेनैव मुक्तिरिति न नियमो नः प्रत्येकसाधकत्वबोधिकानां सर्वासां श्रुतीनां मिथो विरोधः॥ न चैकत्र तथात्वे सर्वत्रैव तथास्त्वित्याशंक्य तत्र बाधकमाह। शाब्दानुमानाभ्यामि
२८ तिश्चवित्। तत्र प्रत्येकमपि च क्लिष्टत्वमुच्यत इति न तथेत्यर्थः। यत्र प्रत्येकमपि तथात्वं तत्र किमु वक्तव्यं समुदितानां तथात्व इति भावः। तेन क्लिष्टः प्रयोगोयमिति ज्ञेयं॥ ॥यावदधिकारमव
मुक्ति स्थितिराधिकारिकाणां॥ ॥पूर्वं मुमुक्षुनिःसाधनत्वेन। क्रियमाणानां भगवद्धर्माणां मुक्तिधानप्रकारो विचारितः। अधुना तु भगवानेव विचारितकार्यंत्नो किंकेश्वर्याधिज्ञाकं ज्ञात्वा स्वैश्वर्य
४न दिकं दत्वा येन जीवेन तत्कारयति स जीवस्तेनैव मुक्तो भवति न चेति विचार्यते। तत्र जीवकृतभगवद्विषयकधर्माणां यत्र तत्साधकत्वं तत्र भगवदीयानां धर्माणां तत्साधकत्वं सुतरामेवेत
षां स्वकृत्यसाध्यत्वेनाविधेयत्वात्तत्साधने न प्रवेशोपीति संदेहे निर्णयमाह यावदित्यादि। यस्मिन्जीवे यत्कार्यसाधनार्थमधिकारो भगवता दत्तस्तत्कार्यसाधनसमाप्तस्मिन्नेव स्वधर्मि
गवता स्थापितास्तत्राधिकारिका इत्युच्यंते तत्कार्यसंपत्तिरेव तदधिकारप्रयोजनमिति तावदेव तेषां तस्मिन् स्थितिरित्यर्थः। एवं सति तत्संपत्तौ सोपि निवर्तत इति न तत्संबंधिनो धर्मा अपि
र्तंत इति मुक्तिपर्यंतं न तेषां व्यापारसंभवो भगवता तथैव विचारितत्वान्मुक्तिस्तु भक्त्यैवेति भावः। यच्च ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यांते कृतात्मनः प्रविशंति परं पदमिति वाक्यं
त्वाकल्पं तेषामधिकारः समष्टिश्रुतीनां तद्विषयकमिति ज्ञेयमन्यथा भगवद्दत्ताधिकारसामर्थ्यस्य भरनस्य त्वाधिकारसमाप्तौ मुक्तिर्न वदेत् कृतात्मन इति पदात्तेषामपि भगवति लीनांतःक
नामेव परस्य भगवतः परपदे अपि वैकुंठे प्रवेश उच्यते। न त्वाधिकारिकगुणे॥ ॥अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तं॥ ॥ननूक्तापूर्वगुणोपनिषद्वाक्ये भगवद्धर्म
मुक्तिसाधनत्वमुच्यते। श्रुत्यंतरे तु तमेव विदित्वातिमृत्युमेति नान्यपंथा विद्यतेयनाय। ज्ञानादेव तु केवल्यं तरति शोकमात्मवित्। ब्रह्मवेद ब्रह्मैव भवतीत्यादिषु ज्ञानस्यैव मुक्तिसाधनत्वमु

ते।श्रुतित्वाविशेषादुभयोस्तथात्वेकारणवैजात्येकार्यवैजात्यस्यावश्यकत्वान्मुक्तौचतदसंभवाद्भक्त्यामामभिजानातीतिवाक्याद्भक्तौज्ञानस्यापिसंभवाज्ज्ञानेनैवमुक्तिरितिसर्वपक्षेज्ञानसाधन
त्वनिरूपकश्रुतितात्पर्यंनिरूपयन्पुरुषोत्तमप्राप्तेरेवमुक्तिपदवाच्यत्वात्तन्मननस्यैवतत्साधकत्वमितिहृदिकृत्वाह।अक्षरधियामित्यादि।तुशब्दःसर्वपक्षनिरासे।वाजसनेयकेश्रूयते।एतद्वैतदक्षरं
गार्गिब्राह्मणाअभिवदंत्यस्थूलमित्यादिनाधर्मवर्णनेच।अथपरायया तदक्षरमधिगम्यतइतितेनज्ञानमार्गेक्षरविषयकाण्येवज्ञानानिनिरूप्यंते।पुरुषोत्तमविषयकाणिनेतिनिश्चीयते।ब्रह्मविदाप्नो
तिपरमित्यत्रतावदक्षरब्रह्मविदोक्षरात्परस्यप्राप्तिरुच्यते।अक्षरादपिचोत्तमइतिभगवद्वाक्याच्चाक्षरातीतःपुरुषोत्तमः।भक्त्यामामभिजानातीतिवाक्येमामितिपदात्पुरुषोत्तमविषयकंज्ञानमुच्य।
तेनत्वक्षरविषयकं।किंच।ब्रह्मभूतस्यभक्तिलाभोक्तेस्तस्यचानंदांशाविर्भावात्मकत्वात्तस्यचाविद्यानाशजन्यत्वात्तस्यचाक्षरज्ञानजन्यत्वात्पूर्वकक्षाविश्रांतमेवाक्षरज्ञानं।एवंसत्यक्षरविषयिणीनां
धियांश्रुतीनांमुक्तिसाधनेषुयोऽवरोधःप्रवेशानंगणनेतियावत्ससामान्यतःशब्दाभ्यांहेतुभ्यांपुरुषोत्तमसंबंधिसंबंधेमुक्तिरितिसामान्यं।मर्यादामार्गीयश्रुतीनांब्रह्मभूतःप्रसन्नात्मानशोचतिनकांक्ष
ति।समःसर्वेषुभूतेषुमद्भक्तिंलभतेपरामितिवाक्यात्ब्रह्मभावानंतरमेवभगवद्भावसंभवात्तेनपुरुषोत्तमेप्रवेशात्तत्परंपरोपयोगेब्रह्मभावस्यैवमुक्ताभ्यांहेतुभ्यांनयेभ्यःपूर्वः।वस्तुतस्तुपुरुषोत्तमप्रा
प्तिरेवमुक्तिरितिभावः।नन्वक्षरस्याविशिष्टत्वेनतदुपासकानामपितथात्वात्केषांचित्तत्रैवलयः।केषांचिद्भक्तिलाभइतिकथमुपपद्यतइत्याशंक्यतत्रहेतुंदृष्टांतेनाह।औपसदवदिति।उपसदाख्येक
र्मणितानूनप्त्रस्पर्शाख्यमौपसदंकर्मास्ति।तच्चार्त्विज्यायाध्योवाकश्चिच्चमसेवायदान्यंच ध्रुवतत्तंपंचावत्तंवासमवद्यतितत्तानूनप्त्रमित्युच्यते।अनाधृष्टमसीतिमंत्रेणषोडशर्त्विजोयजमानेनसहता
नूनप्त्रंसमवमृशंत्यनुमेदीक्षामितिमंत्रेणयजमानस्तत्समवमृशान्यमृत्विजंकामयेतायंयजमानःसमृच्छेदितितेनप्रथमसमवमर्शयेदितिश्रूयतेश्रुतौकल्पेच।अत्रसर्वेषामृत्विजांतानूनप्त्रत्वाविशेषेपियस्मि

ऽन्येहानिर्ज्ञायेन तथेच्छातत्त्वैव तथाकनिर्मेनरेष्ठ । न हि तत्त्वाविशिष्टेष्टकत्यमेवं कल्प्येतिरिति पर्यनुयोगः संभवत्येव मिहापीत्यर्थः । ननु श्रवणादेर्यथा पुरुषोत्तमसंबंधित्वेन तत्प्राप्तिहेतुत्वमे
वमक्षरस्याप्यस्त्वित्याशंक्याह निखिलासुरजीवतमःपुंजनिरासकेन यदुवंशोदयाचलचूडामणिनैव निरस्तेति न स्वतो वक्तुमुचितेत्याशयेनाह । नन्वेकमिति । भगवद्गीतास्विति शेषः । तत्र
यदक्षरं वेदविदो वदंतीत्युपक्रम्य स याति परमां गतिमित्यंतेनाक्षरप्राप्त्युपायमुक्त्वा ऽनन्यचेताः सततमित्यादिना स्वप्राप्त्युपायं वैलक्षण्यं चोक्त्वा ऽक्षरैकलभ्यत्वं स्वस्य वक्तुं पूर्वं क्षराक्षरयोः
स्वरूपमाह । सहस्रयुगपर्यंतमित्युपक्रम्य प्रभवत्यहरागम इत्यंतेन क्षरस्य स्वरूपमुक्त्वा । परस्तस्मात्तु भावोन्य इत्युपक्रम्य तद्धाम परमं ममेत्यंतेनाक्षरस्वरूपमुक्तं च तत्र पूर्वं क्षरस्वरूपमिति उ के
परस्योक्ते । इत्यत्र क्षरादेव परत्वमुच्यते । तच्छस्य पूर्वपरामर्शित्वात्तस्यैव पूर्वमुक्तत्वादत एवाक्षरव्यावर्तकस्य शब्दस्योक्तेः एतेन नित्यत्वेन क्षरणाभावादक्षरशब्देन जीव एवोच्यते न तु पुरुषोत्तमा
धिष्ठानभूतो जीवातीत इति निरस्तं । यं प्राप्य न निवर्तंत इति वाक्याज्जीवे तथात्वाभवात् । नित्यमुक्तं प्रत्याश्रयस्वेवैफल्यापत्तेः । इत एव ज्ञानमार्गिणां तद्धाम्नि रेव मुक्तिरिति हेयं ततोऽनिवृत्ते
ः पुरुषः स परः पार्थ इत्यनेनाक्षरात्परस्य स्वस्य भक्त्यैकलभ्यत्वमुक्तं तेन ज्ञानमार्गीयाणां न पुरुषोत्तमप्राप्तिरिति सिद्धं । यस्यांतस्थानीत्यनेन परस्य लक्षणमुक्तं । तच्च मूलादिप्रसंगे श्रीगोकु
ले श्रुरेस्पष्टमुच्यते । तेनाक्षरोपासकानां न पुरुषोत्तमोपासकत्वं न द्विषयकश्रवणादेरभावादिति भावः । अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिमिति वाक्यात्स्याम्यातिपरमां गतिमित्यत्राक्षरमेव
यातीत्यर्थो ज्ञेयः । किंच । तैत्तिरीयोपनिषत्सु पठ्यते यस्मिन्निदं सं च वि चैति सर्वं यस्मिन्देवा अधि विश्वे निषेदुः । तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन् । येनावृतं खं च दिवं महीं च येनादित्य प
स्तपति तेजसा भ्राजसा च । यमंतः समुद्रे कवयो वयंति । यदक्षरे परमे प्रजा इति । अत्राक्षरात्मकत्वेन क्षरात्मकादाकाशात्परमे व्योम्नि भिन्नकालमांरूद्याकाश इति यावत् । तत्र प्रकाशमानमित्यर्था ३०

रे च२

ता। अत एव ब्रह्मविदाप्नोति परमित्यस्य पक्षस्य सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्नित्येतदुपनिषद्वाक्ये पठ्यते। यदक्षरे परमे प्रजा इति पदमवयं नीत्यनेन संबध्यते। अत्र प्रजाप

दात् यापि वैकुंठात्मको लोको ऽक्षरपदेनोच्यत इत्यवगम्यते। अत एव न यत्र मायेत्यादिना श्रीभागवतेन तत्स्वरूपमुच्यते। एतेनाक्षरस्य पुरुषोत्तमाधिष्ठानत्वं निश्चाय्यते। [illegible]

[illegible] ऽतो ऽप्यक्षरातीतः पुरुषोत्तम इत्यवगम्यते। एवं सति सामान्यं भगवद्विभूतिरूपत्वेन ज्ञावस्तस्य पुरुषोत्तमस्य भावः। सनोकरीत्या तत्र स्थितिरिति यावत्। ताभ्यां हे

तुभ्यां तथेतस्य पर्यालेयः॥ ॥इयदामननात्॥ ॥ननु संसारनिवृत्त्यानंदाविर्भावयोरविशेषादक्षरे ब्रह्म। एतत्पुरुषोत्तमे प्रवेशान्नततो को कोहेवारित्साकांक्षायामाह। इयदिति। परिमाण

वचनं तस्याक्षरलोकथनादित्यर्थः। अत्रेदं हेयं। तैत्तिरीयोपनिषत्सु मेषानंदं गंधर्वनारभ्य प्रजा इति पर्यंतस्योत्कोच्यते। येशतं प्रजापतेरानंदाः। स एको ब्रह्मण आनंद इति एवं सति यत्तदेतावदित्य

क्षरानंदस्य सावधित्वेनाक्षरलोकथनादानंदत्वेन निरवध्यानंदात्मकस्य पुरुषोत्तमे कथनात्तथोक्तिरिति। ।अंतरा भूतग्रामवत्स्वात्मनः॥ ॥अथ ज्ञानमार्गे यथा स्वात्मत्वेन ब्रह्मणो ज्ञानं तथा भ

क्तिमार्गेपि तथा पुरुषोत्तमज्ञाने स्वात्मत्वेन पुरुषोत्तमज्ञानं भवति न वेति विचार्यते। सर्वांतरत्वेनाक्षरलोकथनात्तद्भवतीति पूर्वः पक्षः। तथात्वेपि सर्वस्य वशी सर्वस्येशान इत्यादिश्रुतिविरोधमेवा

ज्ञानं नभवतथेति सिद्धांतः॥ अत्र तथाज्ञानाभावस्यावश्यकत्वार्थं विपरीते बाधकमाह। पूर्वस्मिन्सूत्रे ब्रह्मानंदाद्भजनानंदस्याधिक्यं निरूपितं सत्तु भगवद्भक्तस्य व्यवधायकोर्ध्वब्रह्मगुणानंसंपादयते स्वा

त्मत्वेन ज्ञानं च भजनानंदांतरायरूपं यद्येनत्संपादयेत्तं न दद्यादयेन्यथाभावादतः स्वात्मत्वेन ज्ञानं भक्तिमार्गीयस्य न संभवतीत्याशयेनाह। अंतरा स्वात्मन इति। भगवता भक्तिमार्गे स्वीयत्वेनांगीकृतो

यश्चात्मा जीवस्तस्य यदात्मत्वेन ज्ञानं न भजनानंदानुभवे अंतरायव्यवधानरूपमिति भगवता नाद्दशोन्तीवेतत्र संपाद्यत इत्यर्थः। तत्संपादनस्य सर्वथैवासंभावितत्वं हीनत्वं च ज्ञापयितुं दृष्टांतमाह। भू

ना३

श्रीभु॰ २ न ग्रामवदिति। उक्तनकस्य विग्रहोप्यलौकिकः इति तन्नलौकिकोन्तरयामो न संभवति हीनत्वानपेत्स्यर्थः। अयमालौकिकोन्तस्तग्रामस्त्रीपुत्रपश्वादिः ब्रह्मसानंदा तु न वे बाधकस्यापानजनानंदा तु न वेत्ता
३१ त्मत्वेन भगवज्ज्ञानमित्यर्थः॥ ॥अन्यथानेदानुपपत्तिरिति चेन्नोपदेशांतरवत्॥ ॥ननु नकेषमुद्धवादिषु ज्ञानोपदेशः श्रूयते। स चात्मब्रह्मसाभेदज्ञानफलक इत्यात्मत्वेन ज्ञानाभावे तदभेदोपदेशा
नुपपत्तिः स्यादिति तन्मतं व्यमेवैवं मतिं न किं मार्गज्ञानमार्गस्योत्कर्षस्य सिध्यति। अत्राशंक्य परिहरति। उपदेशांतरवदिति। न स्वत्वाभेदज्ञानायोपदेशः किंतु यथा। निमस्वर्गापवर्गादिव्यापारलौ
किकानंदफलकालौकिके कर्मण्यधिकाररूपसंस्कारार्थं गाय्युपदेशः क्रियते तत्संस्कारसंस्कृतं न तु शरीरादिकमपि नृतादि निरपि नोपरतं न वति। यथा वाग्योगोपदेशासंस्कृतस्यवडरस्मा
दिभिनोपरम्यते तथा प्रकृते न क्रियावश्यरमात्मकत्वेन संयोगवियोगभावात्मकत्वाद्वितीयस्य प्रलयानलादितिकरणत्वेन कदाचित्प्रादुर्भावोदयेन भक्तवर्गादेस्तिरोधानेऽपि मम न नानंदाद्य
नव प्रतिबंधः स्यादिति तन्निवृत्त्यर्थं ज्ञानोपदेशासंस्कारसंस्कृतं तदुपरादिकं भगवता क्रियते न त्वात्माभेदज्ञानं भगवतो भिन्नेनमित्यर्थः। अन्यथोपदेशानंतरं बदरीं गच्छ। विदुरं प्रती हागतोऽहं। विरह
दुःखमेतिनवदेदेवमेवान्येष्वपि भक्तेष्वत्येयं। अत्रोपदेशानंतरपदं प्रसक्तनोपदेशाभिन्नमुपदेशामाहेति प्रसक्तनस्य तस्याभावाद्भेदपदे नाभेदोपदेश एवोच्यते। एतेन भगवान्स्वीयानां भक्तिभावप्रति
बंधनिरासायैव सर्वं करोति। नितरापि तेभवति। अथवोपदेशांतरवदित्यस्यायमर्थः। शरीराद्यध्यासवतस्त्वाद्धिन्नच्छात्मातत्वं न तु शरीरादिरित्युपदेशो ज्ञानमार्गे यथा। क्रियते न शरीरादावात्म(
बुध्यायस्त्वेहादिः सोपगच्छति न तथात्र सर्वेषामात्मनो यात्माय श्चात्मनिति दृष्टिं स्यादिश्कृति मिश्रीजीवात्मनोप्यात्मा पुरुषोत्तम इति बोध्यते। तेन पुरुषोत्तमे निरुपधिः स्नेहस्तत्संबंधित्वेनात्मनि स
सिद्धनियद्यप्येवं भावः ध्रुवमप्यासीदेवं तथापि सहजस्य शास्त्रार्थत्वेन ज्ञानेति प्रमोदोदाढ्यं च भवतीति तथा। नैतावता जीवाभेदश्चायाति। अग्रे जीवनसंपत्तिरेवोपदेशाकार्यं न तु तेन ध्रुवभावोप ३१

ते

ति

मदः संभवतीति सारं। तेन ज्ञानेन सर्वाधिकं मत्वा नायं भक्तिबलप्रदर्शनं च सिध्यति॥ ॥अतिहारो विशिषंतिहीनरवत्॥ ॥ननु तद्योऽहं सोऽसौ योऽसौ सोऽहमित्येतरेयके तैत्तिरीयके चाऽहम
स्मि ब्रह्माऽहमस्मीति पश्यां श्चवमध्यस्थं ब्रह्मपदमुत्पत्र संबध्यते तेन नात्मव्यतिहारातो ब्रह्मानंदः सिध्यति। तथा जीवानामध्यपातिनकानामपि तस्सोऽहमहं तत्त्वमसीति भावत्वे त्वमस्मत्वं यतेऽत्र स्तद्वचेर
ज्ञानं भक्तिफलमिति यं कुर्वन्मानं प्रतिवादिनं तत्त्वरूपं बोधयति। रसात्मकत्वाद्भक्तेः संयोगविप्रयोगात्मकत्वात्॥ द्वितीयभावोद्रेके यथेतरे शुष्कप्रलापादयो व्यभिचारिभावास्तथातिविगाढभावे
न तद्भेदस्फूर्तिरिप्येकः सनतु सार्वदैविकस्तदा स्वात्मानंतत्वेन विशिष्टं संतितं च स्वात्मत्वेन सोऽत्र व्यतिहारपदार्थ इत्यर्थः॥ अपरं च॥ उद्देश्यपविधेयभावस्फूर्तेर्निश्च द्वैतज्ञानमस्ति किंतु भावनामात्रं। भक्ता
नां तु विरहभावे तदात्मकमेवाखंडं स्फुरति येन तत्त्वीजां स्वतः कुर्वंत्येन यथा तत्पाश्च्यभागवत दृश्यामस्कंधविवृत्तोऽप्रपंचितमस्माभिः। एवं सति मुख्यं यद्वैतज्ञानं तन्न भक्तिभावैकदेश्यव्यभिचारिभावे
घेकतर इति सर्षपस्वर्णाचलयोरिव ज्ञानभक्त्योस्तारतम्यं कथं वर्णनीयमिति भावः॥ ॥सेवा हि मन्त्रादयः॥ ॥अथेदं विचार्यते। प्राप्तभक्तेः पुरुषस्य सत्यसन्मर्मादयो विधीयंते न वेति फलो
पकार्यंतरंग साधनत्वात्तु द्वौ सत्यामेव चित्ते भगवत्साक्षात्विसंभवात्। द्वितीयपक्ष इष्ट एव पक्षः। तादृशपतेन विधीयंत इति सिद्धांतः। तत्र हेतुमाह॥ ॥हि यस्माद्धेतोः सेवाभक्तिरेव सत्यादि सर्व
साधनरूपा तस्यां सत्यां सत्यादयो ये ज्ञानमार्गविहितत्वात्कष्टेन क्रियंते मुमुक्षुभिस्ते भक्तहृदि भगवत्साक्षात्विवात्स्वत एव भवंतीति न विधिमपेक्षंत इत्यर्थः। कामादीतरत्र नत्रचायतनादिष्यः। सर्व
स्वे शास्त्रोक्ताखिलसाधनरूपत्वं भक्तेरुक्तं। तदाद्यार्यमधुना मुक्तिप्रतिबंधकत्वेन हेयत्वेनोक्तानां कामादीनामपि भगवत्संबंधात्मुक्तिसाधकत्वमुच्यते। न क्लिष्टा विहिता विहिताश्चेति द्विवि
धा। माहात्म्यज्ञानयुतेश्वरत्वेन प्रभो निरुपधिस्नेहात्मिका विहिता मतो प्राप्तत्वात्। कामादिरूपा विहिता अविहिता। एवमुक्तप्रविधाया अपि तस्या मुक्तिसाधकत्वमित्याह। इतरत्र विहितभक्ते

णु॰ ३ तिशेषः। कामाद्युपाधिस्नेहजरूपायां कामाद्येव मुक्तिसाधनमित्यर्थः। भगवति चित्तप्रवेशहेतुत्वात्। आदिपदात्सुतत्वसंबंधित्वादयः। स्नेहत्वाभावेऽप्यविहितत्वभगवद्विषयत्वयोरविशेषाद्द्वे-
२ षादिरपि संगृह्यते। तेन भगवत्संबंधमात्रस्य मोक्षसाधकत्वमुक्तं भवति। तत्र विहितत्वं न क्वापीत्यर्थः। शास्त्रे सर्वथा हेयत्वेनोक्ता हि ग्रहाः। सर्वनिवेदनपूर्वकं गृहे भगवत्सेवां कुर्वतां तदुपयो-
गित्वेन तेष्वेव मुक्तिर्भवतीत्यर्थः। एतादृशानां गृहाः भगवद्गृहा एवेति ज्ञापनायायनेन परं। तेषु तथा प्रयोगं प्रभुर्यातु। आदिपदेन स्त्रीपुत्रपश्वादयः संगृह्यन्ते। एतेन ज्ञानादिमार्गादुत्कर्ष उक्तो भव-
ति बाधकानामपि साधकत्वात्। माहात्म्यज्ञानपूर्वकस्नेहे सत्येव कर्तव्यत्वेन ज्ञाने कामोऽपि संभवतीति ज्ञापनाय चकारः॥ ॥आदरादलोपः॥ ॥ननु नित्यानां वर्णाश्रमधर्माणां भगवद्धर्माणां चैक-
काले प्राप्तौ युगपदुभयोः करणासंभवादन्यतरबाधे प्राप्ते कस्य स्यान्न कस्येति संशयः। तत्र कर्मणां स्वस्वकाले विहितानामकरणे प्रत्यवायश्रवणादितरत्राप्यश्रवणादन्यदापि तत्कृतिसंभ-
वात्सावकाशत्वेन तेषामेव बाधो युक्तो न तु निरवकाशानामिति पूर्वः पक्षस्तत्र सिद्धांतमाह। आदरादिति। ब्रह्मयज्ञप्रकरणे तैत्तिरीयैः पठ्यते। ॐमिति प्रतिपद्यत एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा
वागेतत्परममक्षरं तदेतदृचाभ्युक्तम्। ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासत इति। अत्र कर्त्तविधित्वेन वर्णात्मके वक्षनक्तपरमव्यो-
मात्मकेऽक्षरे ब्रह्मण ओंकारे वर्तमानं तल्लोकवेदप्रसिद्धं परं ब्रह्म यो न वेद स किमृचा करिष्यतीत्यनेन तदज्ञाने वेदाध्ययनस्य निष्फलत्वमुच्यते। एवं सति तदुक्तकर्मणोऽपि तथात्वमायाति। एतेन नरूपा-
मामनिज्ञानानीति वाक्यात्परब्रह्मस्वरूपज्ञानं भक्त्यैवेति भक्ताः संतः पुरुषोत्तमविदो ये तेषामेव वेदाध्ययनादिकं फलप्रदं नान्येषामित्युक्तं भवति। अत एव श्रीभागवतेऽप्युक्तम्। ऋषयोऽपि देव युष्मत्प्रस-
ङ्गविमुखा इह संचरंति। संचरंतीति वा। अत्र येनिदर्शनं य इत्। ईश्वरत्वेन तत्सर्वोक्तिं ब्रह्मविदस्त इमे भक्ताः सर्वापेक्षया सम्यक्प्रकारेण भवन्निकटे श्रीगोकुलवैकुंठादिष्वासत इति तेनान्येषां सम्प-

ग सत्त्वमपाश्रितं भवति पुनः स्थितार्थवाची दध्नात्प्रयोगेण चान्येषामसत्त्वसत्त्वं कृतेरभिमतमिति ज्ञायते। ऋक्शाखायामपि तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्त्तन। आस्य

जानंतो नाम चिद्विविक्तन महस्ते विष्णोः सुमतिं भजामहे इत्यादिष्विरन्येभ्यो धर्मेभ्यः सकाशाज्ज्यावद्धर्मे धारकः श्रूयत इति तेषामल्लोप एवेत्यर्थः। एतेनाकरणेऽप्रत्यवायश्रवणान्नित्यादिषु कर्मत्वर

पि प्रत्यक्कं वेदितव्यं। करणेऽपि वैयर्थ्यान्निदपरिहारात्। एवं मतिपदकरणे प्रत्यवायकथनं तेन तस्माद्रवकाशं प्राप्य गेणाकातेप्प करणेन घेतितस्माज्ञायत इति ज्ञायते। न चैवं नास्त्यर्थकत्वे कृते रूपनय

नादिवत्कर्मोपयोगित्वं भक्तिनुज्ञानयोः स्यादिति कर्मण एव प्राधान्यं नत्वकर्तुः सिध्यतीत्याशंक्य भक्तिनुज्ञानावश्यकत्वबोधकश्रुतितात्पर्यमाह उपस्थितेन तस्य द्वचनात्॥ ॥नयोर्युगपत्करणे

ऽनुपस्थिते पिय दिप्रर्वंभगवद्दर्मकरणमुच्येत तदा त्वकृतस्यान्नत्वेवं किंत्वनयोर्युगपत्करण उपस्थिते बलाबलविचारे क्रियमाणे तु आरण्डे नोस्त द्वचनाद्भगवद्धर्माणां बलवत्त्वे नान्नोपवचनात्र कर्मा

गत्वमेतेषां सिध्यतीत्यर्थः॥ ॥तन्निर्द्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबंधः फलं। अथेदं विचार्यते पुरुषोत्तमविदः कर्मकर्त्तव्यं नवेति। तत्र मार्गत्रयफलात्मके तस्मिन्प्राप्ते पुनस्तस्य स्वतोऽपुरुषार्थ

स्यकरणमप्रयोजकमिति न कर्त्तव्यमेतिपूर्वःपक्षः। तत्र सिद्धांतमाह। तन्निर्द्धारणेत्यादिना। अत्रेदमाकूतं। न हि मार्गे हि मर्यादापुष्टिभेदेन लिद्वैविध्यं तत्र मर्यादायां पुष्टौ वैनादरश्राम्य संकर्मकरणे

संभवति। अत एव तैत्तिरीयकोपनिषद्युपपद्यते। आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति। एतं ह वाव न तपति। किमहं साधु नाकरवं किमहं पापमकरवमितीति श्रूयते सोऽपि य विधानामपि कर्म

करणं बलोद्भवपौडवादीनां। एवं स तु भयविधानां मध्ये मम कर्मकरणे प्रश्नोरिश्चास्मीतियो निर्द्धारयति तमिमकरोति य एतद्विपरीतं मनकरोतियथाष्टकज डादिः। एतन्निर्द्धारस्त्तभगवदधीनो तो म

क्षेपितन्निर्द्धारणानियमोतः कर्मककर्त्तव्यमेवात निर्द्धारणेत्याधुनिकानां एवं सती आत्तानवतानस्संदेहवताच कर्मकर्त्तव्यमिति सिद्धांतश्चोभयोः फलं वदत्राद्वावाद्यमाह। तद्दृष्टेः तस्मान्गव

ग्रू

एगु-३ दिष्ठा या दृष्टिर्ज्ञानं यस्य समत घातस्य जीवत्तनकर्मफलात्पृथक्मिति मीश्वरस्तत्कर्मणो यत्फलं वेद मयादारस्त्वा। नो कसंग्रहस्वतत्फलमित्यर्थः।। द्वितीयेन सक्ताः कर्मण्य विद्वांसो यथा कुर्वंति भारत।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहमिति भगवद्वाक्यरूपोपनिषत्स्थिता। द्वितीयस्य मध्यमाधिकारात्कालसंगादिजनितचित्तमालिन्येन भगवत्सान्निध्ये प्रतिबंधः स्यात्तन्निवृत्तिस्तु तत्कर्मणः
३२ फलमित्यर्थः। अथवा पूर्वसूत्राभ्यां भगवद्धर्मस्ततेरेवत्रपकत्वमुक्तं। सर्वात्मभाववतो न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहेति भगवद्वचनाद्विधेयाभावादमं च वाच्य कर्मज्ञानयोर्विहितत्वं केश्वर
श्री करणं न संभवतीति तस्य किं फलमित्याकांक्षायां शरणायतरस्तु वदति। तन्निरपेत्यादिना। तस्मिन्धर्मिण्येव नतु धर्मेष्वपि दृष्टिर्यस्य स तथा दृष्टिपदेन ज्ञानमात्रमुच्यते तेनान्यविषयकदर्शनश्रवणादि
ज्ञानाभाव उक्तो भवति। एतादृशस्य तु संगममात्रमपेक्षितं तत्र भगवदुक्तस्य संगमावधिकस्य च कस्य संगमसमयनिर्द्धारो भवति। अतादृशस्य संमनेनित निर्धारणा नियमः। एतेन फलप्राप्ते तं
:श्रागवस्त्वोक्ता भवति। फलस्वरूपमाह। पृथक्फलमिति। अस्यानिर्वचनीयत्वादनुभवैकवेद्यत्वान्मोक्षानंतयत्फलं शास्त्रउक्तं तस्माद्भिन्नमित्युक्तं। अन्यत्र हि धर्माणां साधनत्वं। यत्र फलमेव
साधनं तत्फलस्यानिर्वाच्यतायुक्तैवेति हि शब्देनाह। ज्ञानमोक्षादिनानज्ञावाप्रतिबंधस्य फलमित्यर्थः।। प्रासंगिकमेतत्सर्वं।। ।।प्रदानवदेवतदुक्तं।। ।।अथेदं विचार्यते सर्वात्मभावो विहित
कर्मज्ञानवत्किं साध्यो न वेति। तत्र पुराणे तस्मात्त्वमुद्धवोत्सृज्येत्युपक्रम्य मामेकमेव शरणमात्मानं सर्वदेहिनां। याहि सर्वात्मभावेन यास्यसे ह्यकुतोभयमिति वाक्ये मुक्त्यात्मकाकुतोभयसाधन
रूपशरणगमने प्रकारत्वेन सर्वात्मभावस्य कथनेन स्वप्रयत्नसाध्यत्वं गम्यतेऽतः साधनसाध्य इति पूर्वःपक्षः। अत्र सिद्धांतं वक्तुं तदुपदेशस्वरूपमाह।। प्रदानवदिति। यद्ययं साधनोपदेशः स्यात्तस्या
तदा साधनत्वेन सर्वात्मभावेन शरणप्राप्तेः स्वकृतिसाध्यत्वं न त्वेवं किंतु तदुक्तं भगवदुक्तं प्रदानवत्। प्रकृष्टं दानं वरदानमिति यावत्तद्वदित्यर्थः। वरेण हि स्वकृत्यसाध्यमपि सिद्ध्यतीति तथा चात्र सं

स्व

हारभ्यादिनापि ज्ञानान्मुक्तिर्भवति न च न तस्मात् पुरुषार्थत्वं किंतु नन्विदंत्त्वेरेव। प्रकृतेऽपि सर्वात्मभावे स्वरूपज्ञानमपि विलंबासहिष्णुत्वेनात्यार्त्तौ स्वरूपातिरिक्तास्फूर्त्यानिज्ञावस्थाभावेन गुणगानादि

दिसाधने प्रकृते बप्यप्राप्तौ स्वाशक्यत्वं ज्ञात्वा प्रभुमेव शरणं गच्छेत् तच्च न स्वकृतिसाध्यमिति सुष्ठूक्तं प्रदानवदिति। न क्रमस्यापि तोऽपि विरोधो भवति। सर्वात्मभावस्यानुभवैकवेद्यत्वेन पूर्वज्ञानेनेऽपि

ति तत्त्वाभावेऽत्रवेऽपि स्वतन्त्र एव तत्प्रयोजनं वदिति फलं। अथवा सर्वात्मभावेन मोक्षस्य ज्ञानिसंबंधः। यद्वा प्रदानवदित्यस्य पूर्ववदेव व्याख्यानं। तत्र साधनाभावस्य स्वत्वे प्रमाणमाह तदुक्तमिति। नायमात्मा प्रवच-

नेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्य इति श्रुत्या वरणातिरिक्तसाधनाप्राप्यत्वमुच्यत इति न तथैवेत्यर्थः। भगवदुक्ताकृतो भयपरस्य न मुक्तिरित्यर्थः। किंच यतो वाचो इत्यादिनानंद-

स्य स्वरूपमुक्त्वा आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति फलकथनं यत् तद् ब्रह्मरसात्मकपुरुषोत्तमभजनानंदानुभवोत्तरकालीनमन्ततोऽप्यन्तदर्थः॥ ॥लिंगभूयस्त्वात्तद्धि बलीयस्तदपि॥ ॥

ननु प्रतिबंधकाभावे दृष्टादिसद्भावेऽपि वरणाकार्यं स्यात् तु न तन्निवृत्ता विनिमंत्रये प्रतिबंधकाभावस्य सर्वत्र हेतुत्वात् तन्निवृत्तावेव तत्पत्ति इति पूर्वपक्षे सिद्धान्तमाह। लिंगेत्यादिना। सामोपनिषत्सु नवमे प्रपा-

ठके सनत्कुमारनारदसंवादे प्रथमत एवं मुख्या ब्रह्मविद्योपदेश्या तेन भवती निज्ञात्वा सनत्कुमारो नारदाधिकारं च ज्ञातुं यदेत्थ तेन मोपसीदेत्युक्तो नारदः स्वदितमृग्वेदादिमपरं देवजनविद्यांतमुक्त्वा सोऽहं दे

भगवो मंत्रविदेवास्मि नात्मवित् स्वाधिकारमुक्त्वा इनात्मविच्छ्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयत्विति नारदेनोक्तः सनत्कुमारः पूर्वस्मात्पूर्व-

स्मात् तत्त्वयोर्वदेनिष्टस्य भूयः पदमाधिक्यार्थकं नामवाङ्मनःसंकल्पचित्तध्यानविज्ञानबलान्नापस्तेज आकाशस्मराशाप्राणान् ब्रह्मत्वेनोपासनाविषयत्वेनोक्त्वा प्राणोपासकस्यातिवादित्वं सत्य-

वादित्वेनोक्त्वा विजिज्ञासितव्यत्वेन सत्यविज्ञानमतिश्रद्धानिष्ठाकृतिसुखानि पूर्वपूर्वकारणत्वेनोत्तरेणोक्त्वा सुखस्वरूपजिज्ञासायामाह। यो वै भूमा तत्सुखमिति। भूमः स्वरूपं जिज्ञासायामाह। यत्र

भ तरो १

२ नाभ्यन्तरप्रपत्तिनान्यच्छुरणोत्तिनाभ्युद्विज्ञानातिसम्भ्रमेत्तिं एतेन सर्वात्मभावस्य स्वरूपमेवोक्तं भवति। तत्र विरहभावे तु विगाढभावेन सर्वत्र तदेव स्फुरतीति स एवाधस्तादिनोक्ता कदाचित्स्वस्मिन्नेव
भगवत्त्वस्फूर्तिरपि भवती यथाहं काराद्देशा इत्यादिना तामुक्तेतेषां व्यभिचारिभावत्वेनानियतत्वं ज्ञापयितुं तेनः सर्वत्र भगवत्स्फूर्तिर्माशायात आत्मादेशा इत्यादिना। ततः संयोगभावे
मति पूर्वभावेन सर्वोपि मद्भिना स्वप्राणादि सर्वनिरोधानेनाग्निमतीनां तूपयोगित्वं नवांकनीयं यतो भगवत एव सर्वसंपत्तिरित्याशयेन तस्य हरवाएतस्यैवं प्रपन्न इत्युपक्रम्यात्मन एवेदं सर्व
मित्युक्तवान्। ततः श्लोकैस्तु भावस्वरूपमुक्त्वा तस्य मूलकारणमाहाहारशुद्धावित्यादिना॥ प्राणपोषकोस्याहारः तस्य सदोषत्वे तु न किंचित्सिध्यति। एवं सति भगवदतिरिक्तस्य स्वतो निर्दो
षत्वा भावाङ्गवानेव चेत्प्राणपोषको भवेत्तदा सर्वसंपद्यते चेत्तेसे सर्वात्मभावे मत्स्येव भवति स च तथा तेन प्रकारेणेत्यर्थः॥ ॥ तद्धरणं विना न भवतीत्युक्तकार्यानुमेयमिति विवरणं लिंगं सर्वात्मभा
वस्तस्यैव भयत्वात्सर्वतोधिकत्वात् तद्धरणमेव सर्वतः कान्तादेर्बलीय इत्यर्थः॥ यल्लिंगमेव सर्वतोधिकं तस्य तथात्वे किं वाच्यमिति कैमुतिकन्यायोपि सूचितः। ज्ञानमार्गीय ज्ञाने न प्रतिबंधः वाका
यामाह। तदपीति। उक्तमिति विशेषः। अंतराभूतयामवस्थात्मन इति सूत्रेणात्रोपपादितमस्माभिः॥ ॥ पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत्॥ ॥ अत्राह॥ नात्र वरणलिंगभयस्त्वं निरू
प्यते किं त्वात्मज्ञानप्रकारविशेष एव। तथा हि। पूर्वप्रपाठके आत्मना सहाभेदः सर्वस्य निरूपितः श्वेतकेतूपाख्यानेन। अग्रिमे च सोऽहं भगवो मंत्रविदेवास्मि नात्मविदित्यादिना नारदस्यात्मजिज्ञासे
वोक्ता। एवं सत्युत्तरमपि तद्विषयकमेव भवितुमर्हत्य तत्र तत्प्रकरणत्वादुभयोः प्रपाठकयोः पूर्वस्मिन्नप्यभेद उक्तस्तस्यैव स्वरूपमात्मन एवेदं सर्वमित्यनेनोक्तमिति पूर्वोक्तप्रकारादन्येन प्रका
रेणात्माभेद एव सर्वस्योक्त इति। तदेवाह। पूर्वस्य पूर्वप्रपाठकोक्तात्माभेदज्ञानस्य विकल्पः प्रकारभेद एवाग्रेपि निरूप्यते। तत्रोपपत्तिमाह। प्रकरणादिति। एतदुपपादितं। अत्र सिद्धांतिसंमतमेव

८१

ति १ श्रीं णां ३

दृष्टांतमाह तं हृदयमेवादार्थं क्रियामानमवदीय धा ह्रउनप्रकारेणोबास्यं तत्क्रियारूपमुच्यते अंतरं तु मनोव्यापाररूपमुच्यते। न चैतावता न्यतरस्य तद्भिन्नत्वं वक्तुं शक्यं प्रकरणान्नेदान्नयेदापीत्यर्थः॥ ॥
अति देशाच्च॥ ॥नामरूपात्मकं हि जगत्तत्सर्वं सर्वशास्त्रेनानूद्यते स्मिन् ब्रह्माभेदो निरूपितोः ग्रेत्वुगादिविद्यास्वनूद्य नामात्मकब्रह्मत्वं तत्रादिश्यते नामैवेतन्नामोपास्वेति। इतो पि हेतो ज्ञानप्रक
रणेदएवाये निरूप्यत इत्यर्थः॥ ॥विधेयवच्चानिर्धारणात्॥ ॥अत्राह सर्वप्रसंग्यावर्त्तयति। यदुक्तं सनत्कुमारनारदसंवादे आत्मोपदेशप्रकारविशेष एवं निरूप्यत इति। तन्न किंतु विधेयवन्निरूप्यत इति। अत्रेद
मासूत्रं। नायमात्मेति श्रुतिरितरसाधननिषेधपूर्वकं वरणस्य साधनत्वमुक्त्वा तलस्य तेहेतुत्वं वदत्वरणविषयमप्याहतस्यैष आत्मा वृणुते तनुं स्वामिति। तस्य वृतस्यात्मन एष भगवानात्माऽन्त
एव तत्र स्वरूपः स जीवात्मा। तद्वरणस्यावश्यकत्वज्ञापनाय स्वामिति। सर्वो हि स्वकीयां तनुमात्मीयत्वेनात्मत्वेन च वृणुते न हि त्रिः स एव नो गात्रं दुंक्ते। अत एव तैत्तिरीयकोपनिषद्यपि ब्रह्मविदो
प्नोति परमिति सामान्यतो ब्रह्मविदः परब्रह्मप्राप्तिमुक्त्वापि सत्यविशेषतो वद सत्यं ज्ञानमनंतं ब्रह्मेति परब्रह्मस्वरूपमुक्त्वा यो वेद निहितं गुहा—यां परमे व्योमन्। सोऽश्नुते सर्वान्कामान्सह ब्रह्म
णा विपश्चितेत्युक्तं। एतद्यथा तथा नंदमयाधिकरणे प्रपंचितमस्माभिः। किंच। पुरुषोत्तमत्वात्महेतुत्वं तं तु न क्विं मार्गीयहृदयस्वीयत्वेनांगीकाररूपं तदेवमेतत्त्वन्यायेनामपीति ज्ञापनायाग्रे वद
ति नायमात्मा बलहीनेन लभ्य इति। बलकार्यं हि प्रभुवशीकरणं। तच्चाहं च क्रमपराधीनः। वशो कुर्वंति मां भक्त्येत्यादिवाक्ये भक्त्यैवेति बलशब्देन भक्तिरुच्यते। अन्यथा पूर्ववाक्य एवेतरनिषेधस्य
कृतत्वात्पुनर्बलाभावनिषेधं न कुर्यात्। वरणमात्रस्य हेतुत्वमुक्त्वा बलस्य तथात्वं न वदेत्। एतादृशस्य हृदि भगवत्साक्षात्कारो भवतीत्याह। एतेरूपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधा
मेति। अस्यार्थस्त्वेषआत्मा त्मनो प्यात्मा पुरुषोत्तमो ब्रह्म। अक्षरब्रह्मात्मकं धाम विशत इति धामपदं पुरुषोत्तमस्याक्षरं ब्रह्म सहजं स्थानमिति ज्ञापनार्थमुक्तमन्यथा न वदेत्। तेन तत्र हृदये स्वस्थान र

माविर्भावयित्वा स्वयं तत्तत्प्रकारी भवतीति ज्ञाप्यते। प्रकृते श्वेतकेतूपाख्याने परोक्षवादेन ब्रह्माभेदबोधनेन पुरुषोत्तमाधिष्ठानत्वयोग्यता ज्ञाप्यते। अन्ये तु नह्येतावतैवाधिष्ठाना
त्मकानुरादिर्भावो भवति पुरुषोत्तमस्य वा। तथा सति ज्ञानिनां सर्वेषां पुरशाप्तिः स्यान्नत्वेवं भक्त्या इमे कयायास्य इत्यादिवाक्यैः। किंतु भगवदनुग्रहेण भक्तियोगेन च भक्तो मत्यामिति ज्ञा
पनाय भजनं एव न श्रोधाधिकारीत्यपि ज्ञापयितुं भक्तस्य नारदस्य भगवदावेशयुक्तस्य सनत्कुमारस्य च संवाद उक्तः। तत्रात्मशब्देन पुरुषोत्तम उच्यते। भक्तिमार्गे निरुपधिस्नेहविषयः
मेव यतः। स तु सर्वात्मभावैकसमधिगम्य इति सर्वात्मभाव एव विद्याशब्देनोच्यते। परमकाष्ठापन्नं यद्वस्तु तदेव हि वेदान्तेषु मुख्यत्वेन प्रतिपाद्यमन्यत्तु ब्रह्मादिकं तु तद्विभूतिरूपत्वेन त
दुपयोगित्वेन मध्यमाधिकारिफलत्वेन च प्रतिपाद्यते। तेन तत्र विद्याशब्दप्रयोग औपचारिकः। सर्वात्मभाव एव मुख्यः। युक्तं चैतदक्षरविषयिण्या विद्यायाः सकाशात्तदुत्तमविषयिण्या
स्तस्या उत्तमत्वं। एवं सति पूर्वप्रपाठकस्याक्षरप्रकरणत्वाच्चोत्तरस्य पुरुषोत्तमप्रकरणत्वाच्चह्येव सिद्धिश्चात उक्तन्यायेन विद्यैवांतिमप्रपाठके निरूप्यते। न तु पूर्वोक्ता ज्ञानप्रकारविशे
षाः। अत्र हेतुमाह। निर्द्धारणादिति। सुखं त्वेव विजिज्ञासितव्यमित्युक्त्वा सुखस्वरूपमाह। यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति अक्षरपर्यंतं गणि
तानंदत्वात्पुरुषोत्तमस्यैवानंदमयत्वेन निरवधिसुखात्मकत्वात् अत एव भूमानमेव विजिज्ञासितव्यत्वेन निर्द्धारणादित्यर्थः। भूम्नो लक्षणमथ उच्यते यत्र नान्यत्पश्यतीत्यादिना। यस्मिन्दृष्ट
ते सति नान्यत्पश्यतीत्यर्थः। तथा सति सर्वात्मभाववतः प्रभुदर्शनेन सत्यपि लौकिकोपयोगिवस्तुदर्शनादिकमनुपपन्नमिति शंकात्र तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्म
नः प्राण इत्यादिना निरस्ता वेदितव्या। तैः सह लीलां चिकीर्षतः प्रभुत एव सर्वं संपद्यते न तु न सामर्थ्येनेति भावेन तदुक्तं॥ दर्शनाच्च॥ ॥ दृश्यते सर्वात्मभाववतां भक्तानां व्रजसीमंतिनीप्रभृती

५

नांस्त्वमितरस्मृतिर्भगवच्छब्दादिना ये सर्वसामर्थ्यमितिव्यासः स्यानुभवंप्रमाणत्वेनाह। उक्तंच श्रीभागवते नाभिरेवचित्रं सुखेन भवतापहृतं स्वदेह्ययंत्रिविंशात्मनकरावपिशब्दंनान्येपा
दौपरंनचलनतत्त्वलवेत्यादिना। तेन ज्ञानशक्तिक्रियाशक्तितिरोधानमुक्तं नवतिश्चयेनद्वाक्रियावादिकं स्फुटमेव। ननु सनत्कुमारनारदसंवादात्मकमांतमेकं वाक्यं तत्रोपक्रमे मंत्रविदेवास्मि
ना त्मविच्छ्रुतंह्येवमे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोहं भगवः शोचामीत्यादिना स्वात्मज्ञानस्यैवोपक्रमादुपसंहारोपि तमादायैवोचितः। अयमेवेदात्मपदनामामीश्वरपरत्वं स्याद्वा
क्यनेदमुपक्रमविरोधश्च स्यात्तस्माद्वाक्यानुरोधात्सर्वज्ञानप्रकारविशेष एवायमितिमंतव्यमित्यत उत्तरं पठति॥ ॥श्रुत्यादिबलीयस्त्वाच्च न बाधः॥ ॥नैवं वाक्यानुरोधेहरणं सर्वात्म
भावलिंगत्रयस्त्वं बाधितव्यं वाक्यापेक्षया श्रुतिलिंगयोर्बलीयस्त्वात्। एतत्तु बलीयस्त्वं तु श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांसमवाये परदौर्बल्यमिति जैमिनिसूत्रे सिद्धं॥
प्रकृत इतरसाधननिषेधपूर्वकं यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वामिति श्रुतिर्वरणमात्रलभ्यत्वमाह। एतदर्थे च नायमात्मा बलहीनेन लभ्य इत्युपक्रम्यैतैरुपायैर्यत
ते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधामेति श्रुतिः पठ्यते। एतच्चाधिदैवतनिरणादित्यत्र निरूपितं॥ ॥अपरं च॥ ॥नात्मवित्तरति शोकमात्मविदिति नारदवाक्यानुवादयोरात्मपद
मुत्तमब्रह्मात्मकत्वेन लिंगेन पुरुषोत्तमपरमिति ज्ञायते। स हि सर्वेभ्य उत्तमोतो ब्रह्मेत्यपास्य तेन सनत्कुमारोक्तश्रुतिरूपं ततस्ततो भूयोस्तीत्यपृच्छत्। अंते सर्वाधिकत्वेन भूमानं श्रुत्वा तथा नापृ
च्छत्किंतु तत्राप्यधर्मसाम्यात् कस्मिन्प्रतिष्ठित इत्यपृच्छत्। तदा सर्वात्मभाव स्वेव प्रतिष्ठित इत्याशयेन सर्वात्मभावलिंगात्मको भाव उच्यते। किंच व्यापकत्वे सर्वरूपत्वे स्वमहिम्नाधिकरणाभा
वादन्यत्राप्रतिष्ठितत्वमेवोच्यत इत्यत उत्तरं पठति॥ ॥अनुबंधादिभ्यः प्रज्ञांतरपृथक्त्ववद्दृष्टश्च तदुक्तं॥ भूमस्वरूपं श्रुत्वा स भगवः कस्मिन्प्रतिष्ठित इति प्रश्ने स्वे महिम्नीत्युक्तं तदयत्किंची

कभावलिंगात्मकं भावं स एवाधस्तादित्यादिनोक्तवान्। नन्वेतया श्रुत्या न सर्वात्म~~भावलिं~~ ४२

ए·२ यच्चेनद्वने भक्तेयो महिमरूपः सर्वात्मभावस्त्वास्मिन्निति। स्वरूपात्मके महिम्नीति वा। भगवदात्मकत्वात्सर्वात्मभावस्य। तदितरस्य साक्षात्पुरुषोत्तमाज्ञापकत्वादस्यैव तत्त्वज्ञापकत्वात्परमकाष्ठा
६ पन्नमहिम्नस्वरूपोयमेव भाव इति महिमशब्देनोच्यते। मत्तविप्रयोगभावोदये सत्येव सम्यग्ज्ञातो भवति व्यभिचारिभावैः ने त्वनियतस्वभाव इति ज्ञापयितुं त्रिविधः। स एवाधस्तादित्यादिना
त्मैवेदं सर्वमित्यंतेन निरूप्य भूम्नः प्रतिष्ठाधिकरणप्रश्ने यदुत्तरितं स्वे महिम्नीति तमेवानुवध्नाति स एवा एष इत्यनेनैतच्छब्दस्य पूर्वपरामर्शित्वात्। एवं सति तदुक्तमन्यथा प्रतिष्ठितत्वं चेदिस्वभुति
पादं स्यात्तदोक्तरीत्या तुवं धंनकुर्यादिहंकारादेशादिकं च न कुर्यात्। उक्तप्रश्नोत्तरं स्वात्मस्वस्वभावात्वकापीत्येवं वदेत्तस्मादस्मदुक्त एव मार्गोनुसर्त्तव्यः। आदिपदात् त्रिविधा येभ्यो उक्तास्तेषामपि स्व
स्वरूपमेव पश्यन्नेवं मन्वान एवं विजानन्निति क्रमेण यन्निरूपितं तदुच्यते। पूर्वं त्विति विगादभावेन तदितरास्फूर्तिमेव सर्वं च पश्यतीति। एतदेवोक्तमेवं पश्यन्नित्यनेन। ततः किंचिद्वद्धानुसं
धानेऽहंकारादेशो भवति मत्त्वहमेव। सर्वतः स्वकृतिसामर्थ्येन तं प्रकटीकरिष्य इति मनुते। करोति च तथा तत एवाचेषणगुणगानेक्षतेनाऽपि। एतदेवोक्तमेवं मन्वान इत्यनेन ततो निरुपधिस्नेह
विषयः पुरुषोत्तम आत्मशब्देनोच्यत इति तदादेशो भवति। तदा पूर्वकृतसमसाधनवैफल्यज्ञानेनातिदैन्ययुक्तस्य रत्नस्नेहज विविधभाववान्भवति तदेतदुक्तमेवं विजानन्नित्यनेन भवत एवोप
सर्गउक्तः ततोऽतिदैन्येनाविर्भाविमतिया भवस्थात्मा निरूपिता आत्मरतिरित्यादिना। अत्रात्मशब्दाः पुरुषोत्तमवाचका ज्ञेयाः। अन्यथौपचारिकत्वं स्यात्। मुख्ये संभवति। तस्मायुक्तत्वात्। ननु
सर्वात्मभावस्यापि मुक्त्योपर्यवसानमुक्तनेति संशयनिरासाय दृष्टांतमाह। प्रशांतरसप्रत्यक्षवदिति। मुमुक्षुनकस्य स्वेष्टदातृत्वेन भगवद्विषयिणी या प्रज्ञा सा सर्वात्मभाववत्तज्जनकप्रज्ञातः प्रशांत
रमित्युच्यते। न च कर्मज्ञानतदितरभक्तप्रहान्यः पार्थक्येन तदिष्टमेव साधयति यथा तथा सर्वात्मभाववतो भक्तस्य यत्र को भगवद्विषयिणी प्रज्ञा तमेव प्रकारं स भावः साधयति नान्यमिति मुक्तोप

रिका

र्यवसानमित्यर्थः। अत्र व्यासः स्वानुभवं प्रमाणत्वेनाह। दृष्टश्चेति उक्तानां वचनानां चकस्य प्रभुस्वरूपदर्शनाद्यतिरिक्तफलाभावो ऽस्माभिरेव दृष्ट इत्यर्थः। एतादृशा अनेके दृष्टा इति नैकस्य नाम गृहीतं॥ अत्रान्यमपि प्रमाणमाह। तदुक्तमिति। भगवतेति शेषः। श्रीभागवते दुर्वाससं प्रत्यहं भक्तपराधीन इत्युपक्रम्य वशीकुर्वंति मां भक्त्या सत्स्त्रियः सत्पतिं यथेति। यो हि यद्वशीकृतः स तदिच्छानुरूपमेव करोत्यतो न सायुज्यादिदानं किंतु भजनानंददानमेव। तेषां मुक्त्यनिच्छा तु मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयं। नेच्छंति सेवया पूर्णाः कुतो ऽन्यत्कालविद्रुतं। स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः। सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत। दीयमानं न गृह्णंति विना मत्सेवनं जनाः। इत्यादिवाक्यसहस्रे निर्णीयते॥ ॥न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः॥ ॥ननु नान्यत्वरूपनीत्या तस्य सर्वस्य प्रपालकस्य सर्वात्मभावनिरूपकत्वोक्तिरनुपपन्ना। तत एवात्मपदानां पुरुषोत्तमपरत्वोक्तिश्च। यतस्तस्य मुक्तावपि कामाभावः प्रतिपाद्यते ऽत एतस्य सर्वेष्वपि लोकेषु कामचारो भवतीति श्रुतिः पठ्यते। एवं सति न तन्निरूपणमनेति वा वाच्यं तत्र भाववतो ऽप्यनुकामवत्त्वमिति चेत्। द्वितीयमोक्षप्रमाणपराहतत्वेनाद्यपक्ष एवाश्रयणीय इति पूर्वपक्षं निरस्यति नेति। तत्र हेतुमाह। सामान्यादप्युपलब्धेरिति। तत्समानधर्मयोगादपि तत्प्रयोगः श्रुतानुपलभ्यते ऽनेकशो यतः। प्रकृते ऽपि विविधानां लोकानां विविधसुखप्रधानत्वात् भगवत्संबंधिषु सर्वेष्वपि सुखेषु कामचारो भवतीति श्रुतेरर्थो ज्ञेयः। ननु यथाश्रुत एवार्थः किं नत्राह। न हि लोकापत्तिरिति। सर्वात्मभाव इति इकरणात् नान्यत्वरूपतीत्यादिधर्मविशिष्टस्यात्मनः प्राणादिसर्वविनो लोकसंबंधो युक्तिसहो ऽपि नेति ज्ञापनाय हि शब्दः। किंच। एतदग्रे न पश्यो मृत्युं पश्यंतीति श्रुत्या यथा मृत्युनिषेधः क्रियते न तथात्मत एवेदं सर्वमिति श्रुत्यैवकारेणात्मातिरिक्तव्यवच्छेदः क्रियत इति मृत्युवल्लोको ऽपि न संबध्यत इत्याह। मृत्युवदिति। न च रोगादीनामपि दर्शननिषेधे सत्यपि मृत्योरेव यन्निदर्शनमुक्तं तेनान्यकानां लोकांतरसंबंधस्तत्तुल्य इति ज्ञाप्यते ऽत एव नोत दुःखमिति दुःखसामान्यनिषेधो ऽप्येतत्तः॥ ॥परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबंधः॥ ॥अत्र हेत्वंतमाह। अस्मिन्नेव लोके सर्वमाप्नोति सर्वश इति परे

गु॰३ ण पदेन शब्दस्य श्रुतिवाक्यस्यात्मत एवेदꣳ सर्वमिति यत्पूर्वं श्रुतिवाक्यं तद्विधत्तेव प्रतीयत इति न लोकसंबंधो वक्तुं शक्य इत्यर्थः॥ न चात्मत एवेदꣳ सर्वमिति वाक्येनैवैतदर्थलाभे पुनस्तदुक्तिर्नोचि
३७ तेति शंकायां तत्र हेतुमाह। उक्तशङ्कः शंकानिरासे। न्यस्त्वाद्धेतोः उक्तेऽर्थे हेतुत्वं बाढमस्येति दार्ढ्यं भवतीत्यस्माद्ब्राह्मणोक्तार्थस्यैव श्लोकेनानुबंधः कृत इत्यर्थः। अथवा॥ ॥अयः पदमाधिक्यार्थकं तथा
च स्वकृतसाधनसाधितफलापेक्षया स्वयमुद्यमस्य भगवता साधितफले निरवधिरुत्कर्ष इति ज्ञापनाय पुनः श्लोकेन तथेत्यर्थः॥ ॥एकत्वात्मनः शरीरेऽभावात्॥ ॥उक्तेऽर्थे श्रुत्यंतरसंमतिम
प्याह॥ एके शाखिनस्तैत्तिरीयाः शरीरेन कृशरीरे हृदयाकाश इतियावत्तत्रात्मनो भगवतो भावादाविर्भावेन सह सर्वकामोपभोगं वदंतीं श्रुतिं पठंति। सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहा
यां परमे व्योमन्। सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति। अत्रोप क्रमे ब्रह्मविदाप्नोति परमिति श्रुतिरक्षरब्रह्मविदः परब्रह्मप्राप्तिं सामान्यत उक्त्वा विशेषतः कथनार्थं तदेषाभ्युक्तेति वा
क्यं तद्ब्रह्मप्रतिपाद्यत्वेनाभिमुखीकृत्यैषा वत्सव मा एकस्मिब्रह्मविद्भिरुक्ते स्फुटत्का मुक्तवतीं सत्यं ज्ञानमिति। परब्रह्मस्वरूपमनुभवैकवेद्यं न शाह्यादिभिर्वेद्यमिति ज्ञापनाय स्वयं तत्तत्त्व प्रतिपादि
य काप्यन्यमुखेनोक्तेन। अत्र ब्रह्मणा सह सर्वकामोपभोग उक्त इत्येतदेकवाक्यतायै सर्वेषु लोकेषु कामचारो भवतीति श्रुतेरप्युक्त एवार्थो मंतव्यः॥ ॥व्यतिरेकस्तद्भावाभावित्वान्नतूपलब्धिव
त्॥ ॥ननु ब्रह्मविदाप्नोति परमिति श्रुत्याक्षरब्रह्मविदः परब्रह्मप्राप्तिरुच्यते। तत्रेतरसाधनसापेक्षं ब्रह्मज्ञानं प्रापयत्युत न निरपेक्षमिति भवति संशयः। अत्र श्रुतौ तन्मात्रोक्तेरितरनिरपे
क्षमेव तत्रपेति पूर्वः पक्षः। सिद्धांतस्त्वेवं सति ज्ञानमार्गीयाणामपि परप्राप्तिः स्यात्तस्मात्त्वनेकप्रमाणबाधितेति पूर्वमवोचाम। किंच। ज्ञानशेषभूतब्रह्मापेक्षया फलात्मकपरस्य मुख्यत्वात्तदेषा
भ्युक्तेति श्रुतिस्तदेव प्रतिपाद्यत्वेनाभिमुखीकृत्य ऋगुक्तेत्याह॥ तेनात्र ब्रह्मपदे पुरुषोत्तमपरे ज्ञायेते। तथा च गुहायां यद्याविर्भूतं परमं व्योम पुरुषोत्तमस्य हार्दात्मकमक्षरात्मकं व्यापिवैकुंठं भवति

तद्धानंतु भगवानाविर्भवतीति तस्याविर्भवतीत्युच्यते यो वेद निहितं गुहायां परमे व्योमन्नित्यनेन। तथा च ज्ञानिनां गुहासु परमव्योम्नो व्यतिरेकएवं तत्र हेतुस्तद्भावाभावादिति। यमेवैष वृणुत इति श्रुते
वरिणाभावे भगवज्ज्ञानस्यासंभवात् ज्ञानिनां तथावरणाभावाद्भगवद्विषयको भावो न भावीति नेत्यर्थः। ननु ज्ञानविषयत्ववदाविर्भावोप्युक्तः॥ किंच तदतिरिक्तमाविर्भावमपि न पश्याम इत्याशंकाया
माह। न तूपलब्धिवदिति। उपलब्धिर्हि ज्ञानं तद्गुहायामाविर्भावो न भवतीत्यर्थः। यस्मै भक्ताय यत्नीलाविग्रहं स्वस्वरूपमनुभावयिता प्रभुर्भवति तं गुहायां तल्लीलाश्रयं न्यूनतमं स्वस्वरूपं वैकुंठ
लोकवदाविर्भावयतीति नोक्तशंकालेशोपि। यत्र पुरुषोत्तमस्य चाक्षुषत्वं तत्र तत्तनोधः कस्य तस्य तथात्वे कात्राशंकानाम। एतच्चोपपादितं पूर्वं विद्वन्मंडने च। ननु ज्ञानिज्ञानविषयभक्तगुहाविर्भूता
क्षरयोर्भेदो भिन्नवान्नाद्योमानाभावादेकत्वेनैव सर्वत्रोक्तेः। नद्वितीयः निरवयवस्य क्वचिल्लोकरूपत्वान्नरूपत्वाभ्यामेकत्वानुपपत्तेरिति चेन्न। मैवं। लोकरूपत्वस्य पश्चाज्ज्ञापितत्वेऽक्षरायमनुपपत्ति
र्नत्वेवं किंत्वक्षरस्वरूपमेव तथेति श्रुतिरेव। अंभस्य पारे भुवनस्य मध्य इत्युपक्रम्य तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्। एतदग्रे च यमंतः समुद्रे कवयो वयंति यदक्षरे परमे प्रजा इत्या
दिरूपा। स्मृतिरपि परस्तस्मात्तु भावोन्योऽव्यक्तोऽव्यक्तात्सनातनः। यः सर्वेषु भूतेषु नश्यत्सु न विनश्यति। अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिं। यं प्राप्य न निवर्तंते तद्धाम परमं ममेत्यादि गीतासु। श्री
स्व भागवतेपि दर्शयामास लोकं स्वं गोपानां तमसः परं। सत्यं ज्ञानमनंतं यद्ब्रह्मज्योतिः सनातनं। यद्धि पश्यंति मुनयो गुणापाये समाहिता इति दशमे॥ द्वितीये च। तस्मै स्वलोकं भगवान्सभाजितः संदर्श
यामासेत्युपक्रम्य कालत्रिगुणमायादिसंबंधराहित्यमुक्त्वा भगवत्पार्षदानुक्त्वा विमानप्रमदा उक्ताः श्रीरुक्ता। तथा च श्रुतिस्मृत्येकवाक्यतायां तादृक्स्वरूपमेवाक्षरमिति निर्णयो भवति एवं
सति सच्चिदानंदत्वदेशकालापरिच्छेदस्वयंप्रकाशत्वगुणातीतत्वादिधर्मवत्वेनैव तानि नामक्षरवितानं भक्तानामेव पुरुषोत्तमाधिष्ठानत्वेन तथेति ज्ञेयं। मद्भक्तानामक्षरानिरिति श्लोकोक्तरीत्या पुरु

अणु॰२ षोन्नमस्येव।अत्रन्यायेयथाविचारिताःसंतितेतथानुवर्तंतीतिनहिचारएवसर्वेषामधिकाररूपइतितत्प्रयत्नापेक्षत्वित्यत्रनिर्णीतंअस्मिन्नर्थेकैमुतिकन्यायेकथनार्थंनिदर्शनेनोत्तरंपठति। ॥अं
३० गावबद्धास्तुनशाखासुहिप्रतिवेदं॥ ॥यागेतत्तद्विहितेतिकर्त्तव्यान्यन्वाधानादीन्यंगानि।तत्रावबद्धाःसर्वएवर्त्विजोयमानेन।अववंधनंनामाध्वर्युंत्वांवृणेहोतारंत्वांवृणउद्गातारंत्वांवृणइत्या
दिरूपंवरणमेवान्यथासर्वकर्मविडुषांतत्कृतिपटूनामेकत्राधिकारोनान्यत्रेतिनियमोनस्यात्।तस्यतस्यतथावरणेतुयजमानेछैवहेतुः।तेचतदानसर्वासुशाखासुविहितान्यंगानिकर्त्तुंसर्वे
शक्ताःकिंतुयजमानवरणनियमिताएवतथातत्रहेतुमाह।हियतःकारणात्प्रतिवेदंनियमितान्यंगानिहोत्रमृचाध्वर्यवादियजुषोद्गात्रंसाम्नेति।तथाचालौकिकेवैदिकेकर्मणिजीवेछानि
यामिकानवृत्तियत्र तत्रकिमुवाच्यंप्रतिलोमरूपंसावकाशमितिवस्तोऽस्थितिमनस्तदीश्वरिछैवनियामिकातत्रसाधनफलसंपन्नाविति॥ ॥मंत्रादिवद्वाविरोधः॥ ॥ननुसर्वंकर्मत्वानानि
ष्ठानामपिपुंसाम येनकिमार्गीयत्वंयत्रभवेतितत्रतथैवभगवद्वरणमितिहिसिद्धांतः।ऋत्विजस्त्वेकस्मिन्यागएकत्रवृतस्यनापरत्रापितथेतिविरुद्धोदृष्टांतइत्यरुच्यानिदर्शनांतरमाह।यथै
कएवकश्चिन्मंत्रोबहुषुकर्मसुसंबध्यतेकश्चिद्द्वयोःकश्चिदेकत्रैवतथैवविधानान्यथात्रापीत्यर्थः।आदिपदात्कर्मोच्यते।यत्रकाम्येनैवनित्यकर्मनिर्वाहस्तत्रकामितार्थसाधकत्वेप्रत्यवाय
परिहारेप्येकमेवतदुपयुज्यते।यथाचसर्वतोमुखेऽनेकत्रहोतृप्रवरेऽध्वर्युप्रवरेचश्घमात्रेदेवाःपितरइत्यादिनायजमानकर्तृकानुमंत्रणमेकमेवसर्वत्रसंबध्यतेतथैवविधेस्तथात्रापितावद्विधंयदे
कमेववरणंतेनतत्रनिष्ठानंतरंभक्तिनिष्ठेतिनदृष्टांतविरोधइत्यर्थः।अथवोमित्फदाकृत्यैवमंत्राणामुच्चारणान्मंत्रादिरोंकारःसयथाब्रह्मात्मकत्वेनैकएवसर्वमंत्रेषुसंबध्यतेतथावरणम
पीतितथेत्यर्थः।यद्यपीतरनिष्ठानंतरंभक्तिनिष्ठावतोवरणंतथाप्युक्तमेकमेवेतिनोक्तदोषस्तथापुष्टिमार्गेहितस्यनीचकर्त्तापादनमनुचितमितिमत्वापक्षांतरमुक्तं।वस्तुतस्तुसाध

न मर्यादया यत्र भक्तिर्दिदृक्षिता तत्र तथेति नानुपपत्तिः काचित्॥ ॥ अत्रः तद्वज्ज्यायस्त्वं तथाहि दर्शयति॥ ॥ ननु सुखस्वरूपजिज्ञासायां यो वै भूमा तत्सुखमित्युक्तं भूमस्वरूप
जिज्ञासायां यत्र नान्यत्पश्यतीत्यादिना तद्यन्निरूपितं तत्सर्वात्मभावस्वरूपमिति यदुक्तं तत्रोपपद्यते। भूम्नो हि सुखरूपतोच्यते सर्वात्मभावे तु विरहभावे दुःसहदुःखानुभवः श्रूयते। तेन मे
दसुखमेव यो वै भूमेत्यादिनोच्यते। यो वै भूमा तदमृतमिति वाक्याच्च। अग्रे च स वा एष एवं पश्यन्नित्याद्युक्त्वा तस्य सर्वेषु लोकेषु कामचारो भवतीति फलमुच्यते। तच्च मोक्षानन्तरमसंभाव्यत।
स भावो मोक्षो वोच्यत इति संशयः। तत्र कामचारोक्तेर्मुक्तिपूर्वदशायां तन्माहात्म्यनिरूपणपर्यत्वादमृतशब्दाच्च मुक्तिरेव भूमपदेनोच्यत इति पूर्वः पक्षः। अत्र भूमशब्देन सभाव एवोच्यत इ
ति सिद्धान्तस्तत्र तु दुःखदर्शनानुपपत्त्या सर्वाधिकत्वलक्षणभूमत्वमनुपपन्नमिति शंकां परिहरति। अत्रः सर्वात्मभावस्य ज्यायस्त्वं सर्वस्मान्मंतव्यं तत्रोक्तानुपपत्तिपरिहारार्थं दृष्टान्तमाह। क्रतु
वदिति। दर्शपूर्णप्रकरणे तैत्तिरीयके पठ्यते। परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्तेन स परमां काष्ठामगच्छदित्युपक्रम्य य एवं विद्वान्दर्शपूर्णमासौ यजते परमामेव काष्ठां गच्छतीति। यथा वृत्रादिदुः
खात्मकत्वेऽपि परमकाष्ठालक्षणफलगमकत्वेन दर्शपूर्णमासयोः सर्वक्रतुभ्योऽधिकत्वं वक्तुमग्र आसीदिति श्रूयते। तथा दुःखहेतुत्वेऽप्यनन्यलभ्यमाहात्म्यरूपोत्तमानंदप्राप्तिहेतुत्वेन सुखरू
पत्वमुच्यत इत्येभ्यः सर्वेभ्यो ज्यायस्त्वं मंतव्यमित्यर्थः। अत्रोपपत्तिमाह। तथाहि दर्शयति। श्रुतिस्स एवाधस्तादित्याद्युक्त्वाऽथाहंकारादेश इत्याद्युक्त्वाऽथात्मादेश इत्याद्युक्तवत्येवैनादेशासा
त्मत एव प्राण आशा स्मरादि सर्वमिति च दर्शयति। एतत्सर्वात्मभाववत्येव सर्वमुपपद्यते न तु मुक्तस्य। द्वित्रिभेदाभावात्प्राणाद्यभावाच्च। जीवन्मुक्तिदशायां प्राचीनानामेव सत्त्वादात्मनः प्राणा इ
त्यादि न वदेत्। यद्वा। ननु लोके पि शृंगाररसभाववति दुःसितायां च तदुक्तभावसंबंधिव्यभिचारिभावाः श्रूयंते सैव सर्वत्र स एव सर्वत्रेति। एवं सति लौकिकसधर्मवत्त्वान्न तदुक्तभावस्यालौकिकत्वाना

५ ।रतिरात्मक्रीडात्ममिथुन आत्मानंदः सस्वराड्भवति ।सर्वेषु लोकेषु कामचारो भवतीति

उ॰२ दित्यत्राधिक्यं वक्तुं शक्यमलौकिकविषयत्वाल्लौकिकत्वमपि न तथेति भवति संशयः ।तत्र मनुजत्वरिपुत्वादिवज्ज्ञानमिव कामादिभावेन स्नेहभावस्यापि संभवान्नास्यालौकिकत्वमिति पूर्व-
५॰॰ पक्षः ।सिद्धांतस्तु स्वस्यभावस्य लौकिकेभ्यो न्यायस्त्वं मंतव्यं ।नत्वक्तं लोकसाधारणं बाधकमिति शंकानिरासाय निदर्शनमाह ।ऋतुवदिति ।यथा दर्शादिषु दोहनादिश्रयणांतं च व्रीह्यवघाता-
दिषुरोऽप्याग्रयणादीनां लौकिकक्रियातुल्यत्वेन दर्शनेऽपि न लौकिकत्वं लौकिकप्रमाणाप्राप्तत्वाद् लौकिकत्वप्राप्तत्वात्तथोक्तप्रमाणरूपवरणजन्यत्वेनास्मत्कृतान्न लौकिकत्वमस्य भा-
वस्येति दिक् ।वस्तुतस्तु ग्राम्यसिंहस्य सिंहसरूपत्वेऽपि न ताद्रूप्यं वक्तुं शक्यं तथा लौकिकपुंसि नार्या वा न तदाभासो रसशास्त्रे निरूपितेन दृष्टांतेन भगवद्भाववत्स्फुरतीति भावनार्थं नत्वृषीणां लौ-
किकेतात्पर्येण विडम्बयति ।अत्रोपपत्तिमाह ।तथाहीत्यादि ।सर्वोक्तभाववत्त्वात्मतः प्राणादिके सर्वं दर्शयति ।[illegible] श्रुतिस्तस्य ह वा एतस्यैवं पश्यत इत्यादिना ।इतः पूर्वमपि स ए-
वा एष एवं पश्यन्नित्युपक्रम्यात्म तिश्रुतिश्च ।नहि लोके एवं संभवत्यात्मपदानां भगवद्वाचकत्वादिति सर्वोत्तमविषयभावस्यैव तथात्वं युक्तमिति चोपपत्तिरिह श्रुत्येन सूच्यते॥ ॥नानावाक्यादिभेदा-
त्॥ ॥पूर्वाधिकरणे सर्वात्मभावस्वरूपादिनिर्णयं कृतवानथ मत्स्यादिरूपाणां भगवदवतारत्वमविशिष्टमिति सर्वेषां समस्योपासना कार्येति पार्थक्येनेति विचारयति ।तत्रोपास्याभेदेऽपि
रूपभेदादेकत्रोपासकस्यान्यत्रानुपासनलक्षणावज्ञासंभवादस्याश्चाप्रसिद्धिसंभवादपि समस्यैव सा कार्येति प्राप्ते सिद्धांतमाह॥ सर्वेष्ववतारेषु नानैवोपासना कार्या ।तत्र हेतुः ।शब्दादिभेदा-
त् ।तत्तत्स्वरूपवाचकशब्दानां मंत्राणां चादिपदादाकारकर्मणां च भेदादित्यर्थः ।एतेनैव मिथो विरुद्धानामाकारकर्मणामेकत्र भावनस्याशक्यत्वमप्युक्तत्वं चेति भावः सूचितः॥ ॥विकल्पोऽवि-
शिष्टफलत्वात्॥ ॥पार्थक्येनोपासनानि कर्तव्यानीति स्थिते विचार्यते ।किमग्निहोत्रदर्शपूर्णमासादिवदेषां समुच्चय उत फलविकल्प इति ।तत्र विधिफलयोः समानत्वात्समुच्चय इति प्राप्ते नि-

र्णयमाह। उपासनानां विकल्प एवं तत्र हेतुरविशिष्टफलत्वात्। मुक्तिफलकत्वं हि सर्वेषामुपासनानामविशिष्टमेवं सत्येकेनैव तत्सिद्धावपरस्याप्रयोजकत्वादग्निहोत्रादिवन्नित्यताबोधक
त्वाभावात्तदर्थिनो विकल्प एव॥ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्। ये तूपासनेषु भिन्नानि भिन्नानि फलान्युच्यन्ते तत्र त्वनेकफलार्थिना तत्तत्फलकोपासनानि समुच्चीयेरन्न विशिष्टफल
भावात्। यत्त्वेकस्यैवोपासनस्य स्वकामितानेकफलत्वं श्रूयते। तत्र तथैव चेदुपासनं करोति तदा न समुच्चीयेरन्नपि स्वकामितेष्वेकतरस्य तदन्यफलवैशिष्ट्येन। विशिष्टफलत्वाभावादिति पूर्वहेत्वभाव
ति। शिष्टप्रयोगाभिप्रायेणोक्तमिति ज्ञेयं। अथवा कामैक्ये नियतफलकानि तानि न समुच्चीयेरन्नत्र हेतुः स्पष्टः॥ ॥अंगेषु यथाश्रयभावः॥ ॥प्रधानेषु निर्णयमुक्त्वांगेषु तमाह। एकार्थसाधकानामु
वे सनां भेदे नांगभेदेऽप्येकतरोपासने फलैक्यादंगानि तत्र समुच्चीयेरन्निति शंकायां निर्णयमाह। उपासनांगानां तदेवाश्रयस्तथा च यदंगं यदुपासनाश्रितं तत्तत्रैव तस्य भाव इत्यर्थः॥ अत्र हेतुमाह॥ ॥शिष्टेश्च
त उपासनं तत्तदंगविशिष्टमेव वेदे शिष्यत इति तथेत्यर्थः। चकारादतिरिक्तकरणे प्रायश्चित्तोक्तिरपि बाधिकेति सूच्यते॥ ॥समाहारात्॥ ॥कर्ममार्गीयोपासने निर्णयमुक्त्वा ज्ञानमार्गीयोपास
नेतमाह। अथर्वोपनिषत्सु नृसिंहोपासनादिषु मन्त्रकस्यादिरूपत्वेनापि प्रकृतिः श्रूयते॥ श्रीभागवते च नमस्ते रघुवर्याय इत्यादिरूपास्तुतिर्व्रजनाथे एवं सति रूपभेदे पि भगवदवतारस्याविशिष्ट
त्वादेकस्मिन्रूपे रूपांतरसमाहारो दृश्यत इति सर्वरूपत्वेनैकत्वोपासनमपि साध्वित्यर्थः॥ ॥गुणसाधारण्यश्रुतेश्च॥ ॥ऐश्वर्यवीर्यादिगुणानां सर्वेष्ववतारेषु साधारण्यं श्रूयते तेन धर्मिधर्मिणामैक्या
त्सर्वैक्यं साधितमित्यर्थः। न वा तत्सहभावाश्रुतेः। न त्वेवमुपासनं नित्यमुत वैकल्पिकमिति शंकायां तदुक्तरीत्या नित्यत्वे प्राप्ते तन्निषेधमाह। नेति। किंतु वा। विकल्प एवैवमुपासने ऐच्छिकस्तत्र हेतुमाह। सहभावा
श्रुतेरिति। नियमतस्तेषां रूपाणां सहभावश्रवणं चेत्स्यात्तदा स्यात्तथोपासनस्य नित्यता न त्वेवमतो विकल्प एवेत्यर्थः॥ ॥दर्शनाच्च॥ ॥योऽपि रूपांतरसमाहारहृदकिमुपास्ते सोऽप्येकं रूपमुपास्य त्वे

अणु॰ ३ मत्वा तत्र योपास्त इति फलं तस्यैव रूपस्य दर्शनं च वतिन उभयवैषामितोपि हेतोर्विकल्प एवेत्यर्थः। एतद्दृष्टांतेन यस्मिन् रूपे यादृग्धर्मवत्त्वं श्रूयते तादृग्धर्मवि। शिष्टमेवैकं रूपमुपास्यमि
४० तिव्यासहृदयमिति ज्ञायते। उपासनानिर्णयांते दर्शनात्मकहेतूक्त्या सर्वेषामनानां भगवत्साक्षात्कारः फलमिति ध्वन्यते। माहात्म्यज्ञापनार्थं परं सर्वावताररूपत्वं यथार्थमेव केचिज्ज्ञाप्यते(
यथार्थत्वान्न दृष्यविरोधीति ज्ञेयं॥ ॥इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य तृतीयः पादः॥ ॥३॥ ॥ ॥पुरुषार्थोतः शब्दादिति बादरायणः॥ ॥
उपासनाभेदेप्युपास्याभेदाच्छाखांतरोक्तधर्माणामप्युपसंहारः कर्तुमुचित इति पूर्वपादे निरूपितमिति तन्न्यायेनोत्तरकांडप्रतिपाद्यब्रह्मफलकसर्वात्मभावेपि पूर्वकांडप्रतिपादितकर्मणामुपसंहा
रः प्राप्नोति न वेत्यधुना विचार्यते। विधिपक्षे तत्सहकृतस्याप्यफलसाधकत्वमिति सिध्यति। निषेधपक्षे तु केवलस्येतीममेव पक्षं सिद्धांतत्वेनाह॥ पुरुषार्थमित्यादिना॥ ॥सिद्धांते तातेन च पूर्वपक्षसंभव
इत्यादौ तमेवाह। अतः सर्वात्मभावादेव केवलात्पुरुषार्थः सिध्यति। कुतः। शब्दात् श्रुतेरित्यर्थः। श्रुतिस्तु नायमात्मा प्रवचनेनेत्युपक्रम्य यमेवैष वृणुत इत्यादिका। ब्रह्मविदाप्नोति परमित्यादिका।
मेवं विद्वानमृत इह भवति। सनत्कुमारनारदसंवादे यत्र नान्यत्पश्यतीत्याद्यात्मिका छांदोग्यश्रुतिश्च एतदादिश्रुतिषु सर्वत्र आत्मा केवलस्यैव भगवज्ज्ञानस्य फलसाधकत्वं श्रूयत इति तथा। अत्र फल
त उपपत्तेरित्यत्रेवोपपत्तिं हेतुत्वेनानुक्त्वा श्रुतिपदं चानुक्त्वा शब्दपदं यदुक्तवांस्तेन श्रुतिस्मृत्यात्मकः सर्वोपि प्रमाणराशिर्हेतुत्वेन व्यासाभिमत इति ज्ञायते। तेन केवलेन हि भावेन गोप्यो गावः ख
गाः। येन्ये मूढधियो नागाः सिद्धा मामीयुरंजसा। यन्न योगेन सांख्येन दानव्रततपोध्वरैः॥ व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपीत्यादिरूपा स्मृतिरपि संगृह्यते। एतेन श्रुत्यादिप्रमाणवादि
दृमेवाभिमतं न द्विरुद्धवादिमितोन्यदिति तेषामप्रामाणिकत्वं ज्ञाप्यते। अत एव स्वनामग्रहीतं स्वस्य वेदव्यासकर्तृत्वेन तत्रैव यतो भरः। अपरं च। वैदिकाः सिद्धांते भगवत्स्वरूपस्यैव स्वतंत्रपुरुषार्थत्वा

नी

भतत्त्वरूपाणांमुक्त्यनिष्ठाकथनान्मुक्तोपसृप्यव्यपदेशाच्चमुक्तेःपरमपुरुषार्थत्वात्तान्नवत्तुनामान्यैःसाधनैः।वस्तुतःपरमपुरुषार्थेयिउक्तरूपःसत्त्वसत्त्वन्निभावेनैवेतिज्ञापनायफलपदमनुक्त्वा
·· पुरुषार्थपदमुक्तं।एवंसत्यस्यसूत्रस्यार्थान्तरमपिव्यासाभिमतमितिज्ञायते।तथासत्ययंस्त्रिष्टः३योगस्तथाहिपुरुषार्थेन्निगवानेव।कुतः।अतःशास्त्रात्।अतःपदविशिष्टस्त्रनिवाक्याद्दित्य
:।तैत्तिरीयोपनिषत्सुपठ्यते।अतःपरंनान्यदणीयम८हिपरात्परंयन्महतोमहान्तं।यदेकमव्यक्तमनंतरूपंविश्वंपुराणंतमसःपरस्तात्।इति।अथाचप्रस्तवतिष्ठते॥ ॥ज्ञेयत्वात्पुरुषार्थत्वा
यथान्येष्वितिजैमिनिः।विद्योपरिज्यत्वेनकर्मशेषत्वात्तत्स्वरूपज्ञानपूर्वकोयागःफलातिशयेहेतुरितितन्माहात्म्यमुच्यतइत्यर्थवादरूपंतत्।अत्रदृष्टांतमाह।यथान्येष्विति।अन्येषुद्रव्यसंस्कारक
र्मस्वपि।यस्यपर्णमयीजुहूर्भवतिनपाप८श्लोक८शृणोतियदाङ्क्तेचक्षुरेवभ्रातृव्यस्यवृङ्क्ते।यत्प्रयाजानुयाजाइज्यंतेवर्मवाएतद्यज्ञस्यक्रियतेवर्मयजमानस्यभ्रातृव्याभिभूत्याइत्येवंजातीयकाफल
श्रुतिरर्थवादस्तद्वदित्यर्थः।ननुतमेवंविदित्वामुनिर्भवत्येतमेवप्रव्राजिनोलोकमीप्संतःप्रव्रजंति।एतद्धयेचद्दैस्मपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्यंच
· रंतीतिश्रुतिर्निरंगवल्लानवतःसर्वत्यागंवदंतीतिनत्वदुक्तंसाधीयइत्यतउत्तरंपठति॥ ॥आचारदर्शनात्॥ब्रह्मविदामपिवसिष्ठादीनामग्निहोत्रादिकरणंजैमिनिःपद्रूपेतितदाचारप्रामा
णिकमितिचमनुतइतितन्मतमनुवद्विमममप्यन्यत्कथयाख्यामः।ब्रह्मविदोत्यागावश्यकत्वेगार्हस्थ्यमेतेषांनस्यादितिभावः।उक्तश्रुतिस्तुकर्मण्यशक्तानांतेषांत्यागमनुवदति।लोकैषणा
याश्चव्युत्थायेतिश्रुतेर्लोकसंग्रहार्थंतत्करणमितिनवक्तुंशक्यं।तच्छ्रुतेः॥ ॥ब्रह्मविदःकर्माचारनिरूपकश्रुतेरित्यर्थः।साचजनकोहवैदेहोबहुदक्षिणेनयज्ञेनेजइत्यादिरूपा।तथाचतत्ते
नैवार्थसिद्धिश्चेत्स्यात्तदातद्गतआयाससाध्येकर्मणिप्रवृत्तिर्नस्यादितिभावः॥ ॥समन्वारंभणात्॥ ॥तंविद्याकर्मणीसमन्वारभेतेइतिश्रुतिःफलारंभेविद्याकर्मणोःसाहित्यंदर्शयतीतिनस्वातंत्र्यं

अ॰पु॰३ विद्यायां॑ न हृतो विधानात्॥ ॥ब्रह्मिष्ठो ब्रह्मा दर्शपूर्णमासयोस्तं वृणीत इति कल्पश्रुत्या ब्रह्मविदो ब्रह्मत्वेन वरणं विधीयत इति ब्रह्मज्ञानस्यार्त्विज्याधिकारसंपादकत्वात्कर्मशेषत्वमेवेत्य
ध१ र्थः। ननु यदहरेव विरजेत्तदहरेव प्रव्रजेद्गृहाद्वा प्रव्रजेद्वनाद्वेत्यादिश्रुतिभ्यो विहितत्वाविशेषात्कर्मत्यागयोरैच्छिको विकल्पोंगाकार्येतो न शेषिशेषभाव इत्यत उत्तरं पठति॥ ॥नियमाच्च
॥ ॥आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेत्। ऐन्द्राग्नं पुनरुत्सृष्टमालभेत य आतृतीयात्पुरुषात्सोमं न पिबेद्विच्छिन्नो वा एतस्य सोमपीथो ब्राह्मणः स आतृतीयात्पुरु
षात्सोमं न पिबति। यावज्जीवमग्निहोत्रं जुहुयादित्यादिश्रुतिभ्यो यथा कर्मकरणे नियमः श्रूयते न तथा त्याग इति नोक्तपक्षः साधुरित्यर्थः। चकारान्नियतस्य तु संन्यासः कर्मणो नोपप
द्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्तित इत्यादिरूपा स्मृतिः समुच्चीयते। त्यागविधिरज्ञविषय इत्यक्रमिति भ्रान्तेप्रति वदन्ति॥ ॥अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शना
त्॥ ॥तु शब्दः पूर्वपक्षं व्यवच्छिनत्ति। यदुक्तं शेषत्वात्पुरुषार्थवाद इति तन्नोपपद्यते। कुतः। अधिकोपदेशात्कर्मसाम्यमपि न वक्तुं शक्यं। यत्र तत्र तच्छेषत्वं दूरापास्तं। यत ईश्वरः कर्मणा
सकाशादधिक उपदिश्यते। तथाहि। स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंच स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्। इत्यु
पक्रम्याग्रे पठ्यते तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्तीत्यादि। एवं सति यज्ञान
ग्रं साधनत्वं यज्ञे तस्य यैः शेषत्वं कथं स्यात्। किंतु यज्ञस्य तद्वेदनशेषत्वं। एतेनेज्यत्वेन तच्छेषत्वं प्रत्युक्तं वेदितव्यं। ज्ञानस्य यागपूर्वाङ्गित्वात्तद्विशिष्टस्य तस्य ब्रह्मज्ञानसाधनत्वात्। न च पूर्वं सामान्
त इज्यत्वानमामीयते न विशेषतो ज्ञाने सति पुनर्यज्ञकरणे पूर्णकर्मफलं चावीति न तद्शेषत्वमिति वाच्यं। तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्तीति श्रुतेस्तद्

व३

दनस्यगार्हस्थ्यविरोधित्वेन तदसंभवात्। यद्वा साध्वसाधुकर्मफलसंबंधरहितस्तस्य कर्तृत्वेन तथात्वं नु मे पपन्नम तो जीवात्मन एव तथात्वं न तु परस्य। न चैतेन योर्वास्तवाभेदान्नैवमिति वाच्यं वास्तवा
भेदाज्जीवेप्यकर्तृत्वस्य तथात्वस्य सुवचत्वात्। वास्तवा भेदस्य पूर्वमेव निरस्तत्वात्तमादाय ये पूर्वपक्षास्ते पूर्वपक्षा एवेत्यलमुक्त्या। न कर्मणां बंधनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं
निहितं गुहायां विभ्राजते यद्यतयो विशंतीति श्रुत्या कर्मप्रजाधनैर्मोक्षाप्राप्तिमुक्त्वा त्यागेन तत्प्राप्तिरुच्यते त्यागविषयस्यानुक्त्या तुल्यत्वात्सर्वं निध्यसत्कर्मादीनामेव त्यागोऽभिप्रेतः। न याच। मुक्तो
पसृप्यत्वाद्भगवतः उक्तसाधनेन मुक्ताः संतो नाकं परेण विद्यमानमपि भक्त्या गुहायां विभ्राजते न तु यस्मात्परं नापरमस्तीत्यादिनोपक्रांतत्वात्पुरुषोत्तमस्वरूपं यतयः विरहभावेन तद्विना भ्र
ष्टात्तु मत्राक्तास्त्याः स्पर्धयतमाना विशंतीति भक्तिमार्गीयाणां फलमुक्तं। अग्रे वेदांतविज्ञाने त्वच्चा ज्ञानमार्गीयाणां फलमुक्तं। अन्यथा पौनरुक्त्यं स्यात्। एवं कर्मज्ञानाभ्यामधिको भक्तिमा
र्गस्तस्याप्यः पुरुषोत्तमस्य ब्रह्मतावुपदिश्यत इति तदेकप्रमाणबादरायणस्य मतमप्येवं जैमिनिमतादधिकमित्यर्थः। एवं श्रुत्या परमतं निरस्य त्रिष्वपि विश्वासार्थं स्वानुभवमपि प्रमा
स्य णयति। न दर्शनादिति। भक्त्याधिक्यवचनेनैव भगवतो भक्तिमार्गवानुभवादित्यर्थः। श्रुतयोऽधिकमात्मानं दर्शयंतीति तद्व्याख्यानमुपदेशपदेन पौनरुक्त्यापत्तेः। तन्मतमनिरस्य तस्मात्स्वम
तश्चाधिकमात्रोक्त्या निष्कामकर्मणश्चित्तशुद्धिहेतुत्वेन परंपरा ज्ञानमार्गेपि योगांगीकारः सूच्यते। शुद्धिश्च भक्तिमार्गेद्धि सोपि न। यन्नु योगेनेति वाक्यादेवं स निष्ककर्मशेषत्वगंधोपि ब्रह्मणीति
भावः॥ ॥तुल्यं दर्शनं॥ ॥यदुक्तमाचारदर्शनात्कर्मशेषत्वं ब्रह्मण इति तदपि समाधीयस्तुल्यं यतो दर्शनं। ब्रह्मविदां शुकतृतीयजन्मवशार्षभादीनां त्यागदर्शनात्। एतेन यदुक्तं कर्मसा
गस्तस्य कर्मशेषत्वं कथं शंकितुमपि शक्यमिति भावः सूच्यते एतेन कर्मण्यशक्तान्प्रति त्यागविधिरिति निरस्तं। शुकादीनामतथात्वात्। ननु जनको ह वैदेहो वैदेह इति श्रुतिसामान्यादाचरद

य३

गु·३ त्तनित्यागस्तत्तनादधिकबलमित्यतउत्तरंपठति॥ ॥अमार्वत्रिकी॥ब्रह्मविदांसर्वेषामेतदाचारंचेन्निरूपयेद्भूतिस्तदात्वदुक्तंस्यात्तत्त्वेसंयत एतादृशीश्रुतिर्ब्रह्मविल्सुसर्वेष्वनश्रूयते

४२ तथाहि।एतद्धस्मवैतद्विद्वांसआहुःऋषयःकावषेयाःकिमर्थावयमध्येष्यामहेकिमर्थावयंयक्ष्यामहे।एतद्धस्मवैतत्पूर्वेविद्वांसोऽग्निहोत्रंनजुहवांचक्रिरे।एतंवैतमात्मानंविदित्वाब्राह्मणाः

पुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंति।एतावदरेखल्वमृतत्वमितिहोक्त्वायाज्ञवल्क्यःप्रवव्राजेत्यादिश्रुतयोबह्व्यस्तद्विदांकर्मत्यागमेवानुवदंत्यत

स्त्यागपक्षएवबलवान्।ननुब्रह्मवित्त्वाविशेषेप्येकेषांकर्मकृतिरेकेषांत्यागइतिविभागःकृतस्तत्राशंक्यतत्रहेतुमाह॥ ॥विभागज्ञानवत्॥ ॥एतस्यैवानंदस्यान्यानिभूतानिमात्रामुप

जीवंती।तिश्रुतेर्मानुषानंदमारभ्यब्रह्मानंदपर्यंतंयेगणितास्त्वानंदास्तेसर्वेपुरुषोत्तमानंदात्मकाएव।एवंसतियेषुयावानानंदोदृष्टोऽस्तितावंतंतंनिरूपयेत्स्वधिकारस्तारतम्येनतद्ज्ञानमि

तितज्ञापनाय[illegible]ज्ञातोत्तरमानंदंश्रुतिर्निरूपयत्।अतएवपुरुषायुःसंख्यासमानसंख्ययैवोत्कर्षउक्तस्तेनपुरुषधर्मस्याधिकारस्यैवोत्कर्षःसूच्यते।एवंप्रकृतेप्यन्यत्रावतारादिस्तत्तारत

म्येनभगवज्ज्ञावतारतम्यमत्रत्वनुग्रहएवाधिकाररूपइतितदुत्कर्षेत्यागस्तदनुत्कर्षेनेत्यर्थः।यच्चोक्तंतद्व्रतोविधानादितितत्राह॥ ॥अध्ययनमात्रवतः॥ ॥यदुक्तंब्रह्मनिष्ठोब्रह्मेत्यादितत्र

ब्रह्मशब्देनवेदएवोच्यते।नतुपरस्तथाचतंब्रह्मत्वेनाविज्ञतत्राद्ब्रह्मरूपत्वंज्ञात्वासततंतदध्ययनमात्रंयःकरोतिनतुतेन।किंचित्कामयतेतस्याधिकारोब्रह्मत्वाद्विज्ञइत्युच्यतइति[illegible]नब्रह्मश

नस्यकर्मशेषत्वं।प्रत्ययस्यातिशायनार्थकत्वादतिशयेनब्रह्मरूपस्तदेवभवतीत्युक्तंतस्यतदार्त्विज्यमेवंसतिब्रह्मपदंब्रह्मणएवपरमपिसंगच्छते।अथवावेदाध्ययनमात्रवतःकर्मण्यधिकारो

नतुब्रह्मविदोपीत्यर्थः।नचतदंतःपातित्वेनवेदांतानामप्यध्ययनस्यावश्यकत्वेनतत्प्रतिपाद्यब्रह्मज्ञानस्याप्यवर्जनीयत्वात्तद्वतएवतत्राधिकारइतिवाच्यं।शाब्दपरोक्षज्ञानस्यब्रह्मज्ञानत्वाभावा

त।न हि मितामधुरे तिष्ठाद्ज्ञानमात्रवांस्तन्माधुर्यत्तोनवति।न यामतिपित्रोपशमादिकं तत्कार्यमपिस्यात्त्वेवं।अत एव छांदोग्ये सनत्कुमारेण यद्वेत्थ तेन मोपसीदेत्युक्तो नारद ऋग्वेद-
मारभ्य सर्पदेवजनविद्यापर्यंतं स्वाधीतमुक्त्वा सोहं मंत्रविदेवास्मि नात्मविदित्युक्तोऽपरोक्षब्रह्मज्ञानमेव ब्रह्मज्ञानमुच्यते अत एव तैत्तिरीयोपनिषत्सु वेदांतविज्ञानसुनिश्चितार्था इति पठ्यते
विज्ञानमनुभव एव न तु ज्ञानमात्रमतो ह्यनापास्तं कर्मशेषत्वं ब्रह्मणः।तं विद्याकर्मणी इत्यादिस्तु संसार्यात्मनः पूर्वदेहत्यागसामयिकं वृत्तांतं निरूपयति न तु ब्रह्मविद इति सम्यगारंभणादिति सूत्रमुपे-
क्षितमाचार्येण।यच्चोक्तं नियमाच्चेति तत्राह॥ ॥नाविशेषात्॥ ॥कुर्वन्नित्यादिश्रुतिस्थः कर्मकृतौ यथा नियमः श्रूयते न तथा त्याग इति यदुक्तं तत्र।कुतः।अविशेषात्।न कर्मणा न प्रजया ध-
नेन त्यागेनैके अमृतत्वमानशुरिति श्रुतिः।कर्मादिनाऽमृतत्वाप्राप्तिमुक्त्वा त्यागेनैतां वदंती कर्मत्यागस्यावश्यकत्वं वदती ति तस्मान्नविशेषो यत इत्यर्थः।तथा चामृतत्वमानशुरिपदान्मुमुक्षो-
:कर्मत्यागनियमोऽमुमुक्षोस्तत्कृतिनियम इति व्यवस्थेति भावः।अथवा।ननु कर्मप्राप्तेस्तुरीयाश्रमे हि कर्मत्यागो द्वितीये तस्मिन् कर्मकरणनियमस्तत्र च कर्तुरंगत्वेन न तत्त्वरूपज्ञानमात्ररूपकं
तच्च वेदांतैरेव निरूपणं कर्मशेषत्वमित्यस्त्वमाशंक्य निषेधति।नेति।यदहरेव विरजेदिति श्रुतेस्तावत्कर्माणि कुर्वीत न निर्विद्येत यावता इति भगवद्वाक्याच्च।त्यागे वैराग्यस्यैव प्रयोजकत्वादाश्रम-
विशेषे विशेषाभावादप्रयोजकत्वादित्यर्थः।यत्रापि क्वचित्कर्मप्राप्तिस्तत्रापि तत्कर्म ज्ञानं ब्रह्मज्ञानमिति पूर्वसूत्र एवोक्तमिति भावः।एतेन वेदाध्ययनादिकमप्यप्रयोजकमिति ज्ञापितम् अत एव वस्तुक-
स्य वैराग्यातिशयादुपनयनादेरप्यनपेक्षोच्यते।एवं सूत्रद्वयेन कर्माधिकारसंपादकत्वेन ब्रह्मज्ञानस्य तच्छेषत्वं निरस्तं।अथ यद्दितनया ब्रह्मविच्छ्रुत्यत्र ब्रह्मपदेन पर एवोच्यत इति वदसि तत्रापि व-
दामः॥ ॥स्तुतयेनुमतिर्वा॥ दर्शपूर्णमासावेतादृशो यत्र ब्रह्मविदा विद्याधिकारीति न तत्कृतस्यार्थं ब्रह्मविद्यो ब्रह्मेत्यनेन ब्रह्मविदोऽप्यविद्ये अनुमतिः क्रियते न तु तस्याधिकारत्वमभिप्रेतमुक्त्वानुप।

स्रौ ३ धै २

णु॰ ३ पत्रिभिरित्यर्थः॥ ॥कामकारेण चैके॥ ॥न चैष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयानिति श्रुत्या ब्रह्मविदः कर्मकृतगुणदोषौ निषिध्येते स च प्राप्तिपूर्वक इति ब्रह्मवि

१३ दः कर्मकरणमावश्यकमिति प्राप्तमुच्यते। कामकारेणेति। करणं कारः कामेनेच्छया करणं कामकारस्तथा च परानुग्रहार्थमिच्छामात्रेण न तु विधिवशात्करणं न कामकार इत्युच्यते। तथा

चैवं कृते कर्मणि तत्कृतगुणदोषप्रसक्ते तत्प्रतिषेधमेके शाखिनः एष नित्य इत्यादि पठंति। न ह्येतावता कर्मकृतस्याधिकारप्राप्तिरिति भावः। अथवा कामेन कारो यस्य तथा तादृशेन कर्मणा प्राप्त

वृद्धिह्रासयोः संबंधाभावं ब्रह्मविद्येके पठंतीत्यर्थः। चकारेणाप्रार्थतया लोकसंग्रहार्थं कृतं कर्म समुच्चीयते सर्वस्य वशी सर्वस्येशान इति श्रुतेस्तथा॥ ॥उपमर्द्दं च॥ ॥अनेन कर्माधिका

राभावे हेत्वंतरमुच्यते द्वैतभाने हि यथा कथंचित्कर्मकृतिसंभावनापि यस्य त्वखंडब्रह्माद्वैतभानं ब्रह्मेत्येव न त्विदं ब्रह्मेति सखंडं। अतो द्रष्टृत्वेन प्रपंचस्यापि भानात्सखंडत्वं। तथा चाखंडतज्ज्ञा

ने कर्मतदधिकारादेरुपमर्द्दं चैके शाखिनः पठंतीति न ब्रह्मज्ञानस्य कर्मशेषत्वसंभावनापीत्यर्थः। श्रुतिस्तु यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिरूपा॥ ॥ऊर्द्ध्वरेतस्सु च शब्दे हि

॥ ॥अथेदं विचार्यते ब्रह्मचर्यानंतरं गार्हस्थ्यमपि श्रुत्या बोध्यते ब्रह्मचर्यादेव प्रव्रजेदित्यादिश्रुतिर्निर्ब्रह्मचारिण एनव प्रव्रजनमपि बोध्यते। एवं सत्यविरोधाय यदहरेवेति श्रुतेश्च रागि

तद्रहितभेदेन विषयभेदो वाच्यः। तत्र ब्रह्मचर्याविशेषेऽपि भगवदनुग्रहविशेषजन्यचित्तशुद्धिविशेषजवेदांतार्थपरिज्ञानमेव हेतुर्वाच्यः। वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यत

यः शुद्धसत्त्वा इति श्रुतिरिममेवार्थमाह। तथा चैतादृशा ऊर्द्ध्वरेतस इत्युच्यते। एवं सत्यूर्द्ध्वरेतस्सु कर्माभावउक्तिस्त्वव याप्यूरीकार्य इति ज्ञानरहितानां कर्मण्यधिकारस्तद्रहितानां संन्या

स इति त्वदुक्ताद्विपरीतोर्थः सिध्यतीति क कर्मशेषत्वसंभावना ज्ञाने। ननु संन्यासेपि तदाश्रमीणां कर्मास्तीति वैराग्यसहकृतं ज्ञानमेतच्छेषभूतं तदसहकृतं तदग्निहोत्रादिशेषभूतमिति ६

ति १

किंतु वेदमात्रसिद्धं

नवैपरीत्यमिमिषाप्रच्चार । वाद्देहीनि । ज्ञानस्वरूपं तत्फलं च नमुक्तिसिद्धं । तत्र तमेवंविद्वानमृत इह भवति ब्रह्मविदाप्नोति परं य एनं विदुरमृतास्ते भवंतीत्यादिवाक्यैर्ब्रह्मज्ञानस्य मो
एव फलं श्रूयते । सर्वसाधनानां साक्षात्परंपरावेदनेन तत्रैव पर्यवसानात् ततो धर्मिग्राहकमानविरोधात् संन्यासाश्रमीणां कर्मशेषत्वमपि न वक्तुं शक्यमित्यर्थः । नन्वेवं संन्यासस्य वैयर्थ्यमि
ना । ब्रह्मविदंतिशिक्षसंगस्य भगवद्विस्मारकत्वेनावश्यपरित्याज्यत्वेन श्रुत्या कथनात् तत एव वेदांतविज्ञानसुनिश्चितार्था इत्यत्र संन्यासयोगाद्यतयः शुद्धसत्त्वा इत्यत्र कंचत्रपंचस्यांतःकरणे
विशेषाधायकत्वं च प्रतीयते संन्यासस्य । स च संस्कारफलोपकार्यंग मित्यावश्यकः संन्यासो मर्यादामार्गे पुष्टिमार्गे त्वन्यैव व्यवस्था । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहेति वाक्यात् ॥ ॥पर
मिनिस्चोदनाचापवदतीति ॥ ॥ऊर्ध्वरेतस्सु च ज्ञानोक्तेस्तस्य मुक्तिफलकत्वोक्तेः । किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इत्यादिश्रुते ब्रह्मसंप्राप्तावेव सर्वस्याः श्रुतेस्तात्पर्यमिति
तिनस्मात् एवं सर्वक्लेशापायपूर्वकपरमानंदरूपत्वात्तत्र कर्मणि । दुःखात्मकसंसारहेतुत्वात्तस्य । जीवस्य योनिमित्तमेव श्रुतिप्राकट्यात् । अन्यथा निषेधविधिर्न स्यात् । तथा च कर्मविधिनापि
रामो ह्येव फलत्वेन परामृश्यत इति सिद्धं । तं परामर्शं कर्मस्थानं अपवादी जैमिनिरपवदति बाधत इत्यर्थः । मोहकशास्त्रप्रवर्तकः स ईश्वर एव तन्मतं नेयतो । तस्तत्र । सिस्तस्य मनेहशपारस्तकमान
कारिणामंधादीनां संन्यासविधिविषयत्वं अन्यथा वीरहा वा एष देवानां योऽग्निमुद्वासयत इति श्रुतिर्न स्यात् । अतो ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादेव
जेत् गृहाद्वा नादेति श्रुतेरप्यंगहीन एव स विषयो यत आयुर्भागविभागेनाश्रमाणां विधानं तुरीये तस्मिन्न देहेंद्रियादिवैकल्यं नियतमतः कर्मण्येव स्कृतेस्तात्पर्यं अपि च । ज्ञानकर्मणोरलौकिकफ
साधकत्वेन विहितत्वमेव प्रयोजकं । अपरोक्षब्रह्मज्ञानं च न विधेयं साक्षात्स्वरूपमाध्यत्वा चोदना बोधकलिङाद्यभावाच्च ज्ञानस्य न मुक्तिसाधकत्वं वक्तुं शक्यं । य एनं विदुरित्यादिस्तु यागेऽधि

अणु॰ ३ ज्यविधुस्तुतिपरेत्याम्नायेनाहाचोदनाचेति।जैमिनिवचनसहायस्तुतेयमचोदनाचपरामर्शमपवदतीतिसंबंधः।तथाचविधिसंबंधात्कर्मैवानुष्ठेयंनतुमुक्तिसाधनमप्यतथात्वादितिस्थितं॥
४४ अनुष्ठेयंबादरायणःसाम्यश्रुतेः॥ ॥बादरायणस्त्वाचार्योजैमिनेरपिगुरुस्तदेवकर्तव्यमितिशिष्यसंमतमनुष्ठेयंकर्मापवदतीतिपूर्वेणसंबंधः।तत्रहेतुःसाम्यश्रुतेः।यथा वीरहावाएषदे
नामितिश्रुत्याकर्मत्यागकर्तुर्निंदाश्रूयतएवमेवभगवत्स्मनरहितस्यापिमाश्रूयतेयतस्तथाहि॥असुर्यानामतेलोकाअंधेनतमसावृताः।तांस्तेप्रेत्याभिगच्छंत्यविद्वांसोऽबुधाजनाःएत
चयेनद्विदुरमृतास्तेभवंत्यथेतरेदुःखमेवोपयंतीत्यादिरूपा।एतच्चनिंदामात्रेणसाम्यमुक्तमापाततोवस्तुतस्तुतमेवंतंवेदानुवचनेनविविदिषंतिब्रह्मचर्येणतपसाश्रद्धयायज्ञेनानाश
चैतमेवविदित्वामुनिर्भवत्येतमेवप्रव्राजिनोलोकमीप्संतःप्रव्रजंतीतिश्रुत्याज्ञानसाधनत्वेनैवाश्रमकर्मकरणोक्तेस्तत्स्वातंत्र्यंकर्मणोवक्तुमशक्यं।अतएववस्तुकस्यनब्रह्मचर्यादिक
फलज्ञातत्वेनतत्साधनानपेक्षणात्।नचस्वर्गकामपदश्रवणान्नैवमितिवाच्यं।त्वदभिमतलोकात्मकस्वर्गेयत्रदुःखेनसंभिन्नमितिवाक्यशेषोक्तस्वर्गपदप्रवृत्तिनिमित्तधर्माभावादात्म
वतादृशत्वात्तस्यैवतत्रोक्तेः।एवंसतितमेतंवेदानुवचनेनेतिश्रुत्यैकवाक्यतापिसंपद्यते।अन्यथानुरविरोधएव।ननुदृष्टफलकाअपिकारीरीचित्रादियागाःश्रूयंतइतिनैवंनिर्णयइ
च्यते।नित्यकर्मणोहिज्ञानसाधनत्वमुच्यतेव्रीहिपश्वादीनांतन्निर्वाहकत्वात्तच्छेषत्वेनतेषांविधानं।एवंसति वीरहेतिश्रुतिःसाग्निकस्यगृहिणआलस्यादिदोषेणतदुद्वासनेदोषमाह।नत्वाश्र
ग्रहइतिमंतव्यं।अन्यथातदुच्छेदस्तद्विधिवैयर्थ्यंचस्यात्।नचानधिकृतमादायनत्समाहितिरितिवाच्यं।अत्रपृच्छामोंधपंग्वादिभिःप्रव्रजनंकार्यमितिविधिरस्याहोस्विद्यावज्जीवमग्निहोत्र
कप्रव्रजनविधायकवाक्ययोर्विरोधाभावायविषयोभिन्नःकल्प्यते।नाद्योश्रुतेः।नद्वितीयःयदहरेवविरजेदितिश्रुत्यावैराग्यवतःप्रव्रजनविधानात्तेनैवविषयभेदसिद्धौतत्कल्पनानवका

।तेन नापुत्रस्य लोको ऽस्तीति श्रुतिरप्यविद्वद्विषयिणीति न विरोधः॥ विद्वांसः प्रजां न कामयन्त इति श्रुतेः। एतेन एतत्र पापाकरणमपि प्रत्युक्तं वेदितव्यं। अविद्वद्विषयत्वात्। यदप्युक्तमचोदना चेति स्वावयवेन चोदनाबोधकलिङाद्यभावो बाधक इति तदपि न साधीयः श्रुतिमात्रादेव। श्रूयते हि तस्मादेवंविद्वांछांतो दांत उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येदिति। न च प्रमाणवस्तुपरत्वान्न ज्ञानस्य विधेय[illegible]नेति वाच्यं। इतरज्ञानस्य तथात्वेऽपि जीवात्मलक्षणे ऽधिष्ठाने परमात्मनो भगवतो दर्शनस्यान्यतोऽप्राप्तत्वात्तस्य श्रद्धान्तसाधनैस्तद्दर्शनस्वरूपयोग्यतासंपत्त्या वात्मन्यधिष्ठाने परमात्मदर्शनानुकूलप्रयत्नविधानसंभवाच्छ्रवणविधिनाक्षिप्तवाक्यजन्यज्ञानानुकूलप्रयत्नविधानवत्। एवमेव हि यागविधिनापि क्रियारूपयागस्य स्वानुकूलप्रयत्नाधीनत्वेन सप्रयत्न एव विधीतेऽन्याप्राप्तत्वान्न तु क्रियातत्प्रयत्नेसतिनस्याः स्वत एव संभवात्। च यथा। ननु यथा वीरहेति श्रुत्या कर्मत्यागो निंद्यते तथैवासुर्या नाम ते लोका अंधेन तमसावृताः। तांस्ते प्रेत्यापि गच्छंत्यविद्वांसोऽबुधा जनाः। ये तद्विदुरमृतास्ते भवंत्यथेतरे दुःखमेवोपयंतीत्यादिश्रुत्या भगवज्ज्ञानाभावो निंद्यते। एवं सति कर्मज्ञानानुकूलप्रयत्नयोर्विधेयत्वे मिथो विरोधादधिकारिभेदेन विधेयत्वं वाच्यं। न च तावत्कर्माणि कुर्वीत न निर्विद्येत यावतेति भगवद्वाक्याज्ज्ञानिनः कर्मविधेयत्वेन इहितस्य ज्ञानमिति वाच्यं। जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे इति श्रुतेः। तेनरागत्वेन प्रसिद्धस्यापि तस्य कर्मणि प्रवृत्तिर्यासिनस्यादधिकाराभावात्। अपि जनकदृष्टान्तेन कर्मणोऽङ्गित्वं ज्ञानस्य तदंगत्वं वाच्यं तथा च ज्ञानवता कर्मानुष्ठेयमिति प्राप्तं प्रतिवदति॥ ॥अनुष्ठेयं बादरायणः साम्यश्रुतेः॥ ज्ञानमंगं तदंगित्वेनानुष्ठेयं कर्मेति मतं बादरायणोऽपवदतीति सर्वेण संबंधस्तत्र हेतुमाह। साम्यश्रुतेरिति। स्वतोऽपुरुषार्थं कर्म फलार्थिनैवानुष्ठेयं। तथा चैष नित्यो महिमेति श्रुत्या ज्ञानवति विहितनिषिद्धयोः कर्मणोः फलाजनकत्वेन साम्यं श्रूयत इति फलार्थिप्रवृत्त्यसंभवेन ज्ञानिनस्तथात्वाभावेन कर्मोच्छेदप्रसक्त्या न ज्ञानस्यांगत्वं वक्तुं शक्यं। कृषिवलस्य व्रीहीणां वपनेन जनिस्ये

ए॰उ॰२ वा तथा च ज्ञानिनः प्रवृत्तस्य संन्यासेनान्येषां चापेतरेऽदुःखमेवोपयंतीति निंदाश्रवणेन तथात्वात् सर्वार्पितत्वज्ञानस्य कृति ज्ञानवह्निर्भस्मितंकर्मकं पंडितं बुधा इति ज्ञानस्य पुरुषार्थसाधकत्वोक्तिमसह⸱ मानेना
५५ चार्येण प्रोद्यानिरूपितं एवं सति पूर्वकांडवैयर्थ्यमापततीति तत्तात्पर्यमाह॥ ॥विधिर्विधारणावत्॥ यथा योगशास्त्रे मनःसमाधेरेव साध्यत्वात् तत्साधनत्वेनैव मानस्यासक्तेर्धारणा विधीयते न
तु स्वतंत्रतया फलसाधकत्वेन मनःसमाधौ नत्वाऽगात्। ततः किंचिदनन्यस्मरेत्। न चापि चित्रवद्दिशं ज्ञानकैविर्धुंक इत्यादिवाक्ये न्यस्य तथा न तथा च भक्तिसाधनत्वेनैवानुष्ठेयमिति तात्पर्येण कर्मवि
धिरूप्यते न तु स्वतंत्रतया फलसाधकत्वेन। ननु तत्र समाधिमधिकृत्य यमादीन्युक्तानीति तन्मध्यपातित्वेन धारणास्य तथात्वं युज्यते प्रकृते तु ज्ञानं भक्तिं वाधिकृत्य न कर्म विहितमिति दृष्टांत
वैषम्यमिति चेन्न उक्तानुपपत्त्या स्वानियमेव कर्मकृतिर्विदधातीत्यवश्यं वाच्यं। निंदायां चेतरपदात् ज्ञानमध्यपातित्वेन एव तद्विषयस्य प्राप्तेरावश्यकत्वात्। तथा च भगवज्ज्ञानस्येतरनिरपे
क्षत्वेन स्वरूपोपकारित्वमस्य कर्मणो वाच्यं। तथा चोक्तं दानव्रततपोहोमजपस्वाध्यायसंयमैः। श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यत इति। एष नित्यो महिमेति श्रुतिरपि यज्ञानेऽसति
विहितनिषिद्धकर्मफलासंबंधस्य हि स्यादित्यनुक्तात्स्येव पदवित्स्यादिति युक्तवतीनेन पदयोर्भक्तिमार्गरूपत्वात् तत्र च पदयोरेव मेयत्वेन मुख्यत्वात् तद्दानानुकूलप्रयत्नमेव श्रुतं विदधे
तेन शृण्वंति गायंति गृणंत्यभीक्ष्णशः स्मरंति नंदंति तवेहितं जनाः॥ त एव पश्यंत्यचिरेण तावकं भवप्रवाहोपरमं पदांबुजमिति वाक्याच्च वर्णाश्रमधर्माश्च पदज्ञानसाधनत्वेन कर्तव्या इति
दुं। तस्यैव तत्त्वं दृष्ट्वा प्रसिद्धार्थकत्वाद्वेदोक्तवेदप्रसिद्धस्य पुरुषोत्तमस्यैव तत्रापि पदविदेव दीनभावेन न भक्तिमार्गीयज्ञानवानेव स्यादेवं तत्सेवकारः सर्वत्रानुपपद्यते। तथा सति न कोऽपि ज्ञाता यांस्तत एव न
वक्ष्मनं नवनीति ज्ञापयितुं तं विदित्वेति पश्चात्तदुक्तवतीति तदाचार्यो ज्ञायते। अत एव पूर्वं कर्म निरूपितं साधनत्वात्। स्यादेतत्। भक्तिसाधनत्वमेव चेत्कर्मणः श्रुतेरभिप्रेतं तदा भगवद्विदितं फलं

३ धर्मश्रीराम ४२

संबंधस्यानुपपन्नमिति चेन्न। मैवं कर्मणां ज्ञानकुत्पत्तौ स्वरूपयोग्यतासंपादकत्वमेव नायमात्मेति निष्कृतेः कर्मज्ञानाभ्यामलस्य त्वाद्भगवतः। स्वरूपयोग्यतापेक्षाप्रिमापादिकस्य नतपोव्हिक
स्यात एव याज्ञवल्क्योक्तो नियमवाचीन यासति भगवदनुग्रहस्त्वेन दात। किंत्व घाघुरुषोत्तमज्ञानं तदा कर्मतत्फलसंबंध गं योपिनेति किमनुपपन्नं। एतेन तमेव विदित्वा मुनिर्भवति। अगृह
नहिरुद्ध्यन इत्यादिश्रुतीनां मिथो विरोधः परिहृतः। भक्त्या यास्त्वात्तदितरसाधनायास्त्वात एतवि विदिषंति नतु विद्वत्सपीत्याश्रयवतीतमेतं वेदानुवचनेनेति श्रुतिः प्रवृत्ते। नचानुपद
विदित्वा मुनिर्भवतीत्युक्तेः सांनिध्याज्ज्ञसाधनैरेव वेदनमभिप्रेतमिति वाच्यं। वेदानुवचनादीनां सर्वेषां वेदनसाधनत्वे सर्वेषां तत्कर्तृणां वेदनसंभवेन मुनिर्भवतीत्येकत्वं तद्विदिनवदे
तानं कस्यचिदेकस्य भवतीति ज्ञानस्य दुर्लभत्वं ज्ञाप्यते। मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः इति भगवद्वाक्याच्च। तर्हि वेदानुवचनादिभिः किं
का प्रवृत्तिः कथं। इत्थं। सतामयमात्मेत्यादिकया पूर्वश्रुत्या भगवन्माहात्म्यं श्रुत्वा यथाकथंचित्तद्वेदनौत्सुक्ये सति मत्संगाभावेन च किमार्गपरिचयात्कर्ममार्गमात्रमाश्रमधर्मत्वेनानो कि
कार्यसाधकत्वेनापि पूर्वं ज्ञानमस्तीति तदेव भगवद्वेदनेऽपि साधनमिति मन्यमानास्तदेव कुर्वंति। ननु वेदिकसाधनानां कथं वैयर्थ्यमिति चेन्न। नात्र भक्तितत्वेऽपि जन्मांतरीयात्तत्र ज्ञानोप
क योगिसंस्काराधायकत्वेनावैयर्थ्यात्॥ ॥स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्॥ ॥ननु सामस्त्यश्रुतेर्हेतोः कर्मशेषत्वं ज्ञानस्य यदपास्तं तन्नोपपद्यते। साम्योक्तेस्तत्र न स्तुतिरूपत्वात्। अपि
चातयाज्ञानिनोऽपि कर्मोपादानात्कर्मस्तुतिस्वीकारादिति यावदन्यथा ज्ञानिनां कर्मकृत्याभावेन तत्कृतगुणदोषाप्रसक्त्यात्तन्निषेधानुपपत्तिः स्यात्तेषामपि तत्कृतगुणदोषसंबंधोस्त्येवेति
ज्ञापनाय मात्रपदं निषेधेनेतरसाधारणपं परिक्रियते। तथाच ज्ञानिनोऽपि कर्मकरणात्कर्मशेषत्वं ज्ञानस्य निश्चप्रचमिति चेन्नैवं वक्तुं युक्तं। परज्ञानस्य कर्मफलासंबंधफलकत्वस्यापूर्व

तं३

ब्र.सू.३ त्वाद्विधेयत्वमेवं न हि यस्य कर्मणो ज्ञानस्य वा यत्फलं तदुक्तिरपि स्तुतिरेवेति युक्तं तयोरफलत्वापत्तेः। विधिर्हि प्रवर्तकः तस्य पुरुषप्रवृत्त्युपयोग्यर्थकथनेनैव चारितार्थ्यादन्यार्थकथनस्य स्तु
४६ तित्वमस्तु नाम। न ह्येवं प्रकृते मुमुक्षोः कर्मबंधाभावप्रेप्सोस्तत्साधनत्वज्ञान एव प्रवृत्तिसंभवात्। यच्च कर्मफलसंबंधनिषेधानुपपत्त्या कर्मसंबंध इत्युक्तं तत्र समाधीयते। न हितरणेन मः
कार्याभाव इत्युक्तेन तत्प्राप्तिरपि संभवति। अथवा पुरुषोत्तमज्ञानमुख्यफलस्यातिमहत्त्वेन साक्षात्कर्मशक्यत्वं ज्ञापयंती कैमुतिकन्यायेन परंपरया तदाज्ञानयचातिं विदित्वा ब्राह्मणो भ
वतीति श्रुतेर्ब्राह्मणपदेन ब्रह्मविदुच्यते तेन याताद्यपदेन बुद्धिस्थब्राह्मणमाहात्म्योद्देश्योक्तेः स क इत्याकांक्षायामाहैतं ब्राह्मणं विदित्वा विहितनिषिद्धफलासंबंधी भवतीति लक्षणा इत्यथ
साक्षाद्भगवद्विदः किमु वाच्यमिति भावः। अतस्तस्यैव तच्छब्दस्य पूर्वपरामर्शित्वाद्ब्राह्मणस्यैव भगवद्विदो नक्तस्येव पदविस्यान्नेशानानुकूलप्रयत्नवान्स्यात्तद्भजनेनेति यावत्। तथा च
यत्र भगवद्विद्विषयकज्ञानस्याप्युक्तरीत्या न कर्मशेषत्वं वक्तुं शक्यं तत्र भगवज्ज्ञानस्य तथात्वं दूरदूरतरमिति सर्वं सुस्थं॥ ॥पारिप्लवार्था इति चेन्न विशेषितत्वात्॥ ॥अथ प्रकारां
तरेणाशंकते भृगुर्वै वारुणिर्वरुणं पितरमुपससार। अधीहि भगव इति होपससाद सनत्कुमारं नारदः। प्रतर्दनो ह वै दैवोदासिरिंद्रस्य प्रियं धामोपजगामेत्याद्युपाख्यानैर्हि ब्रह्मविद्या
निरूप्यते। सर्वाण्याख्यानानि पारिप्लवे शंसतीति श्रुत्या शंसनशेषत्वं तेषामवगम्यते। शंसने शब्दमात्रस्य प्राधान्येनार्थज्ञानस्यातथात्वादुपदेशांनाख्यानप्रतिपाद्यं ज्ञानं मंत्रा
द्युपयोजकमिति कर्मशेषत्वमपि न वक्तुं शक्यं प्राधान्यं तु दूरापास्तं धर्मिण एवासिद्धेरित्याह॥ ॥पारिप्लवार्था इति॥ ॥उक्तरीत्या सर्वा उपाख्यानश्रुतयः कर्मशेषभूता इत्यर्थः। अ
त्राचार्य एवमपि कर्मशेषत्वं ज्ञानस्य न संभवतीत्याह। नेति। कुतः। विशेषितत्वात्। कर्मणः सकाशाज्ज्ञानं विशेषितमधिकधर्मविशिष्टत्वेनोक्तमिति न ज्ञानस्य कर्मशेषत्वमित्यर्थः।

त४

ननु विशेषितत्वमाख्यानेष्वेवेत्यप्रयोजको हेतुरिति चेन्नमेवं। आचार्याशयानवगमात्। तथा हि पूर्वतंत्रेष्पउउर्जैनिशतिम्यायेनाख्यानानां शंसनशेषत्वमुपेक्षितं त्वोच्यते न ख्या-
ख्यानेष्वेव ज्ञानं निरूप्यते। किं त्वन्यत्रापि। तथा हि। तैत्तिरीयके पठ्यते। ब्रह्मविदाप्नोति परं तदेषाभ्युक्ता॥ सत्यं ज्ञानमनंतं ब्रह्मेत्युपक्रम्य माहात्म्यविशेषज्ञानार्थमाकाशादिकर्तृत्वमु-
क्त्वानंदमयत्वं रसरूपत्वमप्युक्त्वा भीषास्माद्वात इत्यादिना सर्वनियामकत्वं चोक्त्वा भगवानेव पूर्णानंद इति ज्ञात्वा यानंदगणनां कृत्वाऽनंदमयं [illegible] पुरुषोत्तमं प्राप्तेनानुभूयमानानंद-
स्वरूपं यतो वाचो निवर्तंते अप्राप्य मनसा सहेत्यादिनोक्त्वा तद्विदो माहात्म्यमुच्यते। एतं ह वाव न तपति। किमहं साधु नाकरवं किमहं पापमकरवमिति। अत्र ज्ञानवाक्ये स्वरूपं। देशका-
ग लापरिच्छिन्नं सर्वकर्तारं निरवद्यानंदात्मकं सर्वनियामकं मनोवागगोचरं पुरुषोत्तमं प्राप्नोति। कर्मठ स्वयं क्लेशात्मकं तदांशस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः
हुइतरानंदजनकस्वर्गपश्वादिफलमाप्नोति। विहितनिषिद्धकर्मणोश्चाप्रयोजकत्वं तस्मिन्नुच्यत इति कर्मणः सकाशाज्ज्ञानस्य निरवधिरेव विशेष उच्यत इति न धर्मासिद्धिर्वा कर्मशेषत्वं
ज्ञानस्य सिध्यति। तथाप्याख्यानप्रतिपादितविद्यानामसिद्धिरेवेति चेत्तत्राह॥ ॥तथा चैकवाक्यतोपबंधात्॥ ॥यथा केवलश्रुतेर्विद्याप्राधान्यं तथैवोपाख्यानश्रुती[illegible]नामित्यर्थः।
चकारेण प्रश्नोत्तरैर्निर्णीतार्थप्रतिपादनं। महतामेवात्र प्रवृत्तिः सापि बक्कायामहर्विकेति विद्यामाहात्म्यज्ञापनं प्ररोचनं चाधिकमुपाख्यानानामुपाख्यानं विनैव विद्यानिरूपिकायाः
श्रुतेः सकाशादित्युच्यते। तत्र हेतुरेकवाक्यतोपबंधादिति। आचार्यवान्पुरुषो वेदेति श्रुत्यैकवाक्यता ज्ञानमाख्यानं विना न भवतीति तदर्थमुपबंधाद्गुरुशिष्यकयोपसंबंधादित्यर्थः॥
अथ वोपाख्यान[illegible]रइतार्थाः श्रुतौ यथा ज्ञानं निरूप्यते इति चानाख्यानश्रुत्यैकवाक्यतयैवाख्याने ज्ञानस्वरूपोपबंधात्प्रतिपादनादित्यर्थः। नैकद्यवः। चेन्नोपपद्येत व

तेन तथैवाधीहि भगवद्वति होपससाद सनत्कुमारं नारदः इत्याद्याख्यानेष्वपि निरूप्य

ने

पु॰२ स्कमतीयानत्र पुरुत्र छि[illegible]ष्यकथानत्सामीप्यमत्रोच्यते। अन्यथा सामीप्यासंभवादतः कल्पितत्वशंकानिरासः। न चैवमपि पारिप्लवार्थत्वेन बाधकं पश्याम इति चेत्‌ उच्यते॥ अथ

५७ मेध प्रकरणे मनुर्वैवस्वतो राजेत्यादिनाख्यानानि यच पठितानि तत्र सामान्यतस्तेषां विनियोगः। सर्वाण्याख्यानानि पारिप्लवे शंसतीत्यनेनोक्त इति सर्वशब्दस्तदाख्यानपर एव न त्वाख्यानांत

रपरोपि प्रकरणस्य नियामकत्वात्‌। एवं सति यदा पारिप्लवाख्यकर्मप्रस्तावस्तदा विशेषविनियोग उक्तः पारिप्लवमाचक्षीतेति। तत्र प्रथमेहनि मनुर्वैवस्वतो राजेति द्वितीयेहनि यमो वैवस्वत इति तृती

येहनि यमो वैवस्वतो राजेत्याद्याख्यानविशेषाद्वाक्यशेषे विनियु[illegible]ज्यंते। आख्यानसामान्यपरत्वे त्वहो विशेषरूपाख्यानविशेषविधानं न स्यात्‌। अत एव पारिप्लवमित्येकवचनमतो नाख्यानांत

रगंधसंबंधोपि। अप्रकाशनावान्‌। अत एवाग्नीध्रनाद्यनपेक्षा। एवं पुरुषार्थो निःश्रेयसादिरूपकस्य ज्ञानस्य फलसाधने कर्मानपेक्षत्वमुपपाद्य तत्रैवोपपत्त्यंतरमाह। यतो ज्ञानी स्वयमेव ज्ञानेन य

ज्ञात्मको जातो न एव जरामर्याग्निहोत्रेऽग्निसमिंधनं समिदादितदारण्यआन्यादयस्तेषामनपेक्षोक्ता श्रुतौ। तैत्तिरीयके पठ्यते तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो

वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपो ग्निरित्यादि। एतेन यदन्यस्य यज्ञता संपादकं तस्य स्वकार्यसाधने कथं यज्ञापेक्षा न वेदिति भावः सूच्यते॥ ॥सर्वापेक्षा च

यज्ञादिश्रुतेरश्ववत्‌। उक्तन्यायेन ज्ञानं प्रति कर्मणः फलोपकारित्वाभावे स्वरूपोपकारित्वमस्ति न वेति चिंत्यते। तत्र नेति पूर्वः पक्षः गुरूपसत्तितदुपदेशैरेव ज्ञानसंभवादाचार्यवान्पुरुषो वेदेति श्रु

तेरत्र सिद्धांतमाह। सर्वापेक्षेति। सर्वेषां कर्मज्ञानभक्तीनां पुरुषोत्तमज्ञानोत्पत्त्यावश्यपेक्षा। अत्र प्रमाणमाह। यज्ञादिश्रुतेरिति। यज्ञादिनिरूपिका श्रुतिरेव प्रमाणं यत इत्यर्थः। इदमत्राकूतं। पुरु

षोत्तम एव स्वतंत्रपुरुषार्थरूपस्तत्प्राप्तिरेव फलं तत्र प्रेमभक्तिजं तज्ज्ञानमेव साधनमिति ब्रह्मविदाप्नोति परमित्यादिना येतद्विदुरमृतास्ते भवंतीत्यादिश्रुतिसहस्रेभ्यः प्रतिपाद्यते। अथ येन रेणुः स्वमेवोप

कं

यंतीति श्रुत्याज्ञानरहितानां दुःखमात्रप्राप्तिरुच्यते। एवं सति स्वतोऽपुरुषार्थरूपं यज्ञादिं सर्वार्थित्वप्रतिपादिका श्रुतिर्यन्निरूपयति तत्सर्वथा पुरुषार्थसाधनत्वेनैवेति मंतव्यं तच्च निष्कामतयैव
कृतं तथा। अत एव वाजसनेयिशाखायां यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवतीत्युपक्रम्य पठ्यते। तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण इति नु कामयमा
थाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो भवति न तस्मात्प्राणा उत्क्रामंत्यत्रैव समवनीयंते ब्रह्मैव सन्ब्रह्माप्येतीत्यादि॥ अत्र यथाकामयमानः कर्म निरूप्यत इति शेषः। य
पुमान्कर्मकृतावकामस्ततो निष्कामः स आत्मकामो निरुपधिस्नेहवानुप्रेम्णैनतो भगवत्प्राप्त्या आप्तकामो भवतीत्यर्थः। अत्र यथाकारीत्यादिना कर्मकर्तुरेवोपक्रमाद्यथाकामयमान इत्यनेन
पि तथाभूतः स एवोच्यते। एवं सति सत्कर्माणि प्रवृत्त्यर्थं विविधफलानि स्वयमेवोक्त्वा जनौमितवानिति स्वोक्तकरणाच्चिरेण हृदयानिष्कामं करोति। सकामतयापि क्रियमाणेन वैदिककर्मणानेक
जन्मभिः संस्कारविशेषप्रचयेनापि तथा। कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तत इत्यादिस्मृतिभ्यश्च ज्ञानोत्पत्तौ कर्मापेक्षास्तीति। चकारेणतुष्टावंगीकृतस्य सर्वानपेक्षेति सा समुच्चीयते। अ
त एव नायमात्मेत्यादिश्रुतिर्न विरुध्यते। ननु ज्ञानद्वारा कर्मादीनामेव फलसाधकत्वमस्त्विति शंकानिरासाय दृष्टांतमाहाश्ववदिति। यथाश्वेष्टफलसाधकदेशाद्यवधानात्मकदेशातिक्रमेऽश्वस्य
साधनत्वं न तु तत्र फलसिद्धावपि तथाधिभौतिकाध्यात्मिकाधिदैविकप्रतिबंधनिवृत्तावेव तेषां साधनत्वं न तु भगवत्प्राप्तावपीत्यर्थः। इदं च मुमुक्षुभक्तविषयकमिति ज्ञेयं। आत्यंतिकभक्तिमतां त
कीनरानपेक्षणात्। ॥शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात्। ननु तस्मादेवंविद्वांतो दांत इत्यादिना शमादेरेव ज्ञानसाधनत्वमुच्यते न तु यज्ञादेरिति चेन्नाह। शमद
माद्युपेतो भक्तिमार्गेऽपि स्यादेव यद्यपि तथापि तदंगतयात्मन्येवात्मानं पश्येदिति ज्ञानमार्गीयज्ञानांगतयैव शमादिविधेर्हेतोर्ज्ञानमार्गे तेषामवश्यानुष्ठेयत्वान्न तथा विधिरित्यर्थः। भक्तिमार्गे त्वित

श्रा

श्रु०२ एवं शमादीनां संभवेप्यावश्यकत्वं न तेषामिति निराकृ। सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्। ननु सत्वशोधकत्वेन यत्शमदमादेर्विधानमिति मतं तन्नोपपद्यते। आहारशुद्धौ सत्वशुद्धिरिति
४७ श्रुतेस्तद्विरुद्धा सर्वान्नभक्षणानुमतिरपि यतः श्रूयते छंदोगानां। न ह वा एवंविदि किंचनानन्नं भवति न घा वाजसनेयिनां न ह वा अस्यानन्नं जग्धं भवतीत्यादि। तस्मात्सत्वशुद्ध्यर्थं शमादेर्वि
धानमिति प्राप्ते विषयव्यवस्थामाह। आहारदोषेल्पेन प्राणात्यय उपस्थिते प्राणधारणस्य ज्ञानांतरंगतमसाधनत्वेनाहारस्य देहपोषकत्वेन ततो बहिरंगत्वात्तदनुमतिः क्रियत इत्यर्थः॥
अत्र प्रमाणमाह। तद्दर्शनादिति। चाक्रायणः किलर्षिरापद्गत इभ्येन सामिखादितान्कुल्माषांश्च खादेत्यादि श्रुतिदर्शनादित्यर्थः। यद्यपि ज्ञानसाधनत्वेन सत्वशुद्धेरपेक्षितत्वाज्ज्ञानेनानेत
त्साधनानपेक्षणादेवं विधीति वचनानाद्दृशो सार्वदिक्यतितदनुमतिर्नानुचिताऽपि स्मर्यत इत्यनेनाविदुषोप्यनुमतेर्वक्ष्यमाणत्वाच्च। न घाप्याचार्येणाव्यवस्था। विशेषविषयकत्वमुक्तं यतो
न ज्ञानिनोप्यनापदि विहितत्यागोऽविहितकरणं च चित्तमालिन्यजननेन ज्ञाननिरोधायकमिति श्रुत्यभिमतमिति ज्ञाप्यते। अत एव श्रीभागवते द्वितीयस्कंधे विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यग
वस्थितं। सत्यं पूर्णमनाद्यंतं निर्गुणं नित्यमद्वयं। ऋषे विदंति मुनयः प्रशांतात्मेंद्रियाशयाः। यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतमिति ब्रह्मणोक्तं। ज्ञानिनामपि चेतांसि देवी भगवती हि स
बलादाकृष्य मोहाय महामाया प्रयच्छतीति मार्कंडेयेनाप्युक्तं। एषा ज्ञानमार्गीयज्ञानवतो व्यवस्थेति ज्ञेयं। न भक्तिमार्गीयस्यैवमाह भगवान्। अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते। तेषां नि
त्याभियुक्तानां योगक्षेमं वहाम्यहमिति भगवद्वाक्यात्। मामेव ये प्रपद्यंते मायामेतां तरंति त इत्यत्रैवकारेण पुरुषोत्तमज्ञानवत एव मायातरणोक्तेरक्षरमात्रज्ञानवतां तथात्वमनुचितं॥ ॥अ
बाधाच्च॥ ॥आर्थे दितियान्नभक्षणेन ज्ञाने चित्ताशुद्ध्यसंभवेन तत्कृतिप्रतिबंधाभावाच्च न दोष इत्यर्थः॥ ॥अपि स्मर्यते॥ ॥आपद्यविदुषोपि दुष्टान्नभक्षणे पापाभावो यत्र स्मर्यते नेनत्र

५१

विदुषि कृत्यनुमतेकाकुग्रांत्यर्थः। स्मृतिश्चाजीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः। लिप्यते न स पापेन पद्मपत्रमिवांभसेति। अथवा विदुषोष्टकर्मसंबंधो। ज्ञानाग्निः सर्वकर्माणि भस्म
सात्कुरुते तथेति स्मर्यतेपीत्यर्थः॥ ॥शब्दश्चातोकामकारे॥ ॥यतो ज्ञानाग्निरेव सर्वकर्मदहनसमर्थ इति। फलदशायां कामकारेपि न दोषो न एवं साधनदशायां तदभावेन तस्मा
द्विशांतो दांत उपरतस्तितिक्षुरित्यादिरूपः शब्दः कामकारनिवर्तकः श्रूयत इत्यर्थः। एवं ज्ञानस्य कर्मनाशकत्वे सिद्धे ज्ञातज्ञानस्याश्रमकर्मकर्तव्यत्वं न वेति चिंत्यते। तत्र फलस्य ज्ञातत्व
तस्यापि नाशत्वेनाप्रयोजकत्वान्न कर्तव्यमिति पूर्वः पक्षस्तत्र सिद्धांतमाह॥ ॥विहितत्वाच्चाश्रमकर्मापि। यथा ज्ञानिनाप्यनापदि शिष्टानामेवान्नं भक्षणीयं विहितत्वात्तथाश्र
मापि कर्तव्यमेव नित्यं विहितत्वादित्यर्थः। यथानापदि शिष्टान्नभक्षणं दोषाय निषिद्धत्वादेतच्चोपपादितं सर्वान्नानुमतिरित्यत्र तथा नित्यत्यागोपि प्रत्यवायजनक इति तत्कर्तव्यमेवेति भावः। य
क्तं त्वतस्यापि नाशत्वेनाप्रयोजकत्वान्न कर्तव्यमिति तत्राह॥ ॥सहकारित्वेन च॥ ॥शमदमादीनामंतरंगसाधनानां सहकारीण्याश्रमकर्माणीत्येन इहितैः शमादिभिरपि ज्ञानं न। स्थिरीकर्तुं शक्य
मिति तानि कर्तव्यान्येवेत्यर्थः। संसारवासनाजनकत्वस्याभावो यः कर्मणां स ज्ञानेन नात्रपत इति न सहकारित्वेनुपपत्तिः काचिदिति भावः। एवं ज्ञानमार्गीय ज्ञानस्थैर्यसाधनमुक्त्वा भक्तिम
गम्यसाधनानां भगवच्छ्रवणादीनामितरेभ्य आधिक्यमावश्यकतां चाह॥ ॥सर्वथापि त एवोभयलिंगात्॥ ॥भगवच्छ्रवणकीर्तनादयः साधनांतरवद्विहितत्वेन कर्तव्या एव यद्यपि योते
सर्वथापि अन्येषां [illegible]गापडुपस्थितो न तदनुरोधमकृत्वापि त एव भगवद्धर्मा एव कर्तव्या इत्यर्थः॥ कुतः। श्रुतिलिंगात्स्मृतिलिंगाच्च। श्रुतिलिंगं तु तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्या
याद्बहूञ्छब्दान्वाचो विग्लापनं हि तदिति। तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथामृतस्यैष सेतुरित्यपि। अत्रैवकारेण भगवदतिरिक्तं प्रतिषिध्य तद्विषयकज्ञानानुकूलं प्रयत्नं श्रवणात्मकं

पु

५× सर्वपाप्मानं तरति नैनं पाप्मा तरति

अ४-३ विज्ञायेति विधाय स्मरणमपि तन्मात्रविषयकमेव प्रज्ञां कुर्वीतेति वचनेन विधाय तदेकनिष्ठताहेतुभूतानामेव शास्त्राणामावर्त्तनमर्थानुसंधानमपि कर्त्तव्यं नान्येषामिति नानुध्याया
४९ द्बहूनित्यनेनोक्तवती। अत्रापि तत्प्रसंगेण ध्यानस्य पश्चाज्ज्ञावित्वमुच्यते तेन योग्यतया श्रवणकीर्त्तने एव तत्पूर्वभाविनी प्राप्येते। स्मृतिश्च शृण्वंति गायंति गृणंत्यभीक्ष्णशः
स्मरंति नंदंति तवेहितं जनाः। त एव पश्यंत्यचिरेण तावकं भवप्रवाहोपरमं पदांबुजमिति।। महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं। सततं
कीर्त्तयंतो मां यतंतश्च दृढव्रताः। नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते इति। एतेन भगवद्धर्माणामात्मधर्मत्वेनांतरंगत्वादाश्रमकर्मणो देहधर्मणो देहधर्मत्वेन बहिरंगत्वात्तद्विरोधे
नैव तत्कर्त्तव्यमिति स्थितं। अत एव भगवद्धर्मान्यधर्मं प्रतिषिध्य तेषां सर्वेभ्यश्चाधिक्यं ज्ञापयितुं स वा अयमात्मा सर्वस्य वशीत्यादिना भगवन्माहात्म्यमुक्तं।। ।।अत्र भिन्नवंचद्दर्शयति।।
प्राधान्येन भगवद्धर्मा एव कर्त्तव्या इत्यत्रोपोद्बलकांतरमनेनोच्यते। सर्वपाप्मानं तरति नैनं पाप्मा तरति सर्वपाप्मानं तपति नैनं पाप्मा तपतीत्यादिना भगवद्धर्मानुरोधेनाश्रमकर्माकरणज
षेरन भिन्नवंच श्रुतिर्दर्शयत्यतो भगवद्धर्मा एव सर्वेभ्य उत्तमानि साधनानीत्यर्थः।। ।।अंतरा चापि तु तद्दृष्टेः।। ।।भगवद्धर्मेभ्य आश्रमधर्मा हीना इत्यप्यल्पमुच्यते। अपि तु तस्मिन्नु
त्तमे धर्मिणि एव दृष्टिस्तात्पर्यं यस्य पुंसस्तस्याश्रमधर्मा अंतरा च फलसिद्धौ व्यवधानरूपास्तेति श्रुतिर्दर्शयतीति पूर्वेण संबंधः। अंतराशब्दोऽत्राव्ययात्मको व्यवधानवाचकस्तथा च श्रुतिः
तद्ध स्म वै तत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयंते। किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति ऋणापाकरणहेतुत्वेन लौकिकोत्कर्षहेतुत्वेनापि प्रजाया अनीप्सत्वेऽपि
त्पादनव्यासंगेन भगवदानंदानुभवेंतरायो भविष्यतीति तद्दृष्टांतश्चोपेक्षां दर्शयति।। ।।अपि स्मर्यते।। ।।अपिशब्देनाश्रमधर्माणां तथात्वं किमु वाच्यं यतो ज्ञानसाधनवैराग्यादीनामप्य

नराकृतत्वं स्मर्यते तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह इति भगवद्वाक्यं॥ ॥विशेषानुग्रहश्च॥ ॥स्मर्यत इति पूर्वेण संबंधः ज्ञानादेः सकाशा
द्भक्तिमार्गे फलतोप्युत्कर्षमाह। ज्ञानादिसाधनवत्त्वनुग्रहो मुक्तिपर्यंत एव भक्तिमार्गे त्वहं भक्तपराधीनो ह्यस्वतंत्र इव द्विजेत्यादिवाक्ये विशेषरूपो मुक्त्यादिभ्योपि भक्तानां व्यावर्त्तको भगवदनु
ग्रहः स्मर्यत इत्यर्थः। गूढाभिसंधिमुद्घाटयन्फलितमर्थमाह॥ ॥अतस्त्वितरज्यायो लिंगाच्च॥ ॥अत इति पूर्वोक्तश्रुतिस्मृतिपरामर्शः। तथा चेतरस्या मुक्तेरपि भक्तिमार्गीयतदीयत्वमेव ज्या
यस्त्वर्थः। अत्र हेत्वंतरमाह लिंगाच्चेति॥ मुक्तानां तु मायाविनिर्मुक्तमात्मस्वरूपमेव न तु देहेंद्रियादिकमप्यस्ति येन तज्जनानंदानुभवः स्यात्। भक्तानां तु देहेंद्रियादिकमप्यस्ति। येन तज्जनान
नुभवः स्यात्। भक्तानां तु देहेंद्रियादिकमपि मायातत्कार्यरहितं चेनानंदरूपत्वेन च भगवदुपयोगतोपि तत्रयेत्यर्थः। न हि मुक्तात्मनां कश्चन भगवदुपयोगोस्तीति भावः। उक्तं श्रीभागवते
॥न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिता इत्यादि मुक्तोपसृप्यत्वं चोच्यते। अत एव सप्तमस्कंधे॥ देहेंद्रियासुहीनानां वैकुंठपुरवासिनामित्युक्तं॥ पुरवासित्वे देहादेरावर
णकत्वान्निषेधोऽज्ञात्मकानामेवेत्यवगम्यते। इतरत्ज्याय इति पाठे तु पूर्वोक्ताश्रमकर्मपरामर्शोऽपि इत्यनेनउक्तयोरेव वा। एतेन सोश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति श्रुत्युक्तफलवत्वं
तस्य सूच्यते॥ःं॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः॥ अथेदं विचार्यते॥ ॥तदीयानामपि कदाचित्सायुज्यमस्ति न वेति। तत्र भक्तिमार्गस्यापि साधनरूपत्वात्तस्य च र
मुक्तावेव पर्यवसानात्तदीयत्वस्य साधनावस्थायां मुक्त्यवस्थारूपत्वात्तेषामपि मुक्तिरावश्यकी। तथा च फलतो न कश्चिद्विशेष इति प्राप्त उच्यते॥ तद्भूतस्येत्यादि॥ ॥तुशब्देन मर्यादामा
र्गीयव्यवच्छेदः। अत्र विश्वासदार्ढ्याय हान्यस्य का वार्त्ता कर्ममात्रनिरूपकस्य जैमिनेरपि यदि कदाचिद्भगवत्कृपयाऽयं भावो भवेत्तदा तद्भूतस्य। पुष्टिमार्गीयभगवद्भावं प्राप्तस्य तस्यापि

२ नानज्ञावत्त्वाभावनिरोधान्न कदाचिदपीत्यर्थः। अत्र हेमाह नियमादीत्। तैत्तिरीयकैंतेने धामान्युश्मसीति मंत्रे। यत्र भूरिशृंगा अयासस्तदुरुगायस्य परमं पदमित्यस्मात्तदनंतरं तत्र
कृतानि कर्माण्यपि विष्णोः कर्माणि पश्यतेति मंत्रेण निरूप्य पुनः पूर्वोक्तजीलावस्थानं तद्विष्णोः परमं पदमिति पदेनानूद्यतस्य नित्यत्वनिरूपणायोच्यते। सदा पश्यंति सूरय इति
। सूरयो विद्वांसः पुरुषोत्तमज्ञानवंत इति यावत्। तच्च भक्त्यैवेति सूरिपदेन भक्ता उच्यते। तथा च भक्तानां सावदिकुदर्शनं नियम्यते सदेति पदेन। एवं सति पुष्टिमार्गीयभगवद्भावेशापन्नस्य
मुक्तावुच्यमानायां तन्नियमो भज्येतेत्यर्थः। यच्चोक्तं साधनावस्थायामुत्तमावस्थारूपत्वं परं तदीयत्वस्य फलं मुक्तिरेतिवेत्तत्राह। तद्रूपे ति। उक्तभगवदीयत्वं न साधनरूपमपि तु मुक्तेरपि फ
लरूपं मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशांतात्मेति वाक्यात्। यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति श्रुत्याऽमुक्त
स्य मुक्तस्य ब्रह्मस्वरूपभोग उच्यते सच्चयमेवैष वृणुत इति श्रुतेर्भगवदीयत्वसाध्य एवेति स्पष्टं फलत्वमस्यातोऽतद्रूपत्वं। किंच। फलं हि साधनादुत्तमं भवति। भगवदीयत्वादुत्तमस्याप
स्याभावादपि न मुक्तिर्वक्तुमुचिता। तदुक्तं श्रीभागवते पंचमस्कंधे सूर्वेन भक्तिस्वरूपं निरूप्य। तयैव परया। निवृत्या ह्यपवर्गमात्यंतिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियं
भगवदीयत्वेनैव परिसमाप्तसर्वार्था इति॥ ॥न चाधिकारिकमपि पतनानुमानात्तदयोगात्॥ अथेदं विचार्यते॥ ध्रुवायेव ब्रह्मादिलोकाधिकारं दत्वा तत्संबंधिफलं ददाति न वेति
चनेत्याह। न चेति। तत्र हेतुः पतनानुमानादिति। आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनेति स्मृतेरित्यर्थः। फलस्य सावधित्वादिति भावः। किंच। तादृशो भगवदीये पतनायोगादपि नैत
या। अथवा। तादृशस्य सदा भक्तिरसानुभवात्तदतिरिक्तस्यानपेक्षणादन्येषां फलानां संबंधाभावादित्यर्थः। उपहूवमपि त्वेके भावमशनवत्तदुक्तं। । एकेभक्ता आधिकारिकेफल ५

३× साक्षाद्भगवत्स्वरूपभोगवदेवमन्यंते। नतुक्तं श्रीभागवतेनत्र ःअत्र [illegible] हधावे
१× पक्षस्यकंठेद्दायमद्धात्तीयातयामानीनबंधाययद्यहामताइतिवाक्याद्द्वराय बंधकत्वेनत्याज्यइति×५

लेपतनमात्रेणनहेयत्वप्रयोजकमितिनिवदंत्यपिरूपपूर्वंपतनममेवेतदितिवदंतीतिभक्तिभावाच्युतेः। अधिकारस्यसमाप्तौभगवदनुग्रहाज्ञापिकदाचित्कंभवतीतितत्पतनंनतत्त्यामुक्तोत्व
पुनरावृत्तेर्भक्तिरस्याज्ञापिनेतिमहापतनमेवसेतिभावः। तेननिषिद्धकर्मफलतुल्यत्वंज्ञापितंभवति। अतएवश्रीभागवतेनारायणपराःसर्वेनकुतश्चनबिभ्यति। स्वर्गापवर्गनरके
ष्वपितुल्यार्थदर्शिनइतिगीयते। नभक्तिमार्गेतुसासाक्षात्संगाभावेपितदीयंभावमात्रमप्यज्ञानवतंवेत्यादिना। साक्षाद्भगवद्भोगीजीवस्यासंभावितइतिशंकानिरासायाह॥ ।
नदुक्तमिति॥ ॥सोश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चितेति। अत्रब्रह्मसममश्नुतइत्यादिश्रुतिषुसाक्षाद्ब्रह्मस्वरूपरसानुभवमुक्तमित्यर्थः॥ ॥बहिस्तूभयथापिस्मृतेराचाराच्च॥
अपेदंचिंत्यते॥ प्रचुरभगवद्भावमात्रवतःसाक्षात्स्वरूपभोगवतोवागृहत्यागःकर्तव्योनवेति। फलस्यसिद्धत्वान्नेतिपूर्वपक्षव्यवछेदायचतत्राह। भावमात्रेसात्म्येतुसंबंधेवोभयथापिगृहाद्बहि
र्गमनंगृहत्यागइतियावत्। सभावरूपकः। तत्रप्रमाणमाह। स्मृतेरित्यादि। त्वंतुसर्वंपरित्यज्यस्नेहंस्वजनबंधुषु। मय्यावेश्यमनःसम्यक्समदृग्विचरस्वगामित्यादिस्मृतिर्भगवद्भावतस्तत्सं।
गविशिष्टस्यापिबहिर्गमनमाह। तदाचारोपितथैवश्रूयते। तस्तथा। अत्रायमाशयः। आश्रमधर्मत्वेनगृहत्यागोयदहरेवेत्यादिश्रुतिभ्यःपूर्वमुपपादितोपियदधुनापुनरुच्यतेतेनेनतद
तिरिक्तोयमितिज्ञायते। तथाचोक्तवाक्यान्मुमुक्षुमुक्तिप्रतिबंधकत्वाभावेपितत्त्यागस्याविहितत्वशंकाभावायेयमुक्तिरिति॥ ॥स्वामिनःफलश्रुतेरित्यात्रेयः॥ ॥पुष्टिमार्गीयभक्तस्य
विहितत्वादिज्ञानमप्रयोजकंतत्रहेतुःतस्यभक्तिमार्गस्वामिनःश्रीगोकुलेशात्वेदेफलस्यश्रुतेरतोबहिर्गमनंसाधनत्वेनापिचकार्यमितिभावः। अत्रयमेवैषवृणुतइतिश्रुतिस्तुसंदेहा
एतदनुपदमेवोपपद्यते। नायमात्माबलहीनेनलभ्यइति। अत्रभगवद्वरणानंतरमपिजीवबलंकतमंयदपेक्षाभगवद्दानइति। जिज्ञासायांसर्वात्मभावएवबलमितिनिर्णीयते। तस्ये
व्यासंगस्यतत्रावश्यावश्यकत्वादुभयोरप्यनवरतंप्रभुरसास्वादेप्रतिबंधकत्वेनतस्यतत्त्यागस्यविप्रयोग वै१ रसानुभावकत्वेनचसकर्तव्यः। यद्यपिस्वेष्टांतरायत्वेनस्वतएवत वै१ त्यागोभावीनथाप्याश्रमादाश्रमं
गच्छेदितिवाक्यादत्रांतरत्वाभावे ×३

स्तु॰३ वमर्यादावज्ञोपमर्द्दकत्वाद्भगवद्दत्तीकारहेतुत्वाच्च व्रजसीमंतिनीनां प्रभुवचनातिक्रममपि कृत्वा स्वरूपपरित्यागस्य छलेनैव यतनइत्यात्तेय आचार्योमिनुते ॥ इदमत्राभिप्रेतं । सर्वा
५१ त्मनावस्य यद्बलं तत्तदात्मकस्य प्रभोरेव तस्य चायं स्वभावो यदन्यत्र रोचते ऽत एव व्रजपरिवृढवदने ऽनुवचनकिरणप्रचारप्रोल्लसत्केवलनिभावांभोधिवचनवीचयो गीयंते । यर्ह्यंबुजा
क्षतव पादतलमस्प्राक्ष्मतत्प्रभृति नान्यसमक्षं स्थातुं पारयाम इत्यादयः । अत स्त्यागस्य कष्टत्वलग्न इव वा याती तिननदर्थ्ययतनीयमिति । विस्तरवतारत्वेन पुरुषोत्तमभावस्वरूपं ज्ञेय
मिति नया ॥ ॥ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ ॥ सर्वत्यागपूर्वकं यद्धरिः प्रभुसमीपगमनं भक्तस्य तदार्त्विज्यमृत्विक्कर्मैवेऽत्यौडुलोमिराचार्यो मन्यते तस्मा यमभिसं
धिः यजमानो हि स्वेष्टसिध्यर्थमृत्विज आदौ वृणुते प्रकृते च यमेवैष वृणुत इति श्रुतेस्तस्मादेकाकीनरमतइतिश्रुतेश्च स्वक्रीडार्थं भगवान् स्वचिकीर्षितलीलानुरूपान्जीवान्वृणु
ते यतः स्वविराचेत्रिविकल्पादेकरूपाणां यथा सोमादिषु वरणं तथा सर्वात्मभाववत्त्वेनैकरूपाणामेवात्र वरणं ॥ तत्र यथा स्वीयदंगमात्रं करणं तेषां तथेतरसंबंधनिवर्त्तनपूर्वकं
तद्योग्यसमर्पकत्वमत्र । तदुक्तं भगवता । यदा पुमांस्त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मइति च च पूर्वपदेनेतरसंबंधनिवर्त्तनोक्त्या सर्वात्मभाव उक्तो भवति । तदनंतरमा
त्मनिवेदने सति तद्विषयकलीलाकरणेच्छाविषयः स भवति । अंतरंगलीलाप्रवेशनमिच्छायां विशेषस्तस्मात्पुरुषोत्तमार्त्विज्यमिति एतेन नर ज्ञानिनपचतीत्यादिश्रुतेर्यथा सोमादौर
त्विजस्तद्यागेतरधर्मनिवृत्तिः । स एव परमो धर्मो यत्तस्य था पुरुषोत्तमस्योक्तं भक्तैः सह रमणमेव साध्वादिकमेतद्देववमस्मद्रत्वमिति निरूपितं भवति । प्रकृते भक्तानामृत्विक्त्वेन निरूप
णो हेतुत्वेन तात्पर्यंनिरमप्पार । तस्मै यजमानारब्धकर्मसांगत्वाय ऋत्विक्परिक्रियते वरणेन स्वकार्यमात्रोपयोगित्वाय स्वीयः क्रियते । तथा प्रकृतेपि । न च कश्चित्कल्प्य एषो दक्षिणा इति ५

श्रमवचनात्तदर्थैव तत्प्रवृत्तिरत्र तु स्वतः पुरुषार्थत्वेन भगवदपाश्रितवृत्तिरतो वैषम्यमिति वाच्यं । नीरागस्यापि वरणसमयेन तत्प्रसन्नस्यावश्यकत्वात्तथैव दक्षिणादानमप्यन्यथा निरं-
गत्वापत्तेः । प्रकृतेपि भक्तानां स्नेहादेव प्रवृत्तिर्भगवानस्यानुभवार्थमेव ज्ञानानुभावयतीति न वैषम्यं । कृतेश्च । अपवर्गोपनिषत्सूपपद्यते । भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्मि-
न्मनःकल्पनमेतदेव नैष्कर्म्यमिति । न किमार्गप्रचारैकहृदयो बादरायणः । मानेनागवतं तत्रतेनैवं हेयमुत्तमैः ॥ ॥ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् । ननु यमेवैतिश्रुतिः सा-
धनान्तरनिषेधपूर्वकं वरणस्यैव साधनत्वमाह । तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतिः साधनान्तरमप्याह । एवं विरोधे श्रुतीनामविशेष-
त्किमादरणीयं किंनेति संशये साधनान्तरविधिरेवादरणीयोऽन्यथा शास्त्रवैयर्थ्यं स्यादिति प्राप्त उच्यते । सहकार्यन्तरविधिरिति ॥ ॥ मर्यादापुष्टिभेदेन वरणं द्विधोच्यते । तत्र सहकार्यन्तर-
विधिस्तु मर्यादापक्षेणोच्यते । पुष्टौ तु नान्यापेक्षेति न विरोधगन्धोपि । अपरं च ॥ साधनं हि कायिकं वाचनिकं मानसिकं च विधीयते । तत्र मननस्यैव प्राधान्यमिति श्रुतेस्तृतीयं मुख्यं । तदपि तावदेवमा-
नसिकस्यापि विधेयत्वेन कर्तव्यं यावत्क्लेशो न भवति । यत्तु स्वतः स्नेहवतस्तत्कृतं तृतीयं साधनमपि विध्यादिवत् । यथा तद्वतो विधिर्यथावादो वा प्रवृत्तावप्रयोजकस्तस्य स्वत एव संभवात्तथा ।
भगवत्प्राप्त्याविदमित्यर्थः । कैमुतिकन्यायेन द्वयोरप्रयोजकत्वमेतद्वेषणाद्देवायास्यतीति तृतीयमेवोक्तं ॥ ॥ कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ॥ ननु बहिस्सूत्रमयपेत्यादिना भगवदीयस्य ।
गृहत्यागश्चावश्यक इति निरूपितं छान्दोग्ये चाचार्यकुलादित्युपक्रम्य छान्दोग्योपनिषदन्ते आचार्यकुलाद्वेदमधीत्य गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो
धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्याहिंसन्सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते ।

अणु·३ इदं विषयवाक्यं ब्रह्मलोकमभिसंपद्यत इति हरिणोपसंहारः कृतः। वाजसनेयिशाखायां चैतद्धस्मवैतत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयंत इत्युपक्रम्याथ भिक्षाचर्यं चरं-
५२ तीति पठ्यते। एवं सति विकल्पे संन्यस्तोपसंहारस्य मात्सर्यग्राहकत्वाद्धरिणा एवं यथोक्तकर्तुर्ब्रह्मसंपत्तिरिति श्रुतेस्तात्पर्यं त्यागोक्तिस्तु ब्रह्मैतादृशं यदर्थं सर्वं त्यज्यत इति स्तुतिपरेति
प्राप्ते हरिणोपसंहारे हेतुत्वेन तात्पर्यमाह। कृत्स्नेति। त्यागे वास्मिन्न मोरेव भगवति विनियोगेन सर्वेंद्रियाणां हरिणा कृष्णं सर्वैः प्रकारैर्भजनं भवतीति परिजनस्य कृतार्थे भवतीति च भजने
कृत्स्नतानवतिष्ठतीति तेनोपसंहारः कृत इत्यर्थः। अत एवात्मनि सर्वेंद्रियाणि संप्रतिष्ठाप्येत्युच्यते। अत्रात्मपदं भगवत्परमिति तिद्धेयं। कर्ममार्गस्य परिव्यवछेदाय तु ज्ञाहः। अत्रेदमाकूतं॥
न भक्तिमार्गे बिकृविध इति। कपिलदेववाक्यात्केचन भक्ताः स्वशरीरे बेवस्थेहेनन भगवदाकारे विविधोपचारैः सेवां कुर्वंतस्तत्रैव निर्वृत्या मुक्तिमपि तुच्छां मन्यंते। तदुक्तं मधुद्विट्सेवानु-
रक्तमनसामभवोऽपि फल्गुरिति तेन भगवद्भजन एव तत्त्वापि पुष्टिमार्ग एव श्रुतेर्भर इति ज्ञायते। पूर्वोक्तं भगवद्भाववतां तद्वर्यं त्यागं निरूप्य हरिणोपसंहारतात्पर्यं पश्चाद्यन्निरूपितं वा-
स्तेन तादृशानां भावतेन त्यागः कार्यस्तद्धरिणैव भक्तुरं एवोक्तमित्याशतु भजनं कार्यं तेनैव तद्धानमिति व्यासहृदयमिति ज्ञायते। उक्तभावाभावे त्यागधर्मानिर्वाहादिति। केचन भक्ता भाषणा-
लीलादर्शनं विना स्थातुमशक्ताः प्रचुरं भावविवशा आर्या गृहं त्यक्त्वा वनं गच्छंति। अत्र योऽभ्युनोमित्यां तु भगवद्वधामसामयिकं भक्तदश्योक्ता। एते सर्वे फलमार्गीयाः। वाजसनेयक-
स्कसाधनमार्गीया इति नानुपपत्तिः काचित्॥ मौनवद्धितरेषामप्युपदेशात्॥ ॥किंच। संन्यासिनश्चावश्यकार्ये धर्मस्तिनोऽधिकास्ते हरिणाः। सिध्यंतीत्यपि हेतोस्तेनोपसंहारः कृत इत्याह।
नाह। मौनवद्धित्यादि। मौनपदं मननशीलायामादि। त्रिदंडिधर्मोपलक्षकं। यथा वागिंद्रियमात्रदेहमात्रचित्तमात्रनियामकास्ते धर्मा उक्तास्संन्यासिनस्तथैतरेषामपि। इंद्रियनियामकानां धर्मा-

भाव

उक्तानामितरस्त्वपेतरेषामपींद्रियनियामकानां धर्माणामात्मनि सर्वेंद्रियाणि संप्रतिष्ठाप्येति श्रुत्या गृहिण उपदिष्टत्वं तदिति युक्तो गृहिणोपसंहार इत्यर्थः। चैतेन नियमनमात्रम
तु भगवति विनियोगादाधिक्यमिति भावः। वस्तुतस्तु केवलनियमनस्याप्रयोजकत्वात्तत्रापि भगवति विनियोग एव तात्पर्यमिति ज्ञेयं॥ ॥नाविःकुर्वन्नन्वयात्॥ ॥ननु भगव
वैंद्रियविनियोगाद्गृहिणोपसंहार इति न युज्यते शुचौ देशे स्वाध्यायमधीयान इत्यादिकर्ममार्गाश्रयसाधनश्रुतेरित्याशंक्य तत्तात्पर्यमाह नाविःकुर्वन्निति। भगवद्भावस्य परमात्म
नः गुप्त्यैवाभिवृद्धिस्वभावकत्वादाश्रमधर्मैरेव लोके स्वं भगवत्त्वमनाविःकुर्वञ्जनेतेऽप्येतदाज्ञायेन ते धर्मा उक्ताः। गोपने मुख्यं हेतुमाहान्वयादिति। यतो भगवता सममन्वयं संबंधं प्राप्य
हेतो ते। तौस्तया। ल्यब्लोपे पंचमी। एतेन यावदंतःकरणे साक्षात्प्रभोः प्राकट्यं नास्ति तावदेव बहिराविःकरणं भवति। प्राकट्ये तु न तथा संभवतीति ज्ञापितं॥ ॥ऐहिकमप्रस्तुतप्रतिबंधे तद्द
त॥ ॥वैदिककर्मकरणे तात्पर्यमुक्त्वा लौकिकस्यानावश्यकत्वेऽपि तत्समयमाह। प्रस्तुते पुत्रजनने तत्प्रतिबंधासंबंधे एवैहिकं कर्म कार्यं न त्वैहिकं कर्मास्कमावान ततस्समयोक्तिरप्यर्थेत्या
ध्याह। नह्यन्नादिति। आचार्यकुलादित्युपक्रम्याभिपद्यते धार्मिकान्विदधदिति। अतो धार्मिकपुत्रविधानमैहिकं कर्मापेक्ष्यते। ततस्तत्संयोक्तिरावश्यकी अन्यथा स्वकृतावुक्रमस्त्री
प्रस्तुतबाधेऽपि तत्करणे फलप्रतिबंधः स्यादिति भावः॥ ॥एवं मुक्तिफलानियमस्तवस्थावधृतेस्तदवस्थावधृतेः। ननु तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति श्रुतौ मुक्त्यनंतर
संपत्तिः श्रूयते। सा तु पुरुषोत्तममंगेलीलारसानुभवातिरिक्ता वक्तुमशक्या। मुक्तोपसृप्यव्यपदेशात्। मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा कोटिष्वपि
महामुने इति स्मृतेश्च मुक्तेः फलं भक्तिरसानुभव एव। एवं सति उक्तगृहिणस्तत्फलं भवति न वेति संशये निर्णयमाह। एवं भक्तस्योक्तरूपस्य मुक्तस्य मुक्तेर्यत्फलं भक्तिरसानुभवस्तस्या

६

अणु ३

५३

नियमस्तस्माद्भगवदिच्छाधीनत्वात्साधनाप्राप्यत्वात्। अतएव मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगमिति शुकवाक्यं। अत्रोत्तरांगिकं हेतुमाह। तदवस्थेति। न स पुनरावर्त्तत इत्यस्मा
दुक्तामुक्त्यवस्थाया एव सार्वदिकत्वेन निर्द्धारः क्रियते। यद्यप्येवं मुक्तिफलाभावनियम एवायाति न तु तन्नियमस्तथापि तस्य तावदेव चिरमित्यादिप्रमाणैर्न स पुनरावर्त्तत इति
श्रुत्या समं विरोधाभावायोत्तरांगिकी तदवस्था। तत्फलं तु कस्यचित्तदनुग्रहेण उद्बोधप्रवेशाद्भवतीति स्वाभिप्रायं प्रकटीकुर्वन्बादरायणेनानियम इत्युक्तं। एवं सति न स पुन
वर्त्तत इति श्रुतिः प्रपंचे पुनरावृत्तिं निषेधति न तु तत्तीतेऽपीति ज्ञेयं। ममाभिलापनायावृत्तिः। अथवात्मनो तदवस्थावधृने हेतोरस्माकमपि तदवस्थाव[illegible]धृतिर्यतोऽतः फलानियम
नियमनिश्चयोऽपीत्यर्थः। एवं सति मुक्तिपर्यंतं साधनं भगवद्भाव इति निर्णयः संपन्नः॥ ॥इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभा ष्ये तृतीयाध्यायस्य चतुर्थ
पादः समाप्तः॥ ॥समाप्तोऽयं तृतीयोऽध्यायः॥३॥ ॥शुभमस्तु॥ ॥श्रीरस्तु॥ ॥श्री॥ श्रीः ॥छ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

ग्रंथसंख्या २५५०

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

पं.कुशविप.मः प११६

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

रामकृष्णन कार होतँ
अ.च.सं.१३००

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

६४

।।श्रीगोपीजनवल्लभाय नमः।। ।।समन्वयेनाविरोधात्मसाधनैर्ब्रह्मविद्यादितस्यान्तिमव्यवस्थायां सा चतुर्थे विविच्यते जीवतो म्रियमाणस्य गच्छतः सफलस्य च। अतो ब्रह्मवि

कार्यमेवमेवन चान्यथा। तामसीं बुद्धिमाश्रित्य ये मूढाः सर्वविप्लवं। वदंति शास्त्रनाशाय सद्भिः शोच्यास्त्वये तु नात्र। ब्रह्मविज्जमनाभावः ज्ञातं ज्ञेनापि चेद्भवेत्। शास्त्रमेत

या जातं सर्वं स्वत्र विनाशतः। स्वाप्ययस्य च संपत्तेरत्र ब्रह्मस्वगतिश्रुतौ। अन्यथा तत्कृतेरर्थः स्याच्चेष्टामोवदेत्र किं। तामसीं बुद्धिमाश्रित्य या मुक्तिः कैश्चिदुच्यते। सा सुषुप्तिस्कृते

र्यो मोहादेवान्यथामतिः। अतो ब्रह्मविदः कार्यं जीवतः सर्वमुच्यते। आवृत्तिः श्रवणादीनां नवकृत्वोपदेशतः। दर्शनार्थं ततो लिंगादपि ब्रीह्यवघातवत्। आवृत्तोश्रवणादीना

त्मेति स्याद्दृढा मतिः। आपानतो दर्शनं तद्भेदेनापि बोध्यते। प्रतीकोपासनादीनां नैवं भावो हि जायते। आलंबनार्थं तत्रापि ब्रह्मदृष्टिर्विशिष्यते। आदित्यादि ब्रह्मदृष्टेरंगत्वेन स्व

तं तत। मनने च निदिध्यासे विशेषश्चोच्यतेऽधुना। आमनादिषडंगेषु चित्तैश्रोतार्थ एव हि। धारयेदामृतेरेवं ततः सिद्धिमवाप्स्यति। धर्माधर्मनयं तस्य नाश्यैवेति विनिश्चयः।।

अग्निहोत्रादिकं कार्यं संन्यासः फल एव हि। षोढा चेत्सुरुषोव्यक्तः प्रारब्धांते फलं भवेत्। एतावानध्यमे पादे निर्णयः सूत्रकृत्कृतः।। द्वितीये म्रियमाणस्य सर्वेंद्रियलयः पुरा। लिंगस्या

पि शरीरस्य नाड्योत्क्रांतिरिहोच्यते। दिनायनकृतो नास्य विशेषोस्तीति चोच्यते। तृतीये क्रममुक्तौ यो मार्गो यस्य कृते मतः। तत्रिधारोन्यमार्गस्याणामप्राप्यत्वं च वर्ण्यते। गंतव्यं ४च २

परं ब्रह्म कार्ये लोक स्कृते ति च। तुरीये तु हि मर्यादाभेदेन फलमुच्यते। प्रभोरेव फलं तत्र द्वैविध्यं च वर्ण्यते।। लीलानित्यत्वतः सर्वगुणत्वं च तत तो। खिलं अस्य फलप्रकरणत्वे पि साध पा॰१

नरूपस्यापि श्रवणस्यांतरंगत्वं हापयितुं तन्निर्धारमप्याह।। ।।आवृत्तिरसकृदुपदेशात्।। ।।आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यादिवाक्ये विहितं श्र १

णादिकंकिमसकृदेवकर्त्तव्यमुतसकृदितिभवतिसंशयः।किंतावत्प्राप्तंसकृदेवेति।तावतैवशास्त्रार्थस्यसंपत्तेः।नचतंडुलनिष्पत्तिफलकावघातस्येवदर्शनफलकानांश्रवणादी
नंसिद्धिपर्यंतमावृत्तिर्न्याय्याप्राप्नोतीतिवाच्यं।अवघातस्यवितुषीकरणात्मकदृष्टद्वारकत्वेनतथात्वमस्तुनामप्रकृतेत्वदृष्टद्वारकत्वात्सकृत्कृतेनैवादृष्टद्वाराफलसंपादनसंभवादावृ
घयोजकेतिप्राप्तउच्यते।आवृत्तिरेवश्रवणादीनांसूत्रस्याभिमता।कुतः।असकृदुपदेशात्॥ ॥छांदोग्येश्वेतकेतूपाख्यानएतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतोऽइति
त्येनजउज्ञीवयोर्ब्रह्मात्मत्वंनवकृत्वउपदिष्टवान्।तथाचसकृदुपदेशेनैवचेदर्थसिद्धिःस्यात्तदैकमेवार्थमेकस्माएकदैवासकृन्नोपदिशेत्प्रयोजनाभावात्।एतेनावघातवदंतःकरण
निवर्तनंदृष्टद्वारमन्येषामुपदेशानांचरमस्यतस्यज्ञानसाधकत्वमितिमंतव्यं।अत्रैवहेत्वंतरमाह॥ ॥लिंगाच्च॥ ॥श्रुत्यनुमापकत्वेनस्मृतिर्लिंगमित्युच्यते।साचयथा।यथात्मा
रिमृज्यतेसौमत्पुण्यगाथाश्रवणाभिधानैः।तथातथापश्यति तत्त्वसूक्ष्मंचक्षुर्यथैवांजनसंप्रयुक्तमित्यादिरूपात्तदावृत्तिमेवफलसाधनत्वेनाह।अदृष्टेदृष्टांतेनापिदृष्टद्वारकत्वंश्र
दीनांसूच्यते।आत्मावारेद्रष्टव्यइतिपदेनश्रवणादीनांफलात्मकंदर्शनंपूर्वमुक्त्वाश्रोतव्योमंतव्यइत्यादिनातत्साधनानिपश्चाद्यदाहतेनात्मनःपरोक्षमपिज्ञानमवांतरफलरू
तेनक्रिमार्गेपरमफलरूपतत्सजातीयत्वेनचफलमध्यपात्येवेतिश्रुत्यभिमतमितिज्ञायते।तेनसूत्रकृदपिफलप्रकरणेपिसाधनविचारंचकारेतिनिगूढाशयः।तथापिआह्
दार्थक्रमोबलीयानितिन्यायात्द्रष्टव्यइतिपदस्यपश्चात्संबंधेतत्क्ररातिर्निरवसरंप्राप्नोतीतिप्रकृतविचारस्यफलप्रकरणासंगतत्वमापततीतिप्रकारांतरेणसूत्रार्थउच्यते॥ ॥
त्तिरसकृदुपदेशात्॥ ॥श्रुतिरिहकर्मज्ञानभक्तीःसाक्षात्परंपराभेदेनपुरुषार्थसाधनत्वेनहीनमध्यमोत्तमाधिकारिणःप्रतिकर्तव्यत्वेनप्रतिपादयति।तत्रतेषांस्वरूपंरती

न

धे

येचारण्येन श्रुतिप्रतिपादितमथ उत्तरायेऽध्याये तेषां फलं चिंत्यते। तत्रादौ कर्ममार्गस्य फलमुच्यते। ज्ञानकर्मणोरेव क्रमेणोत्र मोक्षस्तु न फलकत्वमत्र स्वसाधनत्वेनैव न कर्तव्यं। न तु स्वातंत्र्येणेति ज्ञापयि
तुमिति। कर्ममार्गस्य वृत्तिः। पुनर्जन्मफलत्वात्तदुपसंहृतं इदं पदं मावृत्योन्नयत्रापि संबध्यते। तथा चात्र प्रमाणापेक्षायां तदाह हेतुत्वेनासकृदुपदेशादिति। कृतौ कर्ममार्गे पुनर्जन्मा
प दित्सूपते यतोन्यथासकृदुपदेशो नैव न त्ववगमेप्यसकृदुपदेशो व्यर्थः स्यादत स्तद्येत्यर्थः। वाजसनेयिशाखायां पठ्यते एवमेवायं शारीर आत्मेभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्या
। प्राणायैवेति। तत्रैव पुनस्तेन प्रद्योतेनैष आत्मा निष्क्रामतीत्युपक्रम्य पठ्यते तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति। तत्रैवैतदनुपदमेव तद्यथा तृणजलायुकेत्युपक्रम्य पठ्यते एवमेवायमा क्र
ष इदं शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं कल्याणतरं रूपं तनुते पित्र्यं वा गान्धर्वं वा ब्राह्मं वा प्राजापत्यं वा दैवं वा मानुषं वान्येभ्यो वा भूतेभ्य इति। तत्रैवाग्रे पठ्यते प्राप्यांतं कर्मणस्तस्य य ..
त्किंचेह करोत्ययं। तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण इति। अत्र हेत्वंतरमाह॥ ॥लिंगाच्च॥ ॥वेदानुमापत्त्वैकेन स्मृतिर्लिंगमित्युच्यते। सा च भगवद्गीतासु त्रैविद्या मामित्युपक्रम्य पठ्यते ए
यीधर्ममनुप्रपन्ना गतागतं कामकामा लभंत इति। आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनेति च। पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति श्रुतिर्वर्तमानजन्मकर्मणोः पूर्वजन्मसंबंधिकर्म
पकत्वं वदतीति कर्मिणः पुनर्जन्मावश्यकमिति ज्ञायते। एवं सति लिंगत्वेन निरूपणादित्यर्थः संपद्यते। निवृत्तिमार्गीयस्यापि तस्य ज्ञानोपकर्तृत्वमात्रं न तु जन्मनिवर्तकत्वं। मानाभावात्। एवं
र्मफलं विचार्य ज्ञानफलं विचारयति॥ ॥आत्मेति तूपगच्छंति ग्राहयंति च॥ ॥पूर्वार्धनिरूपणस्य बलेदायहशाह्नः। ज्ञानिनोपि भगवंतमात्मत्वेनैवोपासते। तस्मात्तेरंतर्येऽनेकजन्मभिस्तथैव तेषां पा-१
वद्भिर्भगवान्स्फुरति। तदा स्वानंदांशस्याप्याविर्भावाद्भगवत्तः स्वात्मत्वेनैव स्फुरितमिति तदानंदात्मकस्तं समनुभवति एवं स्थितं प्रारब्धसमाप्तौ देहापगमे तत्रैव प्रविष्टो भवति। एतादृशः स वेपि २

४४ अथ यथा यथाकारी यथाचारी तथा भवति। साधुकारी साधुर्भवति। पापकारी पापो भवति ४४

१४ शीति परार्थमपि तस्मै भगवता ज्ञानं दत्तमिति प्रवचनमपि तस्य फलतः प्राप्नोतीत्यधि[illegible]का४१

त्र१

म२

कौरिएषु पस्थितेन तथैवोपदिशंति च। एतदेवाहात्मेत्यादि उपसमीपे गमनं। प्रवेश इति यावत्। अथवा। ननु ज्ञानान्न क्रियोरनावृत्तिः फलमतउक्तमेते। ननु कर्मेन्द्रियाणां येन कर्मणः फलमावृत्तिरितिय
न्निरूपितं तद्वेदं। चीयते। न स पुनरावर्त्तन इति श्रुतिः सर्वथा नावृत्तिमाहोत सावधिकीं तामरं ज्ञानेन तन्निवृत्तिमिव। किमत्र युक्तं सावधिकीमेवेति। तथा हि। पूर्वं कर्मनैयत्यस्य त्वयाप्यंगीकार्यत्वा
न्नस्य प्ररोहैकस्वभावत्वान्नस्य इत्यतिक्रमत्वान्न फलानुभवस्यावश्यकत्वात्। अपि च य एते विदुरिति श्रुतेः सति ज्ञाने हि मायतो वाचः अगृह्यो न हि गृह्यत इत्यादिश्रुतिभ्यो ब्रह्मज्ञानासंभवात्। इत
एव भक्तिरपि प्रस्तुकावेद्वि नया ज्ञाना विषये स्नेहासंभवात्। किंच। सर्वस्य वशी सर्वस्येशान इत्यादिश्रुतिभ्यो यस्मात्परा कर्माणि न गायंति स्वस्मदादयः न यं विदंति तत्त्वेनेत्यादिस्मृतिभ्यश्च का
प्रत्याशाजीवस्यातिहीनस्य तत्प्राप्तावतएवोपदेशासंभवोपीति प्राप्ते प्रत्याहात्मेतीत्यादिना उच्चाट्टः पूर्वपक्षनिरासकः। अत्रायमाशयः सत्यमुक्तं भवतात्तत्रोच्यते यथा। गृहत्वातिम इत्वा
दिधर्मी भगवति संति [illegible]तिपामर्वात्मत्वमपि य आत्मनि तिष्ठन्नित्यादिश्रुतिष्वात्मत्वेनैवोक्तेः सर्वधर्माश्रयत्वेपि यदायं धर्मं पुरस्कृत्य लीलां करोति। तत्कार्यमेव तदा संपद्यते। इति कारित्वस्व
भावत्वान्नस्य। एवं सति यस्मिन् रूपे यदात्मत्वेन लीलां करोति तदा स्वप्राप्त्यनुरूपप्रयत्नवंतं विधायात्मानं प्रापयति। न तु कंठ रतिक्रमः कर्मस्वभावश्च। नैष दोषः। न त्वयनं रसपाकायज
समौषधमपि गोरवाय भवति तेन न तन्निवृत्तिर्वा। व्यापादनैकस्वभावमपि विषमाशीविषं तदपगमप्रयुतरनिगमसंगमो नापगमयति वा। तथा भगवदर्पितं तदर्थं च कृतं कर्म न कर्मता ज्ञा
भवतीति न वक्तुं शक्यं कर्म मोक्षाय कर्माणि विधत्ते यागदंयचेति वाक्यात्। अगृह्यत्वं स्वरूपं। इति शाङ्गोदेव यः। तथा च भगवानात्मा न वति सर्वेषां जीवानां मनो हेतो रुकरात्वा तदनुग्रहे
रात्मुपगच्छंति। ज्ञानमार्गेणी कृतास्त्वात्मत्वेनैव ज्ञानादुपसमीप एव गच्छंतु क्रियात्मा कुरात्मकेतत्रैव प्रविष्टा भवंतीत्यर्थः। भक्तिमार्गे गीकृतास्तु साक्षात्प्रकटे पुरुषोत्तमे समिति भजना।

गृह्यत्वविरोधापहारस्तु जीवस्याम प्र्यैश्वरेच्छाभ्यां पुरैव कृत इति नाधिकमत्र[illegible]ं।नि

[illegible] ज्ञानेनोपगमः [illegible]
शेषः [illegible]

४ ✗ मार्गे ऽनुपपत्तिमाह । नप्रतीकेनाभिभूतेन ज्ञानिन उपगमः । प्रत्युक्तं प्रदेशाः संभवतीति शेषः । भक्ति ✗ ४

र्थमुपसमीपं गच्छतीत्यर्थः । एवं स्थितेपि मोक्षक्रियेयमिति ज्ञायते । संप्रदायानुवृत्तिरपि भगवदिङ्गितेनेत्येतादृशाः स्वयं येन मार्गेण फलं प्राप्तास्तं मार्गमन्यानपि प्रापयंत्युद्देशेरओन यत्राप्यात्मत्व
वदेवत्वपाप्मात्मारामस्य सर्वनिरपेक्षस्यैवं करणसंभवेन मोक्षमार्गप्रसिद्धिरेवस्यान्नस्मा [illegible] त्कर्तव्यानुपपत्तिरेवस्याभिमतेति ज्ञेयं । न चात्मत्वेनोक्तिरूपासनार्थेति नोक्तं सा
ऽयज्ञस्यैतदुत्तरं प्रयुक्ति ॥ ॥ न प्रतीके न हि सः ॥ ॥ अतद्रूपेणत्वेनोपासनं हि प्रतीकमित्युच्यते तेन यातनादेशोनतेन ममोक्षो न भवतीत्यर्थः । श्रुतिसिद्धत्वान्नास्ति मोक्ष इति न वक्तुं शक्यमिति
भावः । अथवा ऽऽत्मत्वेनोक्तिरूपासनार्थेति न दत्तादीवक्रमः फलार्थमेव तत्र । फलं च श्रुत्युक्तं कस्यचित्स्वेच्छया एवेति त्वयापि वाच्यं । एवं सत्यादौ ज्ञानं मार्गेपि तामाह । न हि स इति । न हि प्रतीकोपा
सनेसतः लोकवेदप्रसिद्धः पुरुषोत्तमोस्युपास्यत्वेन तस्याक्षरं मान्तउपगमनेचेत्यर्थः । एवं ज्ञानं च क्वो फलं न सत्तासाधिता न तु सर्वं खल्विदं ब्रह्म तज्जलानिति वेदं सर्वमित्यादिश्रुतयः सर्वत्र ब्र
सदृष्टिं मुक्तिसाधनत्वेनोपदिशन्तीत्याशंक्य प्रतीकात्मिकैवेति कथं प्रतीकोपासनस्य न मोक्षसाधकत्वमिति प्राप्तउत्तरमाह ॥ ॥ ब्रह्मदृष्टिरुत्कर्षात् ॥ ॥ सर्वत्र ब्रह्मदृष्टिर्नप्रतीकात्मिका सर्व
स्यैवस्वतोब्रह्मात्मकत्वात् । सा च नोपदेशसाध्या नोनोपदिश्यते । किं त्वनुद्यते । सा त्वधिकारोत्कर्षात्सिन एव भवतीति प्रतीकोपासनस्य न मुक्तिसाधनत्वमिति साधूक्तं । एतदेवोत्कर्मनेनसूत्रेण ॥ ॥
आदित्यादिमतयश्चांगउपपत्तेः ॥ ॥ छांदोग्ये अथवोचे सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाचेति अथ वाचेंद्रद्युम्नमित्यपभ्यकं त्वमात्मा
नमुपास्स इति वायुमेव भगवो राजन्निति होवाचेति एवमेवाग्रे प्रश्नभेदेन वत्सुभेदेनाकाशापःश्रद्ध पा॰१
यश्चात्मत्वेनोपासना विषयाउक्ताः । तत्रैवासो वा आदित्यो देवमध्वित्यपभ्यक्रम्यान्ते प्रयते । यएतमेवं विद्वानादित्यं ब्रह्मेत्युपास्त इति । अत्रेदं चिंत्यते । अत्र प्रतीकोपासनत्वमस्ति न वेति । अस्तीति ३

सर्वःपन्थास्तथाहि सर्वं खल्विदं ब्रह्मेति श्रुतौ सर्वमनूद्य ब्रह्मत्वं तत्र बोध्यत इति न कश्चित्प्रतीकोपासनमस्तीति हि सर्वं निरूपितं तच्चोक्तमस्माभिः प्रत्येकं तत्त्वेनोपास्यत्वेनोक्ता नोपपद्यते ब्रह्मण
एकत्वादेकप्रकारकेणैवोपासनेन सर्वेषां फलसिद्धेः पृथक्पृथगुक्तौ गौरवात्प्र[illegible]यो [illegible] ज्ञन [illegible] विशेषाभावाच्च। नादृत्याधिकाराभावान्स्थयुक्तिरिति चेन्न सर्वत्र सदा तद्भावनायोग[illegible]यानु
भवस्यापि संभवात्। एवं सति वस्तुतः सर्वस्य ब्रह्मत्वं नाभिमतं किंतु यथादित्यादीनां तत्तथा तथा सर्वस्यापीति प्रतीकोपासनत्वमेव सर्वत्र तेनैव फलमिति प्राप्ते प्रतिवदन्ति। आदित्यादौ।
याः ब्रह्मत्वमतं तु अन्तेनास्य साकारस्यैव ब्रह्मणो व्यापकत्वात्तस्य प्रत्येकमप्यंगमुपासितं फलदमित्येकैकांगविषयिण्यः ता विधीयन्ते उपपन्नं चैतत्। न हि साकारव्यापकब्रह्मणोऽंगेन
ब्रह्मातो न प्रतीकोपासनत्वं तत्र। अपरं च॥ असौ वा आदित्यो देवमध्वित्युक्त्वा तस्य प्रतिदिक्करश्मीनां कृपावलोकरूपाणां मधुत्वं निरूप्य तद्यत्प्रथमममृतं तद्वसव उपजीवन्त्यग्नि
नामुखेन न वै वेदा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्तीत्येव देवरूपमभिसंविशन्ति एतस्माद्रूपादुद्यन्तीति पठ्यते। तथा च दर्शनमात्रेणान्यधर्मनिवृत्तिरस्यैव स्वतंत्रपुरुषार्थत्वेन स्ता
मतिशायितस्नेहरूढविगाढभावेन तत्रैव लयः पुनस्तद्दर्शनानंदानुभवार्थं भगवानेव कृपया पुनः पूर्वभावं संपादयतीति तस्माद्रूपादुद्यन्ति सर्वं भगवदंगत्वं च एवोपपद्यत इत्यपि हेत्वभि
योर्थो ज्ञेयः। न हि प्रतीकत्व इदं संभवति भक्तिमार्गीयत्वादस्यायमस्येति भावः। अंगानां भगवत्स्वरूपात्मकत्वेनैक्यमिति ज्ञापनायैकवचनं। एतेन स्वरूपस्यैव फलत्वमुक्तं भवति।
मुख्यः सिद्धान्तः सूचितो भवति॥ ॥ आसीनः संभवात्॥ ॥ पूर्वसूत्रेण धर्ममात्रस्य फलत्वमुक्त्वाधुना धर्मिणः फलत्वे तत्साधनं चाह। संभवात्। उत्कटस्नेहात्मकसाधनस्य संभवा
दधीनं संस्तद्य आसीनो भगवान् भवति एतेन भवद्रूपतोक्ता। एवं प्रागद्यमुक्त्वानंतरं दाह। ध्यानाच्च। भावानोत्कद्यदशायां अविचारिभावात्मकसततस्मृतिरूपध्यानादपि इह

कटः सन्नासीनो भवतीत्यर्थः । तेन स्थैर्यमुक्तं भवति । एवं भक्तेच्छयैव स्वरूपप्राकट्यमित्युक्त्वा लीलानाविष्करणमाविष्करणं चापि तदिच्छयैवेत्याह ॥ ॥ अचलत्वं चापेक्ष्य ॥ ॥ भक्तेच्छामपे
चलत्वे चकाराच्चलत्वमपीत्यर्थः ॥ ॥ स्मरन्ति च ॥ ॥ केचन भक्ता निरूपा निरपेक्षास्तत्स्मरणजनितानन्देनैव विस्मृतापवर्गान्तफला भवन्ति । चकाराच्छ्रवणकीर्तनादयोऽपि समुच्चीय
न्त इत्युक्तं । अथवा तत्त्वमहिमामृतसमुद्रविप्रुषा सकृल्लीढया स्वमनसि निष्पन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतसुखलेशाभासाः परमभागवता इति । अथवा अहं भक्तपरा
धीन इत्यादिस्मृतिः पूर्वोक्ते प्रमाणत्वेनोक्ता ॥ ॥ यत्रैकाग्रता तत्राप्यविशेषात् ॥ ॥ अथेदं विचार्यते । बहिराविर्भावो येभ्यो येभ्यश्चान्तस्तेषां तेषां च मिथस्तारतम्यमस्ति न वेति । तत्र नि
र्णयमाह । यत्र भक्तेष्वेकाग्रता भगवत्स्वरूपे प्रकट एवैकस्मिन्नयाहकचित्तधारानन्त्वं तद्बहिर्विज्ञानं तत्रोभयोरन्तःप्रकटतो बहिःप्रकटतश्चाभावे भगवत्स्वरूपे च विशेषाभावान्न तारत
म्यमस्तीत्यर्थः ॥ ॥ आप्रायणात्तत्रापि हि दृष्टं ॥ ॥ उक्तेऽर्थ एवायं संशयः । अन्तःप्राकट्यवतो यदा बहिःसंवेदने सत्यपि पूर्वानुभूतभगवत्स्वरूपानुभवस्तदा पूर्वमन्तरन्वभवमधुना
बहिरनुभवामीत्यनुव्यवसायो भवति न वेति । तत्र वैलक्षण्याद्विभ्रमर्हतीति पूर्वःपक्षस्तत्र सिद्धान्तमाह । आप्रायणादिति । श्रीभागवते ॥ ॥ प्रायणं हि सतामिह मिति भगवद्वाक्यात्
प्रायणशब्देन स्वतन्त्रपुरुषार्थत्वेन प्राप्यं परमं लोकं फलमुच्यते । तथा च तन्मर्यादीकृत्य तस्यामेवावस्थामावधिकी न तु बहिःप्राकट्येऽपि बहिष्ठानुसंधानमित्यर्थः । ततस्तस्य तत्र सायुज्यं भ
वति न वेति संशये निर्णयमाह । तत्रापि प्रायणेऽपि प्राप्ते तस्य सर्वविस्मृत्युणा समम आलापावलोकश्रीचरणनलिनस्पर्शादिकं दृष्टमेव फलं न त्वदृष्टं सायुज्यमित्यर्थः । यतः शुद्धपुष्टिमार्गीया पा॰
कृतोऽन्यथा पूर्वोक्तिभावसंपत्तिः कुतः स्यादित्युपपत्तिर्हिशब्देन सूच्यते । एतच्च तद्भूतस्य तु नातद्भाव इत्यत्र निरूपितं । तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ ॥ पुष्टिमा ४

सा ४

६२

गीयत कस्य फलं। निष्कामस्य मर्यादामार्गीयस्य तस्य फलं चिंत्यते। तत्र उक्तानां सर्वकर्मणां नके एव त्रपकं कर्मभिर्मर्यादाया अपि स्खलितत्वात्तामनुवृत्त्यैव भगवता फलं दीयते। तद्वचनानुक्तं दीयते नच भोगानुकूलकर्मणो स्वसजातीयसंतानजननादनिर्मोक्ष एव सर्वस्य संपद्यते। नच प्रायश्चित्तज्ञानस्यैव कर्मनाशकत्वं वक्तुं शक्यं तदुत्तरस्यतु द्देशेनाविहितत्वात्। तथा कथने चान्योन्याश्रयः दुरितस्यापि नाशस्तु द्विहेतुत्वेन तन्नाशे नोत्तरोदयो यतोतो मर्यादामार्गे मुक्तिरनुक्तिविषये विशिष्य उच्यते। तदधिगमे ब्रह्मज्ञाने सति तु ज्ञानस्वभावादेवोत्तराघस्याश्लेषः संबंधः पूर्वस्य तस्य विनाशो भवतीत्यर्थः। अत्रोत्तरस्योत्पन्नस्याश्लेष इति नार्थस्तस्यात्मन्येवोत्पन्नत्वात्तदतिरिक्तस्य श्लेषस्याभावादतोऽनुत्पत्तिरेवार्थः। न चैवं मर्यादामार्गीयत्वभंगः साधनं विना त्वस्वरूपोपपत्तेर्नैव कार्यकरणेऽपि स्थितिरितु नियतकर्मविरोधित्वस्वभावेन तत्रैनैव तथा संपत्तेः। अतएव तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंत इति श्रुतिरपिदृष्टांतमाह। स्मृतिरपि। यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति सर्वपाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजत इत्यादिश्रुतिभ्यस्त्व ...पि न तद्भोगनियमो वक्तुं शक्यः। एतेनानुक्तस्याप्यभोगे च कर्मानंतरजननान्मोक्षासंभव इति निरस्तं वेदितव्यं। न चान्योन्याश्रयः। अनाद्यविद्याजनितसंसारवासनात्मिका हि सा ...गुरूपसत्तिश्रवणमननविरूपामनादिरूपया ज्ञानसामग्र्यैव नाश्यते। अविद्यापि परं ज्ञानेन नाश्यत इति क्व तत्प्रसंगः। ज्ञानमार्गस्यावलिष्ठत्वात्कर्मणो दुर्बलत्वान्न तत्प्रतिबंधकत्व ...तिज्ञाननाश्यत्वबोधकश्रुतिस्मृतिमतात्त्वयाप्यंगीकार्यं। इममेवार्थमाहाचार्यस्तद्व्यपदेशादिति॥ ॥इतरस्याप्येवमसंश्लेषः पाते तु॥ पापस्य शास्त्रविरोधित्वेन ज्ञात्वा यज्ञानेन समंवि...ग्धो भवतु नाम धर्मस्यातथात्वेनाविरोध एवेत्याशंकानिरासाय पूर्वन्यायातिदेशमाह। इतरस्य पुण्यस्याप्येवं पूर्ववन्नाशउत्तरस्याश्लेष इत्यर्थः। अतिदेशाद्धेतुरपि स एव ज्ञेयः। तथा हि उत्तरे

र्हैवेषएनेतरनिष्ठीयंनेचास्यकर्माणीतिसामान्यवचनात्। ज्ञानाग्निःसर्वकर्माणीतिस्मृतौसर्वत्राश्रवाच्चतथा। अथेदंवाक्यते। मर्यादामार्गीयत्वाज्ञानानंतरंतरतत्संगदोषेणभगवज्ञावाञ्छतो
गअदोषोन्यन्निवद्दयेविहितनिषिद्धकर्मणोरष्फत्यसर्वकुंठाक्येतिज्ञानस्यसर्वात्मनाकर्मविरोधित्वमितितत्रनिर्णयमाह। यत्नेनकिंमार्गेभगवज्ञावाञ्छतिः। पातइत्फच्यतेउरप्यर्थेअपि
ह्वेवाच्येव्यवछेदार्थकतुञाश्चेन्यास्मिन्मार्गेपातस्यव्यवछेदएवनतुकर्हिचिन्मत्पराइतिवाक्यात्परंतुमर्यादामार्गीयत्वात्स्वारब्धभोगार्थंप्रभुस्वेनयाकरोतिनज्ञावेष्टमितितद्भोगो
न्नाबितइतितदेवंभवतीतिव्यासाभिप्रायोज्ञायते। तथाचतस्मिन्नस्यपुत्ररस्यकर्मणोसंश्लेषएवेत्यर्थः। पूर्वसूत्रएवमेवाश्लेषञाद्वस्यकुत्सनेः। अतिदेशस्यैवंपदेनैवप्राप्तेःसर्वस्यत्वंतन्परत्वेन
तन्याख्येयं। पातञाद्वस्यदेहपातेउञाद्वस्यावधारणमर्थमुक्तादेहपातेमुक्तेएवद्रूपकत्वावधारणंवाक्यार्थइतिचोक्तिर्नसाधीयसी। मुक्तिज्ञापकपदाभावात्। भोगेनत्वितरेक्षपयित्वाथसंप
द्यतइत्यत्रैववक्तव्यत्वाच्च। अनारब्धकार्येएवतुपूर्वेतदवधेः। ननुदेहस्यकर्मजन्यत्वात्तन्नाशेतन्नाशस्यावश्यकत्वाद्भूयसविरःप्रवचनानुपपत्तिरेवंसतिब्रह्मसञ्जितामोगुरूपमर्यादिसाधनासं
नवआचार्यवान्पुरुषोवेदेतिश्रुतेस्तदभावेनज्ञानमार्गोछेदेनमुक्त्युछेदप्रसंगइत्याशंक्यसमाधत्ते। पूर्वेपूर्वसूत्राभ्यांज्ञाननाशत्वेनयेप्रोक्तेपापपुण्येतेनाश्लेषे। किंत्वनारब्धेभोगायतन।
ञ्जएवंकार्ययास्यांनेएवेत्यर्थः। नत्वितरनिरपेक्षंहिज्ञानंस्वशक्त्यैवाग्निरेधइवकर्माणिदहतीतिपूर्वमुक्तं। तथासत्यश्लेषमेवनदहतीतिवक्तुमुक्तंनतुसश्लेषंशक्तेरविशिष्टत्वात्। नचकर्म ०
नाशोपिसंस्कारवशानुकूलानचक्रभ्रमिवत्तद्वासनावशाद्देहादिसत्तयाप्रवचनाद्युपपत्तिरितिवाच्यं। ज्ञानस्यसर्वतोबलवत्त्वात्सवासनस्यतस्यनाशात्। नहिमहाशिलानिपातेचक्रभ्रमिरनुव पा॰२
र्तिर्हिशाक्तोनीत्याशंक्यारब्धकार्यदहनेहेतुमाह। तदवधेः। ननुज्ञानेनारब्धकार्यदहनंयत्नदृश्यंकिलकारणत्वेनाखिलस्यपूर्वावधिरूपभगवदिछालक्षणाद्धेतोरित्यर्थः। नतुतस्यापिदहनेछा ५

० म

घ

तत्र तथैवेति निरूढाशयः। अत एवाग्रेन यावत्पते। अत एव श्रीभागवते। मृगदारकाभासेन स्वारब्धकर्मणा योगारंभणतो विभ्रंशित इति। उपभोगेन कर्मारब्धं व्यपनयन्निति च भरतं प्रति वचनं गीयते॥
एवं सति मणिमंत्रादिप्रतिबद्धशक्तेरग्नेरिव ज्ञानस्याप्यदाहकत्वेन काचिद्धानिरिति सर्वमनवद्यं। इच्छाप्रतिबद्धतादशायां न प्राचीनादृष्टाग्नीतितैर्विच्छेदस्तापनायत्त्वत्रादृष्टः। एतेन भगवज्ज्ञावस्य सर्व-
तो बन्धनवत्कथं तस्य पात इति शंका निरस्ता। भगवदिच्छायामल्लकारणत्वे नोक्ते तस्याः सर्वतो बलिष्ठत्वात्। तत्र यथेच्छाचरस्वकृतमर्यादापालनाय तुष्टावेंगीकृतेनेन तथेति सर्वमनवद्यं॥ ॥अग्निहोत्रादि तु
त्कार्यायैव तद्दर्शनात्। ननु प्रारब्धं हि प्राचीनं तत्राज्ञायत भोग एव कर्त्तव्यो ब्रह्मविदा नेतु विहितमन्यदप्यग्निहोत्रादिप्रयोजनाभावात् दृश्यते च नादृष्टानां तत्करणमन्तरस्य कर्मणः संश्लेषश्चा-
न शंक्यस्याशंक्य तत्प्रयोजनमाह। तुशब्दः शंकाव्युदासकः। अग्निहोत्रादिविहितकर्मकरणं तत्कार्यायैव भोगकार्यायप्रारब्धनाशायैवेत्यर्थः। यस्माग्निहोत्रादिकारकं प्रारब्धमस्ति तेनैव तत्रा-
यत्नो भगवत्तदपि क्रियते तेन वृतादशौरतएव सनकादीनां तथात्वं कुत एतत्। तद्दर्शनात्। यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति। पुण्यः पुण्येन क-
र्मणा भवति पापः पापेन। निष्कृतिः पूर्वकर्मणो निमकर्महेतुत्वं दृश्यते। निनानुपपत्तिः काचित्। केचित्तु ज्ञानस्य तत्कार्यं न देवाग्निहोत्रादेरिति तत्कार्यायेति पदस्यार्थं वदंति सनमाधुः। तद-
पमश्लक्ष्णपक्षमा ब्रह्मविदः प्रारब्धात्मकप्रतिबंधनाशो मोक्षस्य पूर्वज्ञानेनैव संपन्ने कर्मणो वैयर्थ्यापातात्। तमेतं वेदानुवचनेनेत्यादिश्रुतिदर्शनं दर्शनपदार्थ इत्यपि पूर्वविरोधादुपेक्ष्यः
॥अतोऽन्यापि ह्येकेषामुभयोः॥ ॥तदेवं पूर्वसूत्रचतुष्टयेन मर्यादामार्गीयज्ञानवत्स्य मर्यादयैव मुक्तिप्रतिबंधकंभवसत्यैव तन्नाशात्सेति निरूपितं। अथ पुष्टिमार्गीयस्य विनैव भोगं प्रारब्धं
क्षपति। न वेति विचार्यते। तत्र भोगैकनाश्यस्वभावत्वात्तस्य न तं विंस्थापितं तत्रपतीति प्राप्ते निर्णयमाह। एकेषां पुष्टिमार्गीयाणां भक्तानामुभयोः प्रारब्धाप्रारब्धयोः भोगं विनैव नाशो भ-

ना १

ति। कुत एतत्तत्राह। अतः। श्रुतेः कर्मणो ज्ञाननाश्यत्वनिरूपिकायाः ब्रह्मविद एव प्रवचनादिनिरूपणेन तद्विनाश्यप्रारब्धारब्धकर्मपि ह्येकश्रुतेश्चान्यापि श्रुतिः पठ्यते। तस्य पुत्रा दा
यमुपयंति सुहृदःसाधुकृत्यां द्विषंतः पापकृत्यामिति ज्ञानभोगाभ्यां कर्मनाशनिरूपकश्रुत्यास्याः श्रुतेर्विरोधपरिहारायावद्रूपं विषयभेदो वाच्यः। न च काम्यकर्मविषयेयं श्रुतिरि
ष्यं। तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशाविति सूत्रेणोत्तरस्याप्येवमिति सूत्रावयवेन वा विशेषेणारब्धातिरिक्तकर्मणोरखिलयोर्नाशनिरूपणात्। पापकृत्यायां काम्यत्वा
न वाच्यं। तस्मादत्यनुग्रहभाजनस्य स्वप्राप्तिविलंबमसहिष्णुर्भगवानस्य प्रारब्धमेतत्संबंधिगतं कृत्वा तस्यांतेन योगं कारयति। प्रारब्धं भोगैकनाश्यमिति स्वकृतमर्यादापालनाय तन्नाशयति
न च तयोरसमर्थत्वेनाकृताभ्यागमप्रसंगेन च नैवं वक्तुमुचितमिति वाच्यं। ईश्वरत्वेनान्यथापि करणसंभवात्। मर्यादाविपरीतस्वरूपत्वात्तु पुष्टिमार्गस्य न काचनानुपपत्तिर्भावनीया। [illegible]ा
स्याच्चेत्तत्क्षणत्वात्। अत एवैकेषामिति दुर्लभाधिकारः सूचितः। यदेव विद्ययेति हि॥ ॥ ननु यदेव विद्यया करोतीति श्रुत्या विद्यावतोपि तथात्वस्योचितत्वादुत्तरस्याश्लेष इति यदुक्तं त
न्नोपपद्यत इति प्रारब्ध आह। यदेवेति। हि यस्माद्धेतोस्त्वयाय यदेव विद्यया करोतीति श्रुत्योपनिषदेति श्रुतिरेव ब्रह्मविदोपि कर्मान्यनिषिद्धं संजिकात्वेनोदाहृता सा च न तत्समर्पति यादि उद्गीथमित्ये
तदक्षरमुद्गीथमुपासीतेत्युपक्रम्य तस्यरसतमत्वं मिथुननिरूपणमनुज्ञाक्षरत्वं त्रयीप्रवृत्तिहेतुत्वं च निरूप्येतदग्रे यदेव विद्ययेत्याद्युक्तेति। खल्वेतस्यैवाक्षरस्योपव्याख्यानं [illegible] भवतीत्युप
संहारादुद्गीथोपासनाविषयमेव यदेव विद्ययेति वाक्यमिति ज्ञायते तेनेनो क्रूरसतमत्वादिप्रकारकोपासनानां मध्ये यदेव विद्यया करोति तदेव वीर्यवत्तरं भवतीति तदर्थ इति न ब्रह्मविद्यागंधोपीति
न मात्राशंका। अत्र संभवतीत्यर्थः। यद्वा। उक्ताशंकानिरासायैवाह। यदेवेति। ब्रह्मविद्धि प्रारब्धक्षयायैव कर्म कुरुते। तत्त्वन्यकृतात्कर्मणः सकाशात्तत्त्वमननतत्त्वज्ञानाद्धि वीर्यवत्तरं भवत्येवेति नानुप

वि २

१८ विद्यापूर्वकर्मकरणे वीर्यातिशयः फलं श्रूयते तो ब्रह्म १

या ३
पा॰१
६

पत्तिः काचिदित्यर्थः। यद्वा। ननु पुष्टिमार्गीयस्य परब्रह्मप्राप्तिर्भोगं विनैव नाड्यानिष्क्रमणात्। संभावनां कवलितप्रतिके मुक्तिकन्यायेन तत्परिहारमाह। यदेवेत्यादि। जीवनिष्ठा विद्या हि भगवत्प्रत्यूहा न शक्येरं शास्ता। एवं मति यत्र धर्मसंबंधिसंबंधादन्येभ्योऽतिशयं कर्मणि वदन्ति श्रुतिमन्त्रमात्रादूर्मिसंबंधेऽतिशयितकार्यसंपत्तौ कथमसंभावना कर्तुमुचितेति निरूढाशयः। अत एव हेतुवाची हि शब्दः॥ ॥ भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते॥ ॥ पुष्टिमार्गीयफलं प्राप्तौ प्रतिबंधाभावं सोपपत्तिकमुक्त्वा तत्प्रकारमाह॥ इतरे त्र्ये धाधानौ। किंकदेहादित्रे स्थूललिंगशरीरे क्षपयित्वा हरी स्वस्य। अथ भगवल्लीलोपयोगिदेहप्राप्त्यनन्तरं भोगेन संपद्यते। सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति श्रुत्युक्तेन भोगेन संपद्यत इत्यर्थः। श्रुत्यर्थस्त्वानंदमयाधिकरणे निरूपितः। अलौकिकत्वं विनोक्तदेहं विना चोक्तफलप्राप्तेर्व्यवच्छेदकस्तु शब्दः॥ ॥छ॥ इति श्रीवेदव्यासमतवर्त्ति श्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये चतुर्थस्याध्यायस्य प्रथमः पादः॥ ॥श्रीकृष्णचरणं मम॥ श्रीकृष्णायनमः॥ ॥वाङ्मनसि दर्शनाच्छब्दाच्च॥ ॥पूर्वपादे लौकिकशरीरे क्षपयित्वाऽलौकिकं तत्प्राप्य फलेन संपद्यत इति निरूपितं। अथात्रेदं चिन्त्यते। भक्तस्य सूक्ष्मशरीरस्य रूपपरिणाम। किं तत्स्वरूपनाशानन्तरं मणिस्पर्शादयसश्चामीकरत्वमिव तस्यैवालौकिकत्वसंपादनं भगवदनुग्रहादिति। तत्रो एव पक्षः साधीयानिति निभाति। तथा हि। यथा सर्वसंसारिण एव जीवस्य तदनुग्रहात्स्वभावस्यापगमो मुक्तावस्था चोच्यते। न तथात्रापि वक्तुमुचितत्वात्। न तस्मात्प्राणा उत्क्रामन्त्यत्रैव समवनीयंते इति श्रुतिस्तु जीवस्य सायुज्यमुक्तिकाले तत्प्राणादीनामपि तथैवाह। अत एव ब्रह्मैव सन्ब्रह्माप्येतीत्युच्यते। पुष्टिमार्गीयस्योक्तमुक्त्यभावान्नेयं तद्विषयिणीति [illegible] प्रतिवदामः। ब्रह्मांशत्वेन जीवस्यानंदात्मकत्वान्निर्दोषस्वरूपत्वान्नित्यत्वाच्च दोषाणां चागन्तुकत्वात्तदपगमेन तस्य तथात्वमुचितं प्राणादयस्तु न तादृशा इति तद्धेतुनाऽपि तथात्वं न वक्तुं

श्रीं

ावयं देहेंद्रियासुहीनानां वैकुंठस्थत्वाभिनामिति श्रीभागवतवाक्याच्च। न च लौकिकत्वविशिष्टदेहादिरत्र निषिध्यत इति वाच्यं। सामान्यनिषेधे बाधकाभावात्। न च तत्तनुत्वमेव एव बा-
क इति वाच्यं। भगवन इव तदीयानामपि तेषां तथात्वे बाधकाभावात्। न चागंतुकत्वमेव बाधकमिति चेत्। मैवं। यथा व्यापिवैकुंठस्यानुग्रहात्मकत्वेनानागंतुकत्वेन नैसर्गिकत्वं तथा-
लवक्तरूपत्वेन सामीप्यादिमुक्तिप्राप्तवतां भक्तानां देहेंद्रियादिरूपमप्यनागंतुकमेव वैकुंठप्राप्तिमात्रेण शुद्धजीवानां संपद्यते। तदीयत्वेन तत्फलतातीतियावत्तत्र पुरुषोत्तम-
।लायां अपि पुरुषोत्तमात्मकत्वात्तदंगीकारमात्रेण प्राचीनाद्योषप्रावाहिकधर्मनिवृत्तौ शुद्धजीवस्य पुरुषोत्तमलीलात्मकदेहादिरपि तदीयत्वेन संपद्यत इति नानुपपन्नं किंचिदिति
रितो वेदि। अयमेवार्थो वाजसनेयिश्रुतौ याममथाकामयमान इत्युपक्रम्याप्तकाममात्मकामो न भवति न तस्य प्राणा उत्क्रामंत्यत्रैव समवनीयंते ब्रह्मैव सन् ब्रह्माप्येतीत्यंतेन वाक्येन निग-
द्यते। अत्र प्राणशब्देन प्राणाः सर्वेंद्रियाणि चोच्यंते। आत्मकामशब्देन भगवद्वाचकात्मपदग्रहणेन नक्रमस्नेहातिशयजनितप्रभुदिदृक्षार्त्तिश्चायस्मादृशो येन मरणमेव संपद्येत यदि
तु प्राकट्ये क्षणमपि विलंबः स्यात्तदा भगवत्प्राकट्येनैवात्मस्थितिरिति ध्वन्यते। भक्तिमार्गे प्राकट्यस्यैव परमफलत्वेन तद्दर्शनेनाप्तकामो भवति। ततः साक्षात्सदाश्लेषादिकामनायां प्राची-
न देहप्राणादेस्तदयोग्यत्वात्तेन तेनैव लीलानुभवंति। बहिःप्रकटस्येवांतरपि प्राकट्याद् उत्क्रमणाभाव उच्यते। आत्मातिरिक्तस्य गतिमुक्त्वा तस्य नामाह। ब्रह्मैव सन् ब्रह्माप्येतीत्यनेनउक्तरीत्या पु-
रुषोत्तमात्मकतल्लीलोपयोगिदेहेंद्रियादिसंपत्त्या ब्रह्मैव सन्नत्र तु ब्रह्मातिरिक्तदेहादिमानपि। तादृशः सन् ब्रह्मस्वरहत्वा बृंहणवत्वात्पुरुषोत्तमस्वरूपं प्राप्तो भवतीत्यर्थः। अन्यथा जीवस्य ब्रह्मां- पा॰२
शत्वेनानंदांशाविर्भावेन च ब्रह्मत्वे प्राणादिलयोक्त्या तदितरस्य बलादेवानुक्रमसिद्धमिति ब्रह्मैव सन्निति न वदेत्। अत एवैतदग्रे श्लोकोक्तिरथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति। मृतिधर्म- ७

१५२

हि

वच्छरीरं मर्थनिद्वत्वेन। जीवोपि तथोच्यते। तथा चायं पूर्वं तादृश एव। अथ यदुछिन्नलीलाप्रवेशानंतरममृतत्वरूपशरीरवान्भवतीति ततोऽत्रास्मिन्नेव शरीरे ब्रह्मसम्पग्गच्छते भगवता क्रियमाणलीलारसमनुभवतीत्यर्थः। भगवान्बादरायण इमामेव स्फूर्तिं विषयीकृत्य पतनोत्क्रमणानां लय एकदेवोत्क्रमनियमो न्वीति संशये निर्णयमाह। वाङ्मनसीति। तत्र हेतुं दर्शनादिति। एतदुक्तं भवति। भक्तेः स्नेहात्मकत्वात्तस्य प्रभुप्राकट्यफलकत्वात्तदोत्कण्ठेतस्याविरूपकत्वाद्यं मां पश्यत्विति विघ्नच्छियात्तस्मिन्संपन्ने चक्षुर्भ्यां मनसा च तद्रूपामृतमनुभवतः सकोषुत्करोभावः मम जनि येन प्रभुणा मद्सर्वेंद्रियव्यापारकृतीच्छा ममभवत्तत्र तेषामस्मा मध्यभगवदानंदसंबंधि मनःसंबंधेन तेषाप्यामश इति तत्रैव संगतास्तेनानंदेन संपन्ना जाताः। अयमेवार्थोऽनेन सूत्रेणाग्रिमेण चात एव सर्वाण्यपीति सूत्रेण निरूप्यते। दर्शनानंतरमादौ मदसंभाषणोठेदजन्यत इति वाङ्मनसि संपद्यत इति छांदोग्ये स्फुटोक्तेः संमत्या बादो मैवोक्ता। एवं सति वाङ्मनसि संगतामति भगवदानंदेन संपद्यत इति सूत्रार्थः संपद्यते। दर्शनाभावे पि वेण्वादिशब्दादपि तथा संपद्यत इति हेत्वंतरमाह। शब्दाच्चेति॥ ॥अत एव सर्वाण्यनु॥ ॥अत एव शब्देनाछ्हाद्यहेतोः सर्वाणींद्रियाणि अनु मां निध्यात्। वाचः पश्चान्मनसि संगता। भगवदानंदेन संपद्यंत इत्यर्थः। केचित्तु छांदोग्यस्थं वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामिति वाक्यं विषयत्वेनोक्त्वा सूत्रे वाक्यद्वयस्य तत्र वृत्तिपरत्वं वदंति। संपत्तिं तत्रांशे चा। तन्नसाधीयः। तथा हि। वाक्यद्वयस्य वृत्तिपरत्वे चेत्सूत्रमभिमतं स्यात्सूत्रकारस्तदा तथैव वदेत्तत्स्वरूपमेव वाक्यं। तन्निर्णयार्थमेव प्रवृत्तेः मुख्यार्थत्यागो लक्षणापत्तिश्च। किं चैवं मनसीति पदवैयर्थ्यं स्याद्विषयवाक्योक्तक्रमत्यागानुपपत्तिश्चेति॥ ॥तन्मः प्राणउत्तरात्॥ ॥ पूर्वोक्तिसर्वेंद्रियवैशिष्ट्यवन्मनः प्राणे संपद्यते न तु केवलं तत्र हेतुरुत्तरादिति। स यथा प्राज्ञनिःसूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयत इत्युक्त्वान्ते हेतु·

।× दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बंधनमेवोपश्रयत एवमेव खलु सौम्य तन्मनो

ब्र
सु

मुत्तरेण वाक्येनाह प्राणबंधनं हि सौम्य मन इति। तस्माद्धेतोस्मयेत्सर्थः॥ ॥सोध्यक्षे तदुपगमादिभ्यः॥ ॥सर्वेंद्रियविशिष्टमनोविशिष्टः प्राणो ऽध्यक्षे सुरोहति द्विवाप्रकरणेन गवन्निमं पद्य
न इत्यर्थः। अत्र हेतुः। उपगमादिभ्य इति। उपगमो ऽभ्युपगमः। पुष्टिमार्गांगीकार इति यावत्। तत्रस्तथेत्यर्थः॥ आदिपदाज्ज्ञानवदूवत्रीकरणसमर्थः स्नेहः प्रवृत्तिर्निगीतार्थस्त्यागस्तदनुरू
पं भजनं च। अभ्युपगमे सिद्धे स्नेहादयो ऽवश्यंभवंत्येवेत्याशयेन तदादित्वमुक्तं। नोद्देशः कृतः। मर्यादामार्गीकृतानां तु मुक्तिः पर्यवसायित्वेन मुमुक्षुत्वाद् उत्कटस्नेहासंभवेन प्रभु
वाकह्यामनवा स्वस्वप्रकृतौ संपातलयेषु जीवस्य भगवदनुग्रहेण श्रवणादिरूपया तथाविधस्नेहरूपया च भक्त्या मुक्तिः संपद्यत इति वक्तेवनार तस्मिन्निति निर्द्धारणायेनेदमुक्तं
अभ्युपगमादयश्च मुंडकोपनिषत्सु पठ्यंते। नायमात्मेत्युपक्रम्य यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वां। नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिंगात्। एतैरु
पायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधामेति उक्तं निगूढमाशयं प्रकटयति॥ ॥भूतेषु तच्छ्रुतेः॥ ॥ननु मर्यादामार्गीयाणामप्येवमेव वागादिलय उतान्यथेति संशये निर्ण
यमाह। तेषां ते भूतेषु लीयंते न तत्करीत्या भगवति। अत्र प्रमाणमाह। तच्छ्रुतेः। यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणाः चक्षुरादित्यं मनश्चंद्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमा
त्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयत इति श्रुतेः। न चाविद्वद्विषयिणीयं श्रुतिरिति वाच्यं। याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रा
मंत्याहो ३ नेति नेति होवाच याज्ञवल्क्यो ऽत्रैव समवनीयंते स उच्छ्वयत्याध्मातो मृतः शेत इति पूर्ववाक्यात्। न त्वविदुषः प्राणानामनुक्रमः। तमुत्क्रामंतं प्राणोऽनूत्क्रामतीत्यादिश्रुतेः। ननु पा॰२
यत्रास्य पुरुषस्येत्युपक्रम्य रेतश्च निधीयत इत्येता श्रुतिरविद्वद्विषयिणीति मंतव्यं यत एतदग्रे क्वायं तदा पुरुषो भवतीति प्रश्ने याज्ञवल्क्यार्तभागाभ्यां विचारितमुत्तरमुच्यते तौ ह यदूच ७

यत्याधमा २

तुः कर्म हैव तदूचतुरथ ह यत्प्रशशंसतुः कर्म हैव तत्प्रशशंसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति। एतेन कर्माश्रियत्वनिष्ठतीति निर्णयः संपद्यते। एवं सति ज्ञानानुक्रमणो
क्त्या संघातलयोक्त्या चोविद्विषयत्वमत्रावसीयते। यतस्तस्यैवोक्तद्वयं संभवति। अग्रिमश्रुत्युक्तकर्माश्रियत्वं च तस्मिन्विरुद्धमतः श्रुत्योरविरोधाद्विषयानिश्चये प्राप्ते प्रतिवदामः। म
र्यादामार्गीयविद्वद्विषयिण्येवेयं श्रुतिरिति। अत एव प्रश्ने क्व तदा पुरुषो भवतीत्येतावतैव चारितार्थ्येऽपि साधारणपुरुषस्याहत्या मर्यादामार्गीयत्वज्ञापकमयमिति परं तस्यैवोपक्रान्त
त्वात्तथा अग्रिमविचारितोऽर्थोऽपि तद्विषयक एवेति बुध्यस्वानन्तरं बाधकमिति चेन्न। हंत श्रुतिशिरः समाकलितमाकलय। मर्यादामार्गे हि विधिप्राधान्यं तथैव तन्निर्माणात्। तत्र चैवं कृत ए
वं फलं दास्ये न त्वकृतेऽपीति भगवदिच्छा। अतः कर्मप्रधानं। एवं सत्यात्मभोगस्यायमाशयः। वागादिरेतोऽन्तलयेन प्रारब्धस्यापितदानाज्ञाच्छुद्धं जीवं विधाय विषयं कदाचित्सृष्टौ प्रवेशाय नितवे
ति संज्ञायेन नतदायं क्व। मर्यादामार्ग एवोत पुष्टावपि प्रवेशितो भवतीति प्रश्नः। तदाभ्यार्थस्यैवेच्छारीतिमविदुषोऽज्ञेयत्वं ज्ञानं तौ स्वयमेव यदवधारितवंतौ तदपि रहस्यमिति स्फुटमनुक्त्वा श्रुतिः
र्यविमितमर्थमुक्तवती तौ हेत्वादिना। अत्र कर्मपदं मर्यादामार्गपरं तथाच मर्यादामार्ग एव तस्य स्थितिरित्यर्थः संपद्यते। मुक्त एव भवतीति यावत्। अत एव तत्प्रशंसापि यत ईश्वरत्वेन सर्वकरण
समर्थोऽपि। तद्दाने तदपेक्षते। अत्र हेतुत्वेन मर्यादामार्गस्वरूपमुक्तं पुण्यो वा इत्यादिना। ननु मर्यादामार्गीयो मुक्तो ज्ञानी च भवतु उक्तनिर्णयस्तु ज्ञानमार्गीयविषय एव न कर्मठतादृशामपि कदाचि
त्पुष्टावपि प्रवेशाय इत्याशंक्य तन्निर्णयमाह॥ ॥नैकस्मिन्दर्शयतो हि॥ ॥एकस्मिन्ज्ञानिनि भक्ते वा मर्यादानियमो न। किंतूभयोरपि। तत्र हेतुर्दर्शयत इति। यतो याज्ञवल्क्यार्त्तभागौ ज्ञानि
भक्तसाधारण्येन मर्यादानियमं दर्शयतः उक्तरीत्या तौ हेत्वादिना। अन्यथा प्रकृतांगीकारोऽन्यथा भवेदित्युपपत्तिर्हि बाढेन सूच्यते। एवं च श्रुत्योरस्तु विरोधपरिहारान्यथानुपपत्तिर

सा

त्रमूलमिति ज्ञेयं। केचित्तु पमं कृतेषु वागादिषु प्राणं तरप्रेक्षामयि को जीवः क्वायं तदा भवत्युष इति प्रश्नविषय इति वर्णयंति तन्न साधीयः तमुत्क्रामंतं प्राणोनूत्क्रामति। प्राणमनूत्क्रामत

सर्वे प्राणा अनूत्क्रामंतीति श्रुतिर्विद्वदितरजीवस्य प्राणानामिंद्रियाणां च सहैवोत्क्रमणं वदंतीति वागादिलयस्य तत्रासंभवान्नोक्तस्य प्रश्नविषयत्वं वक्तुं शक्यं। पूर्ववाक्येऽत्रैव सम

नीयंत इत्युक्तत्वाच्चातोऽस्य दुक्त एव मार्गोनुसर्त्तव्यः। एतेन नायं परविद्यावान्यतोऽमृतत्वमेव तत्फलमिति न वदेद्यांतेन एनायत्र निष्क्रमणापेक्षाकर्माश्रयत्वं च न स्यात्किंत्वपरवि

[illegible] द्यावांस्तस्याः स्फ[illegible]ब्रह्मलोकावधिफलमिति कर्माश्रित्य नोत्क्रमणादिकं संभवतीत्यपि निरस्तं वेदितव्यं॥ ॥समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य॥ ॥मर्यादापु

ष्ट्योर्न कदाचिदन्यथाभाव इति यदुक्तं तच्चाद्यत्वपेक्षायां वस्तुस्वरूपमेव तथेति बोधयितुमाह॥ समानेत्यादि॥ ॥अत्रायमाशयः साधनक्रमेण मोचनेच्छा हि मर्यादामार्गीया मर्यादा।

विहितसाधनं विनैव मोचनेच्छा पुष्टिमार्गमर्यादा। तथा सति सदैकरूपत्वं तयोर्युक्तमिति। एतदेवाह। सृतिः संसृतिर्जीवानां स्वस्मात्पृथक्कृतानामविद्ययाऽहंताममतास्पदीकरणं त

दुपक्रमश्चारंभस्तं मर्यादीकृत्य मुक्तिपर्यंतमुक्तरूपा मर्यादा समाना सदैकरूपा मध्ये नान्यथा भवतीत्यर्थः। एवमेवानुपोष्य व्रतमकृत्वाऽमृतत्वमपि पुष्टिमार्गे समानमित्यर्थः। अत्रो

पोषणपदमशेषमुक्तिसाधनोपलक्षकं। एवं प्रासंगिकमुक्त्वा प्रकृतं परामृशते सोऽध्यक्ष इति सूत्रेण पुष्टिमार्गीयकरणसंघातस्य भगवत्येव लय इत्युक्तमग्रिमेणानेन मर्यादामार्गीयक

रणसंघातस्य भूतेषु लयमुक्त्वा पश्चादंतरंगस्थजीवस्य तस्य मुक्तिरेवं भवतीति वक्तव्ये समाहरसोम्परमित्यादिना स्वाशयमन्येष्वप्रकटयंतो कर्मयत्ति रूपितवंतो तत्कृत इत्याशंक्य तयोरनन्यं पा॰२

निगूढं प्रकटयति॥ ॥तदापीतेः संसारव्यपदेशात्॥ ॥तदा नित्यलीलांतःपातलक्षणपुष्टिमार्गीयमुक्तिदशायां मर्यादामार्गीयायाश्चापीतेर्मुक्तेः संसारत्वाभावेऽपि पुरुषोत्तमभजनानं ए

दातुन्न वाभावाभावसंसारश्चेत्येवं पुष्टिमार्गेप्युपदेशो यतः क्रियते। तत्तदभिसंधाय तथा रीत्या निरूपणं। अत एव श्रीभागवते श्रीशिववचनं गीयते। नारायणपराः सर्वे न कुतश्चन बिभ्यति। स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन इति॥ श्रीभगवद्गीतास्वपि। देवान्देवयजो यांति मद्भक्ता यांति मामपीति वाक्ये मर्यादामार्गीयभक्तमुक्तेरितरसाधारण्यमुच्यते। न तु संसारवन्मुक्तेरपि हेयत्वं। एवं च तादृशांचेत्पुष्टिमार्गीयं तत्त्वं तदा मुक्तेः पुरुषार्थत्वबोधिकायाः श्रुतेः प्रतारकत्वमापततीति तद्बोधकप्रमाणानां तत्तत्फलमात्रपरत्वमेवेति प्राप्तमाह॥ ॥सर्वं प्रमाणतश्च तथोपलब्धेः॥ पुष्टिमार्गीयं तत्त्वं सर्वमुक्तं उद्देश्यमित्यर्थः॥ अत्रायमाशयः। पुष्टिमर्यादामप्यतिक्रम्य पुष्टिप्रबोधवेद्यो तत्तत्त्वमनुभवविषयो भवति नान्यथा॥ तत्र प्रवेशस्तु निरुपधिनातिशायिनानुग्रहेण साधनत्वाद् न भक्तेतराणां हेयमेव न भवति। तेषां तु मुक्तिरेव फलं तस्मा एवेष्टत्वात् ज्ञानिनां स्वर्गादिवत् इष्टफलप्राप्तौ हि प्रतारकत्वमन्यथा पुष्टिमार्गीय फलबोधिकाया अपि श्रुतेः प्रतारकत्वं स्यात्। इच्छाचाधिकारानुसारिणीति नानुपपन्नं किंचिदिति। न चैवं विधायां स्थितौ किं मानमित्याकांक्षायामाह। प्रमाणत इत्यादि। प्रमाणे श्रुतिः साक्षात् यतो वाचो निवर्त्तंते अप्राप्य मनसा त सह। आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चने। एतं ह वाव न तपति। किमहं साधु नाकरवं। किमहं पापमकरवमिति। अत्र पूर्वार्धेनोद्देश्यत्वमुत्तरार्धेन तत्सत्ता च बोध्यते। अन्यथा मनसो अप्राप्यस्य वेदनकथनं विरुद्धं स्यादतो उद्देश्यत्वेनैव धर्मिग्राहकमानसिद्धं तदित्यर्थः। चकारात् तादृशानामनुभवः परिगृह्यते। तद्धि ब्रह्मविदामिव तादृशानां भक्तानामपि स्वमार्गोपदेशानं चिद्भूयेत न चैवमतः सर्वं किं न साधीय इति भातीत्याशंक्य तत्र हेतुमाह॥ ॥नोपमर्देनातः॥ ॥उपदेशानंतरं तादृशादि ब्रह्मविदामिव तेषां सायुज्यं स्यात्तन्न। दुःसहत्वेन सर्वेषां भावानामुपमर्देन तिरोधानेनोपदेशो न भवतीत्यर्थः। न हि भगवदग्रे स संभवतीति भावः। ननु रसो वै सः रसं ह्येवायं लब्ध्वाऽनंदी भवतीत्युपक्रम्यैष ह्येवानंदयातीति श्रुतेरुक्तरूपानंदप्राप्तौ उक्तसम भवतीत्यर्थः। संगमे तु अतः पुरः प्रकट परमानंदस्वरूपाद्भगवत एव हेतोरुपदेशोन्यस्मिन न [illegible]ी ×१

२× द्युतमेषां विरहदशा प्रियसंगमदशा वेति दशाद्वयमेव भवति नान्या। पूर्वस्या—

१ भगवान्।सं

हविरहतापोह्यकथ्यवचनआनंदतिरोधानएवतत्संभवात्। तद्धेतोरस्यैंभवेऽवनत्याभिरेवतस्यादितिप्राप्तउत्तरंपठति॥ ॥अस्येवचोपपन्नेरूभा॥ ॥आनंदात्मकरसात्मकस्यास्येवभगवतए
धर्मजभ्यामविरहतापइत्यर्थः। विरोधपरिहारायाह। उपपत्तेरिति। इदमुक्तंभवतिभगवद्विर-हस्यसर्वसाधारण्येपिस्थायिभावात्मकरसरूपभगवत्प्रादुर्भावोयस्यहृदिभवतितस्यैवतद
भिज्ञस्तापस्तदनंतरंनियमतस्तत्प्राप्तिश्चभवति। नत्वेतयाभूतस्येत्यन्वयव्यतिरेकाभ्यामुक्तरसस्यैवैषधर्मइतिनिश्चीयते। तस्माच्छ्रुतएवतथात्वात्तस्तापोपिरसात्मकएव॥ ॥प्रतिषेधादि
तिचेन्नशारीरात्॥ ॥ननुनपत्रपोमृत्स्फंपत्रपनिनरोगंनोनदुःखमितिश्रुत्यादुःखप्रतिषेधस्तादृशोभक्तेक्रियतइतितस्यदुःखित्वंनवक्तुंशक्यमित्याशंक्यप्रतिषेधति। नेति। कुः नःशारीरात्॥
शारीरमेवंधिनोहेतोर्यदुःखंकर्मजनितमितियावत्तस्यैवश्रुतोप्रतिषेधात्तत्रानुपपत्तिरित्यर्थः। एतेनदुःखत्वेनकर्मजन्यत्वानुमानमपिनिरस्तंवेदितव्यं। लौकिकारणवदुःखेतजन्यत्वनि न्य
यमात्। स्पष्टोह्येकेषां। एकेषांशाखिनांभगवत्स्वरूपलाभानंतरंदुःखतन्निर्वर्त्तनलक्षणोर्थःस्पष्टःपठ्यते। तथाहि रसोवैसः। रसंह्येवायंलब्ध्वानंदीभवति। कोह्येवान्यात्कःप्राण्यात्
।यदेषआकाशआनंदोनस्यात्। एषह्येवानंदयाति॥ अत्ररसात्मभगवत्स्वरूपलाभेसत्यानंदवत्त्वमुक्त्वातस्यैवजीवनहेतुत्वंपरमानंदहेतुत्वंचोच्यते। मरणहेतुप्रसक्तिस्त्वभावेजीवनहेतु
त्वंनवदेत्। सरसस्फसंयोगविप्रयोगभावाभ्यामेवप्राणेभिवमनुभूतोनैकतरेण। तत्रविरहतापस्यात्युपमर्द्दित्वेनतदाप्राणस्थितिरपिनस्याद्यदिरसात्मकोभगवानाहृदिनस्यादित्याशा ·
येनाहकोह्येवान्यादितियतश्चहिएषः हृदिस्फुरद्रूपआकाशोभगवाननस्यात्कस्तदान्यात्। अनप्राणनेकोवाजीवयेत्कोपीत्यर्थः। तादृशस्यभगवत्स्वरूपातिरिक्तात्रजीवनमितिज्ञा पा॰२
पनायसामान्यपदं। ब्रह्मानंदाधिकप्र णानंदविरहासत्रमरणनिवारणसामर्थ्यमतादृशस्योचितमेवेतिज्ञापनायहिशब्दः॥ तादृशस्यजीवनसंपादनंफ्लोराक्रपकमिमितिताप १०

नापैवकारः। तापात्मकस्याप्यानंदात्मकत्वमेवेति ज्ञापनायानंदपदं। तदाश्लतापप्रयुक्तग्लान्यादयो ये भवंति तेपि तद्धर्मा एव नीलांबुदश्यामोऽनिलोकेत्रावश्या ह्रद्यादपगच्छत्विति भावेपि हृद

या त्रापमारयित्वंत्राक्यइति ज्ञापनाय चाकात्रात्वमुक्तं। तदनेनरप्रकरीभूय तदन्यः को वा प्रकर्षेण दर्शनस्पर्शाश्लेषभाषणादिभिः स्वरूपानंददानेनान्याऽस्फूर्वतापनिवृत्तिपूर्वकर

मानंदपूर्णं कुर्यादित्यर्थः। रसभक्ते वायंलक्ष्मानंदीभवतीति पूर्ववाक्येनैवान्यव्यवछेदपूर्वकं भगवत्स्वाश्लेषानंदहेतुत्वप्राप्तभावप्रियत्सुनराह। तत्रापि व्यतिरेकमुखेनतत्रापि जीवनहेतु

त्वं तदपि सामान्यविशेषाभ्यां वारद्वयं तेन विरहसामयिकोक्तरूप एवार्थः स्फूर्तेर्भिन्नेन इति निश्चीयते। अन्यथा मरणहेतु त्वनुपस्थितो जीवनहेतुत्वं नवदेदित्युक्तं। तदेवस्थापयन् को

वाष्टकृष्णो जीवेदिति वार्थः॥ ॥स्मर्यते च॥ ॥भगवद्भावस्य दुःखहेतुत्वं तेनैव तज्जीवनं तस्य ब्रह्मादिदुरापत्वं च श्रीभागवते स्मर्यते। तामन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः। ये त्यक्तलोक

धर्माश्च मदर्थे तान्बिभर्म्यहं मित्प्रक्रम्य धारयंत्यतिकृच्छ्रेण प्रायः प्राणान्कथंचनेत्यादि श्रीप्रभुवचनं। श्रीमदुद्धववचनं च एताः परं तनुभृतो भुवि गोपवध्वो गोविंद एव निखिलात्मनि रूढ

भावाः। वांछंति यं भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनंतकथारसस्येत्यादि। तेन भगवत एव जीवनहेतुत्वं भावस्य च परमपुरुषार्थत्वं दुरापत्वं च स्फुटमवगम्यते॥ ॥तानि परे तथा

ाह॥ ॥ननु हृदि वहिश्च रसात्मकभगवत्प्राकट्यं तद्दर्शनजनितो विरहभावस्तत्कृतितस्तापस्तेन मरणोपस्थितिस्तन्निवर्तनं तदौत्कट्यं तदाप्राकट्यं ततः पूर्णस्वरूपानंददानादिकं

ोकेष्वचिदपि न दृष्टं श्रुतं वा वैकुंठेपीति कुत इत्याशंक्याह॥ ता नि। उक्तानि वक्ष्य निपरे प्रकृतिकालाद्यतीते वैकुंठादप्युत्कृष्टे श्रीगोकुल एव संतीति दोषः। तत्र प्रमाणमाह। तथा श्रु

हश्रुतिः। ऋग्वेदे पठ्यते। तावां वास्तून्युश्मसि गमध्यैत्रा तुमुश्मसि कामयामहे। तानि कानीत्याकांक्षायां गूढाभिसंधिमुद्घाटयति। यत्र श्रीगोकुले गावो भूरिशृंगा बहुशृंगा [illegible] क

यत्र गावो भूरिशृंगा अयासः। अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि॥ ता ~~[illegible]~~ तानि। वां भगवत्तदंतरंगभक्तयोः संबंधीनि। वास्तूनि। वस्तूनि। गमध्यै ४१

रूपत्वं तयोर्गावश्च संतीति शेषः । अयासः शुभावहतत् ॥ उक्तगुणविशिष्टमुरुगीयत इत्युरुगायस्तस्य गोप्यो हि सततं तं गायन्ति । अतएव तदादिभक्तेभ्यः कामान्वर्षतीति वृषात-
स्य परमं प्रकृतिकालाद्यतीतितं पदं स्थानं । भगवतो वैकुंठं वर्तत इत्येतादृशलीलाभावेन तस्मादपि परममुत्कृष्टं । अत्र । अवभाति प्रकाशत इत्यर्थः । तथापि स्वदृग्गोचरो न भवती-
ति खेदेन । आह स्माह श्रुतिः । उरुगीयते परं सर्वत्र कामवर्षणं न केवत्रैवेति तात्पर्येण वा विशेषणद्वयमुक्तं । यमुनापुलिनतदुपवननिकुंजगह्वरप्रदेशादिमाधुर्यात्मकत्वेन भू-
रि बहुरूपं तथा चैतादृशं यत्परमं पदमवभाति तत्संबंधीनि वास्तूनि कामयामह इति वाक्यार्थः संपद्यते ते पदार्था इति वक्तव्ये सति नानीत्युक्तिर्यमाविषयवाक्यानुरोधादिति
ज्ञेयं पुरुषोत्तमसंबंध्यपर्याणीतत्प्राकट्यस्यान एव प्राकट्यं युक्तमिति हृदयेनाह ॥ ॥ अविभागो वचनात् ॥ ॥ ननु लीलाया नित्यत्वेन तन्मध्यपातिनां तद्दर्शनं यथा नित्यं त-
थानादृक्साधनाभावेपि निजानुकंपया कदाचित्कमपि भक्तं तत्र नयति चेत्तदा कंचित्कालं स्थापयित्वा तत्र तस्मिन्वियोजयति न वेति संशयः । तोषस्य कृशाश्चित्कत्वा तत्साध्या
तत्र स्थितिरपि तथैवेति न वियोजयतीति पूर्वः पक्षस्तत्र सिद्धान्तमाह । तत्र प्रवेशितस्य तस्मादविभाग एव । कुतः । वचनात् । तैत्तिरीयकउरुगानंतरमेव विष्णोः कर्माणि पश्यत इत्य-
चानन्तरं कृतानि कर्माणि एतत्कानरयेवदति तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय इति पुरुषोत्तमस्वरूपविलसद्रितं तच्च भक्त्यैवेति सूरयो भक्ता एव तेषां सदा दर्शनमुच्यते
। अन्यथा लीलानित्यत्वेनैव दृश्यां तत्र स्थितगवादीनां प्रभुकर्मविषयाणां च भक्तानां सदा तद्दर्शनस्य प्राप्तत्वादिदं न वदेत्तस्माद्विभाग एव । एतेनापि । लीला नित्यं सिध्यति पा॰२
। एतद्यथा तथा विद्वन्मंडने प्रपंचितं । एवं पुष्टिमार्गीयभक्तस्य ज्ञानमुक्ता ज्ञानमार्गीयस्य तमाह ॥ ॥ तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृति- ११

र्वे

र्च

ति२

त४.

योगाच्च हार्दानुगृहीतश्शताधिकया॥ ॥एवं वित्तेषु नष्टेष्वित्यादिना मार्गस्य वागादिलय उक्तोऽधुना तस्य जीवात्मन उत्क्रमणप्रकार उच्यते। स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति श्रुतेस्तस्यात्मन उत्क्रान्त्यायतनं हृदयं तदग्रं पूर्वं प्रज्वलति पूर्वं तथा प्रकाशमानमपि तद्द्वा प्रकाशत इति यावत्। तदात्मप्रकाशितं द्वारं निर्गमनमार्गो पस्य नाड्द्वा उत्क्रामति। यतः श्रुतिस्तथाह॥ ॥तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वेत्यादि। यद्यप्येतावत्सर्वजीवसाधारणं तथापि विद्वांस्तु नेतरवदितरनाड्या निष्क्रामति किंतु शताधिकया। एकशततम्या नाड्या मूर्द्धन्या निष्क्रामति शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति यतः श्रुतिराह। अत्र हेतुमाह। हार्दानुगृहीत इति हेत्वंतर्गर्भं विशेषणं। गुहां प्रविष्टौ परमे परार्द्धे इति श्रुतेर्हृदयाकाशसंबंधी यः परमात्मा तदनुग्रहात्तथैव भवतीत्यर्थः। अनुग्रहे हेतुर्विद्यासामर्थ्यादिति। तस्या विद्यायाः शेषभूतां गच्छता या गतिः प्रव्रजनरूपा। तच्छेषभूतैव या भगवत्स्मृतिपरंपराचिंताभ्यां च योगाद्भगवदनुग्रहत्वेन तथेत्यर्थः॥ ॥रश्म्यनुसारी॥ ॥अथ या एता हृदयस्य नाड्यस्ताः पिंगलस्याणिम्नस्तिष्ठंति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिंगल इत्युपक्रम्यते। तमभित आसीना आहुर्जानासि मां जानासि मामिति स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति। अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमत इत्यत्र तमभित इत्यादिश्रुतेः सर्वसाधारणमुत्क्रान्तिः प्राप्यते एवमादित्यत्वेनोक्तस्य पिंगलस्य रश्मिभिरूर्ध्वाक्रमणं च तथा। अत्र संशयः उक्तोऽमह्लृत्तनादेरितरसाधारणेऽपि यथा हार्दानुग्रहाद्विलक्षणा गतिर्विदुष उक्ता। तथा रश्म्यनुसारी निष्क्रामत्ययमेवेति॥ ॥निशि नेति चेन्न संबंधस्य यावद्देहभावित्वाद्दर्शयति च। विदुष उत्क्रमणे हार्दानुग्रह उक्तो यः

१४ रित्वमपीतरसाधारणमुतास्विन्नेवेति तत्रावधारणमाह। रश्म्यनुसारी

याविशेषस्तथाकालविशेषकृतोपि विशेषो न विष्पतीत्याशंक्य तन्निरासमाह। निशाहोरात्रकृतोऽयनकृतो वा मनवेत्रत्राद्यकृतो नास्तीत्याह नेति। तत्र हेतुः संबंधस्येत्यादि। अनुय
हेतुमतोयः पूर्वोक्तोगत्यनुस्मृतिसंबंधस्तस्य यावद्देहभावित्वात्तत्कार्यस्यानुग्रहस्यापि तथात्वात्कालस्याप्रयोजकत्वमित्यर्थः। अत्र प्रमाणमाह। दर्शयतीति। यतः श्रुतिः
वविदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्संतः प्रव्रजंतीति। हार्दानुग्रस्य मुक्तिदेनो विद्यमानत्वादयनविशेषोप्यप्रयोजक इत्याह॥ ॥अतश्चायनेपि दक्षिणे॥
त्यार्थमिदं॥ ननु यत्र काले त्वनावृत्तिमितिकालप्राधान्येनोक्तेपक्रम्याग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं। तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जना। इति भगवद्वाक्या
ब्रह्मविदोप्युक्तकालापेक्षास्तीत्याशंक्य विषयभेदेन समाधत्ते॥ ॥योगिनः प्रति स्मर्यते स्मार्त्ते चैते॥ ॥ज्ञानमार्गाद्योगमार्गो हि भिन्नः तथा च योगिनमुद्दिश्यैव कालवि
शेषहेतुत्वं स्मर्यते न तु ज्ञानमार्गीयस्य श्रौतस्येतरनिरपेक्षत्वात्। न च योगसांख्ये अपि श्रौते एवेति वाच्यं। यतः स्मार्त्ते एते चोक्तेष्वपि। एते योगसांख्ये। अग्निर्ज्योतिर्धूमो रात्रि
रिति वाक्यद्वयोक्तगती वा। इदं तु श्रुत्युक्तदेवयानपितृयानातिरिक्तमार्गमभिप्रेत्य समाहितं। तेन एव चेदत्राप्युच्यते शब्दभेदेन तदा न विरोधः॥ ॥इति श्री वेदव्यासमतव
र्त्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये चतुर्थाध्यायस्य द्वितीयः पादः॥ ॥अर्चिरादिना तत्प्रथितेः॥ ॥ननु ज्ञानमार्गीयस्यैव मर्यादामार्गीयभक्तस्याप्यर्चिरा
दिमार्गेणैव गमनमुत सद्योमुक्तिरेव भवतीति संशये सत्त्वयथा ज्ञानिनो नियमाभावस्तथा चापीति प्राप्त आह। अर्चिरादिमार्गेण तस्य ज्ञानमार्गीयस्यैवोत्कर्षकथनात् पा०२
स एव तेन मार्गेण गच्छति न भक्तोपीत्यर्थः। तथापि पंचाग्निविद्याप्रकरणे तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपू १२

र्यमाणपक्षमित्यत्रोपक्रमे भक्तातिरिक्तानेवाधिकृत्य तथा गतिरुच्यते। स्मृतावप्यग्निर्ज्योतिरहः शुक्ल इत्यत्र ब्रह्मविदो जना इति वचनेन ज्ञानमार्गस्यैव स पंथा उच्य
ते। अथेदं। चिंत्यते सामोपनिषत्सु पठ्यते। अथ या एता हृदयस्य नाड्यस्ताः पिंगलस्याणिम्नस्तिष्ठंति। शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिंगल इत्युपक्र
म्यादित्यस्य पिंगलस्य रश्मिरूपत्वं नाडीमुक्त्वाऽयेवदत्यथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्द्ध्वमाक्रमत इति नाडीरश्मिसंबंधेनैका परलोकगतिः श्रूयते
॥ अर्चिरादिका चान्या। तेऽर्चिषमभिसंभवंत्यर्चिषोऽहरित्यादिरुक्तैका। स एनं देवयानं पथानमापद्याग्निलोकमागच्छतीति चापरा। स यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायु
मागच्छतीति चेतरा। सूर्यद्वारेण ते विरजाः प्रयांतीति चान्या। एवमनेकेषु मार्गेषु सत्स्वर्चिरादेरेवोक्तिः कुत इति। तत्र सर्वेषां पारिभाषिकमर्चिरादित्वमत एवाथैतयोः पथोर्
नैकतरेण च नेति मार्गद्वयमत्र स्थानमतिकष्टं जायस्व म्रियस्वेति तृतीयं स्थानमित्युक्तं। अन्यथा अनेकेषां मार्गाणामुक्तानां श्रूयमाणत्वादस्य तृतीयत्वं नोच्येतातः प्रकरण
भेदाद्भिन्नोपासनमत्रोपेत्वा। भियोनयेहा। भिन्ना एवैते मार्गा ब्रह्मप्रापका इति मंतव्यमिति चेत्तत्रोच्यते। नहीयं परिभाषा सर्वेषु श्रुतास्ति यतस्तथोच्येत। ततो नापवादनेकपर्व विशि
ष्टएक एव मार्ग इति मंतव्यं। न तु पर्वभेदेन मार्गभेद इति। गौरवप्रसंगात्। न चैवमथैतैरेव रश्मिभिरित्यवधारणानुपपत्तिरिति वाच्यं। तस्याक्रांतेरुत्क्रमणमात्रे मार्गनिरूपकत्वा
त्तथाहि। तत्रोपक्रमेऽथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्द्ध्वमाक्रमत इत्युच्यते। एतस्मात्पुरस्तादथ या एता हृदयस्य नाड्य इत्युपक्रम्य पिंगलस्यादित्यत्वमु
क्त्वा तद्यथा। महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छंतीमं चामुं चामुष्मादादित्यात्प्रतायंते ता आसु नाडीषु सृप्ता आभ्यो नाडी

स्यः प्रतायंते तेः मुमुक्षिभिरादित्ये सम्प्राप्तं तेन वाक्येन नाडीपुरश्मिसंचारमुक्त्वा ऽग्नेः पथयत्रैतरस्मादित्याद्युक्तं। उपसंहारे च शतं चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतै-
का। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति। एवमुपक्रमोपसंहारयोरुत्क्रमणमात्रमार्गनिरूपकत्वं न तु ब्रह्मप्रापकमार्गस्यातस्तदनुपपत्तिपरिहारो
ऽनर्थकः। न चानेकपर्वविशिष्टत्वेन मार्गस्यैकत्वे तं निरूपयन्ती श्रुतिः क्वचित्किंचित्पर्वाणि निरूपयति क्वचित्केतिकथं उपसंहारेण प्राप्यंत इति तात्पर्येण तद्घेति चेद्रवा भिन्नशा-
खांतरमविदुषस्तदसंभवेन तं प्रति श्रुतेर्न्यूनतापातः। न हि सर्वशाखाविदं प्रत्येव कथनमिति वक्तुमुचितं तस्मात्संभवादतः स्वस्वशाखातानवं तं प्रत्येव तथा। अध्ययनविधे-
रपि तावन्मात्रपरत्वात्। शाखांतरसंवादिपर्वकथनानुपपत्तिश्च। उपसंहारेणैव। तस्यापि घा। प्रतिसंवादतो विरुद्धदिक्कानां स्वस्वमार्गेणैकग्रामप्राप्तिवदिहापि तु मह- भवि
ति स्थानं क्रमेण सर्वैर्मार्गैर्ब्रह्मप्राप्तिः। न चैवमप्येतयोः पथोरिति द्विवचनानुपपत्तिर्जयिस्व। प्रियत्वेनस्य स्पृहनीयत्वं चानुपपन्नमिति वाच्यं। अर्चिरादिकमुक्त्वोपसंहरत्येष
देवयानः पंथा इति। श्रुत्यंतरे च स एनं देवयानं पंथानमापद्याग्निलोकमागच्छतीति। तथा च ब्रह्मप्रापकाः सर्वे मार्गा देवयाना इत्युच्यंते। दैवीसंपद्विमोक्षायेति भगव-
द्वाक्याद्दैवीं संपदिये जातास्ते देवा इत्युच्यंते तेषां यानं गमनं यत्रेति ते सर्वेऽपि मार्गा देवयानशब्देनोच्यंते द्वितीयस्तु विशिष्टः। एवं द्वित्वं त्रित्वं चोपपद्यते। न चोक्तरीत्या
लाघवादेक एव समंतव्यः स्वतः प्रमाणभूता हि श्रुतिः सा येन यदा यादृक्तानदर्थविधारणे हि द्वितीयस्यापि अनुपस्थितत्वान्न लाघवगौरवयोर्विचारावसरः। क्वचिदुपर- पा·३
स्थितो चोक्तबाधकैरुपसंहारानवकाशः। अपरं च ब्रह्मविदः क्रममुक्तौ गंतव्यो मार्गोऽर्चियमुपदिश्यते। तत्र ह्यो केतहानं दानुभवस्थावरूपकस्य था चोपासनभेदा १२

ध

७ × भ्यां॥ ॥छांदोग्ये वायुर्न पठ्यते कौशीतकिश्रुतौ तु स एतं देवयानं पं
थानमापद्याग्नि × ७

स्फलनेरस्यावरूपकत्वान्मार्गनिर्देशोपि तथेति सर्वैश्चैकरूपफलप्रसंजकउपसंहारो न युक्तः। किंच। उपासनेकर्मणि चोपसंहारः संभवतः मार्गस्तु नान्यतररूपोऽतो यस्योपासकस्य येन मार्गेण गमनं स
मार्गउपदिश्यत इति नोपसंहारो युक्तः। अविधेयत्वाद्दर्पितथा॥ एतद्यथा तथाऽस्माभिर्निरूपितमुपसंहारो यस्तन्निर्देशाद्विधिशेषवदसमाने चेत्यत्र। एवं सत्यर्चिषश्चाद्ये नार्चिरूपलक्षितो मार्ग
उच्यते। आदिपदेनान्ये सर्वे मार्गाः संगृह्यंत इति नानुपपत्तिः काचिदिति चेत्। अत्र वदामः। अर्चिरादिस्य इत्यस्मिन्वेव इति रेव चेत्। अभिप्रेता भवेत्तस्मान्नैवंमित्यवधार्यते। अर्चिरादिने
त्येकवचनान्यथानुपपत्त्या मार्गस्यैकत्वमवश्यमङ्गीकार्यमेवं सति श्रुतिषु यावंति पर्वाण्युक्तानि तानि सर्वाण्येकस्मिन्नेवार्चिरादिमार्गे वर्त्तमानान्यपि यस्योपासकस्य यावत्पर्वणो योगो भावी तं प्र
तितावत्पर्वोक्तिर्यस्य यावतां तेषां सत्वावितं प्रति तदुक्तिस्तद्योगाभावादिति नानुपपन्नं किंचित्। ननु त्वयाप्युक्तानां पर्वणां तत्र स्थितिं वदतोपसंहार एवोक्तो भवति प्रापकत्वेनेति चेत्। स्या
देतदेवं यदि तस्यैव गंतुर्योगाय तदपि प्रवर्तितो येतन त्वेवं किंत्वेकवचनानुरोधान्मार्गैक्ये निश्चिते यं प्रतियत्पर्वोक्तं तत्र कं वा क्रममेवेति नोपसंहारापेक्षा। अथ येऽन्य ओक्तानां पर्वणामनुक्तस्थ
नेसंनिवेशोक्त्यापि सूत्रकाराभिमत एक एव मार्ग इति ज्ञायते। अतो सर्वत्र पूर्वपरामर्शाद्दर्पितथा॥ ॥वायुमब्दादविशेषविशेषाभ्यां॥ लोकमागच्छति स वायुलोकं स वरुणलोकं स इंद्रलोकं प्र स
जापतिलोकं स ब्रह्मलोकमिति वाय्वादयः श्रूयंते तत्रार्चिषोऽनंतरत्वेनेदानीं विचारणीयमस्ति। वायुलोकं कस्माल्लोकादागच्छतीत्याकांक्षायामाह॥ वायुमब्दादिति॥ ॥अर्चिषोहरह्न आपूर्यमा ०
णपक्षमापूर्यमाणपक्षाद्यान्षडुदङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमित्यत्र संवत्सरलोकात्परस्ताद्वायुलोको निवेशयितव्यस्तथा च संवत्सरलोकाद्वायुलोकं गच्छतीत्यर्थः। नत्र विनि
गमकमाह। अविशेषविशेषाभ्यामिति। अत्रेदं ज्ञेयं। अग्निहोत्रादिकर्मनिश्चितस्तद्वदुपासनाभिज्ञोनोदये क्रममुक्त्यधिकारीहितत्र लोकं गत्वानुक्रांते ब्रह्म सप्राप्नोति। कर्मत्वग्निसाध्यं चंद्रलोक एव

भ्यां [illegible] ति ६

दा

चन वर्त्यत आदौ तत्रत्यो भोगस्तत्तदुपरितनलोकानां। पृथिवीदीनां तथाऽग्निर्दीप्त्यादीक्षितः। यथा पृथिव्यग्निगर्भेत्यादिश्रुतिस्पोक्तरश्मिप्रधाना भवन्त्यतोऽर्चिराख्यमग्निलोकमादौ गच्छन्तीति तत्क
र्मोपासनयोरहरादिसंवत्सरान्ते काले विहितत्वात्तत्र तत्र गत्वा भुंक्ते। तथा च संवत्सरान्तानां क्रमेण बन्धित्वेनाविशेषात्तन्मध्ये वायोर्न प्रवेशः। देवलोकादुपर्यन्तरिक्षलोकस्तदुपरि द्युलोकस्तथा च वायु
रन्तरिक्षस्याधिपतिरिति श्रुतेः सूर्यो दिवोऽधिपतिरिति श्रुतेस्तयोः पौर्वापर्ये विशेषो हेतुस्तस्मादित्यलोकात्पूर्वमुक्तरीत्या देवलोकमध्यपातिसंवत्सरस्य परस्ताच्च वायुर्निवेशितव्य इत्यर्थः। न
नु तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरित्यादिश्रुतिक्रममनूद्यापादानत्वं वदन्ती पूर्वोत्तरयोरव्यवधानं सूचयतीति तेनोक्रमादरणीय इति चेत्सत्यं। यस्योपासकस्य न वायुलोकभोगस्तं प्रति सोक्ति
र्यस्य तु तद्भोगस्तस्योक्तरीतिर्मार्गैक्यादिति नानुपपत्तिः काचित्। केचित्तु स एवं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकमित्यविशेषेण वायुरुपदिश्यते मिथः पौ
र्वापर्यज्ञापकपदाभावात् यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छतीति श्रुत्याऽऽदित्यात्पूर्वो वायु
र्विशेषेणोपदिश्यत इत्यह्वादित्ययोरन्तराले निवेशयितव्य इत्यर्थं वदन्ति। स चिन्त्यते। यथा तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छतीति विशेषोपदेश इत्युच्यते तथा स वरुणलोकमित्य
त्रापि वक्तुं शक्यं। न च स आदित्यमागच्छतीत्यत्र तच्छब्दस्य पूर्वपरामर्शित्वात् वायुलोकगतस्यैव पूर्वत्वान्नयो निवार्यं। अग्निलोकमागच्छति स वायुलोकं स वरुणलोकमित्यत्रापि तुल्यत्वा
त्। किंचैवमग्निलोकानन्तरं वायुलोक इत्यपि वक्तुं शक्यमतो विद्वन्निरूपेक्ष्योऽयं। वाजसनेयिनस्तु मासेभ्यो देवलोकं देवलोकादादित्यमिति पठन्ति तत्राप्यादित्यात्पूर्वो देवलोकोऽपरो वा पा॰२
युर्ज्ञेयः। एकत्रादित्यात्पूर्वत्वे सिद्धे मार्गैक्यादन्यत्रापि तथात्वस्य न्यायप्राप्तत्वात्। सूत्रकारेण तु छंदोगापेक्षयोक्तं वायुमब्दादिति। एवं स इति मासेभ्यः परस्तादब्दान्निवेशनं कार्यं न च १७

२४ श्रुतेर्गमयित्रैव ब्रह्मप्राप्तिरिति निश्चीयते। स च विद्युदनंतरमेव पश्यते। एवं सति यस्य ४५

वायुमब्दादिति सूत्रान्मार्गनेतापत्तिः। देवलोकस्यादित्याधिष्ठेयत्वेनादित्यमध्यपातित्वमभिप्रेत्य छंदोगश्रुतिस्तथोक्तवतीनदनुसारेणाप्यासोप्यनो नानुपपत्तिः॥ ॥तडितोधि
वरुणःसंबंधात्॥ ॥आदित्याच्चंद्रमसं चंद्रमसो वि◌द्युतमित्यत्र पठितविद्युल्लोकात्परतो वरुणलोको निवेशनीयः। तत्र हेतुः संबंधात्। तडितोऽस्य संबंधित्वाद्वरुणस्य तत्स्यतित्वा
तथा। वरुणाच्चाधींद्रप्रजापती। स्पष्टमिदं। अर्चिरादिपाठे विद्युदनंतरं तत्पुरुषोऽमानवः स एतान्ब्रह्मगमयतीति पठ्यमानेन तु यस्योपासकस्य वरुणादिलोकगमनापेक्षाऽस्ति तमपेक्षेति ना ३
ज्ञेयं। मार्गैक्यनियममभिप्रेत्य सूत्रकारेणान्यत्रोक्तानामन्येषामपि लोकानां तत्रैव निवेशनमाह॥३॥ आतिवाहिकास्तल्लिंगात्॥ ॥विद्युदनंतरं तत्पुरुषोऽमानवः स एतान्ब्रह्मगमय
तीत्यत्र भवति संशयः। उक्तं वरुणादिलोकगमनं तस्य वचनान्नावेन गमयित्रप्राप्तेर्ब्रह्मप्राप्तिर्भवति न वेति। तत्र वाचनिकस्य यावद्वचनत्वात्तदभावेन मानवत्वीप्राप्त्याह। आति ति ५
वाहिका इति। एतदुक्तं भवति। यस्योपासकस्य यावत्फलभोगानंतरं ब्रह्मप्राप्तिर्भाविनी तस्य तावत्फलभोगानंतरं ब्रह्मप्राप्तिर्भवत्यत एव कोशीतकिश्रुतौ प्रजापतिलोकानंतरं ब्रह्म
लोकप्राप्तेः। अन्यथा कृतसाधनवैयर्थ्यं तेषां ब्रह्मप्राप्तिसाधनत्वबोधकश्रुतिविरोधश्च स्यात्। तथा च यत्रातिवाहिकश्रुतिर्नास्ति तत्राप्यातिवाहिको भगवद्दूत एव ब्रह्म प्रापयती
ति ज्ञेयं। वस्तुतस्तु ब्रह्मवदेव तादृशाः संतीति ज्ञापनाय बहुवचनमत्रोक्तं तन्मध्येकस्यचिदागत्यैक एव न सर्वतोऽति ज्ञापनाय श्रुतावेकवचनं तत्र हेतुस्तल्लिंगात्। पुरुषोऽमानव इत्यत्र प
ब्रह्मसंबंधित्वं लिंगमुच्यते तेनेदं ज्ञाप्यते यथा विद्याबलात्तत्तल्लोकप्राप्तिस्तथैव ब्रह्मप्राप्तिरपीति न किंतु भगवदीयपुरुषानुग्रहेणैवेति। न च सर्वे सर्वलोकाधिष्ठातृदेवा उत्तरोत्तरलो
कं प्रत्यातिवाहिका यथा तथा ब्रह्मप्राप्त्यवहितपूर्वलोकदेवा एव ब्रह्मप्रापका इति तत्पदेन स लोक एवोच्यत इति वाच्यं। तदेतरलोकेषु तदकल्पनेयथा तथात्रापि न कल्पयेत्

लोकाधिष्ठातृदेवानामातिवाहिकत्वोक्तावर्च्चिरादेर्लोकप्रापकातिवाहिकस्याभावान्नप्राप्तिर्नस्यात्तथा मतिर्देवयानमार्गए बोढिघेतातो यथा विद्याबलेनैवार्चिषः प्राप्तिस्तथेतरेषा
मपीतिबुध्यस्व। कस्यचिदर्च्चिर्लोकगत्यनंतरमेव ब्रह्मप्राप्तिः कस्यचिद्विद्युल्लोकगत्यनंतरं सोऽप्यत इति भोगभूमित्वमेवनेषामवगंतव्यं। सर्वेषां सर्वत्रगमने देवयानं पंथानं वदंत्या
ःश्रुतेः मामितत्कथनमनुपपन्नं स्याद् तदुपासनाभेदेन फलभेदं स्थापयंतीत यथा वदंती ति शुक्लस्तुत्पश्यामः। ननु तेषामिह न पुनरावृत्तिरस्तीत्यादिश्रुतिभ्यो देवयानेन पथानं प्राप्तानां पुं
सां ब्रह्मवित्त्वमवश्यं वाच्यं। तेन सद्योमुक्तौ संभवत्सांहृयि स्तुत्वेन स्वज्ञानंदत्वेन च हेयानां परमफलप्राप्तिविलंबहेतूनामर्च्चिरादिलोकानां कामना कुतो यतस्तद्धेतुभूतोपासनाः सं
भवंति। किंच। अर्च्चिरादिनातत्स्थितेरित्यत्रयं दुर्कं तानमार्ग्गयमेवार्च्चिरादिप्राप्तिर्नत्रिकिमार्ग्गयस्येति नदप्यनुपपन्नं। यत्कर्म्मभिर्यत्तपसाज्ञानवैराग्यतश्च यदित्कपकम्पमर्चं
मद्भक्तियोगेन मद्भक्तोलभतेंजसा। स्वर्गापवर्गमद्धामकथंचिद्यदिवांछति। तिज गवद्वाक्याद्भक्तस्याप्येतद्वांछाफलेसंभवतोऽन्यथाप्रतुर्नवदेदेवं सतिनक्रिसुखं हित्वा अन्यच्चकामना
यां हेत्वर्वाच्यइत्याकांक्षयां तमाह॥ ॥उभयव्यामोहात्तत्सिद्धेः॥ ॥अत्रेदं ज्ञेयं। देवयानः पं॰ थाश्च पिभगवतैव सृष्टोऽस्ति तथा चोक्तहेतुभिस्तत्र कस्यापि कामाभावेन कृष्टिर्यथा
स्यादितो भगवानेवकांश्च व्यामोहयति ज्ञानिनो मर्यादामार्ग्गीयभक्तांश्चातस्तत्कामना। सिद्धेस्तत्फलभोग इति। यत्तर्च्चिरादिमार्गगंतॄणां देहवियोगेन संपिंडितकरणग्रामत्वेना॰
स्वातंत्र्यं व्यामोहः। अर्च्चिरादीनां चाचेतनत्वेनास्वातंत्र्यं व्यामोहः कार्यकरणासामर्थ्यमिति यावत्तेनार्च्चिराद्यधिष्ठातृदेवैरतिवाह्यंत इति सिद्धमिति व्याख्यानं तन्नमाधीयः। व्यामो पा॰ ३
हशब्दस्यान्यथा तानवाचकत्वेनासामर्थ्यावाचकत्वात्। तथासत्यर्च्चिर्लोकमपि न प्राप्नुयात् प्रापकाभावादित्युक्तं। ननु विद्युतो वरुणादिलोकप्राप्त्यनंतरं यस्य ब्रह्मप्राप्तिस्तस्यातत्वो १५

कसंबंधी ब्रह्मप्रापकः पुरुषोत्युक्तमस्वतएव तन्न्यायाग्रोनातिसंज्ञायउत्तरंपठति। वैद्युतेनैव ततस्तच्छ्रुतेः। नहि ब्रह्मप्राप्तिर्विद्युल्लोकसंबंधिपुरुषसामर्थ्येनोच्यते किंतु ब्रह्मसंबंधितस्मा
मर्थ्येन। तथा च यतएव लोकान्तराप्तिस्ततो ब्रह्मसंबंधिपुरुषादेव। एवंसति विद्युल्लोकान्तराप्तौ यो ब्रह्मसंबंधीपुरुषः प्रापकउक्तस्तेनैव ततो वरुणादिलोकेष्वपि ब्रह्मप्राप्तिस्तत्र
हेतुमाह॥ तच्छ्रुतेः॥ तान्वैद्युतात्पुरुषो मानसएत्य ब्रह्मलोकान्गमयतीति श्रुतेः। अत्र एत्येतिवचनात् यतएव लोकाद्ब्रह्मप्राप्तिर्विवक्षिता तत्रैवागत्य ब्रह्मप्रापयतीति गम्यते। अतो वैद्युतं लो
कमागत्य तस्माद्ब्रह्मलोकान्गमयतीत्युक्तमिति सपुरुषोवैद्युत इत्युच्यते। नतु तल्लोकवासित्वेन तथास्त्येत्येतिनवदेत्तत एव ब्रह्मप्रापणे। अतएव मानस इत्युक्तः। यदेव भगवन्म
नसि भवत्यथैनंमां प्रापयितीति तदेव प्रापयतीति तथा॥ छांदोग्ये त्वमानव इति पठ्यते तेन चालौकिकत्वेन तदप्युक्तरूपमेवेति न कश्चिद्विशेषः। वाजसनेयके ब्रह्मलोकान्गमयतीति पठ्यते
छांदोग्ये तु ब्रह्मेति तत्रायंभावः। न केवलंवैकुंठलोकं नयतीति बहुविधा इति ब्रह्मलोकानित्युक्तं। स्थानमार्गीयं त्वक्षरब्रह्म प्रापयतीति ब्रह्मेत्युक्तं। अतएवोभयव्यामोह उक्तश्चाचा
र्येण। अत्र सिद्धांतद्वादार्थमुक्तमर्थं हस्तापिहितमिव कृत्वा बादरिमतं पूर्वपक्षत्वेनाह॥ ॥कार्यंबादरिरस्यगत्युपपत्तेः॥ ॥सएतान्ब्रह्मगमयतीत्यत्र ब्रह्मपदेनाविकृतं परमेव ब्र-
ह्मोच्यतउत कार्यरूपो ब्रह्मलोक इति भवतिसंशयः। परस्यव्यापकत्वेन देशाविशेषगमयित्रोरनपेक्षितयोरुक्तेः। कार्यरूपएवब्रह्म ब्रह्मपदेनोच्यत इति बादरिराचार्योमन्यते। कुतः
अस्यगत्युपपत्तेः। तस्यपरिछिन्नत्वेन तत्क्षितिदेशं प्रत्यस्य गंतुर्गतेरुपपत्तेरित्यर्थः॥ ॥विशेषितत्वाच्च॥ ॥ब्रह्मलोकान्गमयतितेतेषुब्रह्मलोकेषु पराः परावतो वसंतीति श्रुतौ बहुत्वे-
नवासाधिकरणत्वेन च विशेषिता लोकाः गंतारश्च ह्रदेशागत्याविशेषिता इति न परं ब्रह्मनान्किंतु कार्यमेवेत्यर्थः। लोकपदंतु जन्यभोगपरं। तेन तस्यैकत्वेपि विविधभोगस्थापनाय।

बहुवचनं घटते। तत्र ब्रह्मशब्दप्रयोगहेतुमाह॥ ॥सामीप्यात्तु तद्व्यपदेशः॥ ॥तल्लोकस्थितानां नान्यलोकव्य. धानं परप्राप्तौ। किंतु तत एवेति परब्रह्मसामीप्याद्ब्रह्मत्वेन व्यपदेशः कृ
तः। तुशब्दो मुख्यतो ब्रह्मत्वं व्यवच्छिनत्ति। आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुनेति वाक्यात्तत्रः पुनरावर्त्तते। अत्र तेषामिह न पुनरावृत्तिरस्तीति श्रूयत इति परमेवात्र ब्रह्मशब्दे
नोच्यत इति प्राप्त उत्तरं पठति॥ ॥कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्॥ ॥कल्पसमाप्तौ कार्यस्य ब्रह्मलोकस्य नाशे सति तदध्यक्षेण चतुर्मुखेन ब्रह्मणा सहातो ब्रह्मणः पर
काशात्परमीश्वरं प्राप्नोत्यतोऽपुनरावृत्तिश्रुतिर्न विरुध्यते॥ अत्र प्रमाणमाह॥ ॥अभिधानादिति॥ श्रुतौ तथाऽभिधानादित्यर्थः। मातु वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगा
द्यतयः शुद्धसत्त्वाः॥ ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे॥ इति परान्तकाल इत्यत्र परशब्देन ब्रह्मणः सर्वमायुरुच्यते। उक्तेऽर्थे श्रुतिं प्रमाणत्वेनोक्त्वा स्मृतिमप्याह॥ ॥
स्मृतेश्च॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति स्मृत्यापि स एवार्थः प्रतिपाद्यते। अत्र सिद्धान्तमाह॥ ॥परं जैमिनिर्मुख्यत्वात्॥ ॥स ए
नान्ब्रह्म गमयतीत्यत्र ब्रह्मपदेन परमेव ब्रह्मोच्यत इति जैमिनिराचार्यो मनुते। कुतः मुख्यत्वात्। बृहत्त्वादिधर्मविशिष्टं हि ब्रह्मपदेनोच्यते। तादृक् परमेव ब्रह्म भवतीति मुख्यावृ
त्तिर्ब्रह्मपदस्य परस्मिन्नेवान्यत्र गौणी। तथा च मुख्यगौणयोर्मध्ये मुख्यस्यैव बलिष्ठत्वात्तथा॥ ॥दर्शनाच्च॥ ॥स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरु
णलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकमिति कौशीतकिश्रुतिरग्न्यादिलोकप्राप्तिवद्विशेषेण प्रजापतिलोकप्राप्त्यनन्तरं ब्रह्मलोकप्राप्तिं दर्शयति। न हि तत्र ब्रह्मलो पा·३
कशब्देन कार्यः स उच्यत इति वक्तुं शक्यं पार्थन प्रजापतिलोकस्योक्तत्वात्। अपरं च ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्तीति छान्दोग्यश्रुतिविषयीकृत्यपार्चि १६

क्ये

ण दिनातस्य स्थितेरित्युपक्रमश्चाचार्येण कृतो ऽन्यथा चिंत्यब्रह्मणो ऽभावात्तत्र चांते ब्रह्मगमयतीत्युच्यते। तथा च छांदोग्ये ऽनुक्तानामप्यत्रोक्तानां लोकानां मार्गैक्यसिद्ध्यर्थं तत्रैव संनिवेशो वायुमब्दात्तडितो ऽधिवरुणे च वरुणाच्चाधीन्द्रप्रजापती इत्यंतेनोक्तः। एवं सत्यादावर्चिषं ततो ऽहस्ततः सितपक्षं तत उदगयनं ततः संवत्सरं ततो वायुं ततो देवलोकं ततश्चादित्यं ततश्चंद्रमसं ततो विद्युतं ततो वरुणं तत इंद्रं ततः प्रजापतिं ततस्तस्मान्मानवेन पुरुषेण ब्रह्मप्राप्तिनिर्णयः संपद्यते। एवं सति प्रजापतिलोकादन्यस्य कार्यब्रह्मलोकस्यासंभवात्तच्छंकापि नवितुं नार्हति यद्यपि तथापि व्यामोक्तमार्गैक्यममन्वानस्य पा ऽवददिति ज्ञायते। परंतु वेदार्थनिर्णयार्थमेव प्रवृत्तत्वाद्भगवद्वक्तृत्वाच्च तदुक्त एव शास्त्रार्थ इति मंतव्यं। किंच। सप्रजापतिलोकं स ब्रह्मलोकमित्यत्र ब्रह्मपदस्य परवाचकत्वं तेनापि बाध्यं चेत्तद्दृष्टांतेनान्यत्रापि तथैव वाच्यं बाधकाभावात्। ननु परस्य व्यापकत्वान्निर्विशेषत्वाच्च न गंतव्यतोपपद्यते। जीवस्याप्यविद्योपाध्यवच्छिन्नतादशायां परब्रह्मणि गंतृत्वासंभवात्तत्राविद्यैवस्कतो ऽनित्यत्वात्स्वरूपेणावस्थानमेव भवतीति न गंतृत्वमप्युपपद्यते तस्यैवाभावात्। जीवत्वदशायां तूपाध्यवच्छेदाद्गंतृत्वं जीवस्यापरस्य ब्रह्मणश्चाविद्यकरूपनामवत्त्वेन गंतव्यता चोपपद्यते। उपासनाफलादस्य गमनस्योपास्यस्य च सगुणत्वेन तन्मात्रे रेवोचितत्वाच्च। निर्गुणब्रह्मविद्यावतो गंतृत्वासंभव इत्युपक्रमतो बादरिमतमेव साधीयः। न च ब्रह्मपदस्य मुख्यार्थत्वमुक्तरीत्यात्र संभवत्यतो ऽत्रामुख्यार्थत्वमेवानुसर्तव्यमिति। चेन्न। स्यादेतदेवं यद्यौपाधिकमुपास्यरूपं जीवत्वं वा स्यान्न त्वेवं प्रकृतैतावत्त्वं हि प्रतिषेधतीत्यादिभिस्तद्गुणसारत्वात्तु तद्व्यपदेश इत्याद्यधिकरणैः कृत्स्नार्थनिर्णयेन ब्रह्मणि विशेषाणामौपाधिकत्वस्य जीवपुरुषोत्तमाभेदस्य च पुरस्तादेव निरस्तत्वात्। न च व्यापकत्वं गंतव्यत्वे बाधकं प्रारब्धभोगं विना तस्याप्यसंभवाद्यदा यत्र तद्भोगसमाप्तिस्तदा तत्र तत्

प्राप्तेर्निष्प्रस्पृहत्वात्। किंच। उपास्यरूपाणां सर्वेषां निर्गुणत्वमेवोपासकस्य परं सगुणत्वेन तत्तारतम्यात्फलतारतम्यं। यस्तु भगवदनुग्रहेण प्राकृतगुणरहितो ब्रह्म निर्गुणब
ह्मविद्यो निरूप्यते। तादृशस्यैव मुक्तिप्रकारद्वयमुक्तं सद्योमुक्तिक्रममुक्तिभेदेन। न तस्मात्प्राणा उत्क्रामंत्यत्रैव समवनीयंते ब्रह्मैव सन्ब्रह्माप्येतीत्यादिश्रुतिस्तु प्रारब्धरहित
।विषया। निर्गुणब्रह्मविद्यावतोपि प्रारब्धभोगस्त्वयापि वाच्यो न्यथा प्रवचनासंभवेन ज्ञानमार्ग एवोच्छिद्येतेति ब्रह्मलोकेतु परांतकाल इति श्रुतिरपि परांतकाल एव येषां प्रा
रब्धभोगसमाप्तिस्तद्विषयिणीति मंतव्यमन्यथा वेदांतविज्ञानेत्याद्युक्तधर्मविशिष्टानां मुक्तौ विलंबो नोपपद्येतेति दिक्॥ ॥नकार्ये प्रतिपत्त्यभिसंधिः॥ ॥अपि च॥ ब्रह्म च
।विदाप्नोति परमिति संक्षेपेणोक्तानंदप्राप्त्युक्तेस्तद्विवरिकामृचं प्रस्तुत्य सोक्ता। सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्। सोश्नुते सर्वान्कामान्सह ब्रह्मणा। विप
।श्चितेति श्रुत्योपक्रमानुरोधेन परेणैव ब्रह्मणा सह सर्वकामभोगलक्षणा प्रतिपत्तिरुच्यत इति कार्यरूपे वस्तुमात्रे प्रतिपत्तिर्न कापि श्रुतेरभिप्रेताऽतोत्रापि परमेव ब्रह्मपदेनोच्य
ते। अगर्थस्त्वानंदमयाधिकरणे प्रपंचित इति नात्रोक्तः॥ ॥अप्रतीकालंबनान्नयतीति बादरायण उभयथा दोषात्तत्क्रतुश्च॥ ॥क्रममुक्त्यधिकारिणः प्रारब्धं तुक्ताऽमानवेन पुरुषे नौ
ण प्रापिताः परमेव ब्रह्म प्राप्नुवंतीति सिद्धं॥ तत्रेदं संदिह्यते। अर्चिरादिलोकप्राप्तिस्तूपासनाविशेषफलं। एवं सत्यमानवः पुरुषस्तान्सर्वान्ब्रह्म प्रापयत्युत कांश्चिदेवेति। किमत्र यु
क्तं सर्वानेवेति। यतोऽर्चिरादिमार्गगतानामंते ब्रह्मप्रापणार्थमेव स नियुक्तस्ततोन्यथाकरणे हेत्वभावात्तथैव सकलैरिति प्राप्त उच्यते। अतो ब्रह्मत्वेनैव सर्वत्रोपासनाया उक्तत्वादुपास्ये पा॰२
ष्वभगवद्विभूतिरूपत्वेन शुद्धब्रह्मरूपेष्वप्यतथात्वं ज्ञात्वा श्रुतिर्ब्रह्मत्वेनोपासनायाः फलसाधनत्वं वदति न तूपास्ये ब्रह्मतामपीति मत्वा नाम्य उपासते ते प्रतीकालंबना इत्युच्यंते॥ त १७

ते २

ध्याच सत्यपि वेदविहितत्वेनोपासनाया कृतत्वेन सफलत्वात्तत्फलत्वेनोपासकानामर्चिरादिना लोकप्राप्तास्वपि तानमानवः पुरुषो ब्रह्म न प्रापयति । किंतु शुद्धब्रह्मत्वेनात्मत्वायत्तउपास
तेतानेव ब्रह्म प्रापयतीति बादरायण आचार्यो मन्यते । तत्र हेतुमाह उभयथा दोषादिति । ब्रह्मक्रतोर्यद्ब्रह्मरूपं तत्राब्रह्मत्वनिश्चयउपासनायां च ब्रह्मत्वेन भावनमेवमुभयथाकरणे दो
षः संपद्यत इति तस्मान्न ब्रह्मप्राप्तावधिकारोस्तीति युक्तं तदनयनमित्यर्थः । तथा च श्रुतिः । असन्नेव स भवति । असद्ब्रह्मेति वेद चेदिति । योन्यथा संतमात्मानमन्यथा प्रतिपद्यते किं तेन न
कृतं पापं चोरेणात्मापहारिणेति एवं तानर्चिमार्गिमव्यवस्थामुक्त्वानर्चिमार्गीयस्यापि तामाह । तत्क्रतुश्चेति । सर्वमद्वियोगेनेति वाक्यात्ततस्योपासनापेक्षेति न प्रतीकादिसंभावनात्तत्र । क
थंचिद्यदि वांछतीति वाक्यादिच्छामात्रेण तद्योगकरणानंतरं प्राचीनभगवद्भजनलक्षणक्रतुश्च नियत इत्यर्थः । ब्रह्मक्रतुस्तत्क्रतुन्यायाममानवपुरुषमपेक्षाभावात्स्वयमेव ब्रह्मलोकान्प्राप्नोतीति ज्ञा
पनाय प्रथमं तदुक्तः । ननु ब्रह्मणोऽधिकं किंचिदस्ति न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुतेः । एवं सति छांदोग्ये सनत्कुमारनारदसंवादे स यो नाम ब्रह्मेत्युपास्त इत्यादिना नामवाङ्मनःसंकल्प
चित्तध्यानविज्ञानादीनां ब्रह्मत्वेनोपासनमुत्तरोत्तरं पूर्वस्माद्भूयस्त्वं चोच्यतेऽतो न ब्रह्मत्वं सर्वेषामुपास्यानां वक्तुं शक्यमिति चेत्तन्नैवं ॥ विभूतिरूपाणां नियतफलदातृत्वाद्येन रूपेणाल्पफ
लदानं तत्राधिकगुणप्राकट्यप्रयोजनाभावात्तावन्मात्रगुणप्रकटनं । येन रूपेण ततोऽधिकफलदानं तत्र ततोऽधिकगुणप्रकटनमिति पूर्वस्मादाधिक्यमुच्यते । एवमेव सर्वत्र नियतफल
दानं ब्रह्मत्वं चेष्टत्वाल्लीलारूपमिति नानुपपन्नं किंचित् । प्रतिमादिष्वावाहनेन संनिहिते विभूतिरूपेण ज्ञावनं । प्रज्ञा मार्गे नार्चिमार्गेऽत्र न्यासात्तत्र प्रकटेन यथा । गुरौ तु शाब्दे परे च निष्णातं ब्रह्मणीति वि
शेषणवत्त्वेन भगवदावेशात्तत्र तद्भावनमिति सर्वमवदातं । अपि च । बादरिजैमिनिमतोक्त्यनंतरं स्वमतोक्त्यात्तत्समानविषयत्वमत्रापीत्यवगम्यते । तच्च कार्यब्रह्मलोकप्राप्तिपरब्रह्मप्राप्तिविषय

ति १

त

त्वमुक्तं स्वेत्तिरपक्षभेदेन बादरिमतेन सविशेषस्यैवोपास्यत्वाद्विशेषाणां चाविद्यकत्वादुपासनानां सर्वासां प्रतीकवन्नश्वरत्वमेव सिध्यति। एवं सत्यप्रतीकालंबनान्नयतीति वदता व्यासेन बादरि
मतानुसारिणा उपासकस्य न कस्यापि ब्रह्मप्राप्तिरिति ज्ञाप्यते। वस्तुतस्तूपासनायामुपास्यरूपज्ञानस्याप्यंगत्वान्नमतीयानामुक्तरीत्यादभावेन निरंगत्वादर्चिरादिप्राप्तिरपि न संभवति।
किंतु न ब्रह्मण इति निगूढाशयो व्यासस्य। एवं सति पुरुषाभावे वोढलकमुक्तं भवतीति सेव व्यामाभिमतेति सिद्धं। ये त्वप्रतीकेष्वब्रह्मक्रतुत्वं वदंतः पंचाग्निविद्यायास्तथात्वेपि वचनबलान्न ब्र
तो ब्रह्मप्राप्तिरिति वदंति तन्नेदमुच्यते। वचनं तु वस्तुतः सत्पदार्थस्य बोधकं न तु कारकमतस्तच्चेद्बोधयति तदाप्रतीकालंबनान्नयतीति व्यासोक्तविरोधापत्तत्राप्यप्रतीकत्वमूरीकार्यम
न्यथा पंचाग्निविद्यानिरूपिका श्रुतिरप्यत्रैवं न वदेत्। न चोक्तश्रुतेः किं प्रयोजनमित्यतथोक्तमिति वाच्यं। तस्य बाधकापनोदत्वाद्वचनस्य चोक्तन्यायेनाबाधकत्वात्। यत्र वचनस्य बाधकत्व
मुच्यते तत्र बाधबोधकत्वमेव न तु तथात्वमित्युक्तरूपेणीयास्ते। ननु मनःप्रभृतीनां तु ब्रह्मत्वे मनो ब्रह्मोपास्त इति वदेत्तु प्रकारवाचीति शाखाशिरस्कब्रह्मपदमत उपासनाप्रकारावच्छेदक
त्वमेव ब्रह्मपदस्य न तु स्वरूपनिरूपकत्वमिति चेन्न। हंतेदं शास्त्रार्थनवगाविज्ञं। जितमेव यतो मन उपास्ते त्स्फलकान्तदुपासनाफलं यावन्मनो गतं तत्रास्य कामचारो भवतीति वदिष्यंस्तदुपासनाया एतत्
फलसाधकत्वे प्रयोजकत्वं शाखायामाश मनो ब्रह्मेति। इति शाखोक्तहेतुवाची। तथा च यतो मनो ब्रह्मातो हेतोस्तदुपासनं तादृक्फलसाधकमित्यर्थः। अत एव मनो ब्रह्म मन उपास्स्वेति पूर्वमुक्तं
सर्वत्रैवमेव ज्ञेयं। विशेषं च दर्शयति॥ ॥ सर्वाण्युपास्यानि रूपाणि ब्रह्मरूपाण्येवेति तदुपासकानां परप्राप्तिरेवेति सिद्धं। तन्नेदं चिंत्यते। ज्ञानमार्गीयाणां भक्तिमार्गीयाणां चाविशेषेणैव पर पा॰ ३
प्राप्तिरुत कश्चिद्विशेषोऽस्तीति। तत्रोभयोरपि ब्रह्मोपासकत्वेनाविशेषेणैव फलं भवतीति प्राप्ते प्रत्याह। विशेषं च दर्शयति। तैत्तिरीयके पठ्यते ब्रह्मविदाप्नोति परमिति गूढा[illegible]भि १८

मंधिनामात्मान एतावदुक्त्वा गूढं तमुद्घाटयन्नतिगोप्यत्वमस्मिन्नर्थेऽनुभवैकवेद्यत्वं च ज्ञापयन्नाह। तदेषाभ्युक्ता। सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान्का
मान्सह ब्रह्मणा विपश्चितेति। नन्वर्वैकं प्रतिपाद्यत्वेनाभिमुखीकृत्येषदुक्तानंदानुभवकर्तृभिरिति शेषः। ब्रह्मविदः परब्रह्मविदाप्नोति सांनिध्यात्परमेवाप्नोति। एतावानर्थो यो वेदेत्यंत
यचोक्तिः अथ परमाप्नोतीत्यस्यार्थ उच्यते। निहितमित्यादिना। अत एव मध्ये क्रियापदमुभयसंबंधित्वज्ञापकमुक्तं। तस्याभिव्यक्तिमर्यादापुष्टिभेदेन द्वैधात्तत्र मर्यादायामुच्यते। गुहायमात्रायोग्ये
यतः नायमात्मा प्रवचनेनेति श्रुत्या भगवद्वरणातिरिक्तसाधननिरासः क्रियते पुरुषोत्तमप्राप्तौ। एवं सत्यपरब्रह्मज्ञानस्य तत्साधनत्वमुच्यमाने तद्विरोधः स्यादतो नैवमेतदर्थो निरूप्यते॥
ज्ञानमार्गीयाणामक्षरज्ञानेनाक्षरप्राप्तिस्तेषां तदेकपर्यवसायित्वात्। भक्तानामेव पुरुषोत्तमपर्यवसायित्वात्। तदुक्तं भगवद्गीतासु। एवं सततयुक्ता य इति प्रश्ने मय्यावेश्य मनो ये मां
। ये त्वक्षरमनिर्देश्यं। श्रीभागवते च भक्त्याहमेकया ग्राह्यः। तस्माद्भक्तियुक्तस्येत्युपक्रम्य न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहेत्यादिना। तथा च ब्रह्मविदं चेद्भगवान्वृणुते तदा भक्तिरुदे
ति। तत्प्रचुरभावे सति स्वयं तद्धृदि प्रकटो भविष्णुः स्वस्थानत्वं व्यापिवैकुण्ठं तद्गुहायां हृदयाकाशे प्रकटीकरोति तत्परमव्योमशब्देनोच्यते अलौकिकप्रयोगेणास्यालौकिकत्वं ज्ञाप्य
ते यथा स्वस्यापि तत्स्वरूपं स्वदर्शनयोग्यं भवति तथात्र भगवानपीति ज्ञापनाय निहितमित्युक्तं। तथा च परमाप्नोतीति पदविवृतिरूपत्वादस्य गुहायां परमे व्योम्नि निहितं यो वेद सना
स्य प्राणा उत्क्रामंतीहैव समवनीयंते ब्रह्मैव सन्ब्रह्माप्येतीति श्रुत्युक्तरीत्या परमाप्नोतीत्यर्थः संपद्यते। अथ शुद्धपुष्टिमार्गीयज्ञानस्य व्यवस्थामाह। सोऽश्नुत इत्यादिना। अत्रायमभिसं
धिः। यथा स्वयं प्रकटीभूय लोके लीलां करोति तथात्यनुग्रहवशात्स्वांतःस्थितमपि भक्तं प्रकटीकृत्य तत्स्नेहातिशयेन तद्वशः सन् स्वलीलारसानुभवं कारयतीति सह भक्तो ब्रह्मणा परब्रह्म

दो

पि

न

ण्णाः पुरुषोत्तमेन सह सर्वान्कामाश्नुत इति। चकारादुक्ताः श्रुतिः स्मृतयश्च संगृह्यंते। एवं मतिज्ञानमार्गीयाणाममृतत्वप्राप्तिरेव न कामानामेव पुरुषोत्तमप्राप्तिरिति सिद्धं॥ ॥इति श्रीवेद
व्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये चतुर्थाध्यायस्य तृतीयः पादः समाप्तः॥ ॥संपद्याविर्भावः स्वेन शब्दात्॥ ॥ब्रह्मविदाप्नोति परमित्युपक्रम्य सोऽश्नुते स
र्वान्कामान्सह ब्रह्मणा विपश्चितेति तैत्तिरीयके पठ्यते। तत्रेदं संदिह्यते। किमंतःस्थित एवास्तु न उत पुनर्जन्म प्राप्येति। तत्रांत्यस्त्वनुपपन्नः न स पुनरावर्त्तते। तेषामिह न पुनरावृत्तिरस्ती
त्यादिश्रुतिविरोधात्कर्माभावाच्चेति प्राप्ते प्रतिवदति। संपद्य ब्रह्म संपद्यापि स्थितस्य जीवस्य प्रभोरत्यनुग्रहवशात्स्वरूपात्मकभजनानंददित्सायां तत्कृत आविर्भावो भवत्येव। आ
विर्भावस्य भगवदधीनत्वज्ञापनायास्यात्र कर्मत्वं नोक्तं। ननूक्तं न स पुनरावर्त्तत इत्यादिश्रुतिविरोधः कर्माभावश्च बाधक इत्यत आह। स्वेनेति। स्वशब्दोऽत्र भगवद्वाचीति घाच
भगवत्स्वरूपबलेनैवाविर्भाव इत्यर्थः। एवं सत्युक्तश्रुतिर्मर्यादामार्गविषयिणीति न विरोध इति भावः। तेषामिह प्रपंचेन पुनरावृत्तिरस्तीति श्रुतिराह। लीलायाः प्रपंचातीतत्वा
त्तत्राविर्भावस्य निषेधाविषयत्वादपि न विरोधः। अत्र च प्रमाणाकांक्षायामाह। शब्दादिति। सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति श्रुतिः पुरुषोत्तमेन सह सर्वकामभोगं वदति
स च न विग्रहं विना संभवतीति श्रुतिबलादेव तथा मंतव्यमित्यर्थः। हेत्वंतरमाह। मुक्तिप्रतिज्ञानात्। अत्रोपक्रम एव ब्रह्मविदाप्नोति परमिति वाक्येन परप्राप्तिलक्षणां मुक्तिं प्रतिज्ञाय
इतद्विवृतिरेव सोऽश्नुत इत्यादिना क्रियते तेन पुष्टिमार्गीयमुक्तिरूपत्वमेव तस्याख्यानस्य सिध्यत्यतोऽपि हेतोः सदाविर्भावस्य न लौकिकत्वं न चावृत्तिरूपत्वमित्यर्थः॥ ॥आत्माप्रक पा॰४
रणात्॥ ॥ननु परस्य ब्रह्मणो निर्गुणत्वात्कामभोगस्य गुणसाध्यत्वात्सह ब्रह्मणेत्यत्र ब्रह्मपदं सगुणानत्परमतो न तस्य मुक्तिरूपत्वमित्यत आह। अत्र ब्रह्मपदेनात्मा व्यापको मा १७

मायातद्गुणसंबंधरहितो यः स एवोच्यते। कुतः प्रकरणात्। ब्रह्मविदाप्नोति परमित्युपक्रम्य तत्पावागुणातीतस्यैवैतत्प्रकरणमिति तद्वाच्ब्रह्मशब्देनोच्यत इत्यर्थः॥ ॥अविभा
गेन दृष्टत्वात्॥ ॥ननु ब्रह्मविदाप्नोति परमिति भिन्नं वाक्यमस्ति त्वातो नैकं प्रकरणमिति सगुणमेव तत्र ब्रह्मपदेनोच्यत इत्याशंक्य प्रतिवदन्ति। सर्ववाक्येन सममविभागेनैवेयमृक्
पठिता न तु विभागेन। कुतः। दृष्टत्वात्। ब्रह्मविदिति वाक्यानंतरं तत्पूर्वोक्तमर्थं प्रतिपाद्यत्वेनाभिमुखीकृत्यैषर्गुक्तेति श्रुतेर्दृश्यते। तदेषाभ्युक्तेति तेन सर्ववाक्योक्तार्थमधिकृत्यै
वर्गुच्यत इति गुणातीतमेव तद्ब्रह्म वाच्यमित्यर्थः॥ ॥ब्राह्मेण जैमिनिरुपन्यासादिभ्यः॥ ॥सर्वेण मुक्तो जीवो भगवदनुग्रहातिशयेच्छातो बहिराविर्भूतो गुणातीतेन पुरुषोत्तमेनैव
सह सर्वान्कामानश्नुत इति सिद्धं॥ अथ तत्रैवेदं विचार्यते। आविर्भूतो जीवः प्राकृतेन शरीरेण भुंक्त उताप्राकृतेनेति। तत्र भोगस्य लौकिकत्वेन तदायतनस्यापि तादृशेनैव भवित
व्यमिति मन्वानं प्रत्याह। ब्राह्मेण ब्रह्मसंबंधिना ब्रह्मणा भगवतैव स्वभोगानुरूपतया संपादितेन सत्यज्ञानानंदात्मकेन शरीरेण सर्वान्कामानश्नुत इति जैमिनिराचार्यो मनुते। तत्र हे
तुरुपन्यासादिभ्य इति। ब्रह्मविदाप्नोति परमिति ब्रह्मविदः परप्राप्तिं प्रतिज्ञाय तदर्थस्यैवोपन्यासोऽग्रिमवाक्ये क्रियते सोऽश्नुत इत्यादिना। तथाच परप्राप्तेर्मुक्तिरूपत्वात्पुष्टिमार्ग
मायास्तस्या एवंरूपत्वादक्षरब्रह्मणः पुरुषोत्तमायतनरूपत्वात्तदात्मकमेव शरीरं तस्य वक्तुमुचितं। नहि प्राकृतं। एतद्बोधनायैवाग्रेऽन्नमयादीनि विभूतिरूपाण्युक्तानि। नक शरीरेषु प्र
तीयमानानामर्थानां विभूतिरूपत्वेन ब्रह्मात्मत्वं तेन साधितं भवति। इदमेवादिपदेन बहुवचनेन च ज्ञाप्यते। एतदानंदमयाधिकरणे प्रपंचितमतो नात्र पुनरुच्यते। यत्तु कर्मवादिजैमिनि
रेवं मनुते तत्रान्येषामेवमंगीकारे किमाश्चर्यमिति ज्ञापनाय तन्मतोपन्यासः कृतः॥ ॥चितितन्मात्रेण तदात्मत्वादित्यौडुलोमिः॥ ॥यथासैंधवघनोनंतरोबाह्यः कृत्स्नो रसघन एवं

यि

पू॰ध वाअरेऽयमात्मानंतरोबाह्यः कृत्स्नः प्रज्ञानघन इतिश्रुतौ घनपदेन ज्ञानात्मकविग्रहात्मत्वं ब्रह्मणो बोध्यते ऽन्यथा नपदस्य प्रयोजनाभावात्तथाच तादृशेन सह भोगकर्तृता तादृशेनैव भाव्य
मिति चिति चिद्रूपेण ब्रह्मणा। तन्मात्रेण चिन्मात्रेण रूपेण कामाननुभुंक्ते तत्तु विग्रहेण। श्रुतौ जीवस्य तथात्वस्यानुक्तेः। पूर्णानंदत्वाद्भगवतस्तत्संबंधेन तदानंदाननुभवतीत्यर्थः। सं
पद्यते। चिदात्मत्वं जीवस्याप्यतो नैसर्गिकमित्यौडुलोमिराचार्यो मनुते। अशरीरं वावेति श्रुतिरेतादृशान्यवि षयिणीति ज्ञेयं। मुक्तिदशायां तदनुभवस्य भगवदिच्छाविषयत्वाभावात्तत
था तथा चैतदेतज्जातीयकानंदानुभवोस्य भवत्विति भगवदिच्छैव श्रुतौ कामशब्देनोच्यते।। ।।एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः।। ।।परमाचार्यो बादरायणस्तु नैवं म
नुते। ब्रह्मविदाप्नोति परमित्यस्योपन्यास एवमपि विग्रहवत्त्वेनापि कृतो यतस्तथा हि। यो वेद निहितं गुहायामित्यत्र गुहायामुक्तत्वात्तस्या विग्रह एव संभवात्। किंच।। प्रथमांतो
पस्थितत्वेन प्राप्नोतीत्यस्याच ब्रह्मविदः परप्राप्तौ स्वातंत्र्यं ज्ञाप्यते। तदेव ब्रह्मणा सहेतिपदेनोपन्यस्तं तेन ब्रह्मणोपि तत्समानक्रियावत्त्वं ज्ञाप्यते परं त्वप्राधान्येन। तथा च भक्तस्यैव का
मा वक्तुमुचितास्ते च न विग्रहं विना संभवंति किंच। विपश्चितेति विशेषणेन विविधं प्रपश्चिद्रूपत्वमुच्यते। कामभोगोक्तिप्रस्ताव एव न तु ख्यात उपयोग्येव सर्वं वाच्यं। एवं सति भक्तविविध
भावान्यः पति स्वयं भोगचतुरश्चेत्फलं भवति। एतेनापि भक्तविग्रहः सिध्यति। ननु विग्रहस्यागंतुकत्वेन लौकिकत्वादलौकिकेन ब्रह्मणा भोगो विरुद्ध इत्यत आह।। पूर्वभावादिति। भ
क्तिप्राप्तेः पूर्वमेव भगवदिच्छितभोगानुरूपविग्रहाणां सत्त्वाच्चाविरोधः। किंच।। उक्तश्रुतिस्थैः पुरुषोत्तमेन सह भक्तस्य कामभोगो निरूपितः। स यावतार्थेन विना नोपपद्यते तावान्सर्वश्रुत्य पा॰ध
भिमत इति मंतव्यं। तथा च ब्रह्मसंबंधयोग्यानि शरीराणि नित्यानि संत्येव यथानुग्रहो यस्मिन् जीवे स तादृशं तदाविश्य भगवदानंदमश्नुत इति सर्वमवदातं।। ।।संकल्पादेवचतच्छ्रुतेः २०

एवं परप्राप्तिः केषांचिदेव भवति । तत्र हेत्वपेक्षायामाह । भजनानंदं दातुं यमेव संकल्पविषयं करोति । स एवैवं प्राप्नोतीति भगवत्संकल्प एव तत्र हेतुः । तत्र प्रमाणमाह । तच्छ्रुतेः । ना
यमात्मेत्युपक्रम्य यमेवैष वृणुते तेन लभ्य इति श्रुतिः श्रूयतेऽतः स एवात्र हेतुः । अतो प्रवचनादिनिषेधः कृत इत्यत्राप्येवकार उक्तः । चकारात्तत्कृतिनैवैतदनुरूपा परमाप्तिः संप
द्यते ॥ ॥ अत एव चानन्याधिपतिः ॥ ॥ यतो हेतोः साधनं फलं चोक्तरीत्या स्वयमेव नान्योऽतो हेतोस्तेषां कृतिसाधनत्वेन फलत्वेन प्रभुरेव स्फुरति नान्यस्तेनानन्यास्ते । तेषामे १०
वाधिपतिः पुरुषोत्तमः । अन्यत्राधिपत्यं विभूतिरूपैः करोत्यतः सर्वस्याधिपतिरिति श्रुतिरपि न तद्विरुद्धैवेति भावः । चकारान्मदन्यत्ते न जानंति नाहं तेभ्यो मनागपीति भगवद्वाक्यं संगृह्य
ते । अन्यथा सर्वज्ञस्याकुंठितज्ञानशक्तेरेवं कथनमयुक्तं स्यादतः पुष्टिमार्गोनुग्रहैकसाध्यः प्रमाणमार्गाद्विलक्षणस्तत्र विश्वासश्च तथेति सिद्धं ॥ ॥ अभावं बादरिराह ह्येवं ॥ ॥ मु
क्तोपि जीवः पुष्टिमार्गीयलीलातो भगवद्दत्तं विग्रहं प्राप्य भजनानंदं प्राप्नोतीति सिद्धं ॥ अत्र प्रत्यवतिष्ठते । बादरिराचार्यो मुक्तस्य देहाद्यभावं मनुते । तत्र हेतुमाह ह्येवमिति । ब्रह्मविदो
हि मुक्तिरुच्यते ॥ यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्युक्त्वा यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना द्वितीयज्ञाननिषेधमाह । ब्रह्मविदः श्रुतिस्तथा च तस्य
कामभोगवार्ता दूरतरेति । तदा ह्येष्यदेहोपि तथा ॥ ॥ भावं जैमिनिर्विकल्पामननात् ॥ ॥ जैमिनिराचार्यस्तु मुक्तस्य पुंसो देहादेर्भावं संमन्यते । तत्र हेतुर्विकल्पेत्यादि । ब्रह्मविदा
प्नोति परमिति श्रुत्या ब्रह्मज्ञानस्य तत्प्राप्तिसाधनत्वमुच्यते । नायमात्मेति श्रुत्या तु वरणमात्रप्राप्यत्वं । सोऽश्नुत इत्यादिना च परप्राप्त्युपन्यासः क्रियते । इहैव समवनीयंते ब्रह्मै
व सन् ब्रह्माप्येतीति च पठ्यते । एवं सति मिथो विरोधे तदभावायोक्तव्यवस्थानरीत्या ज्ञानमार्गीयस्य ब्रह्मज्ञानेनाक्षरब्रह्मप्राप्तिः । पुष्टिमार्गीयभक्तस्य तु सोऽश्नुत इत्यनेनोक्तापरप्राप्ति

२४ आप्तिसामयिकीमिति किमनुपपन्नं॥ ॥द्वादशाहवदुभयविरोधंबादरायणोतः॥ ॥ ४२

अ·४ रिति व्यवस्थितविकल्प एव श्रुत्यभिमत इति ज्ञायते। तेन नायमात्मेति श्रुतिः अपरप्राप्तिविषयिणी। इहैवेत्यादिकं तु मुक्तमर्यादामार्गीयविषयिणी मंतव्यं। एवं सति पुष्टिमार्गीयस्य भो-
गसाधनात्मकविग्रहवत्त्वं निःप्रत्यूहं सिध्यति। तत्केन कं पश्येदित्यादित्यादिनातु ब्रह्मज्ञानसामयिकीं व्यवस्थामाह। न तु तदुत्तरकालीनं परं ब्रह्मणा सह सर्वकामाशनप्रयोजकं शा-
रीरं शरीरत्वस्य कृतजन्यत्वव्याप्यत्वात्तदभावेनाशरीररूपं तच्छ्रोगायतनत्वेन शरीररूपमपीति बादरायण आचार्यो मन्यते। अत्र हेतुरत इति। तथाविधश्रुतेरित्यर्थः। तथा हि। भूमो
वविजिज्ञासितव्य इत्युपक्रम्य तस्य स्वरूपमाह। यो वै भूमा तत्सुखमित्युपक्रम्य यत्र नान्यत्पश्यति। नान्यच्छृणोति नान्यद्विजानाति स भूमेत्यनेन केवलभावविषयत्वेन पुरुषो-
त्तमलक्षणमुक्त्वा केवलभाववतो भक्तस्य विप्रयोगसामयिकीं व्यवस्थामाह। स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तादित्यादिना। ततः स वा एष एवं पश्यन्नेवं मन्वान एवं विजा-
नन्निति सर्वावस्थामनूद्य संयोगावस्थामाह। आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानंद इति वाक्येन सोऽश्नुत इति संवादिनमर्थमुक्त्वा भक्तस्य रूपमाह। तस्य ह वा एतस्यैवं पश्यत
एवं मन्वानस्यैवं विजानत आत्मतः प्राण इत्युपक्रम्यात्मत एवेदं सर्वमिति। तेनाशरीरत्वं सिध्यति अव्ययप्रयोगेण विलसतादेव पुरुषोत्तमात्प्राणाद्याविर्भाव उच्यते। अत्र ब्लो ल्यो
पेपंचमी। सर्वविरहदशायां प्राणादयो भगवत्येव लीना आसंस्ततस्तत्प्राकट्येन त एव प्राणादयो विसंपन्ना इति तस्मात् निमित्तत्वं यतः। विभूतिरूपाणामपि पुरुषोत्तमे लयो नानु-
पपन्नः आत्मरतिरित्यादिना सोऽश्नुत इत्यनेन चाशरीरत्वं। जैमिनिरप्यत एव ब्रह्मणेति मनुते। एकस्य विरुद्धोभयधर्मसमाधानं प्रतिवैदिकं दृष्टांतमाह। द्वादशाहवदिति। यः काम- पा·४
येत प्रजायेयेति स द्वादशरात्रेण यजेतेति चोदनया द्विरात्रेण यजेतेत्यादिवन्नियतकर्तृकत्वेनाहीनत्वं गम्यते द्वादशाहस्य। द्वादशाहमृद्धिकामा उपेयुः। एवं विद्वांसः सत्रमुपयंती।१ २१

निष्क्रान्त्या च सत्रत्वं बहुकर्तृकस्य गम्यते। एवमेव द्वादशांगशरीरेंद्रियप्राणांतःकरणात्मभिरष्कृत इति सत्र उत्पत्तौ। वस्तुतो भगवद्भिन्ननिरूपत्वे ब्रह्मसात्मत्वे नैकरूपत्वमतो द्वादशाहवदुनयविधं। सत्रे प्रत्येकं चेतनानां यजमानानां फलभागित्वश्रवणादपि तादृग्भक्तदेहादीनामपि ब्रह्मात्मकत्वाच्चेतनत्वमेवेत्यप्यनेन दृष्टांतेन ज्ञाप्यते। अत एव श्रीभागवते देहेंद्रियासुहीनानां वैकुंठपुरवासिनामिति निरूप्यते॥ ॥तन्वभावे संध्यवदुपपत्तेः॥ ॥अथेदं चिंत्यते। भगवत्स्वरूपे प्राकृतशरीरस्येवावस्था तद्रूपेणेन तत्कालीनैः पुंभिरिति कथमप्राकृतत्वमुपपद्यत इति तत्रोपपत्तिमाह। तद्दर्शनस्य वास्तववस्तुविषयकत्वव्यवच्छेदेन स्वपक्षसुदामायत्तत्वात्। तत्प्राकृतत्वप्रतादर्शनमभावेतथात्वस्याभाव एव भवतु इति न तत्र प्राकृतताधर्मः संति न त्वविद्यमानानामर्थानां कथं दर्शनमुपपद्यत इत्यत आह। संध्यवदिति॥ स्वप्ने यथा वासनावशाद्विद्यमानानामप्यर्थानां दर्शनं भवति तथा भगवदिच्छावशात्तत्रापि प्राकृतत्वस्य दर्शनस्योपपत्तेर्न प्राकृतत्वं तत्र ज्ञेयमित्यर्थः। तथा च श्रुतिः। संध्यं तृतीयं स्वप्नस्थानं तस्मिन्संध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च परलोकस्थानं च। अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान्पाप्मन आनंदांश्च पश्यति स यत्रायं प्रस्वपितीत्युपक्रम्य स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति। न तत्र रथा न रथयोगा न पंथानो भवंतीत्यादिरूपा। एवमेव भगवानासुराणां प्राकृतगुणे तमस्येव दुःखात्मके लयं चिकीर्षुः स्वस्मिन्प्राकृतत्वबुद्धिसंपादनाय तादृशीमिव लीलां दर्शयत्यतो न प्राकृतत्वशंकागंधोऽप्यत्र। अत एव भगवतोक्तं मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयका इत्युपक्रम्य ततो यांत्यधमां गतिमिति। तेषामासुरत्वेन मुक्त्यनधिकारित्वात्तथाकरणमतः सुष्ठूक्तं संध्यवदुपपत्तेरिति॥ ॥भावे जाग्रद्वत्॥ ॥लौकिकवद्भासमाने लीलापदार्थे दर्शनं ज्ञानोतत्तु भावे विषये विद्यमाने सति भवति॥ अत्र दृष्टांतमाह॥ ॥जाग्रद्वत्॥ ॥यथा मोहाभाववतः पुंसः स एवार्थस्य दर्शनं तथेति। एताभ्यां सूत्राभ्यामेतदुक्तं भवति॥

लोकवदिति सूत्र

सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति श्रुत्या भक्तकामपूरणाय भगवांल्लीलां करोतीति गम्यते। द[illegible]दितां करोतीति गम्यते। यं
च्चनिश्रवणास्मरणे भक्तानां दुःखं भवति तादृशीमपि तां करोतीति श्रूयते। यथा सोऽनयुद्धे मोहवचनानि हस्ताद्रासुवुस्तुतिः प्रभासीयलीला च। उक्तरीत्या सोऽश्नुत इति श्रुत्या परब्रह्मत्वमवग
म्यते। उक्तलीलयानद्वैपरीत्यं च। एवं सत्येकस्या वास्तवत्वमन्यस्याश्चावास्तवत्वं वाच्यं। ते नेथा मान्युश्मसि। विष्णोः कर्माणि पश्यत। तद्विष्णोः परमं पदं। तद्विप्रासो विपण्यव इत्यादिश्रुतिभिः। स
हस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवं। विश्वं नारायणं देवमक्षरं परमं पदं। विश्वतः परमं नित्यं विश्वं नारायणं हरिं। विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति॥ पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं
मित्यादिभिस्सगुणशुद्धब्रह्मणस्तद्विपरीतदर्शनेविरूपे हेतुर्वाच्यः। सत्वासुरव्यामोहनमेवेति पूर्वसूत्रेणोपपादितः। भक्तेभ्यः स्वरूपानंददानाय लोकवत्तु लीलाकैवल्यमिति न्यायेन या लीलाः
करोति यथा रिंगणादिलीलाः भगवतो नैसर्गिकधर्मरूपाऽऽनंदात्मकत्वेन विद्यमाना एव ता भक्ताः प्रपश्यंतीति द्वितीयसूत्रेणोक्तं॥ अत एव लीलाया अनेकरूपत्वाद्ब्रह्मणश्च श्रुतौ सैंधव
दृष्टांते नैकरसत्वनिरूपणाच्छुद्धब्रह्मधर्मत्वं न संभवतीति शंका। निरामायकैवल्यमित्युक्तं। साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतिभिर्यान्यधर्मराहित्यलक्षणा केवलतोक्ता सा लीलात्मि
केवलीलाविशिष्टमेव शुद्धं परं ब्रह्म न कदाचिद्रहितमित्यर्थः। पर्यवस्यति। तेन स्वरूपात्मकत्वं लीलायाः पर्यवस्यति तेन च नित्यत्वं एतद्विद्वन्मंडने प्रपंचितं। अथवा लीलैव कैवल्यं जीवा
नां मुक्तिरूपं न तु प्रवेशः परमा मुक्तिरिति यावदित्यर्थः। प्रदीपवदावेशस्तथा हि दर्शयति॥ ॥पूर्णज्ञानक्रियाशक्तिमता ब्रह्मणात्मभावेन तत्रापि प्रधानभावं प्राप्य कामभोगकरं पा·४
णमपूर्णज्ञानक्रियाभ्यां तथा भोक्तुं शक्तो न भवति। किंतु भगवांस्तस्मिन्नाविशति यदा तदाऽयमपि तथैव भवतीति सर्वमुपपद्यते। एतदेवाह प्रदीपवदिति। यथा प्राचीनः प्रकृष्टो दीपस्नेह २२

×वतो भक्तस्यानुपपन्नमित्याशंक्यां तत्रोपपत्तिमाह। नहि तदा नैसर्गि ननु
कृतानक्रिया×

युक्तायां वर्त्मनि वर्त्तीनायामाविष्टः स्वसमानकार्यत्वमां स्तोकशोन्निस्नेहाधीनस्थितिस्त्वं भवति स्वयं। न पात्रापीत्यर्थः। अत्र च प्रमाणमाह तथा हि दर्शयति। नत्वमितृत्रियमाणो विन
न्नि एको देवो बहुधा निविष्ट इति। स्वर्वनृका मानित्फक्तित्वाद्यस्य कामस्य भोगो यथा। निवेशो मतिन्नवति तत्र तथा तदा निवेशा इति बहुधा निवेशा उक्तः। अयं निवेशो नान्तर्यामित्वेन। तस्यै
ग कधैव प्रवेशात्। निसर्गतः सर्वेषां जीवानां भगवान् भवत्येव प्रभुर्यद्यपि तथापि यं स्वीयत्वेन वृणुते तस्य विवाहितः पतिरिव भर्त्तासि नूवरणाजस्नेहातिशयेन भक्तेन ध्रियमाणः सन्
सह स्वस्य मर्पितं स्वस्मिन्निवर्त्ति। अत एव स्नेहरागाहित्येनायोगोलकादिकं विहाय प्रदीपं दृष्टान्तमुक्तवानाचार्यः। अत एव देवपदमुक्तं। स्वरूपानंददानाज्ज्ञानोद्दीपनान्नर्तनादिमुक्तिदानेन च
स्वमाहात्म्यद्योतनाद्वैकुंठादिस्थितेश्च। तदुक्तं निरुक्ते दिवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देव इति। किंच॥ भक्तानां कर्मभोजनार्थं क्रीडाकरणात् क्रीडायामेव ज
येच्छाकरणाद्भक्तैः सह व्यवहारकरणाद्भक्तेषु स्वमहात्म्येच्छादियोतनान्न पारयेहं त्वाहद्यौग्र। णाथिनीमित्यादिभिः स्तुतिकरणाद्भक्तप्रपत्तिदर्शनेन कालीयदमनादौ मोदक
रणाच्चैव न कि मदकरणान्ते स्वप्नेपि प्रियमेव पश्यन्तीति स्वप्नकरणात्तेषां कांतिकरणादिच्छाकरणाद्वा तन्निकटे गमनादपि देवः। तदुक्तं धातुपाठे॥ दिवु क्रीडाविजिगीषाव्यवहार
द्युतिस्तुतिमोदमदस्वप्नकांतिगतिष्विति। एवं सत्युक्तमेव तेषां तथात्वमिति द्विराह्नेनाह॥ न च स्थूलमन एवरूपत्वमित्याद्यनंतरं पठ्यते न तदस्तीति कथनेनेति। उक्तश्च तेभ्य ब्रह्म
णा सह जीवस्य भोग उच्यते। तथा च सगुणनिर्गुणभेदेन विषयभेदो व रूपं वाच्यो विरोधपरिहारायेत्यत उत्तरं पठति॥ ॥स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि॥ ॥इहायमाचा
यः। प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः इत्याद्यधिकरणेः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिभिश्च श्रुता एव धर्मा निषिध्यंने ब्रह्मण

२

ब्रह्मणा सह इत्यत्र भगवान् तु
तीमा ए तेन भक्ता नो भजते

भु-ध प्राकृता एव बोध्यंतेऽन्यथा तद्बोधनमेव न स्यान्निषेधकवाक्य एव तद्बोधनमपि न स्यादेतस्यैवाहरस्य प्रज्ञामन इत्यादिरूपमतोऽचिंत्यानंतशक्तेर्भगवतः कार्याकार्यसिद्धिमता यथा प्राकृ पं

२ तान्यगुणाकृत्स्नयदितो निर्गुणमेव सदा सर्वत्र भगवद्रूपमिति मंतव्यं। एवं सति तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरंतो न विंदेयुरेवमेवेमाः सर्वाः प्रजा अ देवा

हरहर्गछंत्य एतं ब्रह्मलोकं न विंदंती। ति छांदोग्यश्रुतेः प्रस्वापदशायां न कश्चिद्ब्रह्मसाक्षात् इति च न कंचनेति न तद्विषयिणी निषेधिका श्रुतिर्ब्रह्मविदाप्नोति परमिति। श्रुत्यंतरपरब्रह्म पध्य

प्राप्तिदशाविषयिणी। भोगेछाधिकासेति न विरोधगंधोपि। एतदेवाह। स्वाप्ययः प्रस्वापः स्वमपीतो भवति। तस्मादेवं स्वपितीत्याचक्षत इति श्रुतेः। संपत्तिर्ब्रह्मसंपत्तिरुक्त रीत्या दिव

मुक्तिमार्गीयो मोक्षस्तयोरन्यतरापेक्षमुक्तपक्षे कृत्स्नमित्यर्थः॥ भगवत्कर्तृकभोगस्य लीलारूपत्वात्तस्याश्च लोकवत्तु लीलाकैवल्यमित्यत्र मुक्तित्वेन निरूपणात्तस्याप्तेः संपद् रूणा

पत्ययुक्ततरमितिद्वयाद्यर्थः॥ ॥जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च॥ ॥ब्रह्मणा सह भोगकरणं लौकिकव्यापारयुतमुत नेति संशये तद्युतमिति पूर्वः पक्षः सर्वा मति भजनं

युक्तित्वे भंगात्पूर्वोक्तिमनुपपन्नमिति प्राप्त आह। जगदित्यादि। पूर्वोक्तिस्य जगत्संबंधी लौकिको यो व्यापारः कायवाङ्मनसां तद्वर्जं सहितं भोगकरणं। तत्र हेतुमाह। प्रकरणा ०

त्र ३ दसंनिहितत्वाच्चेति ब्रह्मविदाप्नोति परमित्युपक्रमेण मुक्तिप्रकरणान्न लौकिकव्यापारो संभावितः। किंच। लीलायाः कालमायाद्यतीतत्वेन प्राकृतं जगद्दूरतरमितोऽपि देशतो नति

संभवः। कदाचित्तु केलीलाभकटने छायां तदधिष्ठानत्वयोग्ये मधुरादिदेशे तिष्ठद्गोलके चक्षुरिंद्रियमिव स्थापयित्वा लीलां करोति। तदापि लीलामध्यपातिनां न लौकि पा-ध

कव्यापारसंभवः। न हि चक्षुरिंद्रियं गोलककार्यं करोति न वा तत्रत्यो न पश्यति। एतत्सर्वं दिवीव चक्षुराततमिति श्रुतिव्याख्याने विद्वन्मंडने प्रपंचितं। किंच। छांदोग्येन्नमेव सु २३

नू

खं भूमा त्वेव विजिज्ञासितव्य इत्युक्त्वा भूम्नो लक्षणमाह। यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति। अत्र नान्यद्विजानातीत्येतावतैव चरितार्थेपि यदिंद्रियव्यापा
रोऽनिषिद्धस्तत्राप्यन्यविषयकत्वेन भगवद्विषयकः स सिद्धो भवतीति जगद्व्यापारराहित्यं सिद्धं तत्र। तेन भगवत एव स्वतंत्रफलत्वमुक्तं भवति न हि सुखस्यान्यस्य योजनमस्ति॥ ॥प
त्यक्षोपदेशादिति चेन्नाधिकारिकमंडलस्थोक्तेः॥ ॥न चैतत्प्रकरण एव छांदोग्ये पठ्यते। सर्वं ह पश्यः पश्यतीति सर्वविषयकप्रत्यक्षमुपदिश्यत इत्यन्यविषयकप्रत्यक्षमुपदिश्यत इत्य
न्यविषयकव्यापारराहित्यं नोपपद्यत इत्याशंक्य समाधत्ते। आधिकारिकेत्यादिना। अत्रेदमुच्यते। मोऽस्तु ते। लोकवत्तु लीलाकैवल्यमित्यादिनिर्णीतलीलामध्यपातित्वं तस्योच्यते
। नान्यत्पश्यतीत्यादिश्रुतिवशाज्जगद्व्यापारवर्जं भोगकरणं पूर्वसूत्रेणोक्तं। अथेदं विचार्यते। नान्यत्पश्यतीति प्रकरण एव सर्वं ह पश्यः पश्यतीति सर्वविषयकं दर्शनमुच्यते। तत्कर
थं पूर्वोक्तमुपपद्यत इति। किंच। एकस्यैव भक्तस्य देशकालभेदेन क्रियमाणानेकलीलासंबंधित्वं भवति। तच्च लीलानित्यतायां न घटते। यतस्तत्र देशतत्कालसंबंधिनी सा नित्या। एवं स
त्येकस्यानेकरूपत्वं जीवस्य न संभवतीति नित्यत्वमपि न सिध्यतीति। तत्रोच्यते भक्तौ सर्वपदेन न जगदुच्यते किंतु यस्यां यस्यां लीलायां देशकालभेदेन क्रियमाणायामधिकृतो य ए
को भक्तस्तस्यैव तावंति रूपाणि संति। तान्याधिकारिकाणीत्युच्यंते तेषां मंडलं समूहस्तत्र स्थितस्य भक्तमात्रमुच्यत इति नानुपपन्नं किंचित्। अत एवाग्रे पठ्यते सर्वमाप्नोति सर्वश इति
स एकधा भ ति त्रिधा भवति पंचधा भवति सप्तधा नवधा चैव पुनश्चैकादश स्मृतः। शतं च दश चैकश्च सहस्राणि च विंशतिरिति। यथा मंडलवर्तिषु तेषु नैकस्य प्राधान्येन प्राधान्यं
वक्तुं शक्यं। येनेष्वपि रूपेष्विति ज्ञापनाय मंडलपदमुक्तं॥ ॥विकारावर्ति च तथा हि स्थितिमाह॥ ॥नन्वेवं सति भक्तस्तत्सोहमाप्याम्य इति प्रगुणोक्तेन दाशयान स्थितिर्नोपपद्यतेति

ः स्मना बलस्य बहुमलौकिकमादृशामिति

४ स्यत्वाल्लीलाऽ ास्त्वस्य कालस्य तदागमनस्य च तदापि वर्त्तमानत्वात्। तथा च न किरणेनोपपद्यत इत्याशंक्य समाधत्ते। इह भगवल्लीलाप्रकृतिस्तद्धि स्फुटोर्थो विकार इत्युच्यते। तत्र न कर्त्ता
नेतद्ज्ञानं ता ोच भवति। यत्स्वरूपं प्रतीतं यावदतितस्य स्वर्गे हेतदा भगवल्लीलेति ज्ञानेन भवतीत्यर्थः। उपलक्षणं चैतत् तृतीये देशकालविशिष्टायाद्धीयालीलातस्यास्मादृश्यपाएवत।
लीलामध्यपातिनो भक्तस्य ज्ञानं नान्यविषयकमिति ज्ञेयम् अत एव द्वितीयस्यापि मध्यं पूर्वमुक्तमासीत्तेनागतस्यैव ज्ञानं भवति। तदैव हि रसोद्योतो रसस्वरूपमध्यपातित्वाल्लीला
यां रसस्य च भगवदात्मकत्वाद्भगवद्रूपत्वेन सर्वमुपपद्यते लीलायां वक्ष्यमाणमाह॥ तथा हि स्थितिमाहेति॥ ॥सर्वमाप्नोति सर्वज्ञ इति श्रुतिरेकस्यैव भक्तस्य सर्वज्ञः सर्वैः प्रका
रैः सर्वलीलारसमाप्नोतीति मंतव्यं वैदिके रितिभावः॥ अलौकिकेर्थे लौकिकरीत्यनुसरणं न युक्तं किंत्वलौकिकरीत्यनुसरणमेव युक्तमिति शिक्षार्थेन घोत्यते। एतेन रसो वै
स इति श्रुते लीलाविशिष्ट एव प्रभुस्तत्र घोतितात्पृश एव परमफलमिति ज्ञापितं भवति। दर्शयितव्यश्चैवं प्रत्यक्षानुमाने। न च लौकिकयुक्तिविरोधो बाधकत्वेन मंतव्यः किंतु मा
धकत्वेन। यतः प्रत्यक्षानुमाने श्रुतिस्मृती अपि लौकिकयुक्त्यप्रसारेण लौकिके भगवत्संबंधिन्यर्थेऽन्यथाभावनं निषेधति। नैषा तर्केण मतिरापनेया परास्य शक्तिर्विविधै
व श्रूयते स्वाभाविकी ज्ञानबलक्रिया च। अलौकिकास्तु ये भावा न तांस्तर्केण योजयेत्॥ श्रीभागवते च। न विरोध उभयं भगवत्यपरिगणितगुणगणे ईश्वरे ऽनवगाह्यमहात्म्येर्वा·
चीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाश्रयदुरवग्रहवादिनां विवादानवसर इत्यादिवाक्यैः। चिंत्यानंतशक्तिमत्त्वेन भगवत्स्वरूपस्यैव पर पा·४
म फलत्वं प्रदर्शनि। किंच। नाविदानां श्रुत्युपासितो मध्यमे भगवान् रिष्टांगाश्रया सः अत्राह तदुक्तं यस्य दूरलः परमं पदमवभाति भूरीत्यृग्वेदे पठ्यते। किं चित्याश्च भेदेन पर्युः २४

शाखायामपि। ता तानि वास्तूनि वां गोपीतिमाधवयोः संबंधीनि गमध्ये प्रमादत्वेन प्राप्तुमुश्मसि कामयामहे। तानि कानीत्याकांक्षायां स्पृहानिर्बंधिमुद्घाटयति। यत्र श्री गोकुले गावो भूरिशृंगा बहुशृंगा रुरुप्रतयो वसंतीति शेषः।। ग्राम्यारण्यपशूपलक्षणार्थमुभयोरेव ग्रहणं।। अत्राह तमावेव न उरुगायस्य बहुगीयमानस्य वृष्णः भक्तेषु कामान्वर्षतीति वृषा तस्य पदं स्थानं वैकुंठं ततोपि परममधिकमत्र विचित्रलीलाकरणात्। सूर्ययमुनापुलिननिकुंजगोवर्द्धनादिरूपत्वेन बहुरूपं। तथा च तत्रत्यानि व्रतानि कामयामह इति वाक्यार्थः संपद्यते। एतेन लीलासंबंधिवस्तूनां यत्र फलत्वेन प्रार्थनं तत्र तल्लीलाकर्त्तुः परमफलत्वे किं वाच्यमित्याशयो ज्ञाप्यते। अथ ह वाव नव महिमामृतसमुद्रविप्रुषा सकृल्लीढया स्वमनसि निष्यंदमानानवरतसुखेन विस्मारितदृष्टश्रुतसुखलेशाभासाः परमभागवता इति श्रीभागवते। एतेनापि कैमुतिकन्यायेन उभयोरेव स्वतः पुरुषार्थत्वं ज्ञाप्यते। फलप्रकरणत्वात्तदेवाचार्यतात्पर्यविषय इति ज्ञायते।। ।।भोगमात्रसाम्यलिंगाच्च।। ।।इतोपि हेतोः पुरुषोत्तमस्वरूपमेव परमं फलमिति ज्ञायते।। यतः सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति श्रुतौ भक्तसाम्यमुच्यते तेन च पुरुषोत्तम एव संभवति यतः सख्यं दत्वा तत्कृतात्मनिवेदनमंगीकुर्वन्निति करुणः स्वस्वरूपानंदमनुभावयंस्तं प्रधानीकरोति। अन्यथा भक्तोऽनुभवितुं न शक्नुयात्। युक्तं चैतत्। प्राप्तं फलं स्वाधीनं भवत्येवान्यथा फलत्वमेव न स्यात्तथा चास्माल्लिंगादपि प्रभोरेव परमफलत्वं सिध्यति। न तत्समश्चाभ्यधिकश्च दृश्यतश्रुतिविरोधपरिहाराय मात्रपदं। न चात्र कामभोगस्य फलत्वं शंकनीयं। आप्नोति परमित्येतद्व्याकृतिरूपानुभवरूपत्वाद्भोगस्य। अनुभूयमानस्यैव हि सुखस्य लोके पुरुषार्थत्वोक्तेः।। एवं भगवतः स्वतः पुरुषार्थरूपत्वमुक्त्वा कर्मफलभोगानंतरमावृत्तिवदत्राप्यावृत्तिर्भविष्यतीत्याशंकानिरासायोत्तरं पठति।। ।।अनावृत्तिः शब्दादनावृत्तिः शब्दात्।। ।।अनावृत्तिर्भक्ता

नां चोच्यते तत्र मानं शास्त्रं॥ स च तयोर्धर्मा यत्र मस्तत्त्वमेति। न तेषां पुनरावृत्तिरेतेन प्रतिपद्यमाना इमं मानवमावर्त्तं न। ब्रह्मलोकमभिसंपद्यते न च पुनरावर्त्तत इत्यादिरूपस्य ज्ञानि

नां तामाह। न हि भक्तानां नाड्यादिप्रयुक्तममृतत्वं [illegible] योगिनो वै [illegible] न [illegible] वैराग्यं प्राप्य [illegible] मेव हि हेत्वो दिवौकसा [illegible] त्वयि [illegible] दिरूपस्य

[illegible]॥ एवं सति ब्रह्मविदां प्राप्तिपरमिति श्रुते विरोधपरिहारपूर्वकोक्तव्याख्यानरीत्या भक्तस्य परं ब्रह्मप्राप्तस्य निर्दोषित्वादावृत्तिहेत्वभावात् स्वपंचे नावृत्तिः सं

भवति। तादृशं प्रतीश्वरेणापि न तथा भवितुमर्हति। ये दारागारपुत्राप्तप्राणान्वित्तमिमं परं। हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे इति भगवद्वाक्यात्। परप्राप्तिरूपत्वा

च्च भोगस्य न नाशसंभावना। किंच। यत्रैकस्यैव भक्तस्य देशकालभेदेनानेकविधलीलासंबंधित्वेपि तत्तल्लीलासंबंधित्वमनश्वरमुच्यते तत्र सर्वथा तदभावः कथं वक्तुं शक्यो। ब्रह्मण

पि। अपरं च। कालस्याधो हि नश्वरः स्यात् न हि पुरुषोत्तमे कालः प्रभवितुं शक्नोति। न यत्र कालोऽनिमिषां परः प्रभुरित्यादिवाक्येभ्यः। तथा च ज्ञानमार्गीयभक्तिमार्गीययोरनावृत्तावुभय

त्वेपि फलप्राप्तौ वैलक्षण्यात् पूर्ववाक्येन भक्तानामनावृत्तिमुत्तरवाक्येन ज्ञानिनामिति ज्ञायते। न च फलप्रकरणे नावृत्त्युक्तेः संसाराभाव एव जीवस्य परमं फलमित्याचार्याभिप्रा

यो ज्ञायत इति वाच्यं। ब्रह्मविदः परप्राप्तिफलत्वेनोक्तात्स्वरूपस्य सर्वकामभोगत्वेन श्रुत्या निरूपणात्। स च स्वस्वाधिकारानुसारेण निवेदितार्थांगीकाररूप एवेति ज्ञेयं। तेन स एव

परमं फलमनावृत्तिस्त्वार्थिकी परं त्वावृत्तौ संभवत्यां परमफलत्वं नोपपद्यत इति तावदुर्बलशंकानिरासायेयमुक्ता। पुष्टिमार्गीयभक्तविशेषप्रवर्त्तकवेणुशब्दाद्भगवन्निकटगतावनावृत्ति पा·ध

ःश्रवैणोक्ता मर्यादामार्गीयाणां वेदरूपाठष्टानदुक्तसाधनादनावृत्तिं द्वितीयेनेत्यपि तात्पर्यविषयः। श्रीष्टोपोद्धेयस्तु धामत्विफ परमफलमयेस्वत एवनावीतिभावश्चपलविस्तरेण २५

रामु

॥५॥

पु०४ ॥आनीतपरमंतत्त्वंयशोदोत्संगलालितं।तदन्यदितियोब्रूतेसंसारानहोबुधाः॥१॥भाष्यपुष्पांजलिःश्रीमदाचार्यचरणांबुजे।निवेदितस्तेनतुष्टाःसंबंधमयितेसदा॥इति।श्रीमद्वेदव्याससमतवर्त्ति

२६ श्रीवल्लभाचार्यविरचितेब्रह्मसूत्राणुभाष्येचतुर्थाध्यायस्यचतुर्थःपादःसमाप्तः॥ ॥संपूर्णोयमध्यायः॥संवत्१७७३वर्षेआश्विनशुद्वदिपसोमवासरेसमाप्तः॥ ॥ ॥ ॥ ॥

१ ×नानामतध्वांतविनाशनक्षमोवेदांतसिद्धांतविकासनेपटुः॥आविष्कृतोयंभुविभाष्यभास्करोमुधाबुधाधावतनान्यवर्त्मसु॥२॥पुरंदरमदोद्भवप्रचुरवृष्टिसंपीडितस्वकीयवरगोकुलावनपरायणोलीलया॥स्मितामृतसुवृष्टिभिःपरिपुपोषतान्योगिरिंदधारससएवहिश्रुतिशिरस्सुसंराजते॥३॥श्रीकृष्णरूपयैवेदंसिद्धांतोहृदिभासते॥तेनाधिकंवरीवर्त्तिवक्तव्यंहरेर्गुणां॥४॥× १

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

૩૨

THE "GUJARATI" PRINTING PRESS
Booksellers & Publishers
Sassoon Buildings
CIRCLE, FORT, BOMBAY.

ग सं. मूळे.

संपूर्णम्.

Important

वि.सं. १९३८

4.84.4.62

22.1.2013

२२८